संस्कृतविद्यापीठग्रन्थमालायाः नवतितमं पुष्पम्

संस्कार-भास्करः

(वीणासंस्कृत-हिन्दीटीकासहितः)

प्रधानसम्पादकः
प्रो. राधावल्लभः त्रिपाठी

सम्पादकः
डॉ. रामराज उपाध्यायः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली-110016

संस्कृतविद्यापीठग्रन्थमालायाः नवतितमं पुष्पम्

संस्कार-भास्करः

(वीणासंस्कृत-हिन्दीटीकासहितः)

प्रधानसम्पादकः
राधावल्लभः त्रिपाठी
सम्पादकः
डॉ. रामराज उपाध्यायः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली

प्रकाशकः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित-विश्वविद्यालयः)
कुतुबसांस्थानिकक्षेत्रम्
नवदेहली-११००१६

आई.एस.बी.एन : 81-87987-64-2

प्रकाशनम् - जनवरी, 2013

मूल्यम् : 300/- ₹

मुद्रकः
अमरप्रिंटिंगप्रैसः
देहली-११०००९
दूरभाषः : 9871699565, 8802451208

पुरोवाक्

विदन्त्येव विज्ञा यद् विश्वस्य ज्ञान-विज्ञान-विमर्शपरम्परासु अतिमहदवदानं वरीवर्त्यते भारतीयप्रज्ञायाः। अस्याः प्रज्ञायाः परमप्रकर्षं विभावयामः अस्माकं शास्त्रपरम्परासु। एताश्च शास्त्रपरम्परा आवेदेभ्यः प्रसृता अद्यावधि विकासं यान्तीति न संशीतिः। विद् - ज्ञाने, विद् - सत्तायाम्, विद्लृ लाभे तथा विद् - विचारणे इति धातुचतुष्टयविनिष्पन्नो वेदशब्दः चतुरस्रतां ज्ञानप्रवाहस्य द्योतयति। विदन्ति जानन्ति, विद्यन्ते भवन्ति, अथवा विन्दन्ते लभन्ते, विन्दन्ति विचारयन्ति सर्वे मनुजाः सत्यविद्यां यैर्येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः- इति ऋषिदयानन्दोक्तेः। वेद्यते ज्ञायते अनेनेति वेदः इत्युक्त्यापि वेदस्य ज्ञानस्रोतस्त्वं सिध्यति।

अथैतेषां वेदानाम् अतिप्राचीनकालात् शाखा-चरण-परिषद्भिः संरक्षणं प्रसारश्च समजायत। तथैव शाखा-चरण-परिषत्सु शास्त्रपरम्पराऽपि प्रसारं विकासं चापेदे। संहितानां शाखास्तासु तासु गुरुशिष्यपरम्परासु अभ्यस्ताः। चरणशब्दः शाखा- विशेषाध्ययनपरैकतापन्नजनसङ्घवाची इति जगद्धरोक्तेः शाखाविशेषमधीयानां जनानां समाजश्चरण इति न्यगद्यत। तथा च चरणानां सङ्घा एव परिषदिति प्रोक्ताः। परिषत्सु विज्ञाः पण्डिता अवश्यं भवेयुरिति व्यवस्था आसीत्। दर्शन-तर्क-धर्मशास्त्रादिष्वबाह्या एकविंशतिर्विप्राः प्रत्येकं परिषदि स्युरिति मनोः याज्ञवल्क्यस्य च लक्षणात्। परिषदि अभ्यस्ताः ग्रन्थाः पार्षदा इत्यभिहिताः।

आवेदेभ्यः प्रसृतायामस्यां परम्परायां नाना ज्ञानधाराः परम्परां सङ्गच्छन्ते संवदन्ति च। तथाहि - षड्वेदाङ्गानि, आस्तिकनास्तिकदर्शनसम्बद्धाः परःसहस्रं ग्रन्था आयुर्वेदाद्युपवेदग्रन्थास्तथा च काव्यशास्त्रललितकलाविषयकं वा साहित्यमिति सर्वथा निरवधिर्वरीवर्ति सुरसरस्वत्याः साहित्यभाण्डागारः। वेदाङ्गग्रन्थानां तत्रापि कल्पविषयकानां ग्रन्थानामस्मिन् साहित्यराशौ विद्यते अनितरसाधारणं महत्त्वम्। एते ग्रन्थाः भारतीयां वैश्विकीं दृष्टिम्,

अनुष्ठानपद्धतिषु अनुस्यूतं सारतत्त्वं आगमनिगमसामञ्जस्यं च प्रकटीकुर्वन्ति। एतादृशेषु ग्रन्थेषु अन्यतमस्य सप्तदशशतकोद्भवेन ऋषिदत्तेन प्रणीतस्य संस्कारभास्करस्य विशदया भूमिकया सुबोधया टीकया संवलितं प्रकृतं संस्करणं निर्माय विद्वत्प्रवरेण रामराजोपाध्यायेन सम्यक् सम्पादिता सारस्वतसपर्या, प्रसाधिता पाण्डित्यपरम्परा, महानुपकारश्च विहितः भारतीयजीवनपद्धतिविषये जिज्ञासुजनानाम्। संस्कारपरम्परा कथं विकसितेत्यपि अस्माद् ग्रन्थाद् ज्ञातुं शक्यते। तथाहि प्रसिद्धान् षोडशसंस्कारनतिरिच्य नैके संस्कारा अत्र विदुषा विधिज्ञेन ऋषिकल्पेन ऋषिदत्तेन प्रतिपादिताः। तस्मात् संस्कारपरम्पराया वैविध्यस्य वैपुल्यस्य च प्रत्ययो जायते। गरीयानयं ग्रन्थो भारतीयपरम्पराणां प्रचाराय अभ्युत्थानाय उपकारकः स्यादित्याशासे। एतत्प्रकाशनसमायोजनाय विद्यापीठ-शोधप्रकाशनविभागाय सम्यङ् मुद्रणाय च मुद्रकायापि साधुवादान् वितरामः।

28.12.2012

(राधावल्लभः त्रिपाठी)

Prof. Yugal Kishor Mishra
FORMER-VICE-CHANCELLOR
J.R. RAJASTHAN UNIVERSITY, JAIPUR
FORMER-SECRETARY, M.S.R.V.V.P
(MINISTRY OF H.R.D., GOVT OF INDIA)

PROFESSOR & HEAD, DEPTT. OF VEDIC STUDIES
Sampurnan and Sanskrit University
7, Professor Colony, Jagatganj
Varanasi- 221002
Tel: 0542-2200136; Mob. 09415224713

प्रस्तावना

मानवों के लिये इष्टप्राप्ति तथा अनिष्ट परिहार के अलौकिक उपायबोधन कराने वाले 'वेद' के षडङ्गों में हस्तस्थानीय अंग 'कल्प' है। 'कल्प' अभिधानात्मक इस शास्त्र के तीन विभाग- श्रौतकल्प, गृह्यकल्प एवं धर्मकल्प बतलाये गये हैं। इनमें साक्षात् श्रुति द्वारा उपदिष्ट कर्मो की प्रयोगविधियों का प्राख्यापक श्रौतकल्प, श्रुति द्वारा श्रौतकर्मों में अधिकारिता सिद्धि के लिए अभ्यर्हणीय श्रुत्यनुमोदित कर्मकलापों का संग्रह 'गृह्यकल्प' तथा समस्त वर्णो के लिए उपयोगी समयाचारिक विधियों का प्रतिपादक शास्त्र 'धर्मकल्प' के नाम से प्रथित है। 'गृह्यकल्प' में कहे गये कर्मो को यथा- संस्कार, श्राद्ध, हवनविधि आदि 'पाकयज्ञ' नाम से भी व्यवहृत किया जाता है।

'पाकयज्ञ' शब्द का अभिप्राय अनेकविध रूप से शास्त्रकारों ने निर्दिष्ट किया है। पारस्करगृह्यसूत्र में भाष्यकार आचार्य हरिहर का कथन है कि 'पाक' शब्द गृह्याग्नि का वाचक है। अतः गृह्याग्नि में जो कर्म किये जांय वे 'पाकयज्ञ' शब्दवाच्य हैं (पाको गृह्याग्निः। गृह्याग्नौ यानि कर्माणि क्रियन्ते तानि पाकयज्ञशब्दवाच्यानीति)।

अमरकोष में 'पाक' शब्द 'अल्प' के अर्थ में भी बतलाया गया है। अतएव आचार्य गार्ग्यनारायण का कथन है कि- 'पाकयज्ञा अल्पयज्ञा इति'। यतः श्रौतकर्मो में अग्नियों (गार्हपत्य, आहवनीय, दक्षिणाग्नि आदि) की बहुलता है तथा क्रियाओं (अनुष्ठान विधियों) की भी बहुलता एवं जटिलता है तदपेक्षया 'पाकयज्ञ' में एकाग्निसाध्यता तथा अनुष्ठान विधियों तथा प्रायश्चित्तादि का अल्पत्व है अतः ये 'पाकयज्ञ' कहे जाते हैं।

आचार्य गार्ग्यनारायण 'पाकयज्ञ' शब्द की एक अन्य भी व्युत्पत्ति देते हुए कहते हैं कि 'पाकशब्दः प्रशस्तार्थेऽपि'। अत 'पाकयज्ञ' शब्द का अर्थ है 'प्रशस्तयज्ञ'। इस सन्दर्भ में आचार्य गार्ग्यनारायण प्रमाणपुरःसर युक्ति देते हैं कि - "कथं प्रशस्तत्वम्, उच्यते- यस्मादेतेषु संस्कारा उच्यन्ते तैश्च ब्राह्मण्यमवाप्यत इति।" अर्थात् पाकयज्ञों में षोडशादि संस्कारों की विधियों का समावेश है, तथा इन संस्कारों के अनुष्ठान से ब्राह्मण्य की प्राप्ति (जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते) होती है, अतः ये अतिप्रशस्त कर्म 'पाकयज्ञ' पदवाच्य है।

उपर्युक्त विश्लेषण से यह स्पष्ट है कि पाकयज्ञों में षोडशादि संस्कारों का समावेश है तथा ये अतिप्रशस्त कर्म हैं। ऐसे ही श्रेष्ठ कर्मों का प्रतिपादक एक ग्रन्थरत्न "संस्कार-भास्कर" है।

मुझे प्रसन्नता है कि मेरे अन्तेवासी डॉ॰ रामराज उपाध्याय (अध्यक्ष-पौरोहित्य विभाग, श्री लालबहादुर शास्त्री राष्ट्रीय संस्कृत विद्यापीठ, नई दिल्ली) "संस्कार-भास्कर" नामक ग्रन्थ को टीका सहित प्रकाशित कर रहे हैं। मैं इसके लिए डॉ॰ उपाध्याय को साधुवाद देता हूँ। यह सारस्वत-सपर्या सहृदयों द्वारा समर्थित हो, यह कामना करता हूँ।

–युगलकिशोरमिश्रः

पूर्व-कुलपति, ज॰रा॰ राजस्थान संस्कृत विश्वविद्यालय, जयपुर, पूर्व-सचिव, म॰सा॰ राष्ट्रीय वेदविद्या प्रतिष्ठान, (मानव संसाधन विकास मंत्रालय, भारत सरकार), प्रोफेसर एवं अध्यक्ष, वेदविभाग, सं.सं.वि.वि., वाराणसी।

विजयदशमी वि॰सं॰ 2069
24.10.2012

शुभाशंसनम्

चतुर्थीलाल शर्मणा अनुष्ठानप्रकाशाख्ये ग्रन्थे योग्याचार्याणां लक्षणानि वर्णितानि सन्ति–

सर्वागमानां सारज्ञः, सर्वशास्त्रार्थतत्ववित्।
अमोघवचनः शान्तो वेदवेदार्थपारगः॥

इत्यादि गुणसम्पन्नो गुरुरागम- संमतः एतानि सर्वाण्येव लक्षणानि डॉ॰ रामराज उपाध्याये विराजन्ते।

एते त्वस्माकं गौरवास्सन्ति।

एतेषामेव परिश्रमेण सत्प्रयासैश्च विद्यापीठस्य पौरोहित्यविभागः समुन्नतिपदमारूढः।

डॉ॰ उपाध्याय महोदयैः हिन्दीटीकया सहितः संस्कारभास्कराख्यः ग्रन्थः प्रकाश्यते एष संतोषस्य विषयः।

साम्प्रतम् संस्काराणामेव महती आवश्यकता विद्यते संस्कारेष्वेव भारतीयसंस्कृतिः सुरक्षितास्ति कथ्यते। भारतस्य प्रतिष्ठे द्वे संस्कृतं चैव संस्कृतिः।

ग्रन्थोऽयं विद्वद्भिः, अनुसंधातृभिः छात्रैः सहृदयैश्च स्वीकरिष्यते इति मे दृढो विश्वासः।

सादरम्

डॉ॰ रवीन्द्रनागरः
पौरोहितविभागाध्यक्षचराः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
नवदेहली–110016

भूमिका

आत्मशरीरान्यतरनिष्ठो विहितक्रियाजन्योऽतिशयविशेषः संस्कारः। स च द्विविधः। एकस्तावत्कर्मान्तराधिकारेऽनुकूलः यथोपनयनजन्यो वेदाध्ययनाद्यधिकारापादकः। अपरस्तूत्पन्नदुरितमात्रनाशको यथाबीजगर्भ समुद्भवैनोनिर्बहणो जातकर्मादिजन्यः। कस्यापि जनस्य सम्पूर्ण जीवनमुपर्युक्तेन कर्मणा फलान्वितं भवति। "कर्मण्येवाधिकारस्ते" इति भगवतोक्तेन श्लोकेन कर्मण्यधिकाराप्तये संस्काराणां सम्पादनं विधीयते। यतोहि कर्मणां सम्पादनं तु तदाभविष्यति यदा तस्मिन् कर्मण्यधिकारो भविष्यति। अनधिकारेण कृतं कर्म निष्फलात्मकं सञ्जायते। एतदर्थमधिकारार्थं संस्काराः स्वीक्रियन्ते। यथोपनयनानन्तरं वेदाध्ययनं क्रियते। उपनयनसंस्काररहितानां जनानामधिकारः वेदाध्ययने नास्ति। अर्थात् वेदाध्ययनाख्यकर्मणां सम्पादने आदौ उपनयन-संस्कारः कर्त्तव्यः। तदभावे कृतस्य संबंधितकर्मणः फलं न प्राप्तुं शक्यते। अत्रैवमपि वक्तुं शक्यते यत् कस्यापि कर्मणां सम्पादने यथागुणमपेक्ष्यते तथागुणं संस्कारेण प्राप्यते।

संस्कारेण द्वितीयः लाभः संक्रमितदोषाणामवरोधनं विद्यते। मातापित्रोः रजोवीर्याभ्यामुद्भूतं दोषं सन्ततिषु मा गच्छेदेतदर्थं गर्भाधानादिसंस्काराः सम्पाद्यन्ते। यथा मनुना प्रतिपादितम्-

गार्भैर्होमैर्जातकर्मचूडामौञ्जीनिबन्धनैः।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते॥

अत्रैनः पापोऽस्ति। बैजिकं गार्भिकञ्च दोषमुपरोक्तैः संस्कारैः सम्पादनेन अपमृज्यते। कस्यापि जातस्य सम्यक् जीवनाय बैजिकं गार्भिकञ्च दोषं मा भूत् इत्यस्त्यवधेयम्। वैज्ञानिका अपि स्वीकुर्वन्ति आनुवंशिकगुणानामभिवहनं रजवीर्याभ्यां भवति। दोषयुक्तयोः शुक्रशोणितयोः पावनार्थं संस्काराः क्रियन्ते येन जातकः पवित्रं स्यात्। यथा-

वैदिकैः कर्मभिः पुण्यैर्निषेकादिद्विजन्मनाम्।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च।।

संस्कारैः शरीरस्यसंस्कारः क्रियते येनायं शरीरः पावनो भूयते। पौरोहित्ये पुनातु पुनातु पदमपि पावनार्थमेव प्रयुज्यते। यतोहि पवित्रे शरीरैव ऐहिकामुष्मिकाणि कर्माणि क्रियन्ते। शरीरपदेनात्राजहत्स्वार्थलक्षणया तत्कारणशुक्रशोणितादयोऽपि गृह्यन्ते पावनः अशुद्धिनिबर्हणः। प्रेत्यचेहचेत्यनेन संस्कृतस्य दृष्टादृष्टाफलेषु कारीरीज्योतिष्टोमादिकर्मसु अधिकारादुभय-लोकोपकारकत्वं संस्काराणामुक्तम्।

संस्काराः द्विविधाः। ब्राह्माः दैवाश्च। अत्र हारीतेन प्रतिपादितम्-द्विविधो हि संस्कारो भवति ब्राह्मो दैवश्च। गर्भाधानादि स्मार्त्तो ब्राह्मः। पाकयज्ञाः हविर्यज्ञाः सौम्याश्च दैवः।

जातूकर्ण्येनोक्तम्-

आधानपुंसवनसीमन्तजातनामान्तचौलकाः।
मौञ्जीव्रतानिगोदानसमावर्त्तविवाहकाः।
अन्त्यं चैतानि कर्माणि प्रोच्यन्ते षोडशैव तु।
शूद्राणां चैव भवति विवाहश्चान्त्यकर्म च।।

अंगिरास्तु- पंचविंशतिसंस्कारानाह, यथा-

स्वे स्वे गृह्ये यथा प्रोक्तास्तथा संस्कृतयोऽखिलाः।
कर्तव्याभूतिकामेन नान्यथा सिद्धिमृच्छति।।

पंचविंशति संस्कारैः संस्कृता ये द्विजातयः।
ते पवित्राश्च योग्याः स्युः श्राद्धादिषु सुयन्त्रिताः।।

गर्भाधानं पुंसवनं सीमन्तो बलिरेव च।
जातकृत्यं नामकर्म निष्क्रमोऽन्नाशनं परम्।।

चौलकर्मोपनयनं तद्व्रतानां चतुष्टयम्।
स्नानोद्वाहौ चाग्रयणमष्टका च यथातथा।।

श्रावण्यामाश्वयुज्यां च मार्गशीर्ष्यां च पार्वणम्।
उत्सर्गश्चाप्युपाकर्म महायज्ञाश्च नित्यशः।।

संस्कारा नियता ह्येते ब्राह्मणस्य विशेषतः।

एतेषां पञ्चविंशति संस्काराणां नित्यनैमित्तिकमासिकवार्षिकभेदेन चातुर्विध्यमुक्तमाश्वलायनः-

महायज्ञास्तु नित्याः स्युः सन्ध्यावच्चाग्निहोत्रवत्।
नैमित्तिका षोडशोक्ताः समुद्वाहावसानकाः।।

मासिकं पार्वणं प्रोक्तमशक्तानां तु वार्षिकम्।
सप्तैवाग्रयणाद्याश्च संस्काराः वार्षिका मताः।।

गौतमस्तु-

गर्भाधानंपुंसवनसीमन्तोन्यनजातकर्मनामकरणान्नप्राशनचौलोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानम्, एतेषां चाष्टकापार्वणश्राद्धश्रावण्याग्रहायणीचैत्र्याश्वयुजीति सप्तपाकयज्ञसंस्थाः, अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबन्धः सौत्रामणीति सप्तहविर्यज्ञसंस्थाः, अग्निष्टोमऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमयज्ञसंस्थाः इत्येते चत्वारिंशत् संस्कारास्सन्ति। अष्टौ आत्मगुणा अपि- दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मंगलमकार्प्ण्यमस्पृहेति विद्यन्ते। सर्वं सम्भूय अष्टचत्वारिशत् संस्काराः प्रतिपादिताः। आत्मगुणानां परिभाषा वृहस्पतिनेत्थं प्रतिपादितम्-

दया- **आत्मवत्सर्वभूतेषु यद्धिताय शिवाय च।**
वर्त्तते सततं हृष्टः कृत्स्ना ह्येषा दया स्मृता।।

क्षमा- **बाह्ये चाभ्यन्तरे चैव दुःखमुत्पादिते परैः।**
न कुप्यति न वा हन्ति सा क्षमा परिकीर्तिता।।

अनसूया- **नदुर्गुणान् गुणैर्हन्ति स्तौति मन्दगुणानपि।**
नान्यदोषेशु रमते साऽनसूया प्रकीर्तिता।।

शौचम्- **अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः।**
स्वधर्मेषु व्यवस्थानं शौचमेतत्प्रकीर्तितम्॥

अनायासः- **शरीरं पीड्यते येन शुभेनापि च कर्मणा।**
अत्यन्तं वर्जयेत्तु सोऽनायासः प्रकीर्तितः॥

मङ्गलम्- **प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम्।**
एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः॥

अकार्पण्यम्- **स्तोकादपिहि दातव्यमदीनेनान्तरात्मना।**
अहन्यहनि यत्किञ्चित्तदकार्पण्यमुच्यते॥

अस्पृहा- **विवर्ज्जयेदसंतोषं विषयेषु सदा नरः।**
परद्रव्याभिलाषं च साऽस्पृहा कथ्यते बुधैः॥

आचार्य गौतमेन प्रतिपादितम्- यस्य पार्श्वे पूर्वोक्तचत्वारिंशत् संस्काराः तथा चाष्टौ आत्मगुणाश्च न सन्ति स सायुज्यं सालोक्यञ्च न प्राप्नोति।

शंखलिखितौ-

पाकयज्ञा हविर्यज्ञाः सोमसंस्थातथैवच।
संस्काराद्यग्निहोत्रान्ता अग्निहोत्रं तु जुह्वतः॥

संस्कारैः संस्कृतः पूर्वैरुत्तरैरनुसंस्कृतः।
नित्यमष्टगुणैर्युक्तो ब्राह्मणो ब्रह्मलौकिकः॥

ब्राह्मं पदमवाप्नोति यस्मान्न च्यवते पुनः।
नाकपृष्ठं यशोधर्मं त्रिरीजानस्त्रिविष्टपम्॥

प्रकारेणानेन नैके आचार्याः संस्काराणामावश्यकता महत्त्वञ्च विषये स्वविचाराः प्रतिपादिताः। संस्काराणां सम्पादनेन न केवलं परलोकमपितु इह लोकमपि सुखात्मकं भवति। इह लोकेऽपि सद्यः फलात्मकमपि संस्काराः विद्यन्ते। यथा- गर्भाधानं पुंसवनं सीमन्तोन्नयनं सूतिकागृहसंस्कारः सीष्यन्तीकर्मेति। अत्र सोष्यन्तीकर्म शीघ्रप्रसवाय भवतीतिगोभिलाद्युक्तम्।

प्रकारेणानेन समेषां मानवानां कल्याणाय संस्कारणामतीवावश्यकता विद्यते। सस्काराणां सम्पादनार्थं सर्वेषु ग्रन्थेष्वद्वितीयं ग्रन्थमस्ति संस्कारभास्करः। श्रीमद्ऋषिभट्टेन विरचितोऽयं संस्कारभास्करः। 1621 इस्वीये वर्ष प्रमाथी नाम संवत्सरे ग्रन्थस्यास्य रचना जाता। ग्रन्थोऽयं मूलरूपेण संस्कृत-भाषायामुपनिबद्धमस्ति। अस्य ग्रन्थस्यातीवमहत्त्वं विज्ञाय "बीणाख्या" हिन्दीसंस्कृतटीका मया कृतम्।

ग्रन्थस्यास्यपरिपूरणे राजस्थानसंस्कृतविश्वविद्यालयस्य पूर्व कुलपतयः प्रो. डॉ. युगलकिशोरमिश्रमहोदयानां महर्षिसांदिपनिराष्ट्रियवेदविद्याप्रतिष्ठानश्च पूर्वनिदेशकाः प्रो. श्री किशोरमिश्रमहोदयानां, भारतीयविद्याभवनस्य प्रधानाचार्याः प्रो. रवीन्द्र नागरमहोदयानां, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य शोधप्रकाशनविभागाध्यक्षाणां प्रो. रमेशकुमारपाण्डेयमहोदानां सोमनाथसंस्कृत-विश्वविद्यालयस्यवेदवेदाङ्ग सङ्कायाध्यक्षानां प्रो. देवेन्द्रनाथपाण्डेय महोदयानां, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य वेदविभागाध्यक्षाणां प्रो. रेमशचन्द्रदाशशर्मा महोदयानां पौरोहित्य विभागाध्यक्षाणां प्रो. हरिहरत्रिवेदी महोदयानाञ्चाशीर्वादैः ग्रन्थोऽयं पूर्णतां प्राप्तम्।

ग्रन्थस्यास्य सम्पदाने अस्माकं पुत्रस्य श्री चन्देश-उपाध्यायस्य, धर्मेश-उपाध्यायस्य ज्ञानेश-उपाध्यायस्याचावदानमतीव श्रेयष्करं विद्यते। अत एतेषां यशो विवर्द्धेतदित्यस्ति मदीया कामना। अस्माकं धर्मपत्नी बीणाउपाध्यायस्य सहयोगमतीवाविस्मरणीयमस्ति। एतदर्थमेतस्याः कृते हृदयेनाशीर्वादं वितनोमि। श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य कृते प्रकाशनाय कृतज्ञताज्ञापनं कृत्वा अमरप्रिटिंगप्रेसस्य कृते कार्तज्ञयं ज्ञापयामि।

आशाषे ग्रन्थोऽयं विदुषां प्रीतिवर्द्धकं स्यादिति नमस्करोमि।

गच्छन्ति स्खलनादत्र भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः॥

विदुषां वशंवदः

—डॉ. रामराज उपाध्यायः

कृतज्ञता ज्ञापन

संस्कारो हि गुणान्तराधानमुच्यते की प्रसिद्ध उक्ति के अनुसार गुणान्तराधान करने की प्रक्रिया का नाम संस्कार है। गुणान्तराधान का मतलब सद्‌गुणों को जीव के अन्दर व्यवस्थित करना एवं दुर्गुणों को बाहर करना है। महर्षियों के अद्भुत रहस्यात्मक खोज का प्रत्यक्ष एवं ज्वलन्त उदाहरण संस्कार है जिसमें किसी मानव को मानव कैसे बनाया जाय की प्रक्रिया का दिग्दर्शन होता है। आज यह एक यक्ष प्रश्न विश्व के सामने है कि मानव को मानव कैसे बनाया जाय। मानवीय गुणों का आधान जीव के अन्दर कैसे हो जिससे व्यक्ति का व्यक्तित्व एवं चरित्र निर्मित हो सके। इस प्रश्न का उत्तर देते हुये भारतीय संस्कृति संस्कारों की ओर संकेत करती है। संस्कारों का महत्त्व बतलाते हुये आचार्य याज्ञवल्क्य जी कहते हैं—

एवमेनः शमं याति बीजगर्भसमुद्भवम्

इसकी व्याख्या करते हुये संस्कार भास्करकार कहते हैं— **एवमुक्तप्रकारेणगर्भाधानादिभिः संस्कारकर्मभिः कृतैरेनः पापं शमं याति** अर्थात् गर्भाधानादि संस्कारों के सम्पादन से पापों का शमन होता है। यहाँ पाप का सीधा-साधा अर्थ दोषों से है। इन दोषों को बैजिक एवं गार्भिक दोषों के नामों से जाना जाता है। इसी व्याख्या को आगे बढ़ाते हुये विज्ञानेश्वर जी कहते **किं भूतं बीजगर्भसमुद्भवं शुक्रशोणितसंबद्धं गोत्र व्याधि संक्रान्ति निमित्तम्** अर्थात् यह दोष शुक्रशोणित से संबंधित दोष होता है। माता पिता के वीर्य एवं रज से सन्तान की उत्पत्ति होती है। इन्ही माध्यमों से उनके गुण एवं दोष संतान में संक्रमित हो जाते हैं। गुणो का संक्रमण जीव के विकासार्थ होता है जो उत्तम है परन्तु दोषों का संक्रमण विपरीत प्रभावोत्पादक हो जाता है। दोषों के संक्रमण का

मतलब माता पिता में किसी गंभीर बिमारी का प्रकोप हो तो वह बिमारी भी सन्तान में संक्रमित हो जाती है जो उस संतान के लिये अशुभ होती है। इस बैजिक एवं गार्भिक दोषों को समाप्त करने में आज भी यदि कोई सक्षम है तो वे है केवल संस्कार। जैसा कि मनु ने कहा है–

गार्भैर्होमैर्जातकर्मचुडामौंजीनिबंधनैः
बैजिकं गार्भिकं नोद्विजानामापमृज्यते।
स्वाध्यायेनव्रतैर्होमैस्त्रैविद्येनेज्ययासुतैः
महायज्ञैश्यचज्ञैश्च ब्राह्मीयं क्रियते तनुः॥

जीवन के निर्माण की प्रक्रिया का आरम्भ गर्भाधान संस्कार से होता है। गर्भ में ही शिशु को जीवत्व मिलता है और उसमें पलना एवं बढ़ना प्रारम्भ करता है। पुराणों में तो इस प्रकार के कथानक मिलते हैं जिसके अनुसार गर्भ में शिशु पिता की बात को सुनकर चक्रव्यूह के छः दरवाजो को तोड़ने की कला भी सीख जाता है। अष्टावक्र जैसे महात्मा गर्भ मे ही गीता ज्ञान के गंभीर रहस्यों को जान जाते थे। संस्कार भास्करकार गार्भैः शब्द की व्याख्या करते हुये कहते हैं **ये गर्भशुद्धये क्रियन्ते ते गार्भाः। अत्र होम ग्रहणमुपलक्षणम्। गर्भाधानादेरहोमरूपत्वात्। एतैः संस्कारैर्बैजिकं प्रतिषिद्धमैथुनसंकल्पादिनाचपैतृकरेतोदोषाद्यद्यत्पापं गार्भिकंचाशुचिमातृगर्भवासजंतत्द्विजातीनामपमृज्यते।** अर्थात् गर्भशुद्धि के लिये किये गये कार्य को गार्भिक कार्य एवं बीर्य शुद्धि के लिये किये गये कार्य को बैजिक कार्य कहते है। इन दोनों प्रकारों से शुद्धि के अलावा **स्वाध्यायेनवेदाध्ययनेनव्रतैर्मधुमांसवर्जनादिनि यमैर्होमैः सावित्र-चरुहोमादिभिःसायं प्रातर्होमैश्च त्रैविद्याख्येन वेदव्रतेन चेज्यया-ब्रह्मचर्यावस्थायां देवर्षिपितृतर्पणरूपया। गृहस्थावस्थायां पुत्रोत्पादनेन महायज्ञैः पंचभिर्ब्रह्मयज्ञादिभिः। यज्ञैर्ज्योतिर्ष्टोमादिभिः। ब्राह्मीयं ब्रह्मप्राप्तियोग्येयंतनुः।**

शास्त्रों के अनुसार पुरुषार्थ चतुष्टय की प्राप्ति ही मानव का पुरुषार्थ है। परम की प्राप्ति तभी संभव है जब शरीर को ब्राह्मीय बनाया जाय और ब्राह्मीय शरीर तभी बन सकता है जब उपरोक्त संस्कारों को सम्पादित करते हुये इस शरीर को शुद्ध एवं प्रबुद्ध बनाया जाय।

संस्कारों की संख्या में विभिन्न विद्वानों के विभिन्न मत रहे हैं परन्तु संस्कार सम्पादन के विषय पर सर्वानुमति से इस बात को कहा गया कि संस्कारों का सम्पादन करना चाहिये। संस्कारो की संख्या का विचार करते हुये आचार्य गौतम ने ४८ संस्कार बतलाये हैं जिन्हें गर्भाधान, पुंसवन, सीमन्तोन्नयन, जातकर्म, नामकरण, अन्नप्राशन, चौल संस्कार, उपनयन संस्कार, चतुर्वेदव्रत, स्नान, सहधर्मचारिणी संयोग, पंचमहायज्ञानुष्ठान, अष्टका, पार्वण, श्राद्ध, श्रावणी, आग्रहायणी, चैत्री, आश्वयुजी, अग्न्याधेय, अग्निहोत्र, दर्शपौर्णमास, चातुर्मास्य, आग्रहायणेष्टि, निरूढ़ पशुबन्ध, सौत्रामणि, अग्निष्टोम, अत्यग्निष्टोम, उक्थ्य, षोडशी, वाजपेय, अतिरात्र, आप्तोर्याम ये चालीस संस्कारों के रूप में जाना जा सकता है। इसमें आचार्य जी ने आठ आत्म गुणों की अनिवार्यता बतलायी है जिनमें सभी प्राणियों पर दया करना, शांति, अनसूया, शौच, अनायास, मांगल्य, अकार्पण्य, अस्पृहा सम्मिलित है। जिसके पास उपरोक्त सारे संस्कार हो परन्तु उक्त आठ आत्गुण न हो तो वह ब्रह्म लोक की प्राप्ति नही कर सकता। जिनके पास इन संस्कारों के साथ-साथ आठों आत्मगुण भी है वे ब्रह्मलोक तथा सायुज्य (मोक्ष) दोनों को प्राप्त करने में सफल हो जाता है।

महर्षि आंगिरस ने पच्चीस संस्कार बतलाये हैं जिन्हें गर्भाधान, पुंसवन, सीमन्तोन्नयन, बलि, जातकर्म, नामकर्म, निष्क्रमण, अन्नप्राशन, चौलसंस्कार, उपनयन, चतुर्वेदव्रत, स्नान, विवाह, आग्रयण, अष्टका, श्रावणी, अमा, आश्वयुजी, मार्गशीर्ष में पार्वण, उत्सर्ग, उपाकर्म एवं महायज्ञ के नामों से जाना जाता है। जो द्विजातियाँ इन पच्चीस संस्कारों से सुसंस्कृत हैं उन्हे श्राद्धादि सभी कर्मो हेतु शुद्ध एवं पवित्र माना गया है। इन संस्कारों में बलि शब्द विष्णुबलि के लिये प्रयुक्त है ऐसा संस्कार भास्कर में लिखा गया है।

उक्त पच्चीस संस्कारों को महर्षि आश्वलायन ने चार भागों में विभक्त किया है। वे भाग क्रमशः नैमित्तिक, वार्षिक, मासिक एवं नित्य भेद से जाने जाते है। नैमित्तिक के अन्तर्गत षोडश संस्कारों को लिया गया है जिनका समापन विवाह संस्कार से होता है। आग्रयण आदि सात

संस्कारों को वार्षिक संस्कार माना गया है। पार्वण इत्यादि को मासिक संस्कार के अन्तर्गत जाना जाता है। असमर्थ जनों के लिये पार्वण को वार्षिक संस्कार के अन्तर्गत स्थान दिया गया है। महायज्ञ को नित्य संस्कार माना गया है। इसका सम्पादन व्यक्ति को सन्ध्या एवं अग्निहोत्र के समान करना चाहिये। इन संस्कारों में गर्भाधान से लेकर उपनयन संस्कार तक सभी के लिये नियत है। स्नानादि जो लिखे गये हैं वे सभी के लिये नियत नही है। इसी प्रकार ब्रह्मचर्य संस्कार से प्रव्रज्या इत्यादि संस्कारों को भी माना जा सकता है।

पारस्करगृह्यसूत्र में आचार्य पारस्कर ने तेरह संस्कारों को माना है। जसमें विवाह, गर्भाधान, पुंसवन, सीमन्तोन्नयन, जातकर्म, नामकरण, अन्नप्राशन, चूडाकर्म, उपनयन, केशान्त, समावर्तन एवं अन्त्येष्टि है। बौधायन गृह्यसूत्र में तेरह ही संस्कार माने गये हैं जिन्हें विवाह, गर्भाधान, पुंसवन, सीमन्तोन्नयन, जातकर्म, नामकरण, उपनिष्क्रमण, अन्नप्राशन, चूडाकर्म, कर्णबेध, उपनयन, समावर्तन एवं पितृमेध के रूप में जाना जाता है। वाराहगृह्यसूत्र में जातकर्म, नामकरण, दन्तोद्गमन, अन्नप्राशन, चूडाकरण, उपनयन, वेद व्रतानि, गोदान, समावर्तन, विवाह, गर्भाधान, पुंसवन, सीमन्तोन्नयन संस्कार बतलाये गये है। वैखानस गृह्यसूत्र में ऋतुसंगमन, गर्भाधान, सीमन्त, विष्णुबलि, जातकर्म, उत्थान, नामकरण, अन्नप्राशन, प्रवासगमन, पिण्डवर्धन, चौलक, उपनयन, पारायण, व्रतबन्धविसर्ग, उपाकर्म, उत्सर्जन, समावर्तन, पाणिग्रहण संस्कार बतलाये गये है।

इस प्रकार विभिन्न आचार्यों के संस्कार संबंधी विचारों को देखते हुये यह निर्विवाद रूप से कहा जा सकता है कि संस्कारों का सम्पादन व्यक्ति को अवश्य करना चाहिये। संस्कार भास्कर नामक इस ग्रन्थ में संस्कारों से संबंधित विधि विधान सम्यक रीति से सम्पादित किये गये है। इस ग्रन्थ का यह वैलक्षण्य है कि जिस संस्कार के बारे में वर्णन किया जा रहा है उस संस्कार से संबंधित समस्त समस्याओं एवं समाधानों पर अत्यन्त गहनतापूर्वक सुगम विचार दिया गया है। जैसे विवाह संबंधी संस्कार की बात चल रही है तो वहाँ यह भी विचार

किया गया कि उस समय कन्या रजस्वला हो जाय तब क्या करें, क्योंकि रजस्वला कन्या का पूजन एवं दान कैसे किया जाय। कन्या की माता ऋतुमती हो जाय तब क्या करें, विवाह के समय किसी अत्यन्त नजदीकी पारिवारिक जन की मृत्यु हो जाय तो क्या करें, नान्दी श्राद्ध में श्राद्ध कर्ता के माता पिता जीवित हो तो कैसे नान्दी श्राद्ध किया जायेगा क्योंकि नान्दी श्राद्ध में स्पष्ट रूप से बोलना पड़ता है **मातृपितामही प्रपितामह्यः भूर्भुवः स्वः नान्दी मुख्यः इमे आसने वो नमो नमः नान्दीश्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः। पितृपितामहप्रपितामहाः नान्दीमुखाः इमे आसने वो नमो नमः नान्दीश्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः।** यदि इस अवसर पर उपरोक्त में से कोई जीवित हो तब क्या करेगें। इत्यादि इत्यादि विभिन्न महत्त्वपूर्ण विचार प्रतिपादित किये गये हैं। इस पुस्तक की उपयोगिता भारतीय संस्कृति का अनुपालन करने वाले समस्त जनों को है तथा इसका सम्यक् ज्ञान पुरोहित कर्म करने वाले प्रत्येक पुरोहित को तो होना ही चाहिये । इसकी महत्ता को देखकर मैने इस पुस्तक पर बीणा टीका लिखने का निर्णय किया।

ग्रन्थलेखन के प्रेरणास्रोत महामहनीय आचार्यवर पूज्य गुरुदेव विद्यापीठ के परम तेजस्वी कुलपति स्व. प्रो. वाचस्पति उपाध्याय जी का मै अधमर्ण हूँ जिनके कृपा प्रसाद से ग्रन्थ को लिखने की प्रेरणा मिली। यद्यपि आज वे परम धाम को प्राप्त हो चुके हैं फिर भी विद्याव्यसनी होने के कारण उनके प्रति कृतज्ञता ज्ञापित करते हुये मै अपनी श्रद्धाञ्जलि निवेदित करता हूँ। सम्पूर्णानन्द संस्कृत विश्वविद्यालय के वेद विभागाध्यक्ष एवं जगद्गुरुरामानन्दाचार्य राजस्थान संस्कृत विश्वविद्यालय के निवर्तमान कुलपति पूज्य गुरुदेव प्रो. युगलकिशोर मिश्र जी का आशीर्वाद इस ग्रन्थलेखन में प्राप्त हुआ इसके लिये मैं अपने आप को गौरवान्वित मानता हूँ तथा इस सारस्वत् सपर्या की ओर अभिप्रेत करने के कारण मै सादर कृतज्ञता ज्ञपित करता हूँ। श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ के शोध एवं प्रकाशन विभाग के अध्यक्ष गुरुदेव प्रो. रमेश कुमार पाण्डेय जी का आशीर्वाद सतत् प्राप्त

होता रहता है इसके लिये मैं नमन करते हुये विनम्रता पूर्वक हार्दिक कृतज्ञता ज्ञापित करता हूँ। पूर्व पौरोहित्य विभागाध्यक्ष प्रो. रवीन्द्र नागर जी का शुभाषीश हमेशा प्राप्त होता रहता है इसके लिए मैं उनको प्रणाम करता हूँ।

इसके अलावा इस पुस्तक के लेखन में मुझे परमवन्दनीय आचार्यों, इष्टमित्रों का प्रभूत सहयोग मिला जिसके लिये मैं सभी को अत्यन्त हार्दिक कृतज्ञता ज्ञापित करता हूँ। इस टीका के सम्पादन में मेरी धर्म पत्नी श्रीमती बीणा उपाध्याय, पुत्र चन्देश उपाध्याय, धर्मेश उपाध्याय एवं ज्ञानेश उपाध्याय का अत्यन्त सराहनीय योगदान रहा है जिसके लिये उन्हें हार्दिक आशीर्वाद प्रदान करता हूँ।

इस पुस्तक का प्रकाशन श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ, नई दिल्ली-१६ के प्रकाशन विभाग के सहयोग से सम्पन्न हो सका जिसका मैं आभारी रहूँगा। टीका करण में अशुद्धियाँ स्वाभाविक रूप से होंगी इसके लिये मैं क्षमाप्रार्थी हूँ और अगले संस्करण में आप सभी के सुझावों को यथामति रखने का प्रयास करूँगा। ग्रन्थ प्रकाशन में सहयोग करने के लिये अमर प्रिटिंग प्रेस सहित समस्त प्रत्यक्ष या अप्रत्यक्ष रूप से सहयोग करने वाले बन्धुओं को हार्दिक सधुवाद देता हूँ।

।। नमो नमः ।।

डॉ. रामराज उपाध्याय

विषयानुक्रमणिका

।। इति संस्कारभास्करस्यानुक्रमणिका।।

संस्कार-भास्करः

(मूलभागः)

प्रस्तावना।

विदितमेवास्ति विविधविद्यावतामत्रभवतां भवतां यन्मणिवत्संस्कृतो द्विजः श्रौतस्मार्तकर्मार्हो भवति। तदुक्तम्। पञ्चविंशतिसंस्कारैः संस्कृता ये द्विजातयः। ते पवित्राश्च योग्याः स्युः श्राद्धादिषु सुयन्त्रिताः।। इति। अतो द्विजस्य तत्त्वसंपादनाय संस्कारावश्यकत्वं सिद्ध्यति। ते च संस्काराः प्राधान्येन षोडश परिगणिताः। गर्भाधानमतश्च पुंसवनकं सीमन्तजाताभिधे। नामाख्यं सह निष्क्रमेण च तथान्नप्राशनं कर्म च। चूडाख्यं व्रतबन्धकोऽप्यथ चतुर्वेदव्रतानां पुरः। केशान्तः सविसर्गकः परिणयः स्यात्षोडशी कर्मणाम्। इति।। तानेतान्संस्कारान्प्रत्यपादयन् लोकाननुजिघृक्षवो याज्ञवल्क्यप्रभृतयो महर्षयः स्वकीयेषु ग्रन्थेषु। प्रयोगप्रकारं चान्य एव व्यरचयन्। एवं चान्यत्र संस्कारा अन्यत्र प्रयोगा इति ऋषीणां वचनानि स्वल्पबुद्धिभिर्दुर्ज्ञेयानीति च मनसि निधाय परमकारुणिको दाशरथिचरणनलिनपरिसरणपवित्रितपरिसरप्रदेशायाः पापिपाप-परिक्षपणप्रसक्तिप्राप्तप्रतिष्ठाया गोदावर्या दक्षिणरोधसि विराजमानस्य विबुधविहारतया स्वर्गवच्छोभमानस्य नाम नासिकक्षेत्रस्यालङ्कारभूतो विश्वनाथतनुजनुर्विद्वन्मण्डलकुटमणिः ऋषिनिभ ऋषिभट्टाभिधानः शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनीशाखाध्यायिनां भूमिदेवानामुपकारकृते भूनेत्ररसभू 1621 मिते शालिवाहनशके स्वशाखीयगृह्योक्तप्रकारेण संक्षेपतः षोडशसंस्कारांस्तत्प्रयोगांश्च संजग्राह। तस्य च नाम संस्कारभास्कर इति। स एव विपुलीचिकीर्षुणा तापीती-रावंतसप्रसिद्धतरसूर्यपत्तन (सुरत) निवासिना शुक्लहरदत्ततनूजेन

यदुरामशर्मणा मया हरिहरादिभाष्येभ्यो याज्ञवल्क्यादिस्मृतिभ्यो निर्णयसिन्धिवादिनिबन्धग्रन्थेभ्यो रुद्रकल्पद्रुमप्रयोगरत्नादिप्रयोगग्रन्थेभ्यश्चो-पयोगीनि प्रमाणानि प्रासङ्गिकमुपयुक्तमन्यदपि च संगृह्य प्रचुरतर-प्रचारकृते ग्रन्थादौ परिभाषामुपनिबध्य स्वशाखीयसूत्रानुक्ताविरोधि-परिशिष्टस्मृत्युक्तसंस्कारैस्तत्तच्छास्त्रार्थेन च समलंकृत्य संशोध्य मुम्बयीराजधानीवास्तव्यपण्डितोपाह्वमुकुन्दतनूद्भवज्येष्ठारामशर्मणे भगीरथात्मजहरिप्रसादशर्मणे च पुस्तकप्रसिद्धिकरणादिस्वामित्वसहितः समर्पितः। ''न हि चलन् न स्खलेत्पतेद्वा'' इति न्यायेन संशोधिते-ऽप्यस्मिन्निबन्धे कुत्राप्यशुद्धिश्चेन्मधुपवद्गुणग्राहिभिः क्षमावद्भिर्विचक्षणैः क्षन्तव्यमिति बहुमानपुरः सरमभ्यर्थयते तानिति शम्।।

—शुक्लहरदत्तात्मजयदुरामशर्मा:

श्रीगणेशायनमः।। श्रीसरस्वत्यैनमः।। श्रीगुरुभ्योनमः।।

त्रैलोक्यंधवलीकृतंस्वप्रभया स्वांगेधृतागोत्रजाशूलेनैवविशेषतो दितिसुताद्येनामरारक्षिताः।। उत्पत्तिस्थितिनाशकादिजगतोयस्ये-च्छयाजायतेग्रंथेस्मिन्ग्रहणोद्यमायगिरिशः सिद्धिंसदायच्छतु।। 1।। यो भूच्छौचोपनामाबुधमुकुटमणिर्विश्वनाथः प्रसिद्धस्तज्जोगंगाधराख्यः क्षितिसुरमहितः सर्ववेदार्थवेत्ता।। तत्पुत्रः साधुशीलः शतपथ-निपुणोयाज्ञिकैर्वंद्यमानः पुण्यात्मासर्वकालेजयतिऋषिबुधः शिष्यसंघार्चितांघ्रिः।। 2।। करोतिविदुषांप्रीत्यैसर्वसंस्कारभास्करं। सूत्रं हरिहरंकर्कंवासुदेवींसमाहितः।। 3।। आलोक्यसम्यङ्मतिना-सरलंसुगमंनवं।। यस्यावलोकनेनैवस्फुरंतिहृदितत्क्षणात्।। 4।। अथसंस्काराः।। तेचाष्टावात्मगुणयुक्ताश्चत्वारिंशत्। तथाचगौतमः।। गर्भाधानंपुंसवनसीमंतोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयना-निचत्वारिवेदव्रतानिस्नानंसहधर्मचारिणीसंयोगः।। पंचानां-यज्ञानामनुष्ठानं।। अष्टकापार्वणश्राद्धंश्रावण्याग्रहायणीचैत्री-आश्वयुजीतिसप्तपाकसंस्थाः।। अग्न्याधेयमग्निहोत्रंदर्शपौर्णमासौ-चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबंधः सौत्रामणीतिसप्तहविर्यज्ञ-संस्थाः।। अग्निष्टोमोऽत्यग्निष्टोमउक्थषोडशीवाजपेयोति-रात्राप्तोर्यामाइतिसप्तसोमयज्ञसंस्थाः।। एतेचत्वारिंशत्संस्काराः।। अष्टावात्मगुणाः।। दयासर्वभूतेषुक्षांतिरनसूया शौचमनायासोमांगल्य-मकार्पण्यमस्पृहेति।। यस्यैतेनचत्वारिंशत्संस्काराः नचाष्टावात्मगुणाः नसब्रह्मणः सालोक्यंसायुज्यंचगच्छति।। यस्तुखलुसंस्काराणामेक-देशोप्यष्टौचात्मगुणाः सब्रह्मणः सालोक्यंसायुज्यंचगच्छतिगच्छतीति।। पार्वणः स्थालीपाकः।। श्राद्धममावास्यादि।। श्रावणीतत्रक्रियमाणं-श्रवणाकर्म।। आग्रहायणीतत्रक्रियमाणंप्रत्यवरोहणं।। चैत्रीतत्र-क्रियमाणः शूलगवः। आश्वयुजीतत्रक्रियमाणमाश्वयुजीकर्म।। अंगिरसातुपंचविंशतिसंस्काराउक्ताः।। तेयथा।। गर्भाधानंपुंसवनं-

सीमंतोबलिरेवच।। जातकर्मनामकर्मनिष्क्रमोन्नाशनंपरं।। चौलकर्मोपनयनंतद्व्रतानांचतुष्टयं।। स्नानोद्वाहौ चाग्रयणमष्टकाश्चयथातथं।। श्रावण्यामाश्वयुज्यांचमार्गशीर्ष्यांचपार्वणं।। उत्सर्गश्चाप्युपाकर्ममहायज्ञाश्चनित्यशः।। संस्कारानियताह्येतेब्राह्मणस्यविशेषतः। पंचविंशतिसंस्कारैः संस्कृतायेद्विजातयः।। तेपवित्राश्चयोग्याः स्युःश्राद्धादिषुसुयंत्रिताइति।। बलिर्विष्णुबलिः।। तच्छब्देनप्रसिद्धत्वाद्वेदग्रहणेनतद्व्रतानांचतुर्वेदव्रतानामित्यर्थः। नियताः नित्याः।। आदिशब्दाद्याजनादावपि।। ।। एतेषांपंचविंशतिसंस्काराणांनैमित्तिक वार्षिकमासिकनित्यभेदेनचातुर्विध्यमाहाश्वलायनः।। नैमित्तिकाः षोडशोक्ताः समुद्वाहावसानकाः। सप्तैवाग्रयणाद्याश्चसंस्कारावार्षिकामताः।। मासिकंपार्वणंप्रोक्तमशक्तानांतुवार्षिकं।। महायज्ञास्तुनित्याः स्युःसंध्यावच्चाग्निहोत्रवदिति।। अत्रगर्भाधानाद्युपनयनांता एवसर्वेषांनियताः।। नतुस्नानाद्याः।। तेनब्रह्मचर्यादेवप्रव्रजेदित्यादिनविरुध्यते।। एतेषांप्रयोगाः ग्रंथभूयस्त्वभयान्नास्माभिरत्रलिखिताः।। अभिबोधार्थंनामान्येवलिखितानि।। इदानींस्वगृह्योक्तगर्भाधानाद्युद्वाहांतषोडशसंस्काराणामाचरणंप्रायः दृश्यते।। अतस्तेमुख्यतयात्रसंगृहीताः।। तथास्मृत्यंतरेपि।। गर्भाधानमतश्चपुंसवनकंसीमंतजाताभिधेनामाख्यंसहनिष्क्रमेणचतथान्नप्राशनंकर्मच। चूडाख्यंव्रतबंधकेप्यथचतुर्वेदव्रतानां पुरः केशांतः सविसर्गकः परिणयः स्यात्षोडशीकर्मणामिति।। अन्येपिपरिशिष्टादिशास्त्रांतरोक्ताः कर्णवेधादयः संस्कारायथाकालमत्रपरिगृहीताः।। तथा चात्रनूनमपेक्षितानिस्मृति शिष्टाचारप्राप्तानिषष्ठीपूजनादीनिकर्माणियथावसरमग्रेसंगृहीतानि।। एतेचद्विजानामेवसमंत्रकाः।। ब्रह्मक्षत्रियविट्शूद्रावर्णास्त्वाद्यास्त्रयोद्विजाः।। निषेकाद्याः स्मशानांतास्तेषांवैमंत्रतः क्रियेतियाज्ञवल्क्योक्तेः।। अत्रनिषेकोगर्भाधानं।। स्मशानंपितृवनंतत्संबंधिकर्म।। वैएवार्थे।। तेनात्रतेषांवैमंत्रतः

क्रियेत्युक्तेः शूद्रस्याऽमंत्रिका क्रियेतिगम्यते।। ।। अतएवसंस्कारा-
नधिकृत्ययमः।। शूद्रोप्येवंविधः कार्योविनामंत्रेणसंस्कृतइति।।
तत्रतस्याध्ययनाभावात्तदंगभूतोपनयनवेदव्रतादीनांनिवृत्तिः।।
स्त्रीणामपिजातकर्मादिचूडांताः संस्काराअमंत्रकाः।। विवाहस्तुसमंत्रकः
कार्यः।। तथाचयाज्ञवल्क्यः।। तूष्णीमेताः क्रियाः स्त्रीणांविवाहस्तु-
समंत्रकइति।। ।। एतेषांनित्यत्वेप्यानुषंगिकंफलमाहयाज्ञवल्क्यः।।
एवमेनः शमंयातिबीजगर्भसमुद्भवमिति।। एवमुक्तप्रकारेणगर्भा-
धानादिभिः संस्कारकर्मभिः कृतैरेनः पापंशमंयाति।। किंभूतंबीज-
गर्भसमुद्भवंशुक्रशोणितसंबद्धंगोत्रव्याधिसंक्रांतिनिमित्तं।।
नतुपतितोत्पन्नत्वादीतिविज्ञानेश्वरः।। मनुरपि।। गार्भैर्होमैर्जात-
कर्मचूडामौंजीनिबंधनैः।। बैजिकंगार्भिकंचैनोद्विजानामपमृज्यते।।
स्वाध्यायेनव्रतैर्होमैस्त्रैविद्येनेज्यययासुतैः।। महायज्ञैश्चयज्ञैश्चब्राह्मीयं-
क्रियतेतनुरिति।। येगर्भशुद्धये क्रियंतेतेगार्भाः।। अत्रहोमग्रहणमुप-
लक्षणं।। गर्भाधानादेरहोमरूपत्वात्।। एतैः संस्कारैर्बैजिकं-
प्रतिषिद्धमैथुनसंकल्पादिनाचपैतृकरेतोदोषाद्यद्यत्पापं।। गार्भिकं-
चाशुचिमातृगर्भवासजंतत्द्विजातीनामपमृज्यते। स्वाध्यायेनवेदा-
ध्ययनेनव्रतैर्मधुमांसवर्जनादिनि यमैर्होमैः सावित्रचरुहोमा-
दिभिः सायंप्रातर्होमैश्चत्रैविद्याख्येनवेदव्रतेनचेज्ययाब्रह्मचर्या-
वस्थायांदेवर्षिपितृतर्पणरूपया।। गृहस्थावस्थायांपुत्रोत्पादनेन।।
महायज्ञैः पंचभिर्ब्रह्मयज्ञादिभिः।। यज्ञैर्ज्योतिष्टोमादिभिः।।
ब्राह्मीयंब्रह्मप्राप्तियोग्येयंतनुः।। तन्ववच्छिन्नआत्माक्रियते।।
कर्मसहकृतब्रह्मज्ञानेनमोक्षावाप्तेरिति कुल्लूकभट्टः।। इतिसंस्काराः।।
अथपरिभाषा।। ।। तत्र शुचित्वंतावदधिकारितावच्छेदकं।।
सदाकुर्याद्धर्मकार्यमापद्यपिशुचिर्नरइतिटोडरानंदे सप्तर्षिस्मृतेः।।
श्रुतिस्मृत्युदितंकर्मनकुर्यादशुचिः क्वचिदितिप्रयोगपारिजातेभृगूक्तेश्च।।
।। शक्तिश्चाधिकारिविशेषणं।। ।। आख्यातानामर्थं ब्रुवतां शक्तिः

सहकारिणीतिन्यायात्।। तदभावेन्येनकारणीयं।। षाष्ठन्यायात्।।
माधवीयेबौधायनोपि।। यथाकथंचिन्नित्यानिशक्त्यवस्थाऽनुरूपतः।
येनकेनापिकार्याणिनैवनित्यानिलोपयेदिति।। यथाकथंचित्केन-
चिदंगेनहीनानीत्यर्थः।। येनकेनापिस्वतः परतोवेत्यर्थः।। नित्यानीति-
नैमित्तिकप्रारब्धकाम्योपलक्षणं।। नैमित्तिकस्याप्यकरणे-
प्रत्यवायात्।। समाप्तेः शास्त्रार्थत्वेनप्रारब्धंकाम्यमपिनित्या-
यतइतिषाष्ठन्यायात्।। आरंभान्नियमोदोषश्चासमाप्तौस्या-
त्सामान्याद्दर्शनाच्चेतिकात्यायन सूत्राच्च।। यत्तुकाम्येप्रतिनिधिर्ना-
स्तिनित्येनैमित्तिकेचसइतितदनारब्धकाम्यपरं।। अन्येनाप्यसंभवेन-
दोषः।। तदुक्तंमाधवीये।। अत्यंतरोग युक्तेंगेराजचोरभयादिषु।।
गुर्वग्निदेवकृत्येषुनित्यहानौनपापभागिति।। अत्रनित्यपदेननप्रारब्ध-
काम्यग्रहणं।। औपदेशिकनित्यग्रहणेनैवसिद्धावातिदेशिकनित्य
ग्रहणेमानाभावात्।। ।। उपवासोप्यधिकारिविशेषणं।। स्नानं-
संध्यातर्पणादिजपहोमामरार्चनं।। उपवासवताकार्यं सायंसंध्याहुतिं
विनेतिवाराहात्।। जलस्यापिनरश्रेष्ठप्राशनाद्द्वेषजादृते।। नित्यक्रिया
निवर्तेतकाम्यनैमित्तिकैस्सहेतिकालिकापुराणाच्च।। यत्तुइक्षुरापः
पयोमूलफलंताबूलमौषधं।। भक्षयित्वापिकुर्वीतस्नानदानादिकाः
क्रियाइतिचतुर्विंशतिमतेस्मृत्यर्थसारेचइक्ष्वादिपरिगणनंतदशक्तविषयं।।
।। स्नानमप्यधिकारितावच्छेदकं।। ।। तदुक्तंहेमाद्रौप्रचेतसा। स्नातो
धिकारीभवतिदैवेपित्र्येचकर्मणि।। पवित्राणांतथाजाप्येदानेच-
विधिचोदितइति।। पवित्राणिमंत्राः।। मंत्रः पवित्रमुच्यतइतिनिरुक्तात्।।
आग्नेये।। स्नानानामपिसर्वेषांवारुणेनचमानवः।। कर्तुमर्हतिकर्माणि-
विधिवत्सर्वदाद्विजइति।। कृतप्रातः संध्योपासनत्वमप्यधिकारिता-
वच्छेदं।। सांध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मस्वितिछन्दोग-
परिशिष्टेकात्यायनोक्तेः।। प्रातः संध्यां ततः कृत्वासंकल्पं बुध-
आचरेत्।। संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु।। यदन्यत्कुरुते-

कर्मनतस्यफलमश्नुतइतिसंवत्सरप्रदीपेदक्षोक्तेश्च।। दानहेमाद्रौ-वाराहेपि।। सुस्नातः सम्यगाचांतः कृतसंध्यादिकक्रियः।। काम-क्रोधविहीनश्चपाखण्डस्पर्शवर्जितः।। जितेन्द्रियः सत्यवादीसर्वकर्म-सुशस्यतइति।। ।। कर्माङ्गस्नानेविशेषोमार्कण्डेयपुराणे।। शिरः स्नातस्तुकुर्वीतदैवंपित्र्यमथापिवा।। प्राङ्मुखोदङ्मुखोवापिश्मश्रुकर्मच कारयेदिति।। तत्रादौश्मश्रुकर्म ततः शिरः स्नानं।। अन्यथाशुचित्वा-पत्त्यापुनः स्नानापत्तेः।। तच्चस्नानंमंगलकृत्यादौतिलामलकादिनो-द्वर्त्याभ्यंगपूर्वकंवाकार्यं।। आद्यंतुरुद्रकारिकायांपरशुरामेणोक्तं।। ततः स्वगृहमागत्यमंगलं स्नानमाचरेत्।। सर्वौषधीगंधचूर्णैर्युक्तेः कृष्णतिलामलैः।। उद्वर्त्यांगानितैलेनचंपकादिसुगंधिना।। तैलेनमंगलस्नानंकुर्वीतब्राह्मणैः सहेति।। अत्रसर्वशब्दस्यौषधी-गंधचूर्णशब्देनकर्मधारयः।। ब्राह्मणैः सहेत्यत्रसहैवदशभिः पुत्रैर्भारंवहतिगर्दभीत्यत्रगर्दभ्याभारवाहकत्वेनपुत्राणामिवब्राह्मणानां-साहित्यमात्रमेनवपुनस्तेषांस्नानेकर्तृत्वं।। अंत्यं तुनिर्णयसिंधौ-कात्यायनेनोक्तं।। मांगल्यंविद्यतेस्नानंवृद्धिपूर्वोत्सवेषुच।। स्नेहमात्र-समायुक्तंमध्याह्नात्प्राक्तदिष्यतइति।। बृहन्नारदीये।। शिरोभ्यंगा-वशिष्टेनतैलेनांगंनलेपयेदिति।। ।। अहतयोरधरीयोत्तरीययोः परिधान-मप्यधिकारितावच्छेदकं।। ।। अधौते कारुधौतेचपरिदध्यान्नवाससी।। अहतेतुपरीदध्यात्सर्वकर्मणिसंयत इतिहेमाद्रौवाराहोक्तेः।। पारस्करगृह्येपि।। अहतंवासोधौतंवाऽमौत्रेणाच्छादयीतेति।। ।। अहतलक्षणमुक्तंस्मृतिरत्नावल्यांकात्यायनेन।। ।। ईषद्धौतं-नवंश्वेतंसदशंयन्नधारितं।। अहतंतद्विजानीयात्सर्वकर्मसुपावन-मिति।। ईषद्धौतमरजकादिनासकृद्धौतमितिनागदेवाह्निकेव्याख्यातं।। कश्यपेनत्वन्यथोक्तं।। अहतंयंत्रनिर्मुक्तंवासः प्रोक्तंस्वयंभुवा।। शस्तंतन्मांगलिक्येषुतावत्कालंनसर्वदेति।। मांगलिक्यंविवाहादि।। अत्रैवंव्यवस्था।। विवाहादिमंगलकर्मसुयंत्रनिर्मुक्तमेवाहतंशस्तं

तन्मांगलिक्येषुतावत्कालमितिवदता तत्रैवतावत्कालंतस्यशस्तत्वाभि-
धानात्।। अन्यत्रयज्ञादौत्वीषद्धौतमिति।। क्षौमेवस्त्रेऽहतेपत्नीचेतिसूत्रे
श्रीमदनंतयाज्ञिकैरप्येवंव्याख्यातं।। हेमाद्रौवृद्धमनुः।। स्वयं-
धौतेनकर्तव्याः क्रियाधर्म्या विपश्चिता।। नतुतेजक-
धौतेननोपभुक्तेनवाक्वचिदिति।। तेजकोरजकः।। ।। धौतवासः
प्रसारणमुक्तंव्रतहेमाद्रौ।। प्रागग्रमुदगग्रं वाधौतंवासः प्रसारयेत्।।
पश्चिमाग्रं दक्षिणाग्रं पुनः प्रक्षालनाच्छुचिरिति।। ।।
तत्रैववस्त्रांतरमाहमार्कंडेयः।। ।। अन्यदेवभवेद्वासः शयनीयेनरा-
धिप।। अन्यद्रथ्यासुदेवानामर्चायामन्यदेवहि।। अन्यच्चलोकयात्राया-
मन्यदीश्वरदर्शनइति।। ।। धौतवस्त्राभावेवस्त्रान्तरमाह।। ।।
योगियाज्ञवल्क्यः।। अभावेधौतवस्त्रस्यशाणक्षौमाविकानिच।।
कुतपंयोगपट्टंवाद्विवासायेनवैभवेदिति।। कुतपो नेपालकंबलः।। ।।
उत्तरीयवस्त्राभावेपारस्करगृह्ये।। एकंचेत्पूर्वस्योत्तरवर्गेण-
प्रच्छादयीतेति।। जातूकर्ण्यस्त्वन्यथाह।। वस्त्रोत्तरीयाभावेद्व्यगुलंत्र्यं-
गुलंचतुरंगुलंवासूत्रैः परिमंडलंकुर्यादिति।। ।। आर्द्रवस्त्रपरिधान-
निषेधमाहआपस्तंबः।। ।। आर्द्रवासास्तुयः कुर्याज्जपहोम परिग्रहान्।।
सर्वंतद्राक्षसंविद्याद्बहिर्जानुचयत्कृतं।। यज्जलेशुष्कवस्त्रेण-
स्थलेचैवार्द्रवाससा।। जपोहोमस्तथादानंतत्सर्वंनिष्फलंभवेदिति।।
सप्तवाताहतमपिशुष्कं।। वर्ज्यवस्त्राणिमहाभारते।। नस्यूतेनन-
दग्धेनपारक्येनविशेषतः। मूषकोत्कीर्णजीर्णेनकर्मकुर्याद्विचक्षणइति।।
बौधायनः।। काषायवासाः कुरुतेजपहोमप्रतिग्रहान्।। नतद्देवगमंकर्म-
हव्यकव्येष्वथोहविरिति।। भवेदितिशेषः।। आचारादर्शे।। नरक्त-
मुल्बणंवासोननीलंचप्रशस्यते।। मलाक्तंचसदाहीनंवर्जयेदंबरंबुधइति।।
उल्बणंव्यक्तं।। एतच्चरक्तविशेषणं।। तेनात्यंतरक्तमित्यर्थः।।
उल्बणमंचलमितिकेचित्।। व्याघ्रपादः।। काषायंकृष्णवस्त्रंवामलिनं-
केशदूषितं। जीर्णंनीलंसंधितंचपारक्यंमैथुनेधृतं।। छिन्नाग्रमुप-

वस्त्रंचकुत्सितंधर्मतोविदुरिति।। अयंचनिषेधः सतिसंभवे-
बोध्यः।। अतएवाहगौतमः।। सतिसंभवेनजीर्णमलवद्वासाः
स्यान्नरक्तमुल्बणमन्यधृतंवावासोबिभृयादिति।। नीलीरक्तवस्त्र-
परिधानंसर्वथानिषिद्धं।। ।। तदुक्तंभविष्ये।। नीलीरक्तेन-
वस्त्रेणयत्कर्मकुरुतेद्विजः।। स्नानंदानंतथाहोमः स्वाध्यायः पितृतर्पणं।।
वृथातस्यमहायज्ञानीलीरक्तस्यधारणादिति।। ।। नीलीरक्तवस्त्र-
धारणेप्रायश्चित्तमाहआपस्तंबः।। ।। नीलीरक्तंयदावस्त्रंब्राह्मणोंगेषु-
धारयेत्।। अहोरात्रोषितोभूत्वापंचगव्येनशुद्ध्यतीति।। ।।
नीलीरक्तमपिपट्टवस्त्रंननिषिद्धं।। ।। तदुक्तमाचारचिंतामणौ।।
कंबलेपट्टवस्त्रेचनीलीरागोनदुष्यति।। स्त्रीणांक्रीडार्थसंभोगे-
शयनीयेनदुष्यतीति।। भृगुरपि।। स्त्रीधृताशयनेनीलीब्राह्मणस्यन-
दुष्यतीति।। एकवस्त्रनिषेधमाहव्याघ्रपादः।। ।। नैकवस्त्रोद्विजः
कुर्याद्भोजनंतुसुरार्चनं।। तत्सर्वमसुरेंद्राणांब्रह्माभागमकल्पयदिति।।
विष्णुपुराणेपि।। होमेदेवार्चनाद्यासुक्रियास्वाचमनेतथा।। नैकवस्त्रः
प्रवर्तेतद्विजवाचनिकेजपइति।। द्विजवाचनिकेद्विजस्वस्तिवाचने।।
एकवस्त्रलक्षणमाहशातातपः।। ।। सव्यादंसात्परिभ्रष्टंकटिदेशे-
धृतांबरं।। एकवस्त्रंतुतद्विद्याद्दैवेपित्र्येचवर्जयेदिति।। ।।
त्रिकच्छनिर्णयस्तल्लक्षणंचोक्तं संग्रहे।। ।। वामेपृष्ठेतथानाभौ-
कच्छत्रयमुदाहृतं।। त्रिभिः कच्छैः परिज्ञेयोविप्रोयः सशुचिर्भवेत्।।
आदौकच्छस्ततोनीवीनाभिमध्येचवाससी।। नीवीदक्षिणतः स्थाप्या
एतत्त्रिकच्छलक्षणमिति।। ।। धर्मकार्येवर्ज्यवस्त्रमुक्तंसंग्रहे।। ।।
कटिवेष्टयंतुयद्वस्त्रं पुरीषोयेनवाकृतः।। मूत्रमैथुनकृद्वस्त्रं-
धर्मकार्येविवर्जयेदिति।। ।। आसुरीकक्षानिषेधमा-
हदानहेमाद्रौश्लोकगौतमः।। स्नानेदानेजपेहोमेदैवेपित्र्येचकर्मणि।।
बध्नीयान्नासुरीकक्षां शेषकालेयथारुचीति।। ।। आसुरीकक्षा-
लक्षणमाहतत्रैवयाज्ञवल्क्यः।। ।। परिधानाद्बहिः कक्षानिबद्धा-

चासुरीमता।। धर्मकर्मणिविद्वद्भिर्वर्जनीयाप्रयत्नत इति।। बहिः कक्षा बहिर्निर्गता कक्षाइत्यर्थः।। कक्षापश्चादंचलं।। प्रांतद्वयमित्यन्ये।। ।। उपवीतित्वबंद्ध शिखित्वंचाधिकारिविशेषणं।। ।। यथाहछंदोग-परिशिष्टेकात्यायनः।। सदोपवीतिना भाव्यंसदाबद्धशिखेनच।। विशिखोव्युपवीतिश्चयत्करोति नतत्कृतमिति।। अनेनहिद-धिखदिरादिवदुपवीतित्वस्यबद्धशिखित्वस्यचक्रतु पुरुषोभयार्थत्व-मवगम्यते।। तेनविशिखेनव्युपवीतिनाचकर्मणिक्रियमाणे कर्मणोपिवैगुण्यंभवति।। एवंचसतिक्रतुपुरुषोभयार्थापचारप्रयुक्तंप्राय-श्चित्तद्वयमत्रबोध्यम्।। ।। यज्ञोपवीतनिवीतप्राचीनावीतलक्षणमुक्तंहेमा द्रौभरद्वाजेन।। ।। दक्षिणंबाहुमुद्धृत्यवामस्कंधेनिवेशितं।। यज्ञोपवीत-मित्युक्तं देवकार्येषुशस्यते।। कंठावलंबितंचैवब्रह्मसूत्रंयदाभवेत्।। तन्निवीतमितिख्यातं शस्तंकर्मणिमानुषे।। उत्क्षिप्तेवामबाहौतु-दक्षिणस्कंधमाश्रितं।। प्राचीनावीतमित्युक्तं तत्पित्र्येष्वेवकर्मस्विति।। ।। यज्ञोपवीतधारणसंख्योक्तास्मृत्यर्थसारेहरिहरभाष्येच।। ब्रह्मचारिणएकंस्यात्स्नातस्यद्वेबहूनिवा।। तृतीयमुत्तरीयार्थे-वस्त्राभावेतदिष्यतइति।। एतच्चोत्तरीयवस्त्राभावेतृतीयोपवी-तधारणंकर्मागं।। बहूनिवेतितुकाम्यं।। बहूनिचायुः कामस्येतिदेव-लोक्तेः।। विश्वमित्रोपि।। यज्ञोपवीतेद्वेधार्येश्रौतेस्मार्तेचकर्मणि।। तृतीयमुत्तरीयार्थेवस्त्राभावेतदिष्यतइति।। ।। शिखाबंधनमुक्तं।। ।। चतुर्विंशतिमते।। मध्येतुबह्वृचाश्चैवनिबध्नीयुः शिखांततः।। माध्यंदिनाश्चयेविप्राः पार्श्वेदक्षिणतः क्रमात्।। वामपार्श्वेनिबध्नी-युर्येविप्राः सामगायिनइति।। सर्वेषांशिरसियत्रक्वचित्केशसत्त्वेतत्रैव-शिखाबंधइत्युक्तमनंतदेवेन।। ।। खल्वाटत्वादिनासर्वथा-केशाभावेविशेषः काठकगृह्ये।। ।। अथचेत्प्रमादान्नशिखातदाकौशीं शिखांब्रह्मग्रंथियुतांदक्षिणकर्णेनिदध्यादिति।। अथासनमाह।। ।। हेमाद्रौकौशिकः।। कुशासनंसदापूतंयतीनां तुविशेषतः।।

कुशासनोपविष्टस्यसिद्ध्यतेयोगउत्तमइति।। विष्णुपुराणे।। कुशोपरिनिविष्टेनतथायज्ञोपवीतिना।। सर्वंकर्मप्रकर्तव्यमन्यथाविफलंभवेदिति।। अत्रकुशोपरिनिविष्टेनेति-कुशासनोपादानंकर्मार्हासनोपलक्षणं।। शमीकाश्मर्यशल्लाश्च-कदंबोवारणस्तथा।। पंचासनानिशस्तानिश्राद्धेदेवार्चने तथेतिश्राद्धकारिकायांस्मृतेः।। काश्मर्यः सालवृक्षः।। शल्लः शिंशपावृक्षः।। श्राद्धेदेवार्चनइतिदैवपित्र्यकर्ममात्रोपलक्षणं।। ।। आसीनादिष्वनियमेनियममाहछंदोगपरिशिष्टेकात्यायनः।। ।। तिष्ठन्नासीनः प्रह्वोवानियमोयत्रनेदृशः।। तदासीनेनकर्तव्यंनप्रह्वेणनतिष्ठतेति।। ।। प्रौढपादनिषेधमाह।। ।। दानहेमाद्रौशांखायनः।। दानमाचमनंहोमंभोजनंदेवतार्चनं।। प्रौढपादोनकुर्वीतस्वाध्यायं-पितृतर्पणं।। ।। प्रौढपादलक्षणंतत्रैव।। आसनारूढपादस्तु जान्वोर्वाजंघयोस्तथा।। कृतावसक्थिकोयस्तुप्रौढपादः सउच्यतइति।। कृतावसक्थिकः कृतपादबंधा।। ।। अदिङ्नियमेनियममाह।। छंदोगपरिशिष्टेकात्यायनः।। यत्र दिङ्नियमोनस्याज्जपहोमादिकर्मसु।। तिस्रस्तत्रदिशः प्रोक्ताऐंद्रीसौम्याऽपराजितेति।। अपराजिताऐशानी।। ।। अनुक्तागेअंगमाह।। ।। छंदोगपरिशिष्टेकात्यायनः।। यत्रोपदिश्यते-कर्मकर्तुरंगंनचोच्यते।। दक्षिणस्तत्रविज्ञेयः कर्मणांपारगः करइति।।

मंत्रेणपवित्रधारणंचाधिकारितावच्छेदकं।। तदुक्तंप्रयोगपारिजाते।। मंत्रेणधारयेद्विप्रः पवित्रंसर्वकर्मसु।। मंत्रंविनाधृतंयत्तु-पवित्रमफलंभवेत्।। पवित्रवंतइत्यादिमंत्रद्वितयमस्यत्विति।। हेमाद्रावत्रिः।। उभाभ्यामेवपाणिभ्यां विप्रैर्दर्भपवित्रके।। धारणीयेप्रयत्नेनब्रह्मग्रंथिसमन्विते।। ब्रह्मयज्ञेजपेचैव ब्रह्मग्रंथिर्विधीयते।। भोजनेवर्तुलः प्रोक्तएवंधर्मोनहीयतइति।। ब्रह्मग्रंथिमत्पवित्रलक्षणमुक्तं।। हेमाद्रौगारुडे।। संत्यज्यवैष्णवंमार्गं-ब्रह्ममार्गविनिःसृतं।। सकृत्प्रदक्षिणीकृत्यपवित्रमभिधीयते।।

तद्ब्रह्मग्रंथिमत्प्रोक्तंपवित्रंवेदवादिभिरिति।। पवित्रकर्तुरभिमुखप्रवेशो ब्रह्ममार्गः।। यदासएवपाशः प्रादक्षिण्येनसमग्रवेष्टनंविधाय-पुरोभागेनप्रवेश्यतेतदाब्रह्मग्रंथिरित्यर्थः।। ।। वृत्तग्रंथि-मत्पवित्रलक्षणमपितत्रैवोक्तं।। ।। अर्धंप्रदक्षिणीकृत्य-शिखायांसंप्रवेशयेत्।। वैष्णवेनैवमार्गेणवृत्तग्रंथौपवित्रकइति।। वैष्णवोमार्गः पश्चाद्भागः। द्विगुणीकृतानांदर्भशिखानांपाशः प्रदक्षिण-मर्धावेष्टनंविधायपश्चाद्भागेनयदाप्रवेश्यते तदावर्तुलोग्रंथिरित्यर्थः।। ।। पवित्रेदर्भसंख्यामाह।। ।। तत्रैवमार्कंडेयः।। चतुर्भिर्दर्भ-पिंजूलैर्ब्राह्मणस्यपवित्रकं।। एकैकंन्यूनमुद्दिष्टंवर्णेवर्णेयथाक्रमं।। सर्वेषांवाभवेद्द्वाभ्यां पवित्रंग्रंथितंनवेति।। एतच्चसंख्या-विशिष्टंपवित्रलक्षणंग्रंथिमत्पवित्रपक्षे।। ।। तदभावपक्षेतुअनंत गर्भिणंसाग्रंकौशंद्विदलमेवच।। प्रादेशमात्रंविज्ञेयंपवित्रं यकुत्रचिदितिछं-दोगपरिशिष्टेकात्यायनोक्तंज्ञेयं।। द्विदलमखंडैकपत्रात्मकमित्यर्थः।। ।। पवित्रधारणस्थानमुक्तमाचारमीमांसायां रत्नावल्यांच।। ।। द्वयोस्तुपर्वणोर्मध्येपवित्रंधारयेद्बुधः।। अनामिकाग्रपर्वेतुनिसर्गंतु-पवित्रकं।। नोच्छिष्टंतत्पवित्रंस्याद्भुक्तोच्छिष्टंविवर्जयेदिति।। कुशपवित्राभावेहेमाद्रौ।। ।। अन्यान्यपि पवित्राणिकुशदूर्वामयानिच।। हेमात्मकपवित्रस्यकलांनार्हंतिषोडशीं।। ।। तत्प्रमाणमाहनागदेवः।।।। माषाणांषोडशादूर्ध्वंकुर्याद्धेमपवित्रकम्।। तेभ्यःस्वल्पतरंन्यूनंन-कुर्वीतकदाचन।। हीनकर्मणिचोच्छिष्टेकुश जातंपवित्रकम्।। निर्माल्यरूपंभवतिनहेम्नश्चपवित्रकमिति।। ।। दर्भकुशकुतपानां लक्षणमाह।। ।। हेमाद्रौकौशिकः।। सप्तपत्राः शुभादर्भास्तिलक्षेत्र सुमुद्भवाः।। तेप्रशस्ताद्विजातीनांदैवेपित्र्येचकर्मणि।। अप्रसूताःस्मृता-दर्भाः प्रसूतास्तुकुशाःस्मृताः।। स मूलाःकुतपाःप्रोक्ताश्छिन्ना-ग्रास्तृणसंज्ञिताइति।। अप्रसूताअसंजातप्रसवाअपुष्पिताइत्यर्थः।। ।। दर्भादीनामयातयामत्वमुक्तं।। ।। हेमाद्रौगृह्यपरिशिष्टे।। दर्भाः

कृष्णाजिनंमंत्राब्राह्मणाहविरग्नयः।। अयातयामान्येतानिनियोज्यानिपुनः
पुनरिति।। यातयामत्वंत्वनेकप्रयोगानर्हत्वं।। अयातयामत्वंतुएकत्र-
विनियुक्तस्याप्यनेकक्रियांतरोपयोगयोग्यत्वं।। हविस्त्राज्यमेव।।
नाज्यादशेषादितिकात्यायनेनाज्यस्यशेषत्वाभावप्रतिपादने-
नयातयामत्वाभावात्पुनः पुनर्विनियोज्यत्वस्यतत्रैवसत्त्वात्।।
पुरोडाशौदनादेस्तुशेषत्वेनपर्युषितत्वेनचयामत्वात्पुनः
पुनर्विनियोज्यत्वस्यासंभवात्।। कोशादावाज्यनामसुहविः
शब्दपरामर्शाच्च।। दर्भाणामयातयामत्वंतुनभो मासीयाऽमा-
वास्यागृहीतदर्भविषयं।। ।। तदाहहारीतः।। मासेनभस्यमा-
वास्यातस्यांदर्भोच्चयोमतः।। अयातयामास्तेदर्भानियोक्तव्याः पुनः
पुनरिति।। ।। निर्माल्यकुशानाह।। ।। हेमाद्रौलघुहारीतः।। चितौदर्भाः
पथिदर्भायेदर्भायज्ञभूमिषु।। स्तरणासनपिंडेषुषट्कुशान्परिवर्जयेत्।।
पिंडार्थयेकृता दर्भायैः कृतंपितृतर्पणं।। मूत्रोच्छिष्टधृताये-
चतेषांत्यागोविधीयते।। नीविमध्येषुयेदर्भा ब्रह्म सूत्रेचयेकृताः।।
पवित्रांस्तान्विजानीयाद्यथाकायस्तथाकुशाइति।। गृह्यपरिशिष्टेपि।।
अमेध्यलिप्तायेदर्भास्तेषांत्यागोविधीयतइति।। ।। आचमनंचाधि-
कारितावच्छेदकं।। ।। तदुक्तंमार्कंडेयेन।। देवार्चनादिकार्या-
णितथागुर्वभिवादनं।। कुर्वीतसम्यगाचम्यप्रयतोपिसदाद्विजइति।।
आचांतस्यप्रयतस्यापिकर्मारंभप्रयुक्तमाचमनमनेनोक्तं भवति।। ।।
कृतप्राणायामत्वमप्यधिकारिविशेषणं।। ।। तदाहवृद्धमनुः।।
प्राणानायम्यकुर्वीतसर्वकर्माणिसंयतः। ।। प्राणायामैस्त्रिभिः
पूतस्ततओंकारमर्हतीति।। ।। प्राणायामलक्षणमाह।।
योगियाज्ञवल्क्यः।। सव्याहृतिंसप्रणवांगायत्रींशिरसासह।। त्रिः
पठेदायतप्राणः प्राणायामः सउच्यतइति।। ।। कर्मादौप्रणवोच्चारः
कार्यइत्युक्तं।। ।। दाल्भ्यपरिशिष्टे।। ब्रह्मयज्ञोजपोहोमोदेवर्षि-
पितृकर्मच।। अनोंकृत्यकृतंसर्वंन भवेत्सिद्धिकारकमिति।।

शाठ्यायनोपि।। दानयज्ञतपः स्वाध्यायजपध्यानसंध्योपासन-
प्राणायामहोमदैवपित्र्यमंत्रोच्चारब्रह्मारंभादीनिप्रणवमुच्चार्य-
प्रवर्तयेदिति।। अतश्चमंत्रमात्रोच्चारणे आदावोंकारः कार्यइति-
सर्वानुक्रमसूत्रभाष्ये।। ।। केचित्तुप्रवर्तयेदितिवचनात्प्रारंभएवयुक्तः।।
तथाचछंदोगपरिशिष्टेकात्यायनः।। नोंकुर्याद्धोममंत्राणांपृथ-
गादिषुकुत्रचित्।। अन्येषांचाविकृष्टानांकालेनाचमनादिनेति।।
सचत्रिमात्रस्ता दृशस्यैवविनियोगात्।। मदनरत्नेव्यासः।।
त्रिमात्रस्तुप्रयोक्तव्यः कर्मारंभेषुसर्वदेति।। ओमित्यधि-
कृत्यापस्तंबोप्येवमेवाह।। अस्यपृथग्विधित्वान्मंत्रेणसहनसंधिः।।
पृथग्विधानेनसहसंधिर्नभवतीत्युपपादितंत्विषिमान् भूयासमिति-
सूत्रेकर्कोपाध्यायैः।। अध्याहारस्यतुलौकिकत्वान्मंत्रेणसहसंध्य-
भावइत्यपिप्रतिपादितंपशुंपूर्वँ समनक्तीत्यधिकृत्यसंतइतिप्रतिमं-
त्रमितिसूत्रेकर्कोपाध्यायैः।। ।। ऋष्याद्यज्ञानेदोषमाह।। ।।
दानहेमाद्रौयाज्ञवल्क्यः।। आर्षंछंदश्चदैवत्यंविनियोगस्तथैवच।।
वेदितव्यंप्रयत्नेनब्राह्मणे नविशेषतः।। अविदित्वातुयःकुर्याद्याजना-
ध्ययनंजपं।। होममंतर्जलादीनितस्य चाल्पफलंभवेदिति।।
अत्रब्राह्मणंचविशेषतइतिमदनरत्नेदानकांडेपाठः।। ।। ऋष्यादिज्ञाने-
फलमाह।। ।। याज्ञवल्क्यः।। पूर्वोक्तेनप्रकारेणऋष्यादी-
न्वेत्तियोद्विजः।। अधिकारोभवेत्तस्यरहस्यादिषुकर्मस्विति।। ।।
क्वचिदस्यापवादः।। ।। कृष्णभट्टीये।। नचस्मरेदृषिच्छंदः
श्राद्धेवैतानिकेमखइति।। ।। अन्यत्र।। ।। अग्निहोत्रेवैश्वदेवे-
विवाहादिविधौतथा।। होमकालेन दृश्यंतेप्रायश्छंदर्षिदेवताः।।
शांतिकादिषुकार्येषुमंत्रपाठक्रियादिषु।। होमेनैवप्रकर्तव्याः
कदाचिदृषिदेवताइति।। ।। नारायणनतिश्चाधिकारविशेषणं।। ।।
तदुक्तंवामनपुराणे।। सर्वमंगलमांगल्यंवरेण्यंवरदंविभुं।।
नारायणंनमस्कृत्यसर्वकर्माणिकारयेदिति।। नारायणग्रहणंगणेशोमा

महेश्वराद्युपलक्षणम्।। ।। कृतसंकल्पत्वमप्यधिकारितावच्छेदकं।। ।। तदुक्तंमार्कंडेयपुराणे।। संकल्पंविधिवत्कुर्यात्स्नानदानव्रतादिकमिति।। दक्षोपि।। प्रातः संध्यांततः कृत्वासंकल्पंबुधआरचेदिति।। अत्रसंकल्प शब्देनामुकफलार्थमिदंकर्मकरिष्यइत्याकारकंमानसंकर्मोच्यते।। तदुक्तंभट्टाचार्यैः।। संकल्पः कर्ममानसमिति।। तत्रविशेषमाह।। ।। देवलः।। मासपक्षतिथीनांचनिमित्तानांचसर्वशः।। उल्लेखनमकुर्वाणोनतस्यफलभाग्भवेदिति।। ।। संकल्पेनविनाकर्मकरणेदोषउक्तः।। ।। तिथितत्त्वेभविष्येच।। संकल्पेनविनाकर्मयत्किंचित्कुरुतेनरः।। फलंचाप्यल्पकंतस्यधर्मस्यार्धक्षयोभवेदिति।। ।। उदकोपस्पर्शनिमित्तान्याह।। कात्यायनः।। रौद्रँराक्षसामसुरमाभिचारणिकंमंत्रमुक्त्वापित्र्यमात्मानंचालभ्योपस्पृशेदपइति।। अत्रचशब्दात्तद्दैवत्यं कर्मकृत्वेतिकर्कोपाध्यायादयः।। ।। हेमाद्रौयाज्ञवल्क्योपि।। रौद्रपित्रासुरान्मंत्रांस्तथा चैवाभिचारिकान्।। व्याहृत्यालभ्य चात्मानमपः स्पृष्ट्वान्यदाचरेदिति।। ।। छंदोगपरिशिष्टेकात्यायनोपि।। पित्र्यमंत्रानुद्रवणेआत्मालंभेअवेक्षणे।। अधोवायुसमुत्सर्गेप्रहासेनृतभाषणे।। मार्जारमूषकस्पर्शेआक्रुष्टेक्रोधसंभवे।। निमित्तेष्वेषुसर्वत्रकर्म कुर्वन्नपःस्पृशेदिति।। अनुद्रवणमुच्चारणं।। आत्मालंभोहृदयस्पर्शः।। अवेक्षणमपितस्यैव।। अत्रपित्र्यमंत्रोच्चारणात्मालंभावेक्षणानियज्ञादौविहितान्येवग्राह्याणि। नलौकिकानि।। प्रहासेमहतिहासेनस्मितमात्रे।। मार्जारस्पर्शोमार्जारकृतएव।। स्वयंकृतेतुस्नानस्योक्तत्वात्।। आक्रुष्टेपरुषभाषणे।। क्रोधसंभवोमानसिकोपि।। अत्रापः स्पृशेदित्यनेन अपांस्पर्शनमेवविवक्षितंनत्वाचमनमितिभर्तृयज्ञादयः सर्वेकल्पसूत्रभाष्यकाराः व्याख्यातवंतः।। संप्रदायादयः पद्धतिकाराश्च।। अपांस्पर्शनमाचमनमितिहेमाद्रिणाव्याख्यातं।। अत्रसर्वेषुवाक्येष्वपः स्पृशेदितिपाठादपः स्पर्शेजलस्पर्शएवयाज्ञिकसंप्रदायाविरुद्धः।। वसिष्ठः।। क्षुतेनिष्ठीविते-

सुप्ते परिधानेश्रुपातने।। पंचस्वेतेषुचाचामेच्छ्रोत्रंवादक्षिणंस्पृशेदिति।। ।। कर्मकालेऽधमांगस्पर्शनिषेधमाह।। ।। मदनरत्नेबौधायनः।। कर्मयुक्तो नरोनाभेरधः स्पर्शंविवर्जयेदिति।। ।। कर्मकालेऽधम-जनसन्निधिनिषेध।। ।। स्कंदपुराणे।। पाखंडिनश्चपतितायेचवैनास्तिकाद्विजाः।। पुण्यकर्मणितेषांवैसन्निधिर्नेष्यते क्वचिदिति।। ।। कर्मकालेनिंद्यशब्दानाह।। ।। हेमाद्रौयाज्ञवल्क्यः।। पेषणादिक-यंत्रेषुशब्दोयावत्प्रवर्तते।। पतितांत्यज चांडालादीनांयावच्चशब्दकः।। तावत्कर्मनकर्तव्यंतथासंध्याद्वयेपिचेति।। ।। उपांशुलक्षणमाह।। ।। आचारप्रदीपेयाज्ञवल्क्यः।। विनाशब्दंजपोयस्तुचलज्जिह्वाद्वि-जच्छदः।। उपांशुतंजपंप्राहुर्मनसामानसंबुधइति।। ।। वाग्यमलोपेप्रायश्चित्तमाह।। ।। याज्ञवल्क्यः।। यदिवाग्यमलोपः स्याज्जपादिषुकथंचन।। व्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययमिति।। ।। अक्रियालक्षणमाह।। ।। छंदोगपरिशिष्टेकात्यायनः।। अक्रियात्रिविधाप्रोक्ताविद्वद्भिःकर्मकारिणां।। अक्रियाचपरोक्ताच तृतीयाचायथाक्रियेति।। ।। परोक्तकर्माश्रयणेदोषमाह।। ।। कात्यायनः।। स्वशाखाश्रयमुत्सृज्य परशाखाश्रयंतुयः।। कर्तुमिच्छतिदुर्मेधामोघंतत्तस्यचेष्टितमिति।। ।। अविरुद्ध-परोक्तकर्माश्रयणमाह।। सएव।। यन्नाम्नातंस्वशाखायांपरोक्त-मविरोधियत्।। विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवदिति।। ।। यत्तुगृह्यपरिशिष्टं।। ।। बह्वल्पंवास्वगृह्योक्तंयस्यकर्मप्रकीर्तितं।। तस्यतावतिशास्त्रार्थेकृतेसर्वंकृतं भवेदितितत्साधारणानां-परोक्तानांचनावश्यकमनुष्ठानमित्येवंपरंनतुस्व गृह्योक्तमात्रमेवानुष्ठेय-मिति।। ।। अयथाकर्मकरणे।। गृह्यपरिशिष्टेकात्यायनः।। प्रवृत्त-मन्यथाकुर्याद्यदिमोहात्कथंचन।। यतस्तदन्यथाभूतं तत एव-समापयेदिति।। ।। कर्मसमाप्त्यनंतरंज्ञाने।। ।। तत्रसएवाह।। समाप्तेयदिजानीयान्मयैतदयथाकृतं।। तावदेवपुनः कुर्यान्नावृत्तिः

सर्वकर्मणइति।। एतच्चपुनरनुष्ठानमविलंबेसुकरत्वेचकर्तव्यं।।
यत्रतुविलंबोदुष्करत्वंवातत्रविष्णुस्मरणमेवनावृत्तिः।। ।। प्रधा-
नक्रियाकरणे।। ।। सएवाह।। प्रधानस्याक्रियायत्रसांगंत-
त्क्रियतेपुनः।। तदंगस्याक्रियायांतुनावृत्तिर्नचतत्क्रियेति।। किंतुतत्-
समाधानार्थं।। अज्ञानाद्यदिवामोहात्प्रच्यवेताध्वरेषुयत्।।
स्मरणादेवतद्विष्णोः संपूर्णंस्यादितिश्रुतिरितियाज्ञवल्क्योक्तं
प्रायश्चित्तमनुष्ठेयं।। एवंसमाप्तेप्रयोगेअकरणज्ञानेप्येतदेवसमाधानमिति
दिक्।। ।। पंचोपचारानाह।। ।। जाबालिः।। ध्यानमावाहनं-
चैवभक्त्यायच्चनिवेदनं।। नीराजनंप्रणामश्चपञ्चपूजोपचारकाइति।।
अन्यत्रापि।। गन्धपुष्पेधूपदीपौनैवेद्यंपंचतेक्रमादिति।। ।।
दशोपचाराः।। ।। ज्ञानमालायां।। अर्घ्यंपाद्यंचाचमनंस्नानंवस्त्रनिवेदनं।।
गन्धादयोनैवेद्यांताउपचारादशक्रमादिति।। षोडशोपचाराः।।
ज्ञानमालायां।। आसनंस्वागतंचार्घ्यं पाद्यमाचमनीयकम्।।
मधुपर्कार्पणंस्नानंवसनाभरणानिच।। सुगन्धः सुमनोधूपौदीपो-
नैवेद्यमेवच।। माल्यानुलेपनेचैवनमस्कारोविसर्जनमिति।।
नागदेवोपि।। आवाहनासनेपाद्यमर्घ्यमाचमनीयकम्।।
स्नानंवस्त्रोपवीतेचगन्धमाल्यादिभिः क्रमात्।। धूपो-
दीपश्चनैवेद्यंनमस्कारः प्रदक्षिणा। उद्वासनंषोडशकमेवंदेवार्चने-
विधिरिति।। ।। पंचगव्यम्।। ।। स्कांदे।। गोमूत्रंगोमयंक्षीरं-
दधिसर्पिर्यथाक्रममिति।। ।। मधुरत्रयमाह।। ।। कात्यायनः।।
आज्यंक्षीरंमधुतथामधुरत्रयमुत्तममिति।। ।। मधुपर्कद्रव्याण्याह।।
।। आपस्तंबः।। सर्पिरेकगुणंप्रोक्तंशोधितंद्विगुणं मधु।। मधुपर्क-
विधौप्रोक्तंसर्पिषाचसमंदधीति।। ।। पंचामृतानि।। ।। शिवधर्मे।।
पंचामृतंदधिक्षीरंसितामधुघृतंनृपेति।। ।। अर्घद्रव्याणि।। ।।
छंदोगपरिशिष्टे।। आपः क्षीरंकुशाग्राणिदध्यक्षततिलास्तथा।। यवाः
सिद्धार्थकाश्चेतिह्यर्घोष्टांगः प्रकीर्तितइति।। ।। अमृताह्वयधूपद्रव्याणि।।

।। भविष्ये।। अगरुंचंदनं मुस्तासिह्लकंवृषणंतथा।। समभागंतुकर्त-
व्यंधूपोयममृताह्वयइति।। पंचरत्नानि।। ।। आदित्यपुराणे।।
कनकंकुलिशंनीलंपद्मरागंचमौक्तिकमिति।। पंचभंगा।।
ब्रह्मांडपुराणे।। अश्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्लवाइति।। ।।
यक्षकर्दमः।। ।। हेमाद्रौ।। कस्तूरिकायाद्वौभागौ द्वौ भागौ कुंकु-
मस्यच।। चंदनस्यत्रयोभागाः शशिनस्त्वेकएवहीति।। सर्व-
गंधद्रव्याणि।। ।। मदनरत्ने।। कुंकुमागरुकर्पूरकस्तूरीचंदनंतथा।।
जातीफलमितिप्रोक्ताः सर्वगंधाः सदाबुधैरिति।। ।। सर्वौषधयः।।
।। छंदोगपरिशिष्टे।। कुष्ठंमांसी हरिद्रेद्वेमुराशैलेयचंदनं।।
वचाचंपकमुस्तंचसर्वौषध्योदशस्मृताइति।। ।। सप्तमृदः।। ।।
मात्स्ये।। गजाश्वरथ्यावल्मीकसंगमाह्रदगोकुलात्।। मृदमानीय-
कुंभेषुप्रक्षिपेच्चत्वरादपीति।। ।। सप्तधान्यानि।। ।। भविष्ये।।
यवगोधूमधन्यानितिलाः कंगूस्तथैवच।। श्यामाकाश्चणकाश्चैवसप्त-
धान्यमुदाहृतमिति।। ।। सप्तधातवः।। ।। तत्रैव।। सुवर्णंरजतं
ताम्रमारकूटंतथैवच।। लोहंत्रपुतथासीसंधातवः सप्तकीर्तिताइति।।
।। पंचरंगाः।। ।। पंचरात्रे।। रजांसिपंचवर्णानिमंडलार्थंहिकारयेत्।।
शालितंडुलचूर्णेनशुक्लंवायवसंभवं।। रक्तंकुसंभसिंदूरगैरिकादि-
समुद्भवं।। हरितालोद्भवंपीतंरजनीसंभवंतथा।। कृष्णंदग्धयवै-
र्नीलंपीतकृष्णविमिश्रित मिति।। कलशास्तत्प्रमाणंच।। ।। विष्णु-
धर्मोत्तरे।। हैमराजतताम्राश्चमृन्मयालक्षणान्विताः।। पंचाशांगुल-
वैपुल्याउत्सेधेषोडशांगुलाः।। द्वादशांगुलमूलाः स्युर्मुखमष्टांगुलं-
भवेदिति।। पंचचआशाश्चपंचाशाः।। पंचाधिकदशमंगुला-
निवैपुल्यमित्यर्थः।। ।। पूर्णपात्रलक्षणं।। ।। तत्रैव।। धातुजंमृन्मयं-
वापिकलशंयत्प्रतिष्ठितं।। तद्वत्प्रादेशदीर्घंचचतुरंगुलमुच्छ्रितं।।
सिततंदुलपूर्णेनपात्रेणपिहिताननमिति।। ।। यज्ञियवृक्षाः।। ।।
प्रतिष्ठाहेमाद्रौब्राह्मेच।। शमीपलाशन्यग्रोधप्लक्षवैकंकतोद्भवाः।।

अश्वत्थोदुंबरौबिल्वश्चंदनः सरलस्तथा।। शालश्चदेवदारुश्च-खादिरश्चेतियाज्ञिकाइति।। ।। समिल्लक्षणमाह।। ।। छंदोगपरिशिष्टेकात्यायनः।। नांगुष्ठादधिका ग्राह्यासमित्स्थूलतराक्वचित्।। नवियुक्तत्वचाचैवनसकीटानपाटिता।। प्रादेशान्नाधिका नोनानसशाखाविशाखिका।। नसर्पणानर्निर्वीर्याहोमेषुतु विजानतेति।। ।। शूद्रानीतसमिदादीनांनिषेधमाह।। ।। आचारप्रदीपेशंखः।। समित्पुष्पकुशादीनिब्राह्मणः स्वयमाहरेत्।। शूद्रानीतैः क्रयक्रीतैः कर्मकुर्वन्व्रजत्यधइति।। ।। ब्रह्मविष्टरलक्षणमाह।। ।। स्मार्तोल्लासे। पंचाशद्भिर्भवेद्ब्रह्मातदर्धेनतुविष्टरः।। दक्षिणावर्तकोब्रह्मा-वामावर्तस्तुविष्टर इति।। ।। सुवर्णरजतताम्रोन्मानमाह।। ।। याज्ञवल्क्यः।। जालसूर्यमरीचिस्थंत्रसरेणुरजः स्मृतं। तेष्टौलिक्षातु-तास्तिस्रोराजसर्षपउच्यते।। गौरस्तुतेत्रयः षट्तेयवोमध्यश्चतेत्रयः।। कृष्णलः पंचतेमाषस्तेसुवर्णस्तु षोडश।। पलंसुवर्णाश्चत्वारः पंचवापिप्रकीर्तितं।। द्वेकृष्णलेरूप्यमाषोधरणंषोडशैवते।। शतमानंतुदशभिर्धरणैः पलमेवतु।। निष्कः सुवर्णाश्चत्वार इति।। पूर्वोक्ताश्चत्वारः सुवर्णाराजतोनिष्कइत्यर्थः।। कार्षिकस्ताम्रिकः पणइति।। पलचतुर्थांशेनकर्षेणोन्मितः कार्षिकस्ताम्रसंबंधि-पणोभवति।। कार्षापणसंज्ञश्चस्मृत्यंतरेपि।। षोडशपणः पुराणः पाणोभवेत्काकिणी चतुष्केण।। पंचाहतैश्चर्तुर्भिर्वराटकैः काकिणीचैकेति।। तथाचदेशादिभेदेनपणादिव्यवहारोज्ञेयइति।। धान्यमानं।। ।। भविष्यत्पुराणे।। पलद्वयंतुप्रसृतंद्विगुणंकुडवंमतं।। चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वारआढकः।। आढकैस्तैश्चतुर्भिश्च-द्रोणस्तुकथितोबुधैः।। कुंभोद्रोणद्वयंशूर्पः खारीद्रोणास्तुषोडशेति।। द्रोणद्वयस्यैवशूर्पइतिसंज्ञा।। गोपथे।। पंचकृष्णलकोमाषस्तैश्चतुः षष्टिभिःपलं।। द्वात्रिंशद्भिः पलैः प्रस्थोमागधेषुप्रकीर्तितः।। आढकैस्तैश्चतुर्भिश्चद्रोणः स्याच्चतुराढकइति।। विष्णुधर्मोत्तरे।।

पलंचकुडवः प्रस्थआढकोद्रोणएवच।। धान्यमानेषुबोद्ध-
व्याक्रमशोमीचतुर्गुणाः।। द्रोणैःषोडशभिः खारीविंशत्याकुंभउच्यते।।
कुंभैस्तुदशभिर्वाहोधान्यसंख्याप्रकीर्तितेति।। विंशत्येत्यत्रद्रोणैरिति-
संबध्यते।। तथाच।। कुंभोद्रोणद्वयमितिपक्षाद्विंशतिद्रोणमितः
कुंभइतिपक्षांतरं।। पलसहस्रमितः कुंभइत्यपिपक्षांतरंज्ञेयं।। वाराहे।
पलद्वयंतुप्रसृतंमुष्टिरेकपलंस्मृतं।। अष्टमुष्टिभवेत्किंचित्कि-
चिदष्टौतुपुष्कलं।। पुष्कलानिच चत्वारिआढकः परिकीर्तितः।।
चतुराढकोभवेद् द्रोणइत्येतन्मानलक्षणमिति।। एतत्पक्षाणां-
शक्तिदेशकालाद्यपेक्षयाव्यवस्थाबोद्धव्येति।। ।। धनिकादिलक्षणं।।
हेमाद्रौवाराहे।। वर्धयित्वाधनंयस्तुतस्माद्ग्रासमपीहयः।।
नखादेत्संग्रहपरोधनिकः सउदाहृतः।। पोषणीयकुटुंबस्यनिर्वा-
होयावताभवेत्।। तावदेवसुखंयस्तुलभतेप्रतिवार्षिकं।।
ऋणंयस्यतुनास्त्येवसमध्यमउदाहृतः।। धनंपूर्वापरंयस्यवर्तते-
बहुसंख्यया।। अधिकस्यार्जकोयः स्यात्समहाधनिउच्यते।।
सदाचाररतोविप्रोधनार्जनपराङ्मुखः।। कुटुंबयत्नमतिकः
सदरिद्रइतिस्मृतः।। यस्यस्यादशनाभावः सदाचाररतस्यहि।।
महादरिद्रः सभवेद्ग्रासोधान्यविवर्जितः।। वर्धयित्वाधनंय-
स्तुग्रासवार्षिकमर्जयेत्।। सवैधन्यइतिप्रोक्तश्चैकवर्षेणयः पुमान्।।
वर्षद्वयमितंग्रासंसहिधन्यतरः स्मृतः।। अधिकस्यार्जकोयः स्यात्सध-
न्यतमईरितः।। धनेनैवविनायस्तुग्रासंवार्षिकमर्जयेत्।। सवैधीर-
इतिप्रोक्तस्तारतम्यंचपूर्ववदिति।। ।। धनिकादीनांदक्षिणादि-
दानेव्यवस्था।। ।। तत्रैव।। लक्षहोमं प्रकृत्य।। व्याहृतीनांसहस्रस्य-
होमेशुल्कंद्विजेर्पयेत्।। माषमात्रंसुवर्णंतुलक्षहोमेशतंयवा।।
धनिकोद्विगुणंदद्यात्त्रिगुणंतुमहाधनी।। यवार्धंतुदरिद्रेणदातव्यं-
कर्मसिद्धये।। दद्यान्महादरिद्रस्तुतदर्धंशुक्लमेवचेति।। एवमर्थ-
तारतम्येनमाध्यमिकानांदक्षिणादिदानेव्यवस्थाकल्पनीया।।

मुख्यकल्पशक्तावनुकल्पेनकर्मकरणेदोषमाह।। ।। मनुः।। प्रभुः प्रथमकल्पस्ययोनुकल्पेनवर्तते।। सनाप्नोतिफलंतस्यपरत्रेतिश्रुतिः स्मृतिरिति।। । होमद्रव्यमानं।। ।। पदार्थादर्शे।। कर्षप्रमाणमाज्यं-स्याच्छुक्तिमात्रंपयः स्मृतं।। उक्तानिपंचगव्यानिशुक्तिमात्राणि-साधुभिः।। तत्समंमधुदुग्धान्नंग्रासमात्रमुदाहृतं।। दधिप्रसृतिमात्रं स्याल्लाजास्युर्मुष्टिसंमिताः।। पृथुकास्तत्प्रमाणाः स्युः सक्तवोपितथाविधाः।। पलार्धंगुडमानंचशर्करापितथाविधा।। ग्रासार्धमात्रमन्नानामिक्षुः सर्वप्रमाणकः।। एकंस्यात्पत्रपुष्पेचतथा-धूपादिकल्पयेत्।। मातुलिंगंचतुःखंडंपनसंदशधाकृतं।। अष्ट-धानारिकेरंच चतुर्धाकदलीफलम्।। त्रिधाकृतंफलं-बैल्वंकपित्थंखंडितंद्विधा।। व्रीहयोमुष्टिमानाः स्युर्मुद्गामाषाय-वास्तथा।। तंदुलास्तुतदर्धंतुकोद्रवामुष्टि संमिता।। लवणंशुक्ति-मात्रंस्यान्मरीचान्येकविंशतिः।। खंडत्रयंतु मूलानांफलानांस्व-प्रमाणतः।। अन्येषांग्रासमात्रंतुप्रसृतिः पायसस्यतु।। अक्षतास्तुयवाः प्रोक्तास्तंडुलाव्रीहयस्था।। एषांकेषांचिद्द्रव्याणामप्यसंभवे आज्यंउपादेयं।। भरद्वाजमतात्।। चंद्रचंदनकाश्मीरकस्तूरीय-क्षकर्दमम्।। फलोपसंमितानेतान् गुग्गुलंबदरास्थिवत्।। द्रवंस्त्रुवेणहोतव्यं पाणिनाकठिनंहविरिति।। होममुद्रालक्षणमाह।। वसिष्ठः।। तिस्रोमुद्रास्तुसंप्रोक्तामृगी हंसीचसूकरी।। सूकरीकरसंकोचाद्धंसीमुक्तकनिष्ठिका।। कनिष्ठातर्जनीही-नामृगीमुद्रातिलाहुतौ।। शांतिकर्मणिसर्वत्रमृगीहंसीशुभेउभे।। अभिचारेषु सर्वेषुसूकरीतुप्रकीर्तितेति।। ।। उक्तद्रव्यालाभेप्रति-निधिः।। विष्णुधर्मोत्तरे।। दध्यलाभेपयः कार्यंमध्वलाभेतथागुडः।। घृतप्रतिनिधिंकुर्यात्पयोवादधिवानृपेति।। बौधायनः।। आज्यहोमेषु-सर्वेषुगव्यमेवभवेद्धृतं।। तदलाभेमहिष्यास्तु आजमाविकमेवच।। तदलाभेतुतैलंस्यात्तदलाभेतुजार्तिलं।। तदभावेतुकौसुंभंतदभावेतु-

सार्षपमिति।। ब्राह्मे।। यथोक्तवस्त्वसंपत्तौग्राह्यंतदनुकारियत्।। यवानामिवगोधूमाव्रीहीणामिवशालयइति।। ।। द्रव्यदेवतयोरनादेशे।। ।। ब्राह्मे।। आज्यंद्रव्यमनादेशेजुहोतिषुविधीयते।। मंत्रस्यदेवता-याश्चप्रजापतिरितिस्थितिः।। अनादेशेअविधाने।। प्राजापत्योमंत्र समस्तव्याहृतयइतिमदनः।। स्मृत्यंतरेपि।। नव्याहृत्यासमोमंत्रइति।। मूलमंत्रः।। गारुडे।। प्रणवादिनमोंतंचचतुर्थ्यंतंचसत्तम।। देवतायाः स्वकंनाममूलमंत्रः प्रकीर्तितइति।। ।। कर्मांगस्वस्तिवाचनदेवता-नामानि।। धर्मसिंधौ।। विवाहस्याग्निर्देवता।। तेनविवाहांग-भूतस्वस्तिवाचनांते कर्मांगदेवताग्निः प्रीयतामितिवदेत्।। औपासनेग्निसूर्यप्रजापतयः।। स्थालीपाकेग्निः।। गर्भाधानेब्रह्मा।। पुंसवनेप्रजापतिः।। सीमंतेधाता।। जातकर्मनामकर्मनिष्क्रमणान्न-प्राशनेषुसविता।। चौलेप्रजापतिः।। उपनयनेइंद्रः।। व्रततुर्ये-अपापकः।। अंतेसुश्रवाः।। पुनरुपनयनेग्निः।। समावर्तनस्येंद्रः ।। उपाकर्मणिव्रतेषुचसविता।। वास्तुहोमेवास्तोष्पतिरंतेप्रजापतिः।। अन्येष्विष्टकर्मसूप्रजापतिरिति।। ।। कर्मविशेषेग्निनामान्याह।। ।। वसिष्ठः।। अग्निस्तुमारुतोनामगर्भाधानेविधीयते।। पावमानः पुंसवनेश्रृंगारः कर्णवेधने।। सीमंतेमंगलोनामप्रबलोजातकर्मणि।। नाम्नितुपार्थिवोवह्निः प्राशनेतुशुचिः स्मृतः।। सभ्योनामाग्निश्चौ-लेतुव्रतादेशे समुद्भवः।। गोदानेसूर्यनामातुविवाहेयोजकः स्मृतः।। चतुर्थ्यांसाक्षिनामातुधृतिरग्निस्तथा परः।। आवसथ्येभवोज्ञेयोवैश्व-देवेतुपावकः।। ब्रह्माच गार्हपत्येतुईश्वरोदक्षिणस्तथा।। विष्णुश्चाहवनीयेचअग्निहोत्रेत्रयोग्नयः।। वह्निस्तुलक्षहोमेतुकोटिहोमे-हुताशनः।। पूर्णाहुत्यांमृडोनामशांतिकेवरदस्तथा।। प्रायश्चित्ते-दितिर्नामपाकयज्ञेतुसाहसः।। पौष्टिके बलदोनामक्रोधाग्निश्चा-भिचारके।। वृष्ट्यर्थेशिखिनामाग्निर्वनदाहेषुसूचकः।। कुक्षौतु जठराग्निश्चक्रव्यादोमृतभक्षणे।। वृषोत्सर्गेरौद्रनामानीलोद्वा-

हेतथाहिसः।। देवानांहव्यवाहोग्निः पितॄणांकव्यवाहनः।।
समुद्रेवाडवोवह्निःक्षये संवर्तकस्तथैति। आदित्यादिग्रहाणांच-
संप्रतिह्यग्निरुच्यते।। आदित्येकपिलोनामपिंगलः सोमउच्यते।। धू
ूमकेतुस्तथा भौमेजठरोग्निर्बुधेस्मृतः।। बृहस्पतौशिखीनाम-
शुक्रेभवतिहाटकः।। शनैश्चरेमहातेजाराहौकेतौहुताशनइति।। ।।
अग्निधमनविचारः।। ।। कात्यायनस्मृतौ।। नकुर्यादग्निधमनं-
पाणिशूर्पादिभिः क्वचित्।। मुखेनैवधमेदग्निंयतोवेदाविनिः सृताइति।।
।। असमिद्धाग्नौहोमे।। ।। छंदोगपरिशिष्टेकात्यायनः।।
योनर्चिषिजुहोत्यग्नौव्यंगारिणिचमानवः।। मंदाग्निरामयावी-
चदरिद्रश्चप्रजायतइति।। ।। आहुतिकालमाह।। ।। देवयाज्ञिकः।।
मंत्रेणोकारपूतेनस्वाहांतेनविचक्षणः।। स्वाहावसानेजुहुयाद्ध्या-
यन्वैमंत्रदेवतामिति।। ।। अनुक्तसंख्यहोमाहुतिनिर्णयः।। ।। मात्स्ये।।
अनुक्तसंख्यायत्रस्याच्छतमष्टोत्तरंस्मृतं।। अष्टाविंशतिर-
ष्टौवायथाशक्तिविधीयतइति। ।। प्राजापात्यादितीर्थनिर्णयमाह।। ।।
योगीयाज्ञवल्क्यः।। कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रंकरस्यच।। प्रजापति
पितृब्रह्मदेवतीर्थान्यनुक्रमादिति।। देशिनीतर्जनी। ।। देवपितृकर्मकंडन-
निर्णयः।। ।। स्मार्तोल्लासे।। कंडनेपेषणंचैवतथैवोल्लेखनंतथा।।
सकृदेवपितॄणांस्याद्देवानांतत्त्रिरुच्यतइति।। ।। प्रतिमाद्रव्यंतत्प्रमाणंच।।
।। भविष्ये।। सौवर्णीराजतीताम्रीवृक्षजामार्तिकीतथा।।
चित्रजापिष्टलेपोत्था निजवित्तानुसारतः।। आमाषात्पलपर्यंताकर्तव्या-
शाठ्यवर्जितैः।। अंगुष्ठपर्वादारभ्यवितस्त्यवधिकास्मृतेति।। ।।
स्मार्तकर्मक्रमः।। ।। धर्मसिंधौ।। संकल्पः स्वस्तिवाग्विप्रवरणं-
भूतनिःसृतिः।। पंचगव्यैर्भूमिशुद्धिर्मुख्यदैवतपूजनम्।।
अग्निप्रतिष्ठासूर्यादिग्रहस्थापनपूजनम्।। देवतान्वाहितिः पात्रा-
सादनंहविषां कृतिः।। यथाक्रमत्यागहोमावितिपूर्वांगकक्रमः।।
पूजास्विष्टंनवाहुत्याबलिः पूर्णाहुतिस्तथा। पूर्णपात्रविमो-

काद्यग्न्यर्चनांतेभिषेचनं।। मानस्तोकेतिभूतिश्चदेवपूजाविसर्जने।। श्रेयोग्रहोदक्षिणादिदानंकर्मेश्वरार्पणं।। क्रमोयमुत्तरांगानांप्रायः स्मार्तेष्विवितिस्थितिरिति।। कर्मांगब्राह्मणभोजनसंख्या।। यज्ञपार्श्वे।। गर्भाधानादिसंस्कारेब्राह्मणान्भोयजेद्दश।। शतं विवाह-संस्कारेपंचाशन्मेखलाविधौ।। आवस्थ्ये त्रयस्त्रिंशच्छ्रौताधाने-शतात्परं।। अष्टकंभोजयेद्भक्त्यातत्संस्कारसिद्धये।। आग्रयणे-प्रायश्चित्तेब्राह्मणान्दशपंचचेति।। ।। इतिपरिभाषाप्रकरणम्।। ।।

अथगर्भाधानं।। तत्रप्रथमरजोदर्शनेत्रयोदशदोषाः ज्योतिः शास्त्रेउक्तास्तेषांनिरसनार्थंशांतिंकृत्वागर्भाधानंकार्यं।। ।। अत्राग्नि-चक्रावलोकनमवश्यं तथापिकर्मविशेषेणवह्निचक्रस्याना-वश्यकताप्रदर्शिता।। ।। ज्योतिर्निबंधे।। दुर्गाहोमविधौ-विवाहसमयेसीमंतपुत्रोत्सवेगर्भाधानविधौचवास्तुसमये विष्णोः प्रतिष्ठादिषु।। मौंजीबंधनवैश्वदेवकरणेसंस्कारनैमित्तिकेहोमो नित्यभवेन्नदोषकथितंचक्रं चवह्नेरपीति।। ।। अथगर्भाधानादौरजो-दर्शनशांति।। ।। तामाहनारदः।। निंद्यर्क्षतिथिवारेषुयदिपुष्पंप्रदृश्यते।। अशुभंचेद्रजः स्त्रीणांनिंद्यस्थानचवाससी।। तत्रशांतिंप्रकुर्वीतग्रह-यज्ञपुरः सरं।। सुमुहूर्तेतुसंप्राप्तेकुर्याच्छांतिंयथाविधि।। विधा-नंतत्रकर्तव्यमरिष्टघ्नंविशेषतः।। दंपत्योः प्रातरेवस्यान्मंगलस्नान-मुत्तमं।। पंचमेदिवसेस्नात्वाद्वाभ्यामप्यत्रमंगलैः।। तिलतैलेनशुद्धेन-शुभकल्केनवापुनः।। उष्णैश्चवारिभिः श्रेष्ठैः पंचपल्लवसंयुतैः।। आह्निकंविधिवत्कृत्वाविधानंनूनमाचरेत्।। शुभाचारसमायुक्तः श्रद्धयापरयायुतः।। तिथिश्रवणकंकुर्याच्छांतिसंकल्पपूर्वकं।। पुण्याहंवाचयेत्पश्चाद्ब्राह्मणैर्वेदपारगैः।। कृत्वाभ्युदयिकंश्राद्धमा-चार्यंवरयेत्ततः।। स्थंडिलंचततःकृत्वाअग्निसंस्थापयेत्ततः।। ईशान्यां चतुरः कुंभान्स्थापयेद्वारिपूरितान्।। पंचपल्लवसंयुक्तान्पंक्तिरूपेण-साधयेत्।। कुंभोपरि न्यसेत्पात्रंशालितंदुलपूरितं।। पात्रोपरिन्यसेद्वस्त्रं-

प्रतिकुंभंपृथक्पृथक्।। सूर्यंचविन्यसेदाद्येइंद्रेंद्राण्यौततः परं।।
चतुर्थेविन्यसेद्विद्वान्प्रतिमांभुवनेश्वरीं।। ततोग्रहांश्चसंपूज्ययथाविधि-
विधानतः।। सूर्यकुंभंतुसंस्पृष्ट्वासूर्यसूक्तंजपेद्द्विजः।। रुद्रैकादशनीं-
चापिजपेत्तत्रसमाहितः।। प्रधानंपायसंप्रोक्तंसघृतंचसर्शकरं।।
अष्टोत्तरसहस्रंतुशतमष्टोत्तरंतुवा।। प्रत्येकदेवतानांचजुहुर्यात्तिलसर्पिषा।।
आकृष्णेनेतिसूर्यंचइंद्रंत्रातारमिंद्रतः।। इंद्राणींतुतथादित्यैरा-
स्नेतिचसुमंत्रतः।। ईश्वरींभुवनस्याथयजुषांश्रीश्चतेनच।। ग्रहहोमंततः
कृत्वायथाविध्युक्तसंख्यया।। वंशपात्रंसमानीयरक्तवस्त्रसमन्वितम्।।
तत्रराशिंप्रकुर्वीततंदुलैर्द्रोणसंमितैः।। तस्योपरिन्यसेद्धैमीं-
कदलीसूर्यदेवतां।। वह्नेरुत्तरतोविद्वान्कदलीं स्थापयेच्छुभां।। हेम्नः
पंचपलाढ्यांवापलस्यापिसुलक्षणां।। पलार्धेनतदर्धेनतदर्धेनचवा पुनः।।
सुस्तंभाढ्यांसुपत्रांचकदलेनविराजितां।। दद्यात्तांविप्रवर्यायसवस्त्रांच-
सदक्षिणां। अलंकृतायविदुषेश्रोत्रियायकुटुंबिने।। ततोभिषेचनंकार्यं
दंपत्योश्चविशेषतः।। उच्चार्यवारुणान्मंत्राञ्जलेनपंचपल्लवैः।। उद्धृत्यो-
द्धृत्यतंसिंचेत्पुण्यमंत्रैर्यथाविधि।। आपोहिष्ठात्रिभिर्मंत्रैःपंचेंद्रैः
पंचवारुणैः।। भगप्रणेतीदमापः समुद्रायपुनन्तुमा।। आप्याय-
पंचनद्येतिशिरोमेतिचतसृभिः।। देवस्यत्वात्रिभिर्मंत्रैरभिषिंचेत्पुनः
पुनः।। शक्रादिदेवताः सर्वाब्रह्मविष्णुपुरोगमाः।। दंपत्योःपरि-
धानार्थमहतेवाससीपुरा।। कर्मणोंते विसृज्यान्यद्वासश्च परिधार्यते।।
आचार्याययततोदद्यात्स्वर्णगोभूतिलांस्ततः।। ब्राह्मणेभ्यस्त-
थान्येभ्योदक्षिणाश्चविशेषतः।। सदक्षिणमनड्वाहंप्रदद्याद्रुद्रजापिने।।
ब्राह्मणान्भोजयेत्पश्चाच्छर्कराघृत् पायसैः।। यस्मिन्वाससि-
दृष्टंचरजोदुष्टभयावहं।। तद्वासोयत्नतस्त्याज्यंततः शांतिकरंहि तत्।।
एवंयः कुरुतेशांतिंनारदोक्तप्रमाणतः।। तदनिष्टंतुसकलंसद्य-
एवविनश्यतीति।। इतिनारदोक्तरजोदर्शनशांति।। ।। अथप्रयोगः।।
तत्रादौसर्वकर्मसाधरणांगानां गणेशपूजादीनां स्वस्तिवाचनांतानां-

प्रयोगः।। सचशिष्टाचारानुसारेणोच्यते।। महत्सुकर्मपूर्वे द्युरल्पेषुतुतस्मिन्नहनिपूर्वाह्णेनिर्णेजनांतपंचमाहयज्ञांतकृतनित्यक्रियेणस-पत्नीकेनसंस्कार्येणचयजमानेनप्राङ्मुखेनोदङ्मुखेनवाशुद्धपीठेउपवेशनं।। पादौहस्तौचप्रक्षाल्यद्विराचम्यत्रिः प्राणानायम्यदेशकालौसंकीर्त्यकरि-ष्यमाणामुककर्मांगतयामंगलस्नानमहंकरिष्यइतिसंकल्पः कार्यः।। ततोयथाचारंमंगलवाद्यघोषपुरः सरंपुत्रवतीवृद्धसुवासिनीभिर्नीराजन-पूर्वकं सर्वौषधीसर्वगंधचूर्णयुक्तेनतिलामलकादिनासुगंधितैलेनोद्वर्तन-मुष्णोदकेनस्नानमिदमेवमंगलस्नानमित्यभिधीयते।। ततोद्विराचमनं।। ततअहतंवसनंयथोक्तरीत्यापरिधास्यैइत्यनेनमंत्रेणपरिधाय।। यशसामेत्यनेन मंत्रेणोत्तरीयंच।। पत्नीत्व मंत्रं।। प्रतिवस्त्रंस्मार्त-विधिनाद्विराचमनं।। पत्न्यास्तुयथोक्तं।। ततोवारणादियज्ञियदारु-निर्मितेसोत्तरच्छदेशुद्धपीठेशुभासनेयज्ञोपवीतिनादक्षिणपार्श्वे-बद्धशिखाऽभिन्नकेशेनयजमानेनप्राङ्मुखेनोदङ्मुखेनवाउपवेशनं।। तद्दक्षिणतः पत्न्याचतद्दक्षिणतः संस्कार्येणच।। सव्येकुशोपग्रहः। दक्षिणेपवित्रोपग्रहः।। करद्वयेकुशोपग्रहः पवित्रोपग्रहोवा।। धृतकुंकुमतिलकः।। स्मार्तविधिनाद्विराचम्यत्रीन्प्राणरानायम्यशांति-पाठंपठित्वात्रिमात्रं प्रणवमुच्चार्य लक्ष्मीनारायणादिदेवान्प्रणमेत्।।

।। अथशांतिपाठमंत्राः।। ।। ॐ आनोभद्राःक्रतवोयन्तुव्विश्वतो-दब्धासोऽअपरीतासऽउद्भिदः।। देवानोयथासदमिद्वृधेऽ-असन्नप्प्रायुवोरक्षितारोदिवेदिवे। देवानाम्भद्रासुमतिर्ऋजूयतान्देवानाँ रातिरभिनोनिवर्त्तताम्।। देवानाँ सख्यमुपसेदिमाव्वयन्देवानऽआयः प्रतिरन्तुजीवसे।। तान्पूर्व्वयानिविदाहूमहेव्वयम्भगम्मित्र-मदितिन्दक्षमस्त्रिधम्।। अर्य्यमणम्व्वरुणँ सोममश्विनासरस्वतीनँ सुभगामयस्करत्।। तन्नोव्वातोमयोभुव्वातुभेषजंतन्माता-पृथिवीतत्पिताद्यौः।। तद्ग्रावाणःसोमसुतोमयोभुवस्तदश्विनाशृणुत-न्धिष्ण्यायुवम्।। तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जि-

न्वमवंसेहूमहेव्वयम्।। पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुर-दब्धःस्वस्तये।। स्वस्तिनऽइन्द्रोवृद्धश्रवाःस्वस्तिनः पूषाव्विश्ववेदाः।। स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्ति नोबृहस्पतिर्दधातु।। पृषदश्वा मरुतः पृश्निमातरः शुभंय्यावानोव्विदथेषुजग्मयः।। अग्निजिह्वामनवः सूरचक्षसोव्विश्वेनोदेवाऽअवसागमन्निह।। भद्रङ्कर्णेभिःशृणुयाम-देवाभद्रम्पश्येमाक्षभिर्यजत्राः।। स्थिरैरङ्गैस्तुष्टुवाᳬसस्तनूभिर्व्व्यर्य-शेमहिदेवहितंयदायुः।। शतमिन्नुशरदोऽअन्तिदेवायत्रानश्चक्राजर-सन्तनूनाम्।। पुत्रासोयत्रपितरो भवन्तिमानोमध्यारीरिषतायुर्गन्तोः।। अदितिद्यौरदितिरन्तरिक्षमदितिर्म्माता सपितासपुत्रः।। व्विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्वम्।। द्यौःशांतिरन्तरिक्षᳬ शान्तिःपृथिवी शान्तिरापःशान्तिरोषधयः शान्तिः।। व्वनस्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व्वᳬशान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि।। यतोयतः समीहसेततोनो अभयंकुरु।। शन्नः कुरुप्रजाभ्योभयन्नः पशुभ्यः।। सुशान्तिर्भवतु।। ।। ॐ श्रीमन्महागणाधिपतयेनमः।। ॐ लक्ष्मीनारायणाभ्यांनमः।। ॐ उमामहेश्वराभ्यांनमः।। ॐवाणीहिरण्यगर्भाभ्यांनमः।। ॐ शचीपुरन्दराभ्यांनमः।। ॐ मातापितृचरणेभ्योनमः।। ॐ कुलदेवताभ्योनमः।। ॐ इष्टदेवता-भ्योनमः।। ॐ ग्रामदेवताभ्योनमः ॐ स्थानदेवताभ्योनमः।। ॐ वास्तुदेवताभ्योनमः।। ॐ सर्वेभ्योदेवेभ्योनमः।। ॐ सर्वेभ्यो-ब्राह्मणेभ्योनमः।। ॐ पुण्यंपुण्याहंदीर्घमायुरस्तु।। सुमुखश्चैकदंतश्चकपिलोगजकर्णकः। लंबोदरश्चविकटोविघ्न-नाशोगणाधिपः।। धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजाननः।। द्वादशैतानिनामानि यः पठेच्छृणुयादपि।। विद्यारंभेविवाहेच-प्रवेशेनिर्गमेतथा।। संग्रामेसंकटे चैवविघ्नस्तस्यनजायते।। शुक्लां-बरधरंदेवंशशिवर्णंचतुर्भुजं।। प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांतये।।

अभिप्सितार्थसिध्यर्थंपूजितोयः सुरासुरैः।। सर्वविघ्नहरस्तस्मै गणा-
धिपतयेनमः।। सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके।। शरण्ये-
त्र्यंबकेगौरिनारायणिनमोस्तुते।। सर्वदासर्वकार्येषुनास्तितेषाममंगलं।।
येषांहृदिस्थो भगवान्मंगलायतनंहरिः। तदेवलग्नंसुदिनंत-
देवताराबलंचंद्रबलंतदेव।। विद्याबलंदैवबलंतदेवलक्ष्मीपतेतेंघ्रियुगं
स्मरामि।। लाभस्तेषांजयस्तेषांकुतस्तेषां पराजयः।। येषामिंदी-
वरश्यामोहृदयस्थोजनार्दनः।। यत्रयोगेश्वरः कृष्णोयत्र पार्थोधनु-
र्धरः। तत्रश्रीविजयोभूतिर्ध्रुवानीतिर्मतिर्मम।। सर्वेष्वारंभकार्येषुत्र-
यस्त्रिभुवनेश्वराः।। देवादिशंतुनः सिद्धिंब्रह्मेशानजनार्दनाः।। ।।
ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतोमहापुरुषस्यविष्णो-
राज्ञयाप्रवर्तमानस्यअद्यब्रह्मणो द्वितीयेपरार्धेश्रीश्वेतवाराहकल्पे-
वैवस्वतमन्वंतरे अष्टाविंशतितमेकलियुगे प्रथमचरणेभरतवर्षे-
भरतखंडेजंबुद्वीपेदण्डकारण्येदेशेगोदावर्याः पश्चिमेतीरे
परशुरामक्षेत्रेबौद्धावतारे शालिवाहनशके अमुकनामसंवत्सरे
अमुकायने अमुकऋतौअमुकमासेअमुकपक्षेअमुकतिथौ-
अमुकवासरेअमुकनक्षत्रेअमुक राशिस्थितेचंद्रेअमुकराशिस्थितेदेव-
गुरौशेषेषुग्रहेषुयथायथाराशिस्थानस्थितेषु सत्सुएवंगुण-
विशेषणविशिष्टायांशुभपुण्यतिथौममआत्मनः श्रुतिस्मृति
पुराणोक्तफलावाप्तयेअस्मिन्पुण्याहेअस्याः ममभार्यायाः
प्रथमरजोदर्शनसमयेमासतिथिवारनक्षत्रयोगकरणलग्नहोरा-
चंद्रवस्त्रादर्शनस्थानदिनभागवर्णानां मध्येयद्यद्विरुद्धफलं
तत्तद्दोषपरिहारार्थंपुत्रादिसंततिप्राप्त्यर्थं तथाचसकलत्रस्यममजन्मराशेः
सकाशाद्येकेचिद्विरुद्धस्थानस्थितक्रूरग्रहास्तैः सूचितंसूच-
यिष्यमाणंचयत्सर्वारिष्टंतद्विनाशार्थंसर्वदातृतियैकादशशुभस्थान-
स्थितशुभफलप्राप्त्यर्थंगणपतिदुर्गाक्षेत्राधिपत्यादित्यादिनवग्रहाधि-
देवताप्रत्यधिदेवतादिसहितश्रीसूर्यइंद्रइंद्राणीभुवनेश्वरीदेवताप्रीत्यर्थं

नारदोक्तरजोदर्शनशांतिं सांगोपांगेनतथाच अस्याः ममभार्यायाः क्षेत्रगर्भयोः संस्कारार्थंप्रतिगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वर-प्रीत्यर्थं गर्भाधानाख्यं कर्मएकतंत्रेणाहंकरिष्ये।। ।। तत्रादौ-निर्विघ्नतासिद्ध्यर्थंगणपतिपूजनं तदंगत्वेनस्वस्तिपुण्याहवाचनं-मातृकापूजनंवसोर्धारायुष्यमंत्रजपंनांदीश्राद्धंब्रह्माचार्य-ऋत्विग्वरणंदिग्रक्षणंपंचगव्यकरणं भूमि पूजनंअग्निस्थापनं-कलशस्थापनंअग्न्युत्तारणप्राणप्रतिष्ठापूर्वकदेवतास्थापनंकदली स्थापनंनवग्रहस्थापनं चाहंकरिष्ये।। ।। तत्रादौकर्मार्थजल-पूरितकलशेगंगाद्यावाहनं।। गंगेचयमुनेचैवगोदावरिसरस्वती।। नर्मदेसिंधुकावेरिजलेस्मिन्संनिधौभव।। ब्रह्मांडोदरतीर्थानि-निकरैःस्पृष्टानितेरवे।। तेनसत्येनमेदेवतीर्थंदेहिदिवाकरेत्यावाह्य।। तत्रवरुणंपूजयेत्।। ॐ तत्वांयामि ब्रह्मणा व्वन्दमानस्-स्तदाशास्तेयजमानोहविर्भिः।। अहेडमानोव्वरुणेहबोध्युरुशꣳस समानऽआयुःप्प्रमोषीः।। कलशेवरुणायनमइतिगंधाक्षतपुष्पैःसंपूज्य।। ततः कलशमभिमंत्रयेत्।। कलशस्यमुखेविष्णुः कंठेरुद्रः समाश्रितः।। मूलेतस्यस्थितोब्रह्मामध्येमातृगणाः स्मृता।। कुक्षौतुसागराः सर्वेसप्तद्वीपावसुंधरा। ऋग्वेदोथयजुर्वेदः सामवेदोह्यथर्वणः।। अंगैश्चसहिताः सर्वेकलशंतुसमाश्रिताः।। इत्यभिमंत्र्य।। ततः प्रार्थयेत्।। त्वत्तोयेसर्वतीर्थानिदेवाः सर्वेत्वयिस्थिताः।। त्वयितिष्ठंतिभूतानित्वयिप्राणाः प्रतिष्ठिताः।। शिवः स्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः।। आदित्यावसवो रुद्राविश्वेदेवाः सपैतृकाः।। त्वयितिष्ठंतिसर्वेपियतः कामफलप्रदाः।। त्वत्प्रसादादिमंकर्म कर्तुमीहेजलोद्भव।। सान्निध्यंकुरुमे-कुरुमेदेवप्रसन्नोभवसर्वदा।। इतिसंप्रार्थ्य।। तस्मादुदका-दुदकंगृहीत्वा।। स्वात्मानंसंप्रोक्ष्य।। स्वशिरः संप्रोक्ष्य।। पुनः स्वल्पोदकमादाय। पूजा संभारान्संप्रोक्ष्य।। गणपतिपूजाविधिमाह।।

।। परशुरामः।। पट्टेवामृन्मयेपीठेरक्तवस्त्रेऽरुणाक्षतैः।।
कार्यमष्टदलंपद्मंतस्योपरिगणेश्वरं।। गणानात्वेतिसंस्थाप्य-
पूजयेत्तदनन्तरमिति।। ।। अथगणपतिपूजनम्।। हेहेरंबत्वमेह्येहि-
अंबिकात्र्यंबकात्मज।। सिद्धिबुद्धिपतेत्र्यक्षलक्षलाभपितुः पितः।।
नागास्यनागहारत्वंगणराजचतुर्भुज।। भूषितः स्वायुधैर्दिव्यैः
पाशांकुशपरश्वधैः।। आवाहयामिपूजार्थंरक्षार्थंचममक्रतोः।।
इहागत्यगृहाणत्वं पूजांक्रतुंचरक्षमे।। ॐ गणानान्त्वागणपतिꣳ
हवामहेप्रियाणान्त्वाप्रियपतिꣳ हवामहे निधीनान्त्वानिधिपतिं-
हवामहेव्वसोमम।। आहमजानिगर्भधमात्वमजासिगर्भधम्।।
सिद्धिबुद्धिसहितमहागणपतयेनमः गणपतिंआवाहयामि।। ॐ
गणानान्त्वा०।। सिद्धिबुद्धिसहितमहागणपतयेनमः।। आसनं
समर्पयामि।। ॐ गणानान्त्वा०।। सि० बु० सहित म० ग०
पाद्यंसमर्पयामि।। ॐ गणानान्त्वा।। सि० बु० सहित म० ग०
अर्घ्यं समर्पयामि।। ॐ गणानान्त्वा।। सि० बु० सहित म० ग०
आचमनंसमर्पयामि।। अथपंचामृतस्नानं।। ॐ पयः
पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः।। पयस्वतीः प्रदिशः
सन्तु मह्यम्।। सि० बु० सहितम० ग० पयः स्नानं समर्पयामि।।
स्नानांतेशुद्धोदकस्नानंसमर्पयामि।। ॐ दधिक्राव्णोऽ-
अकारिषञ्जिष्णोरश्वस्य व्वाजिनः।। सुरभिनोमुखाकरत्प्रणऽआयू
ꣳषितारिषत्।। सि० बु० सहितम० ग० दधिस्नानंस०।। दधि-
स्नानांतेशुद्धोदक स्नानंस०।। ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्रितो-
घृतम्वस्यधाम।। अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभव्वक्षि-
हव्यम्।। सि० बु० सहितम० ग० घृतस्नानंस०।। घृतस्नानांते-
शुद्धोदकस्नानंस०।। ॐ मधुव्वाताऽऋतायतेमधुक्षरन्ति-
सिन्धवः।। माध्वीर्न्नःसन्त्वोषधीः।। मधुनक्तमुतोषसोमधुमत्पार्थिवꣳ
रजः।। मधुद्यौरस्तुनःपिता।। मधुमान्नोव्वनस्पतिर्म्मधुमाँऽअस्तुसूर्यः।।

माध्वीर्ग्गावोभवन्तुनः।। सि० बु० सहितम० ग० मधुस्नानंस०।। मधुस्नानांतेशुद्धोदकस्नानंस०।। ॐ अपाँ रसमुद्वयसँ सूर्य्येसन्तँ समाहितम्।। अपाँ रसंस्ययोरसस्तंव्वोगृह्णाम्म्युत्तममुपयाम-गृहीतोसीन्द्रायत्वाजुष्टङ्गृह्णाम्येषतेयोनिरिन्द्रायत्वायुष्टतमम्।। सि० बु० स० म० ग० शर्करास्नानंस०।। शर्करास्नानां-तेशुद्धोदकस्नानंस०।। ॐ गणानान्त्वा०।। सिद्धिबुद्धि-सहितमहागणपतयेनमः स्नानं स०।। ॐ गणानान्त्वा०।। सि० बु० स० म० ग० आचमनंस०।। ॐ गणानान्त्वा०।। सि०बु०स०म०ग० वस्त्रंस०।। ॐ गणानान्त्वा०।। सि०बु०स०म०ग०आचमनं स०।। ॐ गणानान्त्वा० सि०बु०स०म०ग०यज्ञोपवीतंस०।। ॐ गणानान्त्वा०।। सि०बु०स०म०ग० आचमनं स०।। ॐ गणानान्त्वा०।। सि०बु०स०म०ग० गंन्धंस०।। ॐ अक्षन्नमीमदन्तह्यवप्प्रियाऽ-अधूषत।। अस्तोषतस्वभानवो व्विप्प्रानविष्ठयामतीयोजान्विन्द्रतेहरी।। सि०बु०स०म०ग०अक्षतान्स०।। ॐ गणानान्त्वा०।। सि०बु०स०म०ग० पुष्पाणिस०।। ॐ काण्डात्काण्डात्प्ररोहन्ती-परुषःपरुषस्परि।। एवानोदूर्वेप्रतनुसहस्रेणशतेनच।। सि०बु०स०म०ग० दूर्वाकुरान्स०।। ॐ अहिरिवभोगैः पर्य्येतिबाहुञ्ज्यायाहेतिम्परिबाधमानः।। हस्तघ्नोव्विश्वा-व्वयुनानिव्विद्वान्पुमान्पुमाँ सम्परिपातुव्विश्वतः।। सि०बु०स०म०ग० सौभाग्यद्रव्याणि स०।। ॐ गणानान्त्वा०।। सि०बु०स०म०ग० धूपं स०।। ॐ गणानान्त्वा०।। सि०बु०स०म०ग० दीपं स०।। ॐ गणानान्त्वा।। सि०बु०स०म०ग० नैवेद्यं स०।। ॐ गणानान्त्वा।। सि०बु०स०म०ग० आचमनंस०।। ॐ याःफलिनीर्याऽअफलाऽ-अपुष्पायाश्चपुष्पिणीः।। बृहस्पतिप्प्रसूतास्तानोमुञ्चन्त्वꣳ हसः।। सि०बु०स०म०ग०स०पूगीतांबूलंस०।। ॐ हिरण्यगर्भःसमवर्त्तताग्रे

भूतस्यंजातः पतिरेकआसीत्।। स दाधारपृथिवीन्द्यामुते-
माङ्कस्मैदेवायहविषाविधेम।। सि०बु०स०म०ग० पूजासादगुण्यार्थे
हिरण्यदक्षिणांस०।। अर्घपात्रेगंधरक्तचंदनपुष्पदूर्वाक्षतप्रक्षेपः।।
नालिकेराद्यन्यतमस्यफलस्यच।। रक्षरक्षगणाध्यक्षत्र्याक्षत्रैलोक्यरक्षक।।
भक्तानामभयंकर्तात्राताभवभावार्णवात्।। द्वैमातुरकृपा-
सिंधोषाण्मातुरग्रजप्रभो।। वरदस्त्वंवरंदेहिवांछितंवांछितार्थद।। अनेन
फलदानेनफलदोस्तुसदामम।। सि०बु०स०म०ग० फलार्घ्यंस०।।
ॐ अग्निर्ज्योतिर्ज्योति रग्निःस्वाहासूर्योज्योतिर्ज्योतिःसूर्यःस्वाहा।।
अग्निर्व्वर्च्चो ज्योतिर्व्वर्च्चः स्वाहा सूर्यो वर्च्चो ज्योतिर्व्वर्च्चः
स्वाहाः।। ज्योतिःसूर्यःसूर्योज्योतिः स्वाहा।। सि०बु०स०म०ग०
नीराजनंस०।। ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणि-
प्प्रथमान्यासन्।। तेहनाकम्महिमानःसचन्त यत्रपूर्वेसाध्याः
सन्तिदेवाः।। सि०बु०स०म०ग० पुष्पांजलिंस०।। विघ्नेश्वराय-
वरदायसुरप्रियाय लंबोदरायसकलायजगद्धिताय।। नागाननायश्रुतियज्ञ-
विभूषिताय गौरीसुताय गणनाथनमोनमस्ते।। भक्तार्तिनाशनपराय-
गणेश्वरायसर्वेश्वरायशुभदाय सुरेश्वराय।। विद्याधरायविकटाय-
चवामनायभक्तप्रसन्नप्रसवरदायनमोनमस्ते।। नमस्तेब्रह्मरूपायविष्णु-
रूपायतेनमः।। नमस्तेरुद्ररूपायकरिरूपायतेनमः।। विश्व-
रूपस्वरूपायनमस्तेब्रह्मचारिणे।। भक्तप्रियायदेवायनमस्तुभ्यंविना
यक।। लंबोदरनमस्तुभ्यंसततंमोदकप्रिय।। निर्विघ्नंकुरुमेदेव-
सर्वकार्येषु सर्वदा।। ॐ गणानान्त्वा०।। सि०बु०स०म०ग०
नमस्कारान्स० ॐ गणानान्त्वा०।। सि०बु०स०म०ग०
प्रदक्षिणांस०।। त्वांविघ्नशत्रुदलनेतिच सुंदरेतिभक्तप्रियेतिसुखदेति-
वरप्रदेति।। विद्या प्रदेत्यघहरेतिचयेस्तुवंतितेभ्योगणेश
वरदोभवनित्यमेव।। सिद्धिबुद्धिसहितमहागणपतयेनमः
स्तुतिपाठंसमर्पयामि।। अनयापूजयासिद्धिबुद्धि सहितमहागणपतिः

प्रीयताम्।। ।। इतिगणपतिपूजनम्।। ।। अथस्वस्तिपुण्याहवाचनं।। ।। तत्रतन्निमित्तानिविधानरत्नमालायां।। पुण्येहनि तुसंप्राप्ते विवाहेचौलकेतथा।। व्रतबंधेचयज्ञादौतथाचदानकर्मणि।। गृहारं-भेधनप्राप्तौ तीर्थाभिगमनेतथा।। नवग्रहमखेशांतावद्भुतेषुतथैवच।। गृहप्रवेशनेचैवग्रामस्याभिनिवेशने।। गजबंधेतुरंगाणांदासादीनां-चसंग्रहे।। अन्यस्मिन्नपि सर्वस्मिन्शुभेकर्मणिचोदिते।। वाचनीयाद्विजाः सर्वेवेदशास्त्रपरायणाइति।। व्यासोपि।। संपूज्य-गंधमाल्याद्यैर्ब्राह्मणान्स्वस्तिवाचयेत्।। धर्मकर्मणिमांगल्ये-संग्रामाद्भुतदर्शनइति।। गृह्यपरिशिष्टे।। अथस्वस्तिवाचनमृद्धिपूर्तेषु।। ऋद्धिशब्देनविवाहांताअपत्यसंस्काराः।। पूर्तशब्देनप्रतिष्ठोद्यापनादि।। अत्रशस्तविप्राः। ।। विधानरत्नमालायां।। पुण्याहवाचनेयु-ग्माविप्रावेदविदः शुभाः।। यज्ञोपवीतिनः शस्ताः प्राङ्मुखाः स्युः पवित्रिणः।। गंधपुष्पार्चिताः शुद्धाः सोत्तरीयाकुशायुधाइति।। शस्ताइत्यनेनस्मृत्युक्तवर्ज्यविप्रातिरिक्ताउक्ताः।। वर्ज्यविप्राअपितत्रैव।। नतत्रकुनखीकाणोहीनांगोविकलस्तथा।। क्षयरोगीचकुष्ठीच शावदंतोऽभिशापकः।। वंध्यश्चविधुरोवापिक्रूरस्तुखलसेवकः।। बकवृत्तिश्च-दंभीचहेतुकोज्ञानदुर्बलः।। सहोपपत्तिरुन्मत्तोव्यसनीसोमविक्रयी।। कन्यागोविक्रयीचैवपिशुनोचानृतः खलः।। लोकदुष्टः पराधी-नोराजद्रोहपरायणः।। एतेचान्येच विप्राश्चान वाच्याः स्वस्तिवाचन-इति।। शौनकः।। पुण्याहवाचनविधिंवक्ष्यामोथयथाविधि।। प्रयोक्तुः कर्मणामादावंतेचोदयसिद्धये।। स्वस्तिवाचनमत्रेष्टंगृह्यकर्मादिकेषुच।। आचार्येणापिशास्त्रेस्मिन्मंगलार्थमुदीर्यते।। क्रमेणकलशंस्थाप्य-पूर्णपात्रांतसर्वशः।। वरुणंतत्र संपूज्यगंगाद्यावाहनादिकं।। अर्चिता-ब्राह्मणाःसम्यक्गंधतांबूलदक्षिणाः।। तिष्ठेयुर्ब्राह्मणायुग्मा-वक्तारोदर्भपाणयः।। तिष्ठेद्वाचयितातेषांदक्षिणस्थ उदङ्मुखः। अवनीगतजानुभ्यांततोमुकुलपद्मवत्।। अंजलिंशिरस्याधायप्रणमेत्त्रिः

पुनः पुनः।। हस्तेकलशमुद्धृत्य नमेत्त्रीणिपदानिच।। अथवाच-
यितुंबाहुंदक्षिणांगसमाश्रितः।। मनइत्यादिरूपेणएकाग्रमितिचादिशेत्।।
मनसः स्मइतिब्रूयुस्तेसमाहितपूर्वकाः।। प्रसीदंत्वितिकर्तारः प्रसन्नाः
स्मइतिद्विजाः।। शांतिरस्त्वितिविघ्नांताः शब्दाः पंचदशैवतु।।
अस्तुवाक्यं द्विजमुखाच्छ्रावयित्वातथापरैः।। षड्वाक्यानि-
अस्त्वितिचइतरैरेकविंशतिः।। प्रीयतांवाक्यपठितैरुदकस्यनिषेचनं।।
ततः षड्वाक्यपठितैर्बहिरापोनिषेचनं। अंतेदशशुभंवाक्यंनिकामेति
ततोजपः।। शुक्रादयोग्रहाश्चैकंभगवांस्त्र्यभिषेचनं।। उदकस्य-
प्रकुर्वीतपुण्याहवाचयेत्ततः।। पुण्याहादित्रिरभ्यासमंद्रमध्यो-
च्चनिस्वनैः।। पुण्यंकल्याणमृद्धिश्चस्वस्तिः श्रीत्यादिपंचकं।।
प्रणवाद्यंत्रिराचष्टेभवत्पूर्वंभवन्त्विति।। प्रत्युक्तविषयेप्रेषस्त्रिवारंस्वस्ति-
रित्यतः।। वारुणैः पावमानीयैरभिषिच्यसपत्निकं।। नीराजनंततः
कुर्यादंतेकर्मेश्वरार्पणमिति।। ।। अथपुण्याहवाचनप्रयोगः।। स्वपुरतः
शुद्धायांभूमौ पंचवर्णैस्तंदुलैर्वाष्ट[1]दलकरणं।। तत्रमहीद्यौरिति-
भूमिस्पर्शः।। ॐ महीद्यौःपृथिवीचनऽइमञ्यज्ञम्मिमिक्षताम्।।
पिप्पृतान्नोभरीमभिः।। तत्रौषधयः समितियवप्रक्षेपः।। ॐ ओषधयः
समवदन्तसोमेन सहराज्ञा।। यस्मैकृणोतिब्राह्मणस्तᳪ-
राजन्पारयामसि।। तत्राजिघ्रमितिपारिभाषिकोक्तंकलशंस्थापयेत्।।
ॐ आजिघ्रकलशम्मह्यात्वाव्विशन्त्विन्दवः।। पुनरूर्ज्जा
निवर्तस्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वतीपुनर्म्माव्विशताद्रयिः।।
।। व्वरुणस्योत्तंभनमितिकलशे जलंपूरयेत्।। ॐव्वरुणस्योत्तम्भन-
मसिव्वरुणस्यस्कंभसर्ज्जनीस्थोव्वरुणस्यऽऋतसदन्न्यसि-
व्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद।। ।। त्वांगधर्वे-
तिगंधप्रक्षेपः।। ॐ त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः।।
त्वामोषधेसोमोराजाव्विद्वान्यक्ष्मादमुच्यत।। ।। याओषधीरिति-
सर्वौषधीः।। ॐ याऽओषधीःपूर्व्वाजातादेवेभ्यस्त्रियुगम्पुरा।।

मनैनुबभ्रूणामहꣳ शतन्धामानिसप्तचं।। ।। कांडात्काण्डादितिदूर्वाः।।
ॐ काण्डात्काण्डात्प्र०।। ।। अश्वत्थेवेतिपंचपल्लवान्।। ॐ
अश्वत्थेवोनिषदनम्पर्णेवोव्वसतिष्कृता।। गोभायऽइत्किलास-
थयत्सनवथपूरुषम्।। ।। स्योनापृथिवीतिसप्तमृदः।। ॐ
स्योनापृथिविनोभवान्नृक्षरानिवेशनी।। यच्छानःशर्म्मसप्रथाः।। ।।
याः फलिनीरितिफलं।। ॐ याः फलिनीर्याऽअ०।। ।।
परिवाजपतिरितिपंचरत्नानि।। तदभावेसु[2]वर्णं।। ॐ
परिवाजपतिःकविरग्निर्हव्व्यान्न्यक्रमीत्।। दधद्रत्नानिदाशुषे।। ।।
हिरण्यगर्भेतिहिरण्यं।। ॐ हिरण्यगर्भःसम०।। युवासुवासाइतिरक्त-
सूत्रेणकलशंवेष्टयेत्।। ॐ युवासुवासाः परिवीतआगात्सउश्रेयान्भ-
वतिजायमानः।। तन्धीरासः कवयऽउन्नयन्ति स्वाध्योमनसादेवयन्तः।।
।। पूर्णादर्व्वीतिपूर्णपात्रमुपरिन्यसेत्।। ॐ पूर्णादर्व्विपरापत-
सुपूर्णापुनरापत।। व्वस्नेवव्विक्रीणावहाऽइषमूर्ज्जꣳ शतक्रतो।।
।। तत्वायामीतिवरुणमावाह्य।। ॐ तत्वायामिब्रह्मणाव्वन्द-
मानस्दाशास्तेयजमानोहविर्भिः।। अहेडमानोव्व रुणेहबोध्यु-
रुशꣳसमानऽआयुः प्प्रमोषीः।। ।। वरुणमावाहयामि।। ॐ
मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञꣳसमिमन्द-
धातु।। व्विवेदेवासऽइहमादयन्तामोꣳप्रतिष्ठ।। ॐ वरुणायनमः
सुप्रतिष्ठितोवरदोभव।। इतिप्रतिष्ठाप्य।। ततः ॐ तत्वायामीतिमंत्रेणवा
ॐ वरुणायनमइत्यनेनमंत्रेणवरुणंगंधादिपंचोपचारैरभ्यर्च्यकलश-
मभिमंत्रयेत्[3]।। कलशस्यमुखेविष्णुः कं०।। कुक्षौतुसागराः
सर्वेसप्त०।। इत्यभिमंत्र्यतत्रतीर्थान्यावाहयेत्।। अत्रगायत्रीसावित्रीः
शान्तिः पुष्टिकरीतथा।। आयांतुममशांत्यर्थं दुरितक्षयकारकाः।।
सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः।। आयांतुममशां०।। इत्यावाह्य
ॐ गायत्र्यादिभ्योनमइतिसंपूज्य प्रार्थयेत्।। देवदानवसंवादेमथ्य-
मानेमहोदधौ।। उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं।।

त्वत्तोयेसर्वतीर्था० शिवःस्वयंत्वमे०।। त्वयिति०।। सान्निध्यं-कुरुदेवेशप्रसन्नोभवसर्वदेतिसंप्रार्थ्य।। स्वस्तिवाचनार्थंविप्रान्वृत्वा स्वस्तिवाचयेत्।। ।। अवनिकृतजानुमंडलःकमलमुकुलस-दृशमंजलिंशिरस्याधायदक्षिणेनपाणिनास्वर्णपूर्णकलशं[4]धारयि-त्वादीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानिच।। ॐ त्रीणिपदाविचक्रमेविष्णुर्गोपाऽअदाभ्यः।। अतोधर्माणिधारयन्।। तेनायुः प्रमाणेनपुण्यंपुण्याहंदीर्घमायुरस्त्वितिभवंतोब्रुवंतु।। अस्त्वितिविप्राः।। एवंप्रैषानुप्रैषंसर्वत्र।। ब्राह्मणानांहस्तेसु-प्रोक्षितमस्तु।। शिवाआपः संतु।। संतुशिवाआपः।। सौमनस्यमस्तु।। अस्तुसौमनस्यं।। अक्षतंचारिष्टंचास्तु।। अस्त्वक्षतमरिष्टंच।। गंधाः पांतुसौमंगल्यंचास्त्वितिभवंतोब्रुवंतु।। गंधाः पांतु सौमंगल्यंचास्तु।। अक्षताःपांतुआयुष्यमस्त्विति।। अक्षताः पांतु आयुष्यमस्तु।। पुष्पाणिपांतुसौश्रियमस्त्विति०।। पुष्पाणिपांतुसौश्रियमस्तु।। तांबूलानिपांतुऐश्वर्यमस्त्विति०।। तांबूलानिपांतुऐश्वर्यमस्तु।। दक्षिणा पांतुबहुधनमस्त्विति०।। दक्षिणाः पांतुबहुधनमस्तु।। दीर्घमायुःशांतिःपुष्टिस्तुष्टि श्रीर्यशोविद्याविनयोवित्तं-बहुपुत्रंचायुष्यंचास्त्विति०।। दीर्घमायुःशांतिः पुष्टिस्तुष्टिः श्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंचायुष्यंचास्तु।। यंकृत्वासर्व वेदयज्ञक्रियाकरणकर्मारंभाःशुभाःशोभनाः प्रवर्तंते।। तमहमोंकारमा-दिंकृत्वाऋग्यजुः सामाशीर्वचनंबहुऋषिमतंसमनुज्ञातंभवद्भिरनुज्ञातः पुण्यंपुण्याहंवाचयिष्ये।। वाच्यतां।। यजमानोब्राह्मणानांहस्तेष्वक्षता-न्दद्यात्तेचमंत्रान्तेआशिषोदद्युः।। ।। ॐ भद्रङ्कर्णेभिः शृणुयामदेवाभ-द्रम्पश्येमाक्षभिर्यजत्राः।। स्थिरैरङ्गैस्तुष्टुवाँ संस्तनूभिर्व्यशेमहिदेव-हितंयदायुः।। देवानाम्भद्रासुमतिर्ऋजूयतान्देवानाँ रातिरभिनो-निवर्त्तताम्।। देवानाँ सख्यमुपसेदिमाव्वयन्देवानऽआयुःप्प्रतिरन्तु-जीवसे।। नतद्रक्षाँ सिनपिशाचास्तरन्तिदेवानामोजः प्रथमज

ँह्येतत्।। योबिभर्तिदाक्षायणꣳ हिरण्यꣳसदेवेषुकृणुतेदीर्घमायुः समनुष्येषुकृणुतेदीर्घमायुः।। दीर्घायुस्तऽओषधेखनिताय-स्मैचत्वाखनाम्यहम्।। अथोत्वन्दीर्घायुर्भूत्वाशतवल्शाविरोहतात्।। द्रविणोदाद्रविणसस्तुरस्यद्रविणोदाःसनरस्यप्रयंसत्।। द्रविणोदा वीरवतीमिषन्नोद्रविणोदारासतेदीर्घमायुः।। सवितापश्चात्ता-त्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात्।। सवितानः सुवतुसर्वतातिंसवितानोरासतांदीर्घमायुः। नवोनवोभवतिजाय-मानोह्नांकेतुरुषसामेत्यग्रं।। भागंदेवेभ्यो यंप्रचंद्रमास्ति-रतेदीर्घमायुः।। उच्चादिविदक्षिणावन्तोऽअस्थूर्येऽअश्वदाः सहतेसूर्येण।। हिरण्यदाऽअमृतत्वंभजन्तेवासोदाःसोमप्रतिरन्तआयुः।। इत्याशीर्वादः।। ।। व्रतजपनियमतपः स्वाध्यायक्रतु-दयादमदानविशिष्टानांसर्वेषांब्राह्मणानांमनः समाधीयतां।। समाहितमनसस्मः।। प्रसीदंतुभवंतः।। प्रसन्नाःस्मः।। ॐ कारंसर्वत्र।। ॐ शांतिरस्तु।। पुष्टिरस्तु।। तुष्टिरस्तु।। वृद्धिरस्तु।। अविघ्नमस्तु।। आयुष्यमस्तु।। आरोग्यमस्तु।। शिवंकर्मास्तु।। कर्मसमृद्धिरस्तु।। वेदसमृद्धिरस्तु।। शास्त्रसमृद्धिरस्तु।। धनधान्यसमृद्धिरस्तु।। पुत्रसमृद्धिरस्तु।। इष्टसंपदस्तु।। अरिष्टनिरसनमस्तु।। 15।। यत्पापंरोगंअशुभंअकल्याणं तद्दूरेप्रतिहतमस्तु।। यच्छ्रेयस्तदस्तु।। उत्तरेकर्मणिनिर्विघ्नमस्तु।। उत्तरोत्तरमहरहरभिवृद्धिरस्तु।। उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यंतां।। तिथिकरणमुहूर्तनक्षत्र-ग्रहलग्नसंपदस्तु।।6।। तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां।। तिथिकरणेसमुहूर्तेसनक्षत्रेसग्रहेसाधिदेवतेप्रीयेतां।। दुर्गापांचाल्यौप्रीयेतां।। अग्निपुरोगाविश्वेदेवाः प्रीयंतां।। इंद्रपुरोगा मरुद्गणाःप्रीयंता।। महेश्वरीपुरोगाउमामातरः प्रीयंतां।। अरुंधतीपुरोगा एकपत्न्यः प्रीयंतां।। विष्णुपुरोगाः सर्वेदेवाः प्रीयंतां।। ब्रह्मपुरोगाः सर्वेवेदाः प्रीयंतां।। ब्रह्मचब्राह्मणाश्च प्रीयंतां।। श्रीसरस्वत्यौप्रीयेतां।।

श्रद्धामेधेप्रीयेतां।। भगवतीकात्यायनीप्रीयतां।। भगवतीमाहेश्वरी-प्रीयतां।। भगवतीऋद्धिकरीप्रीयतां।। भगवतीसिद्धिकरीप्रीयतां।। भगवतीपुष्टिकरीप्रीयतां।। भगवतीतुष्टिकरीप्रीयतां।। भगवंतौविघ्न-विनायकौप्रीयेतां।। सर्वाः कुलदेवताः प्रीयंतां।। सर्वाग्रामदेवताः प्रीयन्तां।। 21।। ह॑ताश्चब्रह्मद्विषः।। हताश्चपरिपंथिनः।। हताश्चविघ्नकर्तारः शत्रवः पराभवंयांतु।। शाम्यंतुघोराणि।। शाम्यंतुपापानि।। शाम्यंत्वीतवः।। 6।। शुभानिवर्धंतां।। शिवाआपःसंतु।। शिवाऋतयः संतु।। शिवाओषधयः संतु।। शिवानद्यःसंतु।। शिवागिरयः संतु।। शिवाअतिथयःसंतु।। शिवा अग्नयः संतु।। शिवाआहुतयः संतु।। अहोरात्रेशिवेस्यातां।। ॐ निकामेनिकामेनः पर्ज्जन्यो व्वर्षतु फलवत्योनऽओषधयः पच्च्यन्ताञ्योगक्षेमोनःकल्पताम्।। ॐ निकामेनिकामेनः पर्ज्जन्योव्वर्षत्विति निकामेनिकामे वैतत्रपर्ज्जन्योव्वर्षति-यत्रैतेनयज्ञेनयजन्तेफलवत्योनऽओषधयः पच्यन्तामिति-फलवत्योवैतत्रौषधवः पच्यन्तेयत्रैतेनयज्ञेनयजन्तेयोगक्षेमोनः कल्पतामितियोगक्षेमोवैतत्रकल्पतेयत्रैतेनयज्ञेनयजन्तेतस्माद्य-त्रैतेनयज्ञेनयजन्तेक्लृप्तः प्रजानाञ्योगक्षेमोभवति।। [6]शुक्रांगारक-बुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्य पुरोगाः सर्वेग्रहाः प्रीयंतां। भगवान्नारायणः प्रीयतां।। भगवान् पर्जन्यः प्रीयतां।। भगवान् स्वामीमहासेनः प्रीयतां।। पुण्याहकालान्वाचयिष्ये।। वाच्यतां।। ब्राह्मयंपुण्यंमहद्यच्चसृष्ट्युत्पादनकारकम्। वेदवृक्षोद्भवं-नित्यंत्पुण्याहंब्रुवंतुनः।। भोब्राह्मणाः मह्यंसकुटुंबिनेमहाजनान्न-मस्कुर्वाणायआशीर्वचनमपेक्षमाणायमयाक्रियमाणस्यसग्रह-मखरजोदर्शनशांतिपूर्वकगर्भाधानाख्यस्यकर्मणः पुण्याहंभवंतोब्रुवंतु।। ॐ पुण्याहं।। एवंत्रिः।। एवमन्यत्रापियथोदितकर्मण्यूहः।। ॐ पुनंतुंमादेवजनाः पुनन्तुमनसाधियः।। पुनन्तुव्विश्वाभूतानिजातवेदः-

पुनीहिमां।। ॐ सयः कामयेतमहत्प्राप्नुयामित्युदगयनऽआपूर्य-माणपक्षेपुण्याहेद्वादशाहमुपसद्व्रतीभूत्वौदुंबरेकᳫं सेचमसेवासर्वौ-षधम्फलानीतिसम्भृत्यपरिसमुह्यपरिलिप्याग्निमुपसमाधायावृताज्यᳫं सँस्कृत्यपुᳫंसानक्षत्रेणमन्थᳫंसन्नीयजुहोति।। ।। पृथिव्यामुद्धृतायांतुयत्कल्याणंपुराकृतं।। ऋषिभिः सिद्धगंधर्वैस्तत्कल्याणंब्रुवंतु नः।। भोब्राह्मणाः मया० कर्मणः कल्याणंभवंतोब्रुवंतु।। ॐ कल्याणं।। 3।। ॐ यथेमाँव्वाचंकल्याणीमावदानिजनेभ्यः।। ब्रह्मराजन्याभ्याँ शूद्रायचार्यायचस्वायचारणायच।। प्रियोदेवानांदक्षिणायैदातुरिहभूयासमयम्मे कामःसमृध्यतामुपमादोनमतु।। ॐ अथाध्वर्योः प्रतिगरोरात्सुरिमे यजमानाभद्रमेभ्यो यजमानेभ्योभूदितिकल्याणमेवैतन्मानुष्यैव्वाचोव्वदति।। ।। सागरस्ययथावृद्धिर्महालक्ष्म्यादिभिः-कृता।। संपूर्णासुप्रभावाचतांचऋद्धिंब्रुवंतुनः।। भोब्राह्मणाःमयाक्रिय० कर्मणः ऋद्धिंभवन्तोब्रुवंतु।। ॐ ऋध्यताम्।। 3।। ॐ सत्रस्यऽऋद्धिरस्यगंन्मज्योतिरमृताऽ अभूम।। दिवम्पृथिव्याऽ-अध्यारुहामाव्विदामदेवान्त्स्वर्ज्योतिः।। ॐ तऽउत्तरस्यहविर्धानस्यजघन्यायाङ्कुबर्याँ सामाभिगायत्तिसत्रस्यऽऋद्धिरितिराद्धिमेवैतदभ्युत्तिष्ठंत्युत्तरवेदेर्वोत्तरायाँ श्रोणावित्तरंतुक्रतुतरम्।। ।। स्वस्तिस्तुयाविनाशाख्या पुण्यकल्याणवृद्धिदा।। विनायकप्रियानित्यंतांचस्वस्तिंब्रुवंतुनः।। भोब्राह्मणाः मया० कर्मणेस्वस्तिंभवंतो ब्रवुंतु।। ॐ स्वस्ति।। ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाःस्वस्ति०।। ॐ गातुव्यज्ञायगातुव्यज्ञप तयऽइतिगातुᳫं ह्येषयज्ञायेच्छतिगातुव्यज्ञपतयेयोयज्ञस्यसᳫं स्थान्देवीस्वस्तिरस्तुनःस्वस्तिर्मानुष्येभ्यऽ-इतिस्वस्तिनोदेवत्रास्तुस्वस्तिर्मानुष्यत्रेत्येवैतदाहोर्ध्वंजिगातुभेषजमित्यूर्ध्वोनोयज्ञोदेवलोकव्यजत्वित्येवैतदाहशन्नोऽ-अस्तुद्विपदेशञ्चतुष्पदऽइत्येतावद्वाऽइदᳫंसर्वञ्यावद्विपाच्चैव-

चतुष्पाच्चतस्माऽएवैतद्यज्ञस्यस ँ स्थांगत्वाशंकरोतितस्मा-
दाहशन्नोऽस्तुद्विपदेशञ्चतुष्पदे।। ।। समुद्रमथनाज्जा-
ताजगदानंदकारका।। हरिप्रियाचमांगल्यातांश्रियंचब्रुवंतुनः।।
भोब्राह्मणाः मया कर्मणःश्रीरस्त्वितिभवन्तोब्रुवंतु।। अस्तुश्रीः।।
3।। श्रीश्चंतेलक्ष्मीश्चपत्न्यांवहोरात्रेपार्श्वेनक्षंत्राणिरूपमश्विनौव्यात्तंम्।।
इुष्णन्निषाणामुम्मंऽइषाणसर्वलोकम्मंऽइषाण।। ॐ तेनोहततइजेदक्षः
पार्वतस्तऽइमेप्येतर्हिदाक्षायणाराज्यमिवैवप्राप्ताराज्यमिवहवैव-
प्राप्नोतियऽएवंविद्वानेतेनयज्ञेनय जन्तेतस्माद्वाऽएतेनयजेत-
सवाऽएकैकऽएवानूचिनाहंपुरोडाशोभवत्येतेनोहास्यासपत्नानुप-
बाधाश्रीर्भवति।।5।। अस्मिन्पुण्याहवाचनेन्यूनातिरिक्तोयो-
विधिःसउपविष्टब्राह्मणानां वचनात्श्रीमहागणपतिप्रसादाच्चसर्वः
परिपूर्णोस्तु।। अस्तुपरिपूर्णः।। अथाभिषेकः।। ।। अभिषेके-
पत्नीवामतः।। एकस्मिन्कलशेवरुणोदकंगृहीत्वाऽविधुराश्च-
त्वारोब्राह्मणादूर्वाग्रपल्लवैर्यजमानमभिषिंचेयुः।। तत्रमंत्रा।। ।। ॐ
पयः, पृथिव्यां०।। पञ्चंनद्यःसरंस्वतीमपिंयन्तिसस्रोंतसः।।
सरंस्वतीतुपंञ्चधासोदेशेभंवत्सरित्।। व्वरुंणस्योत्त०।। पुनन्तुंमा०।।
देवस्यंत्वासवितुः प्प्रंसवेश्विनोंर्बाहुभ्यांम्पूष्णोहस्तांभ्याम्।।
सरंस्वत्यैव्वाचोयन्तुर्य्यन्त्रितयेंदधामिबृहस्पतेंष्ट्वासाम्राज्येना-
भिषिञ्चाम्यसौ।। देवस्यंत्वा०।। सरंस्वत्यैव्वाचोयन्तुर्यन्त्रेणाग्नेः
साम्राज्येनाभिषिंञ्चामि।। देवस्यंत्वा०।। अश्विनोभैषंज्येनतेजंसेब्रह्म-
व्वर्च्चसायाभिषिंञ्चामिसरंस्वत्यैभैषंज्येनव्वीर्यान्नाद्यांर्याभिषिंञ्चा-
मीन्द्रस्येन्द्रियेणबलांयश्रियैयशंसेभिषिंञ्चामि।। व्विश्वांनिदेव-
सवितर्दुरितानिपरांसुव।। यद्भद्रंतन्नऽआसुंव।। धामच्छदग्नि-
रिन्द्रोंब्रह्मादेवो बृहस्पतिंः।। सचेंतसोव्विश्वेंदेवायज्ञम्प्रावंन्तुनः शुभे।।
त्वर्ञ्यविष्टदाशुषोनृः पांहिश्रृणुधीगिंरः।। रक्षांतोकमुतत्मनां।
अन्नंपतेन्नंस्यनोधेह्यनमीवस्यंशुष्मिणंः।। प्रप्रंदातारंन्तारिषऽऊर्जंन्नो-

धेहिद्विपदेचतुष्पदे।। ॐ पालाशंभवतितेन ब्राह्मणोभिषिंचति-ब्रह्मवैपलाशो ब्रह्मणैवैनमेतदभिषिंचति।। औदुंबरंभवतितेन-स्वोभिषिंचत्यन्नंवाऽऊर्गुदुंबरऽऊग्वैंस्वंयावद्वैपुरुषस्यस्वंभवति-नैवतावदशनायतितेनोर्क्स्वंतस्मादौदुंबरेण स्वोभिषिंचति।। नैय्यग्रो-धपादंभवतितेनमित्रोराजन्योभिषिंचतिपद्भिर्वैन्यग्रोधः प्प्रतिष्ठितो-मित्रेणैवराजन्यः प्रतिष्ठितस्तस्मान्नैय्यग्रोधपादेनमित्रोराजन्योभिषिंचति।। आश्वत्थंभवतितेनवैश्योभिषिंचतिसयद्देवादो श्वत्थेतिष्ठतऽइन्द्रो-मरुतऽउपामंत्रयतेतस्मादाश्वत्थेनवैश्योभिषिंचति।। यद्देवकल्पाञ्जुहोति-प्राणावैकल्पाऽअमृतमुवैप्राणाऽअमृतेनैवैनमेतदभिषिंचति।। सर्व्वेषांवाऽएषव्वेदानाᳬंरसोयत्सामसर्व्वेषामेवैनमेतद्वेदानाᳬंरसेनाभिषिं-चति।। ॐ द्यौःशांतिरन्त०।। यतोयतः समीहसे०।। अमृताभिषेकोस्तु।। शांतिः शांतिः शांति।। सुशांतिर्भवतु।। ततः पुत्रवतीभिर्वृद्धसुवासिनीभिर्नीराजनं कार्यं।। ॐ अनाधृष्टापुरस्ता-दग्नेराधिपत्युऽआयुर्म्मेदाः पुत्रवतीदक्षिणतऽ इन्द्रस्या-धिपत्येप्प्रजाम्मेदाः सुखदापश्चाद्देवस्यंसवितुराधिपत्येचक्षुर्म्मेदाऽ आश्रुतिरुत्तरतोधातुराधिपत्येरायस्पोषम्मेदाः।। व्विधृतिरुपरिष्टा-द्बृहस्पतेराधिपत्यऽओजोमेदाव्विश्वाभ्योमानाष्ट्राभ्यस्याहिमनोरश्वासि।। इति मंत्रेण।। ।। अनेनपुण्याहवाचनेनश्रीप्रजापतिः प्रीयतां।। ।। इतिपुण्याहवाचनप्रयोगः।। ।। अथमातृकापूजनम्।। तत्रादौवैश्वदेवंकुर्यात्।। अविघ्नोमंडपश्चैवमातृणांपूजनंसकृत्।। वैश्वदेवंवसोर्धारानांदीश्राद्धमतः परमित्युक्तेः।। ततोगोधूमादि-धान्यपूरितेहरिद्रादिरंजितेमृन्मयेअविघ्नाख्यकलशेमोदादिषड्वि नायकमातृणांप्रतिमाः कुंकुमेनलिखित्वावाहयेत्।। तद्यथा।। मोदश्चैवप्रमोदश्चसुमुखोदुर्मुखस्तथा।। अविघ्नोविघ्नहर्ता-चषडेतेविघ्नायकाः।। ॐ मोदायनमः मोदंआवाहयामि।। ॐ प्रमोदाय० प्रमोदं०।। ॐसुमुखाय० सुमुखं०।। ॐ दुर्मुखाय०

दुर्मुखं०।। ॐ अविघ्नाय० अविघ्नं।। ॐ विघ्नकर्त्रे० विघ्नकर्तारं०।। 6।। ॐमनोजूति०।। एषवैप्रतिष्ठानामयज्ञोयत्रैतेन यज्ञेनयजन्तेसर्वमेवप्रतिष्ठितंभवति।। ॐ भूर्भुवः स्वः मोदादिषड्विनायकाः सुप्रतिष्ठावरदाभवंतु।। ॐमोदादिषड्विनायकेभ्योनमइति मंत्रेणआवाहनादिपुष्पांजलिपर्यंतंपूजनंकार्यं।। अनयापूजयामोदादिषड्विनायकाः प्रीयंतांनमम।। ।। ततः स्तंभरोपणादियथोक्तकृतमंडपेमंडपमातृकाः स्थापयेदित्येके।। ।। तत्रआचार्यहस्तेसुप्रोक्षितादिकंकार्यं।। अत्राः पांतुसुप्रोक्षितमस्त्वितिभवन्तोब्रुवंतु।। अत्राः पांतुसुप्रोक्षितमस्तु।। गंधाः पांतुसौमंगल्यंचास्त्वितिभ०।। गंधाः पांतुसौमंगल्यंचास्तु।। अक्षताः पांतुआयुष्यमस्त्वितिभ०।। अक्षताः पांतुआयुष्यमस्तु।। पुष्पाणिपांतुसौश्रियमस्त्वितिभ०।। पुष्पाणिपांतुसौश्रियमस्तु।। तांबूलानि पांतुऐश्वर्यमस्त्वितिभ०।। तांबूलानिपांतुऐश्वर्यमस्तु।। दक्षिणाः पांतुबहुधनमस्त्वितिभ०।। दक्षिणाः पांतुबहुधनमस्तु।। अपूपाःपांतुबह्वन्नंचास्त्वितिभ०।। अपूपाः पांतुबह्वन्नंचास्तु।। शाखादूर्वाः पांतुवृद्धिरस्त्वितिभ०।। शाखादूर्वाः पांतुशाखापल्लवानांवृद्धिश्चास्तु।। ।। ततआचार्येणशतपर्विकाऽपराजितारसालादिशस्तपादपदलानांलोहितसूत्रेणपंचसूत्रेणपंचधावेष्टनंकार्यं।। ।। ततः व्वसोः पवित्रमसितिमंत्रेण यजमानपत्न्याशाखासुतैलारोपणंकार्यं।। ॐ व्वसोः पवित्रमसिशतधारंव्वसोः पवित्रमसिसहस्त्रंधारम्।। देवस्त्वासवितापुनातुव्वसोः पवित्रेणशतधारेणसुप्वाकामंधुक्षः।। ।। अहिरिवभोगैरितिशाखासुहरिद्राकुंकुमादिभिः पूजनं।। ।। ॐ अहिरिवभोगैः।। ।। निकामेनिकामेतिशाखास्नपनं।। ।। ॐ निकामेनिकामेनः।। ।। दधिक्राव्णेतिशाखासुदध्यक्षतावंदनं।। ।। ॐ दधिक्राव्णोऽअ।। ।। याओषधीरितियजमानेनशाखाग्रहणं।। ।। ॐ याऽओषधीः।। ।। ततोयजमानपत्न्याहस्तमुशलशस्त्रसहितापंचमींशाखां

गृहीत्वाकांडात्कांडादितिकंडनंकार्यं।। ।। ॐ कांडात्कांडात्प्ररो-
हंती०।। ततआग्नेयादिक्रमेणमंडपकोणस्तंभेषुचतस्त्रोमध्ये-
एकाएवंस्थिरोभवेतिस्थिरीकरणं।। यद्वावंशपात्रमध्ये-
चतुर्षुतत्कोणेषुचतस्त्रोमध्येएकाएवंस्थिरीकरणसमाचारः।। ।। ॐ
स्थिरोभवव्वीड्वंगऽआशुर्भवव्वाज्यर्व्वन्।। पृथुर्भवसुखदस्त्वमग्नेः
पुरीषवाहणः।। ।। तत्रशाखास्तंभे।। नंदिनीन-
लिनीमैत्राउमाचपशुवर्धिनी।। आग्नेयादिक्रमेणैवशाखा-
स्तंभेप्रतिष्ठिताः।। ।। ॐ नंदिन्यैनमः नंदिनींआ०।। ॐनलिन्यैन०
नलिनींआ०।। ॐ मैत्रायैन० मैत्रांआ०।। ॐ उमायैन० उमांआ०।।
ॐ पशुवर्धिन्यैन० पशुवर्धीनीं०।। 5।। ।। मनोजूतिरितिप्रतिष्ठा-
प्यसर्वासातंत्रेण।। ॐ भूर्भूवः स्वः नंदिन्यादिमंडपमातृ-
भ्योनमइत्यनेन मंत्रेणावाहनादिषोडशोपचारैः पूजयेत्।। अनयापूजया
नंदिन्यादिमंडपमातरः प्रीयंतांनमम।। ।। ततः सगणाधिपगौर्यादि-
मातृणांवंशपात्रेवापीठोपरिरक्तं वापीतंपटंयथाचारंप्रसार्यतदुपरि-
कुंकुमादिनालिखितप्रतिमासुवाक्षतपुंजेषुपूगीफलेषुस्थापनंकार्यं।।
गौरीपद्माशचीमेधासावित्री विजयाजया।। देवसेनास्व-
धास्वाहामातरोलोकमातरः।। धृतिः पुष्टिस्तथातुष्टिरात्मनः कुलदेवता।।
गणेशेनाधिकाह्येतावृद्धौपूज्याश्चतुर्दश।। अत्रचतुर्दशपदसमाहारान्मातरो
लोकमातरइतिसर्वासांविशेषणं।। ।। ॐ गणेशायनमः
गणेशंआवाहयामि। ॐ गौर्यैन० गौरींआ०।। ॐ पद्मायैन०
पद्मां०। ॐ शच्यैः० शचीं०।। ॐ मेधायै० मेधां०।। ॐ
सावित्र्यै० सावित्रीं।। ॐ विजयायै० विजयां०।। ॐ जयायै०
जयां०।। ॐ देवसेनायै० देवसेनां०।। ॐ स्वधायै० स्वधां०।।
ॐ स्वाहायै० स्वाहां०।। ॐ धृत्यै० धृतिं०।। ॐ पुष्टयै०
पुष्टिं०।। ॐ तुष्टयै० तुष्टिं०।। ॐ कुलदेवतायै० कुलदेवतां०।।14।।
इत्यावाह्य।। मनोजूतिरितिप्रतिष्ठाप्य।। ॐ भूर्भूवः स्वः सगणाधि-

पगौर्यादिभ्योमातृभ्योनमः इत्यनेनषोडशोपचारैः संपूजयेत्।। ।।
अथजलमातरः।। मत्सीकूर्मीचवाराहीमांडुकीमकरीतथा।। ग्राह-
कीक्रौंचकीचैवसप्तैताजलमातरः।। कांस्येवाताम्रपात्रेवाप्रभूत-
जलपूरणं।। तत्रमत्स्यादीरावाह्यपूजयेज्जलमातृकाः।। ॐ मत्स्यैनमः
मत्सींआवाहयामि।। ॐ कूर्म्यै० कूर्मीं०।। ॐ वाराह्यै० वाराहीं०।।
ॐ मांडूक्यै० मांडूकी०।। ॐ मकर्यै० मकरीं०।। ॐ ग्राहक्यै०
ग्राहकीं०।। ॐ क्रौंचक्यै० क्रौंचकीं०।।7।। इत्यावाह्य।।
पूर्ववत्प्रतिष्ठाप्य ॐ भूर्भूवः स्वः मत्स्यादिभ्योजलमातृभ्योनमइत्यनेन
पूजयेत्।। ।। अथस्थलमातरः।। ।। ब्राह्मीमाहेश्वरीचैवकौमारी-
वैष्णवीतथा।। वाराहीचतथेंद्राणीचामुंडासप्तमातरः।। ।। ॐ ब्राह्म्यै०
ब्राह्मीं०।। ॐ माहेश्वर्यै० माहेश्वरीं०।। ॐ कौमार्यै०कौमारीं०।।
ॐवैष्णव्यै० वैष्णवीं०।। ॐ वाराह्यै० वाराहीं०।। ॐइंद्राण्यै०
इंद्राणीं।। ॐ चामुंडायै० चामुंडां०।। 7।। एताःगौर्यादिवच्छूर्पे-
आवाह्यप्राग्वन्नाममंत्रेणपूजयेत्।। ।। अथद्वारमातरः।। ।।
जयंतीमंगलाचैवपिंगलादक्षिणेगृहात्।। आनंदवर्धिनीवामे-
महाकालीचनिर्गमे।। गृहस्यदक्षिणेभागेतिस्रो लेख्यास्तुमातरः।।
वामभागेतथाद्वेचजयंत्यादिक्रमेणतु।। ॐ जयंत्यै० जयंतीं०।। ०
मंगलायै० मंगलां०।। ॐ पिंगलायै० पिंगलां०।। 3।।
इतिद्वारदक्षिणे।। ॐ आनंदवर्धिन्यै० आनंदवर्धिनीं।। ॐ महाकाल्यै०
महाकाली०।। 3।। इतिवामे।। इत्युक्तदेशेआवाह्यप्राग्व-
त्प्रतिष्ठाप्यनाममंत्रेणसंपूजयेत्।। ।। ततोगृहमातृणां
गौर्यादिवच्छूर्पेस्थापनंकार्यं।। कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिः
श्रद्धाक्रियामतिः।। बुद्धिर्लज्जा वपुः शांतिस्तुष्टिःकांतिस्तुमातरः।।
।। कीर्त्यै० कीर्त्तिं०।। ॐ लक्ष्म्यै० लक्ष्मीं०।। ॐधृत्यै०
धृतिं०।। ॐ मेधायै० मेधां०।। ॐ पुष्टयै० पुष्टिं०।। ॐ
श्रद्धायै० श्रद्धां०।। ॐ क्रियायै० क्रियां०।। ॐ मत्यै० मतिं०।।

ॐ बुद्ध्यै० बुद्धिं०।। ॐ लज्जावपुषे० लज्जावपुरावा०।। ॐ शांत्यै० शांतिं०।। ॐ तुष्ट्यै० तुष्टिं०।। ॐ कांत्यै० कांतिं०।। 13।। इत्यावाह्य।। प्राग्वत्प्रतिष्ठांकृत्वानाममंत्रेणसंपूजयेत्।। ।। अथघृतमातरः।। ।। एताः कुड्येकुंकुमेनलेख्याः।। श्रीर्लक्ष्मी धृतिर्मेधापुष्टिः श्रद्धासरस्वती।। मांगल्येषुप्रपूज्यंतेसप्तैताघृतमातरः।। ॐ श्रियै० श्रियं० ॐ लक्ष्म्यै० लक्ष्मीं०।। ॐ धृत्यै० धृतिं०। ॐ मेधायै० मेधां०।। ॐ श्रद्धायै० श्रद्धां०।। ॐ सरस्वत्यै० सरस्वतीं०।। 7। 64।। इत्यावाह्य।। पूर्ववत्प्रतिष्ठाप्यनाम-मंत्रेणसंपूजयेत्।। ।। अथवाषड्विनायकादिघृतमातृकांतानांचतुः षष्टिमातृणांस्थापनंकृत्वा।। मनोजूतिरितिमंत्रेणप्रतिष्ठाप्य-सर्वाएकतंत्रेणसमख्ये देव्याधियाइतिमत्रेणषोडशोपचारैः संपूजयेत्।। ॐ समख्येदेव्याधियासन्दिक्षिणयोरुचक्षसा।। माम्ऽआयुः प्प्रमोषीर्मोऽअहन्तवव्वीरंविंदेयतवदेविसन्दृशी।। ततोयजमानः स्वयंसंस्थापितमातृशूर्पंगृहीत्वा भार्यया चाविघ्नकलशं-संग्राहयित्वातामग्रतः कृत्वामंडपतोगृहमध्येदेवाग्रेतत्संस्थापयेत्।। तद्वामपार्श्वेदीपंचस्थापयेत्।। ततः कुड्यलग्नावसोर्धाराः सप्त-धाराघृतेनतु।। कारयेत्पंचधारावानातिन्यूनाः कदाचनेतिवचनादा-वाहितघृतमातृणामुपरिनागवल्लीदलेनरक्तसूत्रेणवा गुडयुक्तेन-केवलेनवाघृतेनाभितः प्राक्संस्थोदक्संस्थावाधारांवसोः पवित्रमितिमंत्रेणकारयेत्।। ॐ व्वसोः पवित्रम्।। ।। अथायुष्यमंत्रजपः।। ।। ॐ आयुष्यंवर्च्चस्यꣳ रायस्पोषमौद्भिदम्।। इदꣳहिरण्यम्वर्च्चस्वज्जैत्रायाविशतादुमाम्।। नतद्रक्षां०।। यदा-बंध्नन्दाक्षायणाहिरण्यꣳशतानीकायसुमनस्यमानाः।। तन्म-आबध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम्।। केचिदत्र-भद्रङ्कर्णेत्यादिविरोहतादित्यंतमृक्चतुष्टयंजपंति।। इत्यायुष्यमंत्रजपः।। ।। अत्रमंडपाभावात्तत्पूजनेप्रमाणंशिष्टाचारएव।। पंचसुबहिः

शालायांविवाहेचूडोपनयनेकेशांतेसीमंतोन्नयनइतिपारस्करोक्ते-
र्विवाहादिपंचस्वेवमंडपसत्त्वात्।। यत्रनमंडपस्तत्राविघ्नमंडपजल-
स्थलद्वारमातृकादीनांस्थापनंनकार्यं।। किंतुतत्रसगणाधिप-
गौर्यादिचतुर्दशमातृणांस्थापनंकार्यमितिदिक्।। ।। इतिमातृकापूजनम्।।
अथनांदीश्राद्धं।। ।। तत्रकालः।। पूर्वाह्णः।। आभ्युदयिके-
प्रदक्षिणमुपचारः पूर्वाह्णेपित्र्यमंत्रवर्जंजपतिऋजवोदर्भायवै-
स्तिलार्थइतिकात्यायनोक्तत्वात्।। अस्यार्थः।। पुत्रजन्मविवाहादि-
रूपोऽभ्युदयस्तस्मिन्सतिक्रियमाणंतदाभ्युदयिकशब्देनोच्यते।।
तत्रप्रदक्षिणमुपचारः।। उपचरणमुपचारः। अनुष्ठानकरणं।।
तेनात्रसर्वमनुष्ठानंप्रदक्षिणंभवतीत्यर्थः।। अत्रप्रदक्षिणग्रहणंकर्म-
कर्तृनिष्ठसकलदैवधर्मोपलक्षणार्थं।। ततश्चप्राक्संस्थत्वोद-
क्संस्थत्वोपवीतित्वप्राङ्मुखत्वदक्षिणजानुनिपातित्वदेवतीर्थ-
वत्त्वादिदैवधर्मः कृत्स्नोत्रभवति।। यथाहहेमाद्रौशातातपः।।
कर्तव्यंचाभ्युदयिकंश्राद्धमभ्युदयार्थिना।। सव्येनचोपवीतेन-
ऋजुदर्भैश्चधीमता।। पितृणांरूपमास्थायदेवाअन्नंसमश्नुते।।
तस्मात्सव्येनदातव्यंवृद्धिश्राद्धेतुनित्यशः।। यथैवोपचरेद्देवांस्तथा-
वृद्धौपितॄनपीति।। पूर्वाह्णे।। पूर्वसूत्राद्विभक्तिव्यत्ययेनद्वितीयां-
तमाभ्युदयिकपदमत्रानुवर्तते।। ततश्चपूर्वाह्णेआभ्युदयिकं-
विधेयमित्यर्थः।। प्रकृतेरपराह्णेप्राप्तमप्येतत्पूर्वाह्णेविधीयते।। अत्रपूर्वा-
ह्णस्त्रेधाविभक्तस्याह्नः प्रथमो भागः।। पूर्वाह्णोवैदेवानांमध्यंदिनोमनुष्या-
णामपराह्णः पितृणामित्यर्थवादेपूर्वाह्णमध्याह्नापराह्णानांत्रयाणांदिवसभागा-
नामभिधानात्।। अतएवच्छंदोगपरिशिष्टेकात्यायनः।। पिंडान्वाहार्य-
कंश्राद्धं क्षीणेराजनिशस्यते।। वासरस्यतृतीयेंशेनातिसंध्यासमी-
पतइतित्रेधाविभाग माह।। विभागस्तुसमोज्ञेयः।। समंस्यादश्रुतत्वादि-
तिज्ञात्।। अग्न्याधियाभ्युदयिकेविशेषोगालवेनाभिहितः।।
पार्वणंचापराह्णेतुवृद्धिश्राद्धंतथाग्निकमिति।। पुत्रजन्मादौतुतत्काल-

एवनपुनस्तत्रपूर्वाह्ननियमः।। यथाहलौगाक्षिः।। नियतेषुनिमित्तेषु-
प्रातर्वृद्धिनिमित्तकं।। तेषामनियतत्वेतुतदानंतर्यमिष्यतइति।।
यत्तुमातृश्राद्धंतुपूर्वाह्णेमध्याह्नेपैतृकंतथाततोमातामहानांचवृद्धौ-
श्राद्धत्रयंस्मृतमित्यादिहेमाद्र्युदाहृतैर्गार्ग्यशातातपादिस्मृति-
वाक्यैराभ्युदयिकंश्राद्धमेकैकमात्रादिश्राद्धस्यैकैकदिनसाध्यत्वाद्दिनत्रय
साध्यमसंभवेपूर्वाह्णादिकालत्रयसाध्यत्वेनैकदिनसाध्यमुक्तं-
तदन्यशाखाविषयं।। वाजसनेयिनांतुएकवचननिर्देशादेकस्मिन्पूर्वाह्णे-
आभ्युदयिकंकार्यमित्यर्थकात्पूर्वाह्णइतिसूत्रादाभ्युदयिकश्राद्ध-
स्यैकपूर्वाह्णकालसाध्यतावगमात्।। यदितुमात्रादित्रीणिश्राद्धानिसूत्र-
कृताउक्तानिस्युस्तदातेषांदिनत्रयसाध्यतापूर्वाह्णादिकालत्रय-
साध्यवास्यात्।। नचसूत्रकृतात्रीणिश्राद्धान्युक्तानि।। किंतुपितृ-
मातामहपार्वणद्वयात्मकंश्राद्धद्वयमेवोक्तं। अपि च।। मात्रादि-
श्राद्धानांकालभेदात्प्रयोगभेदोभविष्यति।। सूत्रकारस्तुद्वयोः श्राद्धयोः
प्रयोगैकंत्वंदर्शयति।। नांदीमुखाः पितरः पितामहाः प्रपितामहा-
मातामहाः प्रमातामहावृद्धप्रमातामहाश्चप्रीयंतामिति।। अत्रहिपूर्वाह्ण-
रूपकालैक्यात्प्रयोगैक्येनषट्दैवतंपार्वणद्वयात्मकमाभ्युदयिकंश्राद्धमुक्तं।।
षण्णामुपादानात्।। छन्दोगपरिशिष्टेकात्यायनेनापि।। आयुष्याणि-
चशांत्यर्थं जप्त्वातत्रसमाहितः।। षड्भ्यः पितृभ्यस्तदनुभक्त्या-
श्राद्धमुपक्रमेदित्यनेनषड्दैवतमाभ्युदयिकंश्राद्धमुक्त्वाप्रागग्रेष्वथ-
दर्भेषुआद्यमामंत्र्यपूर्ववत्।। अपः क्षिपेन्मूलदेशेऽवनेनिक्ष्वेति-
निस्तिलाः।। द्वितीयंचतृतीयंचमध्यदेशाग्रदेशयोः।। मातामह-
प्रभृतींस्तुएतेषामेववामतइत्यनेनप्रयोगैक्यंतत्रप्रदर्शितं।। नहिप्रयोग-
भेदेपित्रादीनांवामतोमातामहादीनामवनेजनंसंभवति।। आद्यंपितरं-
द्वितीयंपितामहंतृतीयंप्रपितामहं।। स्वेनभर्त्रासमंभुंक्तेमाताश्राद्धं-
सुधासमं।। पितामहीचस्वेनैवस्वेनैवप्रपितामहीति।। नयोषिद्भ्यः
पृथग्दद्यादवसानदिनादृते।। स्वभर्तृपिंडदानाच्चतृप्तिरासांयतः स्मृता-

इतिछंदोगपरिशिष्टेकात्यायनेनमातृभ्यः पृथक्त्वेनश्राद्धप्रदानस्य-प्रतिषिद्धत्वाच।। स्त्रीभ्यश्चान्वष्टकावदाभ्युदयिकेविशेषोप-देशाभावाच्च।। सूत्रेविशेषोपदेशाभावेपि।। अन्वष्टकासुवृद्धौ च गयायांचक्षयेहनि।। मातुः श्राद्धंपृथक्शस्तमन्यत्रपतिनासहे-तिस्मृत्यंतरेविशेषउक्त इतिचेन्न।। नांदीमुखाः पितरः पितामहाइत्यादिसूत्रविरोधात्। षड्भ्यः पितृभ्यइतिप्राग-ग्रेष्वथदर्भेष्वितिपूर्वोक्तकात्यायनवचनविरोधाद्वाजसनेयि-भिश्छंदोगैश्चषड्दैवत्यमेवैक प्रयोगमाभ्युदयिकंश्राद्धं कर्तव्यमिति।। यत्तु।। अन्वष्टकासुवृद्धौचेतिस्मृत्यंतरंतच्छाखांतरविषयं।। यानितु।। मातृश्राद्धंतुपूर्वंस्यात्पितॄणांतदनंतरं।। ततोमातामहानांचवृद्धौ श्राद्धंत्रयंस्मृतमिति।। मातृश्राद्धंतुपूर्वेद्युः कर्माहनितुपैतृकं।। मातामहंचोत्तरेद्युर्वृद्धौश्राद्धत्रयंस्मृमिति।। मातृश्राद्धंतुपूर्वाह्णेमध्याह्नेपैतृकंतथा।। ततोमातामहानांचवृद्धौश्राद्धं त्रयंस्मृतमितिहेमाद्र्-यद्यादिनिबंधधृतैः शातातपगार्ग्या दिस्मृतिवाक्यैः कालभेदाद्भिन्नप्रयो-गाणित्रीणिश्राद्धान्युक्तानितानियेषांसूत्रे आभ्युदयिकेविशेषतः पार्वणत्रयविधिरस्तिपार्वणद्वयोर्विध्यभावोस्तितच्छाखा विषयाणि।। यदपि।। अलाभेभिन्नकालानांनांदीश्राद्धंत्रयंबुधः।। पूर्वेद्युर्वै प्रकुर्वीतपूर्वाह्णेमातृपूर्वकमितिवृद्धमनुवचनंतदपिशाखांतरविषयं।। यत्रहि मात्रादिश्राद्धत्रयविधिः कालत्रयेस्तितत्रैवानुकल्पतया-कालैकत्वेनविधियुक्तः।। नहिकात्यायनसूत्रादौकालत्रयमात्रादि-श्राद्धत्रयविधिरस्ति।। तस्माद्वाजसनेयिभिरेकस्मिन्पूर्वाह्णएवैक-प्रयोगपार्वणद्वयात्मकमाभ्युदयिकं श्राद्धमनुष्ठेयमितिदिक्।। पित्र्यमंत्र-वर्जंजपः।। पित्र्यमंत्राअश्नत्सुजपेदित्य त्रोक्ताउदीरतामवरइत्यादय-स्तान्वर्जयित्वजपः कर्तव्यइत्यर्थः।। ऋजवोदर्भाः अत्रऋज-वोदर्भाभवंतिनद्विगुणाः।। यवैस्तिलार्थः।। अत्रतिलार्थाः सर्वेयवैः कार्याः।। तदत्रमंत्रेपियवोसीत्यूहः कार्यइति।। अत्राभ्युदयिके-

श्राद्धेसत्यवसू विश्वेदेवाः।। इष्टिश्राद्धेक्रतूदक्षौसत्यौनांदीमुखेवसू-
इतिहेमाद्रौ शंखोक्तेः।। अत्रसत्यवस्वोः समुदितयोरेवाग्नीषोमवद्दे-
वतात्वंनतुदेवतयोः समुच्चयइति।। तेनात्रनब्राह्मणद्वयेप्रत्येक-
मेकैकस्यप्रयोगइतिहेमाद्रौस्पष्टं।। ।। एतत्सपिंडमपिंडंवा।। दधि-
बदराक्षतमिश्राः पिंडाइतिकात्यायनेनसपिंडोपादानात्सपिंडं।।
पिंडदानंचात्रवैकल्पिकमित्युक्तंमिताक्षरायां।। वृद्धिश्राद्धेविकल्पेनपिंड-
दानंबुधैः स्मृतमिति।। हेमाद्रौविष्णुपुराणेपि।। दध्यक्षतैःसबदरैः
प्राङ्मुखोदङ्मुखोपिवा।। देवतीर्थेनवैपिंडान्दद्यात्कामेनवा नृपेति।।
कामेनइच्छया।। आभ्युदयिकंप्रकृत्याहिताग्नेः पित्रर्चनंपिंडैरेवेति-
निगमपरिशिष्टोक्तत्वादाहिताग्नेः सपिंडकाभ्युदयिकश्राद्धनियमः।।
तदितरस्यतुसपिंडकमपिंडकंवेतिविकल्पः।। अत्रपिंडकरणाकरणयोः
कुलाचारपरत्वेन व्यवस्थाभिहिताहेमाद्रौभविष्यपुराणे।।
पिडनिर्वपणंकुर्यान्नवाकुर्यान्नराधिप।। वृद्धिश्राद्धेमहाबाहोकुल-
धर्ममवेक्ष्यवेति।। अनेनयेषांकुलेवृद्धपरंपरया वृद्धिश्राद्धेपिंडदान-
मनुष्ठीयतेतैरनुष्ठेयमेव।। येषांतुकुलेनानुष्ठीयतेतैर्नानुष्ठेयमिति।।
केचिदत्रैवंव्याचक्षते।। दधिबदराक्षतमिश्राः पिंडाइतिसूत्रेपिंडग्रहणंपक्ष
प्राप्तापिंडकश्राद्धव्युदासार्थं।। पिंडदानप्राधान्यात्तदभावेंऽगानुष्ठा
नायोगात्।। पिंडदानप्राधान्यंतुनिर्णयसिंधौछंदोगपरिष्टेकात्यायनेना-
भिहितं।। प्राधन्यंपिंडदानस्यकेचिदाहुर्मनीषिणः।। गयादौपिंडमात्रस्य-
दीयमानस्य दर्शनात्।। भोजनस्यप्रधानत्वंवदंत्यन्येमहर्षयः।।
ब्राह्मणानांपरीक्षायांमहा यत्नप्रदर्शनात्।। प्राधान्यमुभयोर्यस्मात्तस्मा-
देषसमुच्चयइति।। अत्रकेचित्पदेन यजुर्वेदिनउच्यंते।। अन्यपदेन-
बह्वृचाः।। छंदोगानां तुभोजनपिंडदानयोरुभयोः प्राधान्यमिति।।
श्राद्धकाशिकायांधर्मप्रदीपेपि।। यजुषांपिंडदानंतुबह्वृचाद्विजतर्पणं।।
श्राद्धशब्दाभिधेयंस्यादुभयंसामवेदिनामिति।। विस्तरस्तुपिंडदान-
प्राधान्यंकर्कभाष्येनिरूपितं।। तस्माद्वाजसनेयिनांसर्वेषांसपिंडकमा-

भ्युदयिकश्राद्धंभवतीतिस्वसूत्रानुरूपं।। यत्तुवृद्धिश्राद्धेविकल्पे-
नपिंडदानंबुधैः स्मृतमितिमिताक्षरायां वचनं।। यच्च।। पिंडनिर्वपणं-
कुर्यान्नवाकुर्यान्नराधिपेतिभविष्यपुराणवचनंतदन्यशाखाविषयमिति।।
यद्यपिदधिबदराक्षतमिश्राः पिंडाइतिसूत्रेपिंडपदोपादान-
स्यापिंडकव्युदासार्थत्वेनहेतुनासकंल्पश्राद्धंकात्यायनानांनभवतीत्य-
भिहितंप्राक्।। तथापिसमग्रंयस्तुशक्नोतिकर्तुंनैवेहपार्वणं।।
अपिसंकल्पविधिनाकालेतस्यविधीयतइतिहेमाद्रौसंवर्तेनाशक्तं-
प्रतिसंकल्पश्राद्धविधानात्।। अथवावृद्ध्यनंतरंपिंडदाननिषेधंप्रकृत्य-
वृद्धिमात्रेतथान्यत्रपिंडदाननिराक्रियेतिस्मृतिरत्नावलीधृतवचनेनवृद्ध्-
यनंतरभाविनिवृद्धावपिपिंडदानस्य प्रतिषिद्धत्वात्तादृशस्थलेपिंड-
निषेधान्यथाऽपपत्याभियुक्तैः संकल्पश्राद्धानुष्ठानस्यैवौचित्येन-
स्वीकारात्।। अनग्निकोयदाविप्रउच्छिन्नाग्निरथापिवा।।
तदावृद्धिषुसर्वासुसांकल्पं श्राद्धमाचरेदितिहेमाद्रौषड्त्रिंशन्मतेअनग्नि-
कोच्छिन्नाग्निकर्तृकासुसर्वासुवृद्धिषुसंकल्प श्राद्धस्यैव-
विहितत्वात्सांकल्पिकाभ्युदयिकश्राद्धमिहोच्यते।। ।। सांकल्पि-
कश्राद्धस्वरूपमाह।। ।। हेमाद्रौसंवर्तः।। पात्रभोज्यस्यचान्नस्यत्यागः
संकल्पउच्यते। तत्प्रयुक्तोविधिर्यस्तुयत्तेनव्यपदिशते।।
तावन्मात्रेणसंबद्धं श्राद्धशब्दःसंकल्पमुच्यत इति। पिंडहीनः
श्राद्धशब्दः संकल्पश्राद्धपर्यायइतिहेमाद्रौ।। तत्र-
सांकल्पिकेस्वमंत्रकावाहनार्घाग्नौकरणपिंडदानविकराक्षय्यस्व-
धावाचनप्रश्नेत्येतत्सप्तकंवर्ज्यं।। एतन्मूलवचनानिहेमाद्र्यादि-
निबंधग्रंथेभ्योवगंतव्यानि।। विस्तरभयान्नेह लिखितानि।।
संकल्पवाक्यमपिप्रथमांतमेवात्रप्रयोज्यं।। शुभायप्रथमांतेन
वृद्धौसंकल्पमाचरेत्।। नषष्ठ्यायदिवाकुर्यान्महादोषोभिजायतइति-
संग्रहोक्तः।। अथवृद्धिश्राद्धकर्तुर्जीवत्पितृकत्वेनिर्णयः।। ।।
पितृवर्गेमातृवर्गेतथा मातामहस्यच।। जीवेत्तुयदिवर्गाद्यस्तं-

वर्गंतुपरित्यजेदितिन्यायेन जीवत्पितृकः स्वापत्यसंस्कारेषुमातृमाता-
महपार्वणयुतंनांदीश्राद्धंकुर्यात्।। मातरिजीवत्यांमातामहपार्वणकमेव।।
मातामहेजीवतिमातृपार्वणकमेव।। केवलमातृपार्वणेविश्वेदेवानकार्याः।।
वर्गत्रयाद्येषुमातृ पितृमातामहेषुजीवत्सुनांदीश्राद्धलोपएवसुत-
संस्कारेषूचितः।। द्वितीयविवाहाधानपुत्रेष्टिसोम यागादिषुस्वसंस्कार-
कर्मसुयेभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतः।। तथा चमृतमातृ-
मातामहकोपिजीवत्पितृकः स्वसंस्कारेपितुर्मातृपितामहीप्रपितामह्यः।।
पितुः पितृपितामहप्रपितामहाः।। पितुर्मातामहप्रमातामह-
वृद्धप्रमातामहाः सपत्नीकाः इत्येवंपार्वणत्रयमुद्दिश्यश्राद्धंकुर्यात्।।
नतुस्वमातृमातामहपार्वणोद्देशः।। पितरिपितामहेचजीवतिस्वसंस्का-
रेपितामहस्यमातृपितामहीप्रपितामह्यइत्याद्युद्देशः।। एवं-
प्रपितामहेपियोज्यं।। पितुर्मात्रादिजीवनेतत्पार्वणलोपएव।। तथा
चयेभ्यएवपितादद्यादितिपक्षस्यवर्गाद्यजीवनेतत्पार्वणलोप-
इतिद्वारलोपपक्षस्य चस्वसंस्कारस्वापत्य संस्कारभेदेनव्यवस्था-
सिद्धांतितेतिज्ञेयं।। केचित्तुपक्षद्वयस्यैच्छिकोविकल्पोनतुव्य-
वस्थितइत्याहुः।। एवंमृतपितृकस्यजीवन्मातृमातामहस्यपितुः
पार्वणेनैवनांदीश्राद्धसिद्धिर्ज्ञेया।। समावर्तनस्यमाणवककर्तृ-
कत्वेपितदंगभूतनांदीश्राद्धेपितुस्तदभावेज्येष्ठभ्रात्रादेरधिकार-
इतिकेचित्।। तत्रपितापुत्रसमावर्तने स्वपितृभ्योनांदीश्राद्धंकुर्यात्।।
पिताजीवत्पितृकश्चेत् सुतसंस्कारत्वात्द्वारलोपपक्षोयुक्त इतिभाति।।
माणवकपितुः प्रवासा दिनाअसन्निधानेभ्रात्रादिर्माणवकस्यपितु-
र्मातृपितामहीप्रपितामह्यइत्याद्युच्चार्य श्राद्धंकुर्यात्।। मृतपितृकमाण-
वकसमावर्तनेपितृव्यभ्रात्रादिरस्यमाणवकस्य मातृपितामहीत्याद्युच्चार-
येत्।। भ्रात्रादेरभावेस्वयमेवस्वपितृभ्योदद्यात्।। एवंजीवत्पितृकोपि-
पितुरसन्निधानेभ्रात्रादेरभावेचापितुः पितृभ्यः स्वयमेव नांदीमुखं-
कुर्यात्।। उपनयनेनकर्माधिकारस्यजातत्वात्।। एवंविवाहेपिद्रष्टव्यं।।

मृतपितृकस्यचौलोपनयनादिकंपितृव्यमातुलादिकुर्वन्नस्यसंस्कार्यस्यपितृ पितामहप्रपितामहेत्याद्युच्चार्यश्राद्धंकुर्यात्।। जीवतः पितुरसन्नि-धानेनकुर्वन्मातुलादिरस्यसंस्कार्यस्यपितुर्जनकादीनुद्दिश्यैवकुर्यान्नतु संस्कार्यस्यमृतानपिमात्रादीनितिसंक्षेपः।। ।। अथाभ्युदयिकश्राद्धोत्तरं-देवकोत्थापनपर्यंतंनिषेधानाह।। ।। गार्ग्यः।। नांदीश्राद्धेकृतेपश्चाद्या-वन्मातृविसर्जनं।। दर्शश्राद्धंक्षयश्राद्धंस्नानंशीतोदकेन च।। अपसव्यंस्वधाकारं नित्यश्राद्धंतथैवच।। ब्रह्मयज्ञं चाध्ययनं नदी-सीमातिलंघनं।। उपवास व्रतंचैवश्राद्धभोजनमेवच।। नैवकुर्युः सपिंडाश्च मंडपोद्वासनावधीति।। सापिंड्यंचात्रत्रिपुरुषपर्यंतंज्ञेयं।। अत्रनित्यश्राद्धनिषेधेनतत्कार्यविहितपितृयज्ञनिषेधसिद्धेस्वधा-कारग्रहणंतत्सहितवैश्वदेवनिषेधार्थं।। आचारसंवादलाभाच्चेति-बहवइत्युक्तंस्मृतिकौस्तुभे।। कर्मप्रदीपे।। कृतेभ्युदयश्राद्धे तन्मातृकोत्थापनं विना।। नद्वितीयंनांदीमुखंप्रकुर्यात्पुत्रजन्मनि।। तथैवाभ्युदयंकार्यंराज्ञः पट्टाभिषेचने।। अन्यथाकुरुतेमोहादपमृत्यु-करंपरमिति।। शास्त्रार्थप्रदीपेपि।। मंडपोद्वासनात्पूर्वंनांदी-श्राद्धेकृतेपुनः।। येकुर्वंतिनरामोहादपमृत्युंव्रजंतितइति।। अयंनिषे-धोपित्रिवपुरुषसपिंडपर्यंतमेवेतिपरुषार्थचिंतामणौ।। ।। अथसांकल्पिकनांदीश्राद्धप्रयोगः।। ।। नांदीमुखाः सत्यवसुसंज्ञकाः विश्वेदेवाः।। ॐ भूर्भुवःस्वःइदं वःपाद्यं पादा वनेजनंपाद-प्रक्षालनंवृद्धिः।। गोत्राः पितृपितामहप्रपितामहाः सपत्नीकाः नांदीमुखाः।। ॐ भूर्भुवः स्वः इदंवः पाद्यंपादावनेजनंपादप्रक्षालनं वृद्धिः।। द्वितीयगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः।। ॐ भूर्भुवः स्वः इदंवः पाद्यंपादावनेजनंपादप्रक्षाल०।। अद्यपूर्वोच्चारित० शांतिपूर्वकगर्भाधानांगत्वेनसांकल्पिकविधिना नांदीश्राद्धंकरिष्ये।। ।। आसनदानं।। ।। सत्यवसुसंज्ञकाः विश्वेदेवाः नांदीमुखाः। ॐ भूर्भुवःस्वःइदंवआसनं।। सुखासनं।। नांदीश्राद्धेक्षणौ

क्रियेतां।। तथेतिविप्रौ।। प्राप्नुतांभवंतौकर्ता।। प्राप्नवावेतिविप्रौ।। गोत्राः पितृपितामहप्रपितामहाः सपत्नीकाः नांदीमुखाः।। ॐ भूर्भु० इदंवआसनं०।। द्वितीयगोत्राः मातामहप्रातामहवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः।। ॐ भू० इदं व आसनं०।। ततोगंधा-दिदानं।। ।। सत्यवसुसंज्ञकाः विश्वेदेवाः नांदीमुखाः इदंवोगंधा-द्यर्चनंस्वाहासंपद्यतांवृद्धिः। गोत्राः पितृपितामहप्रपितामहाः सपत्नीकाः नांदीमुखाः इदंवोगंधा०।। द्वितीयगोत्राः मातामहप्रमाता-महवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः इदंवोगंधा०।। ।। भोजननिष्क्रयद्रव्यदानं।। ।। सत्यवसुसंज्ञकाः विश्वेदेवाः नांदीमुखाः युग्मब्राह्मणभोजनपर्याप्तमन्नंवातन्निष्क्रयीभूतंकिंचिद्धिरण्यं दत्तंअमृतरूपेणवः स्वाहासंपद्यतांवृद्धिः।। गोत्राः पितृपितामहप्रपिता-महाः सपत्नीकाः नांदीमुखाः युग्मब्राह्मण०द्वितीयगोत्राः मातामहप्रमातामहवृद्ध प्रमातामहाः सपत्नीकाः नांदीमुखाः युग्मब्राह्मण०।। सक्षीरय[7]वमुदकदानं।। ।। नांदीमुखाः सत्यवसुसंज्ञकाः विश्वेदेवाः प्रीयंतां।। गोत्राःपितृपितामह प्रपितामहाः नांदीमुखाः प्रीयंतां।। द्वितीयगोत्राः मातामहप्रमाता महवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः प्रीयंतां।। ।। आशिषांग्रहणं।। ।। गोत्रंनो वर्धतां।। वर्धतांवोगोत्रं।। दातारोनोभिवर्धतां।। अभिवर्धतांवोदातारः।। वेदाश्चनोभिवर्धतां।। वर्धतांवोवेदाः।। संततिर्नोभिवर्द्धतां।। वर्धतांवः संततिः।। श्रद्धाचनोमाव्यगमत्।। माव्यगमद्वः श्रद्धा।। बहुदेयंचनोस्तु।। अस्तुवोबहुदेयं।। अन्नंचनोबहुभवेत्।। भवतुवो-बह्वन्नं।। अतिथींश्चलभामहै।। लभंतांवोतिथयः।। याचितारश्चनः संतु।। संतुवोयाचितारः।। एताआशिषः सत्याः संतु।। संत्वेताः सत्याआशिषः।। दक्षिणादानं।। सत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्यो-नांदीमुखेभ्यः कृतस्यनांदीश्राद्धस्यफलप्रतिष्ठासिध्यर्थं-द्राक्षामलकयवमूलनिष्क्रयीभूतां दक्षिणांदातुमहमुत्सृजे।।

यवमूलंआर्द्रकं।। गोत्रेभ्यः पितृपितामहप्रपिता महेभ्यः सपत्नीकेभ्योनांदीमुखेभ्यः कृतस्य०।। द्वितीयगोत्रेभ्यो मातामह प्रमातामहवृद्धप्रमातामहेभ्यः सपत्नीकेभ्योनांदीमुखेभ्यः कृ०।। ततोनांदीश्राद्धं संपन्नंकर्ता। सुसपन्नंविप्राः।। व्वाजेव्वाजेतिविसृज्य।। ॐ व्वाजेव्वाजेवतव्वाजिनोनोधनेषु विप्राऽअमृताऽऋतज्ञाः।। अस्यमध्वः पिबतमादयध्वन्तृप्तायातपथिभिर्देवयानैः।। आ मावाजस्येत्यनुवृज्य।। ॐ आमाव्वाजस्यप्प्रसवोयंगम्यादे-मेद्यावापृथिवीव्विश्वरूपे।। आ मागंतापितरामातराचामासोमोऽ-अमृतत्वेनगम्यात्।। मयाचरितेसांकल्पिकनांदीश्राद्धे न्यूनातिरिक्तोयो-विधिः सउपविष्टब्राह्मणानांवचनाच्छ्रीगणेश प्रसादात्सर्वः परिपूर्णोस्तु कर्ता।। अस्तुपरिपूर्णः विप्राः।। ।। इतिसंस्कार भास्करे-आभ्युदयिकश्राद्धप्रयोगः।। ।। अथाचार्यादिऋत्विग्वरणम्।। ।। तदुक्तंवसिष्ठेन।। यजमानः शुचिः स्नातः श्रद्धायुक्तो जितेन्द्रियः।। पादशौचार्घवस्त्राद्यैराचार्यादीन्समर्चयेदिति। आचार्यादीन्समर्चयेदित्यु-क्त्वादाचार्यपूर्वकमेवब्रह्मादिऋत्विजांवरणं।। एतेनयेब्राह्मणोवरण-पूर्वकमाचार्यादीनांवरणमाचरंतितेउपेक्षणीयाः।। अत्रपादशौचार्घ-वस्त्राद्यैरित्युक्तत्वात् पादार्घकरणमप्यावश्यकंप्रतिभाति।। तद्यथा।। दधिदुग्धंयवादूर्वागंधाः सिद्धार्थसंयुताः।। जलपुष्पसमायुक्ताः पादार्घएभिरष्टभिरितिवाक्योक्तं।। आपः क्षीरकुशाग्राणिदधि-चंदनमक्षताः।। दूर्वा सिद्धार्थकश्चेतिअष्टांगोअर्घ उच्यतइति-वाक्योक्तंवापादार्घकरणं।। तत्रेत्थमाचारः।। एकस्मिन्शरावेद-ध्याद्यष्टकमपाद्यष्टकंवानिधायाचारात्फलमपितत्रनिक्षिप्यशरावांतरेण चपिधायरक्तसूत्रेणावेष्ट्यसाचार्यविप्राः ॐ पुण्याहमितित्रिर्वदंतः प्राङ्मुखवोदङ्मुखस्थितायसपत्नीकाययजमानायतत्समर्पयंति।। एवंविप्रैर्दत्तंपादार्घंगृहीत्वास्वासनादुत्थायप्राङ्मुखोदङ्मुखेस्थिते-सपत्नीकेयजमानेद्यौः शांतिरितिमंत्रंसर्वेपठंति। ततस्तिष्ठन्नेवप्राङ्मु

खोपविष्टान्ब्राह्मणान्प्रार्थयेत्।। पावनाः सर्ववर्णानांब्राह्मणाब्रह्मरूपिणः।।
अनुगृह्णंतुमामद्य अ॰मुकाख्येचकर्मणि।। स्वस्वकर्मरतानित्यंवेद-
शास्त्रार्थकोविदाः। श्रोत्रियाः सत्यवाचश्चदेवध्यानरताः सदा।।
यद्वाक्यामृतसंसिक्तावृद्धिंयांतिनरद्रुमाः।। अंगीकुर्वंतुमत्कर्म कल्पद्रुम-
समाशिषः।। यथोक्तनियमैर्युक्तामंत्रार्थस्थिरबुद्धयः ।।
यत्कृपालोकनात्सर्वाऋद्धयोवृद्धिमाप्नुयुः।। स्वागतंवोद्विजश्रेष्ठामदनु-
ग्रहकारकाः।। अयमर्घइदंपाद्यंभवद्भिः प्रतिगृह्यतां।। चरणंक्षालना-
द्देवास्तुष्यं तिशुद्धमानसाः।। तज्जलेनचसंसिक्ताः पूर्णाः कामा-
भवंतुमे।। इमंवोर्घ्यंप्र यच्छामिगृह्णंतुप्रीतिमानसाः।। पावयं-
तुचमांनित्यंपूरयंतुमनोरथानिति।। ततोब्राह्मणाग्रेऽर्घंस्थाप-
यित्वोपविशतः।। केचित्तुअर्घोऽर्घोऽर्घइतित्रिरन्येनोक्तेयजमानः प्रतिगृह्यं
तामित्युक्त्वाब्राह्मणहस्तेतदग्रेवाअर्घंस्थापयेत्।। ॐ प्रति-
गृह्णीमइतिसर्वेषांप्रतिवचनमित्येवमाचरंति।। ।। ततोयजमानः।।
आचार्यत्वंकर्तुंयोग्यंब्राह्मणंप्रार्थयेत्।। आचार्य त्वंयथास्वर्गेशक्रा-
दीनांबृहस्पतिः।। तथात्वंममयज्ञेस्मिन्नाचार्योभवसुव्रत।। ॐ
बृहस्पतेऽअतियदर्योअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु।। यद्दीदयच्छव-
सऽऋतप्प्रजाततदस्मासुद्रविणन्धेहिचित्रम्।। अमुकगोत्रोत्पन्नः
अमुकप्रवरान्वितः अमुकशर्मायजमानोहं।। अमुकगोत्रोत्पन्नं
अमुकप्रवरान्वितंशुक्लयजुर्वेदांतर्गतमाध्यंदिनीयशाखाध्या-
यिनंअमुकशर्माणंब्राह्मणंअस्मिन्सग्रहमखरजोदर्शनशांत्या-
ख्येकर्मणिआचार्यत्वेनत्वामहंवृणे। ॐ वृतोस्मीत्युत्क्त्वा।। ॐ
व्रतेनंदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम्।। दक्षिणाश्रद्धामाप्नोति
श्रद्धयासत्यमाप्यते।। ततोयजमानेन।। आचार्यएतत्तेपाद्यं।।
पादप्रक्षालनं।। एषतेअर्घः।। एषतेगंधः।। एतत्तेपुष्पं।। एवंपाद्यादिभिः
संपूज्यब्रह्मत्वंकर्तुंयोग्यंप्रार्थयेत्।। यथाचतुर्मुखोब्रह्मासर्व-
लोकपितामहः।। तथात्वंममयज्ञेस्मिन्ब्रह्माभवद्विजोत्तमः।। ॐ

ब्रह्मयज्ञानंप्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेनआवः।। सबुध्न्याऽ-
उपमाऽअस्य व्विष्ठाः सतश्चयोनिमसतश्चव्विवः।। अस्मिन्-
रजोदर्शनशांत्याख्येकर्मणि ब्रह्मत्वेनत्वामहंवृणे।। वृतोस्मि।।
ततोयजमानेनाचार्यवत्पाद्यादिभिः पूजनं कार्यं।। एवमग्रेसर्वेषां-
ऋत्विजामपिवरणानंतरंपूजनं कार्यं।। वांछितार्थफलावाप्त्यै-
पूजितोसिसुरासुरैः।। निर्विघ्नंक्रतुसंसिध्यैत्वामहंगणपंवृणे।। ॐ
गणानांत्वा०।। अस्मिन्रजोदर्शनशांत्याख्येकर्मणिगाणपत्येनत्वा-
महंवृणे।। वृतोस्मि।। कर्मणामुपदेष्टारंसर्वकर्मविदुत्तमं।।
कर्मिणंवेदतत्वज्ञंसदस्यंत्वा महंवृणे।। ॐ सदसस्पतिमद्भुतं-
प्रियमिंद्रस्यकाम्यं।। सनिम्मेधामयासिष ँ स्वाहा।। अस्मिन्रजोदर्शन-
शांत्याख्येकर्मणिसदस्यत्वेनत्वामहंवृणे।। वृतोस्मि।। ततश्चतुरोष्टौवा-
ऋत्विजोवृणुयात्।। यज्ञादिकर्मकार्येषुऋत्विक्शक्रमखेयथा।।
तथायज्ञादिकर्मेस्मिन्ऋत्विग्त्वंमेमखे भव।। अस्मिन्० ऋत्विक्त्वे-
नत्वामहंवृणे।। वृतोस्मि।। ततः सूक्तजपार्थेऋग्वेदादीन्वृणुयात्।।
ऋग्वेदः पद्मपत्राक्षोगायत्रः सोमदैवतः।। अत्रिगोत्रस्तुविप्रेंद्र-
ऋत्विगत्वंमेमखे भव।। ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं।।
होतारंरत्नधातमम्।। अस्मिन्रजो दर्शनशांत्याख्येकर्मणिऋत्विक्त्वेन-
त्वामहंवृणे।। वृतोस्मि।। कातराक्षोयजुर्वेदस्त्रैष्टुभोब्रह्मदैवतः।।
भारद्वाजस्तुविप्रेंद्रऋत्विग्त्वमेमखेभव।। ॐ इषेत्वोर्जेत्वावायवस्थ-
देवोवः सविताप्रार्प्पयतु श्रेष्ठतमायकर्मणऽआप्यायध्वम-
घ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशत-
माघश ँ सोध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि।।
अस्मिन्० वृणे।। वृतोस्मि।। सामवेदस्तुपिंगाक्षोजागतः शक्रदैवतः।।
काश्यपेयस्तुविप्रेंद्रऋत्विगत्वंमेमखेभव।। ॐ अग्नआयाहिवीतये-
गृणानो हव्यदातये।। निहोतासत्सिबर्हिषि।। अस्मिन्०।।
बृहन्नेत्रोथर्ववेदोनुष्टुभो रुद्रदैवतः।। वैखानसकुलोत्पन्नोऋत्विक्त्वंमे-

मखेभव।। ॐ शन्नोदेवीरभिष्टये आपोभवंतुपीतये।। शंय्योरभिस्र-वंतुनः।। अस्मिन्०।। भगवन्मूर्ति सर्वज्ञसर्वधर्मभृतांवर।। विततेमम-यज्ञेस्मिन्जपार्थेत्वामहंवृणे।। अस्मिन्० रुद्रजपार्थे त्वामहं०।। वृतोस्मि।। एवंवृत्वा ॐ यदाबन्धन्नितिमंत्रेणाचार्यादीना-मृत्विजांहस्तेरक्तसूत्रात्मकंकणबंधनंयजमानेनसमाचारात्कार्यं यथाचारंवरणश्राद्धंच।। तद्यथा।। आचार्या दिऋत्विग्भ्यइमानिवः पाद्यानि।। ततस्तैः पादावनेजनकृतेयजमानेनआचार्यादिऋत्विजां पादप्रक्षालनंविधाय क्षालितचरणेषुऋत्विक्षुद्विराचांतेष्वात्मन-श्चरणौप्रक्षाल्यद्विराचमनं।। तत ॐ स्वस्तिनइंद्रेतिदिग्बंधः।। वरणश्राद्धोपहाराः शुचयोभवंत्वितिवरणश्राद्धोपकरणानांप्रोक्षणं।। ततोदेशकालौसंकीर्त्याचार्यादीन्वृतान्ब्राह्मणानासनगंधादि-भिरर्च्चयिष्येत्येवंसंकल्पंकृत्वासनगंधादिभिराचार्यादि-ऋत्विजामभ्यर्चनं।। आचार्यादिसमस्तऋत्विग्भ्यइमानिव-आसनानि।। आचार्यादिसमस्तऋत्विग्भ्य एतद्वोगंधः।। सुगंधः।। आचार्या० ग्भ्यइमानिवः पुष्पाणिसुपुष्पाणि।। इमा-निवस्त्रयुग्मोपवीतकुंडलमुद्रिकाकेयूरांगदकंठाभरणादीनियथा-दैवतानि तन्निष्क्रयद्रव्यंवाचार्यादिसमस्तऋत्विग्भ्यः स्वाहा-संपद्यतांनमम९। आचार्या० इदंवोज्योतीः सुज्योतिरित्युक्त्वा।। अर्चनविधेः परिपूर्णतास्त्वित्युक्तेअस्त्वितिविप्राः।। आचमनं।। यथादास्यमानानितृप्तिपर्याप्तानिसिद्धान्नानिसोपस्कराणिवाआमान्नानि-आचार्या० भ्यः स्वाहासंपद्यंतान्नममेतिभोजनसंकल्पः।। अस्य-ऋत्विग्वरणकर्मणः सांगतासिद्धयेगांवातन्निष्क्रयद्रव्यंवादक्षिणा-माचार्यादिभ्यः सर्वेभ्यऋत्विग्भ्यः स्वाहा संपद्यंतान्नममेति-गोहिरण्यादिदक्षिणादानं।। यस्यविप्रस्य योभागः सतेन-प्रतिगृह्यतामितिचवक्तव्यं।। अस्यऋत्विग्वरणविधेर्यन्न्यूना-तिरिक्तंतत्सर्वंगणेशांबिकयोः प्रसादाद्ब्राह्मणवचनाच्चपरिपूर्णमस्तु।।

अस्तूपरिपूर्णमितिविप्राः।। ॐ स्वस्तिनइतियजमानस्य-तिलककरणं।। ॐ यदाबध्नन्निति मंत्रेणाचाराद्यजमानदक्षिण-हस्तेकंकणबंधनं।। ॐ तंपत्नीभिरितिमंत्रेणयजमानपत्न्याश्चवामहस्ते।। तत ॐ कांडात्कांडादितिदूर्वयायजमानेनस्वात्मनिमार्जनं।। ॐ दधिक्राव्णइतिअर्घवंदनं।। ॐ याः फलिनीरितियजमानाय-फलसमर्पणं।। अथयजमानेनतान्प्रार्थयेत्।। ब्राह्मणाः संतुमेशस्ताः पापात्पांतुसमाहिताः।। देवानांचैवदातारः पातारः सर्वदेहिनां।। जपयज्ञैस्तथाहोमैर्दानैश्चविविधः पुनः।। देवानांचऋषीणां चतृप्त्यर्थं याजकाः कृताः।। येषांदेहेस्थितावेदाः पावयंतिजगत्त्रयम्।। रक्षंतुसततंतेषांजपयज्ञैर्व्यवस्थिताः।। ब्राह्मणाजंगमं-तीर्थंत्रिषुलोकेषुविश्रुतम्।। तेषांवाक्योदकेनैवशुध्यंतिमलिनोजनाः।। अस्मिन्कर्मणिमेपूज्याः संतुमेनियमान्विताः।। अक्रोधनाः शौचपराः सततंब्रह्मचारिणः। ग्रहध्यानरतानित्यंप्रसन्नमनसः सदा।। अदुष्टभाषणाः संतुमासंतुपरनिंदकाः।। ममापिनियमाह्येतेभवंतुभवतामपि।। इतिसंप्रार्थ्यतान्ब्रूयाद्यथावत्क्रियतांविधिः।। ऋत्विजश्च-यथापूर्वंशक्रादीनांमखेभवन्।। यूयंतथामेभवतऋत्विजोद्विजसत्तमाः। अस्ययागस्यनिष्पत्तौ भवंतोभ्यर्चितामया।। सुप्रसन्नैः प्रकर्तव्यंशांतिकंविधिपूर्वकं।। इति प्रार्थना।। ।। इतिसंस्कार-भास्करेऋत्विग्वरणम्।। ।। अथदिग्रक्षणम्।। ।। समं ततश्च-सिद्धर्थान्क्षिपेद्रक्षोघ्नमंत्रतः।। सर्वतः पंचगव्येनप्रोक्षयेद्यागमंडपं।। आपोहिष्ठा त्र्यृचेनैवततः स्वस्त्ययनंजपे दितिशांतिसारे।। ।। तत्रमंत्राः।। ॐ रक्षोहणम्वलगहनम्वैष्णवीमिदमहन्त-म्वलगमुत्किरामियम्मेनिष्ठ्योयममात्योनिचखानेदमहन्त-म्वलगमुत्किरामियम्मेसमानोयमसमानोनिचखानेद-महन्तम्वलगमुत्किरामियम्मेसबन्धुर्य्यमसबन्धुर्निचखानेद-महन्तम्वलगमुत्किरामियम्मेसजातोनिचखानोत्कृत्याङ्किरामि।।

रक्षोहणौवोव्वलगहनः प्रोक्षामिव्वैष्णन्रक्षोहणौवो व्वलगहनो-वनयामिव्वैष्णवान्रक्षोहणौवोव्वलगहनोवस्तृणामिव्वैष्ण-वान्रक्षोहणौवाँव्वलगहनाऽउपदधामिव्वैष्णवीरं क्षोहणौवांव्वलगहनौ-पर्यूहामिव्वैष्णवीव्वैष्णवमसिव्वैष्णवास्थ।। रक्षसाम्भागोसिनिरस्तथं रक्षऽइदमहथंरक्षोभितिष्ठामीदमहथंरक्षोवबाधऽइदमहथंरक्षोधमन्तमौ नयामि।। घृतेनद्यावापृथिवी प्रोर्णुवाथाँव्वेस्तोव्वेस्तोकानामग्नि राज्यस्यव्वेतु स्वाहा स्वाहाकृतेऽऊर्ध्वनभसंमारुतङ्गच्छतम्।। रक्षोहाव्विश्वचर्षणिरभियोनिमयोहते।। द्रोणेसधस्थमासदत्।। अपसर्पंतुतेभूतायेभूताभूमिसंस्थिताः।। येभूताविघ्नकर्तारस्तेनश्यंतु-शिवाज्ञया।। अपक्रामंतुभूतानिपिशाचाः सर्वतोदिशं।। सर्वेषामविरो-धेनशांतिकर्मसमारभे।। यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वतः।। स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु।। भूतप्रेतपिशाचाद्या अपक्रामंतुराक्षसाः।। स्थानादस्माद्व्रजंत्वन्यत्स्वीकरोमिभुवंत्विमां।। भूतानिराक्षसावापियत्रतिष्ठंतिकेचन।। तेसर्वेप्येपगच्छंतुशांतिकंतुक-रोम्यहमितिमंत्रैः सिद्धार्थानीशानादिसर्वदिक्षुविकरेत्।। उदकोपस्पर्शः।। इतिदिग्रक्षणम्।। ।। ततः पंचगव्यकरणं।। तद्यथा।। गायत्र्यागोमूत्रं।। ॐ तत्सवितु०।। गंधद्वारामितिगोमयं।। ॐ गंधद्वारांदुराधर्षांनित्य पुष्टांकरीषिणीं।। इश्वरींसर्वभूतानांता-मिहोपह्वयेश्रियं।। आप्यायस्वेतिक्षीरं।। ॐ आप्यायस्व-समेतुतेव्विश्वतः सोमवृष्ण्यम्।। भवाव्वाजस्यसङ्गथे।। दधि-क्राव्णेतिदधि।। ॐ दधिक्राव्णो०।। तेजोसीत्याज्यं।। ॐ तेजोसिशुक्रमस्यमृतमसिधामनामासिप्प्रियन्देवानामनाधृष्ट-न्देवयजनमसि।। देवस्यत्वेतिकुशोदकं।। ॐ देवस्यत्वासवितुः।। प्रणवेनयज्ञकाष्ठेनालोड्यआपोहिष्ठेतित्रिभिर्मन्त्रैः कर्मभूमियज्ञसंभारांश्च-प्रोक्षयेत्।। ततः कृतांजलिः स्वस्तिनइतिमंत्रंपठेत्।। ॐ देवाआयांतु-यातुधानाअपयांतुविष्णोदेवयजनंरक्षस्वेतिपठित्वा भूमौप्रादेशंकुर्यात्।।

।। ततोहोममानतोयथार्थंचतुरस्त्रंस्थंडिलंविरच्यतत्रभूमिकूर्मानंतानां-पूजनं।। ॐ भूरसिभूमिरस्यदितिरसिविश्वधायाविश्वंस्यभुवनस्यधर्त्री।। पृथिवीन्यच्छपृथिवीन्दृंहपृथिवीम्माहिंसीः।। इतिमंत्रेण ॐ भूम्यैनमइतिमंत्रेणवा भूमिंषोडशोपचारैः संपूज्यकूर्मानंतौनाममंत्रेण-षोडशोपचारैः संपूजयेत्।। ।। अथस्थंडिलेपंचभूसंस्काराः।। ।। कृमिकीटपतंगाद्याविचरंतिमहीतले।। तेषांसंरक्षणार्थायपरसिमूहन-मुच्यते।। गृहीतव्यास्त्रयोदर्भाः कनिष्ठांगुष्ठमध्यतः।। दक्षिणे-चोत्तरेकुर्यात्त्रित्रिरेषासमूहनमितिकुशकंडिकाकारिकायां।। अत्र-पूर्वस्यामपसारणमितिकेचित्।। ।। रुग्णावृद्धाप्रसूताचवंध्यासंधिन्यमे-ध्यभुक्।। मृतवत्साचनैतासांग्राह्यंमूत्रंशकृत्पयइत्याचारप्रदीपे।। पुराइन्द्रेण वज्रेणहतोवृत्रोमहासुरः।। व्यापितामेदसापृथ्वीतदर्थ-मुपलेपनमितिकुशकंडिकाकारिकायां।। रेखात्रमुदक्संस्थंप्राग-ग्रंस्थंडिलावधि।। अथवैतत्प्रकुर्वीतद्वादशांगुलमायतमितिपरिशिष्टे।। उल्लेखनंततः कुर्यादस्थिकंटकमेवच।। तेषामुद्धरणाथर्यायउल्लेखः कथितोबुधैः।। अंगुष्ठोपकनिष्ठाभ्यामग्निकार्यंतथोत्करं।। रेखाभ्यः समुपादायरत्निमात्रे निधापयेदितिस्मार्तोल्लासेपरिशिष्टेच।। ।। येभ्रमंतिपिशाचाद्याअंतरिक्षनिवासिनः।। तेषांप्रहरणार्थायसमुध्रः कथितोबुधैरितिकुशकंडिकायां।। स्मार्तोल्लासेपरिशिष्टेच।। उत्ता-नेनतुहस्तेनप्रोक्षणंसमुदाहृतं।। तिरश्चावोक्षणंप्रोक्तंनीचेनाभ्युक्षणंस्मृतं।। प्रोक्षणावोक्षणाभ्युक्षणानांभेदआपस्तंबेनोक्तः।। उत्तानेनकरेणापिस-पवित्रेणवारिणा।। विदुषाप्रोक्षणं कार्यंनीचेनावोक्षणंतथा।। प्राजापत्येनतीर्थेनकुर्यादभ्युक्षणंबुधइति।। संपुटेनाग्निमानीयस्था-प्याग्नेर्दिशिकुंडतः।। आमक्रव्यभुजौतस्मात्त्यक्त्वाकुंडेविनिक्षिपेत्।। शरावेभिन्नपात्रे वाकपालेचोल्मुकेनवा।। नाग्नेः प्रणयनंकार्यंव्या-धिशोकभयावहमितिकोटिहोमपद्धतौ।। कपालंखर्परं।। कुलालचक्र-घटितंमृन्मयंपात्रमासुरं।। तदेवहस्तघटितंस्थाल्यादिदैवपैतृकमिति-

गदाधरभाष्ये।। एतेपंचभूसंस्काराइतिभर्तृयज्ञः।। अग्न्यर्थाइतिकर्को-
पाध्यायः।। तेनयत्रयत्राग्नेः स्थापनंतत्रतत्रैतेकर्तव्याइति।। ।। तत्रमूल-
धृतैस्त्रिभिर्दर्भैर्दक्षिणतउदक्संस्थंपश्चिममारभ्यप्राक्संस्थं-
वास्त्रिःपरिसमुह्य।। गोमयोदकाभ्यामुपलिप्य।। सव्योत्तरा-
भ्यांपाणिभ्यांखादिरकीलेनकुशैर्वा पश्चिमतः प्रागंतंदक्षिणत-
उदक्संस्थंप्रादेशपरिमितंत्रिरुल्लिख्य।। अनामिकां गुष्ठाभ्यामुल्लिखित-
पासून्प्रांचउद्धरेत्।। एवमुत्तररेखयोः।। एवंप्रतिरेखं प्राजापत्यतीर्थे-
नोदकेनाभ्युक्ष्य।। कांस्यादिपात्रेणाग्निमानीय।। तमग्निंस्थंडि-
लाग्नेयांनिदध्यात्।। तस्मादाचार्यः ॐ हुंफट्इतिमंत्रेण-
क्रव्यादांशंनैर्ऋत्यां क्षिपेत्।। ततोग्निंदूतमितिमंत्रेणात्माभि-
मुखमग्निंसंस्थापयेत्।। ॐअग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे।।
देवाँऽऽआसादयादिह।। अग्न्यानीत पात्रेसाक्षतोदकंनिषिच्य।।
अग्निमुखंकृत्वाध्यायेत्।। ॐ चत्वारिशृङ्गात्रयोऽअस्यपादा-
द्वेशीर्षेसप्तहस्तासोऽअस्य।। त्रिधाबद्धोवृषभोरोरवीति महोदेवोम-
र्त्याँऽआविवेश।। सप्तहस्तश्चतुःशृंगः सप्तजिह्वोद्विशीर्षकः।।
त्रिपाद्प्रसन्नवदनः सुखासीनः शुचिस्मितः।। स्वाहांतु-
दक्षिणेपार्श्वेदेवींवामे स्वधांतथा।। बिभ्रद्दक्षिण हस्तैस्तुशक्तिमन्नं-
स्रुचंस्रुवं।। तोमरंव्यजनंवामेघृतपात्रंचधारयन्।। आत्माभिमुखमासीन
एवंरूपोहुताशनः।। अग्नेवैश्वानर शांडिल्यगोत्रशांडिल्यासित-
देवलेतित्रिप्रवरान्वितभूमिर्मातावरुणः पितामेषध्वजप्राङ्-
मुखममसन्मुखोभव।। शांतिकेवरदनामाग्निंप्रतिष्ठाप्य ॐ अग्नयेनम-
इतिबहिर्गंधपूष्पैः संपूज्यप्रार्थयेत्।। अग्निंप्रज्वलितंवंदेजातवेदं
हुताशनं।। हिरण्यवर्णमनलंसमृद्धंविश्वतोमुखं।। ।। इत्यग्निस्थापनं।।
।। अथऋतुशांतौविशेषः।। ।। तत ईशान्यामुदकसंस्थं-
पंक्तिरूपेणकलशचतुष्टयंमहीद्यौरित्यादिक्रमेणस्थापयेत्।। तद्यथा।।
महीद्यौरितिभूमिंस्पृष्ट्वा।। ओषधयः समीतियवान्क्षिप्त्वा।।

आजिघ्रमितिलकशान्स्थापयेत्।। वरुणस्योत्तम्भनमितिजलंपूरयेत्।। त्वागंधर्वाइतिगंधंप्रक्षिपेत्।। याओषधीरितिसर्वोषधीः।। कांडात्कांडादितिदूर्वाः।। अश्वत्थेवइतिपंचपल्लवान्।। स्योना-पृथिवीतिसप्तमृदः।। याः फलिनीरितिफलं।। परिवाजपतिरिति पंचरत्नानि।। हिण्यरगर्भेतिहिरण्यं।। युवासुवासाइतिरक्तसूत्रेणावेष्ट्य।। पूर्णादर्वीतिपूर्णपात्रंनिधाय।। तत्वायामीतिवरुणमावाह्यपंचोपचारैः संपूज्यसर्वेसमुद्राइतिगंगाद्यावाहयेत्।। ।। ततः। कदलीसहितमूर्ति चतुष्टयस्याग्न्युत्तारणपूर्वकंप्राणप्रतिष्ठांकुर्यात्।। तत्रयजमानः देश-कालौस्मृत्वाआसां स्वर्णमयइंद्रइंद्राणीभुवनेश्वरीकदलीमूर्तीनांघ-नादिदोषपरिहारार्थंअग्न्युत्तारणपूर्वकंप्राणप्रतिष्ठांकरिष्ये।। मूर्तीघृतेनाभ्यज्यउपरिजलधारांकुर्यात्।। तत्र मंत्राः।। ॐ समुद्रस्यत्वावकयाग्नेपरिव्ययामसि।। पावकोऽअस्मभ्यंशिवोभव।। हि मस्यंत्वाजरायुणाग्नेपरिव्ययामसि।। पावकोऽअस्मभ्यं शिवोभव।। उपज्मन्नुपवेतसेवंतरनदीष्वा।। अग्नेपित्तमपामसि मण्डूकिताभिरागहिसेमन्नोयज्ञम्पावकवर्णशिवङ्कृधि।। अपामिदंन्ययनसमुद्रस्यनिवेशनम्।। अन्याँस्तेऽअस्मत्तपन्तु-हेतयः पावकोऽअस्मभ्यँ शिवोभव।। अग्नेपावकरोचिषामन्द्रया देवजिह्वया।। आदेवान्वक्षियक्षिच।। सनः पावकदीदिवोग्ने-देवाँऽऽइहावह।। उपयज्ञंहविश्चनः।। पावकयायश्चितयन्त्या कृपाक्षामन्नुरुचऽउषसोनभानुना।। तूर्व्वन्नयामन्नेतशस्यनूरणऽ आयोघृणेनततृषाणोऽअजरः।। नमस्तेहरसेशोचिषेनमस्तेऽ-अस्त्वर्च्चिषे।। अन्याँस्तेऽअस्मत्तपंतुहेतुहेतयः पाव कोऽअस्मभ्य ँ शिवोभव।। नृषदव्वेडप्सुषदेव्वेड्बर्हिषदेव्वेड्ब-नसदेव्वेड्स्वर्विदेवेट्।। येदेवा देवानांयज्ञियायज्ञियाना ँ संव्वत्सरीणमुपभागमासते।। अहुतादोहविषोयज्ञेऽअस्मिन्त्स्वयं-पिबन्तुमधुनोघृतस्य।। येदेवादेवेष्वधिदेवत्वमायन्न्येब्रह्मणः

पुरऽएतारोऽअस्य।। येभ्योनऽऋतेपवंतेधामकिञ्चनननतेदिवोनपृ-
थिव्याऽअधिस्नुषु।। प्राणदाऽअपानदाव्यानदाव्वर्चोदाव्वरिवोदाः।।
अन्याँस्तेऽअस्मत्तपन्तुहेतयः पावकोऽअस्मभ्यंशिवोभव।। ततः
प्राणप्रतिष्ठांकुर्यात्।। ॐ आंह्रींक्रौंयंरंलंवंशंषंसंहंक्षंहंसः सोहं।।
आसांसूर्यइन्द्रइंद्राणीभुवनेश्वरीकदली मूर्तीनांप्राणाइहप्राणाः।। पुनः।।
ॐ आंह्रींक्रौंयंरंलंवंशंषंसंहंक्षंहंसः। सोहं। आसांसूर्य०
मूर्तीनांजीवइहस्थिताः पुनः।। ॐ आंह्रींक्रौंयंरंलंवंशंषंसंहंक्षंहंसः
सोहं आसां सूर्य० मूर्तीनांसर्वेंद्रियाणिवाङ्मनस्त्वक्चक्षुः
श्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानिइहैवागत्य सुखंचिरंतिष्ठंतुस्वाहा।।
संस्कारसिद्ध्यर्थंषोडशवारंप्रणवंजपेत्।। ॐ मनोजूतिर्ज्जुषता०।।
एषवैप्रति०।। प्रतिष्ठांतेगंधपुष्पाभ्यांसंपूजयेत्।। ।। अथसूर्याद्या-
वाहनं।। ।। एह्येहिपद्मासनपद्मपाणेसुरक्तसिंदूरसमानवर्ण।।
सप्ताश्वरक्तांबर सूर्यशीघ्रंगृहाणपूजांभगवन्नमस्ते।। ॐ
आकृष्णेनरजसाव्वर्तमानोनिवेशयन्नमृतंमर्त्यंच।। हिरण्य
येनसवितारथेनादेवोयातिभुवनानिपश्यन्।। ॐ भुर्भूव स्वः
सूर्यइहागच्छइहतिष्ठ।। ॐ सूर्यायनमः सूर्यआवाहयामि।। ।।
अथेंद्रध्यानं।। ।। एह्येहिनानाभरणप्रियेंद्रप्राचीपतेवज्रधरामरेश।।
ऐरावतारूढशचीसखात्रगृहाणपूजांभगवन्नमस्ते।। ॐ
त्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशूरमिंद्रम्।।
ह्वयामिशक्रम्पुरुहूतमिन्द्रं स्वस्तिनोमघवाधात्विन्द्रः।। ॐ
भू० इंद्रइहा० इंद्रइह०।। ।। अथेंद्राणीध्यानं।। ।। एह्येहिदेवीश्व-
रिहेमवर्णेविशालपंकेरुहलोलनेत्रे।। अंभोजहस्तेशचिदिव्यरूपे
गृहाणपूजांममयज्ञसिध्यै।। ॐ अदित्यैरास्नासीन्द्राण्याऽउष्णीषः।।
पूषासिंघर्मायदीष्व।। ॐ भू०इंद्राणि इ०।। ।। अथभुवनेश्वरी-
ध्यानं।। ।। एह्येहिदुर्गेदुरितौघनाशिनिप्रचंडदैत्यौघविनाशकारिणि।।
उममेहेशार्धशरीरधारिणिस्थिराभवत्वंममयज्ञकर्मणि।। ॐ

श्रीश्चंतेलक्ष्मीश्चपत्न्यावहो रात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्व्यात्तम्।। इष्णन्निषाणामुम्मंऽ इषाणसर्व्वं लोकम्मंऽइषाण।। ॐ भू० भुवनेश्वरीइ०।। ।। ततआकृष्णेत्यादि चतुर्भिर्मंत्रैः ॐ सूर्याद्यावाहित-देवाताभ्योनमइतिनाममंत्रेणवासर्वेषामेकतंत्रेणषोडशोपचारैः पूजनंकार्यं।। तत्रसूर्यनमस्कारः।। नमोनमस्तेसुरसेवितायसहस्रनेत्रा यसुमंडलाय।। सिंदूरवर्णायसुपंकजायसुवर्णवज्राभरणायतुभ्यं।। क्षमापनं।। नमोस्तु तेपंकजपत्रनेत्रतेजोनिधानग्रहराजविष्णो।। कलिंगदेशोद्भवकाश्यपेय सर्वार्थसिद्धिंकुरुपद्मपाणे।। ।। अथेन्द्रनमस्कारः।। ।। पुरंदरनमस्तेस्तु वज्रहस्तनमोस्तुते।। शचीसखनमस्तेस्तुमेघवाहनमोस्तुते।। क्षमापनं।। देवराजगजा-रूढपुरंदरशतक्रतो।। शचीसखमहाबाहोवांछितार्थप्रदोभव।। ।। अथेन्द्राणीनमस्कारः।। ।। त्वांनमामि गजारूढांशचींकमललोचनां।। सुरराजप्रियेदेविधृतसंतानमंजरीं।। क्षमापनं।। अंभोजहस्तेवरदे-कमलायतलोचने।। सुरराजप्रियेदेविप्रसीदपरमेश्वरी।। ।। अथभुवनेश्वरीनमस्कारः।। ।। नमोस्तुदेव्यैसुरपूजितायैविशाल-पंकेरुहलोचनायै।। नगाधिराजप्रियकन्यकायैनमोस्तुतस्यै-हरवल्लभायै।। क्षमापनं।। दुर्गेदेविमहाभागेमहादेवप्रियेनघे।। नीलोत्पलमुखेवंद्येममपीडांनिराकुरु।। इतिसंप्रार्थ्य।। अनया-पूजयाश्रीसूर्याद्यावाहितदेवताः प्रीयंतां।। ।। ततः पावकादुत्तरतः सुप्रसारितरक्तवस्त्रवंशपात्रेआढकमिततंदुलराशिंकृत्वात-दुपरिपूर्वोक्तलक्षणांकदलींसंस्थाप्य।। आकृष्णेनेतिमंत्रेण।। ॐ कदल्यैनमइतिमंत्रेणवातांषोडशोपचारैः संपूज्य।। अनयापूजयासूर्य-दैवताकदलीप्रीयतांनममेति।। ततः सूक्तजपार्थत्वेनवृतोविप्रः सूर्यकलशंस्पृष्ट्वाविभ्राडित्यनुवाकंजप्त्वाइन्द्रकलशंस्पृष्ट्वा अप्रतिरथंजप्त्वेन्द्राणीभुवनेश्वरीकलशद्वयेक्रमेणश्रीसूक्तंजपेत्।। अथवारुद्रैकादशनींजपेत्।। ।। इतिऋतुशांतौविशेषः।। ।।

अथग्रहस्थापनं।। ।। तत्रवसिष्ठः।। जन्मभूर्गोत्रमग्निश्चवर्ण-
स्थानमुखानिच।। योऽज्ञात्वाकुरुतेशांतिंग्रहास्तेनावमानिताइति।। ।।
ग्रहपीठमाह।। ।। वसिष्ठः।। कुंडस्यरुद्रदिग्भागेद्विहस्तंपीठमाचरेत्।।
किंचिन्मध्योन्नतंकुर्यादुच्छ्रायेद्वादशांगुलं।। त्रिंशांगुलंप्रकर्तव्यमंतरं-
कुंडपीठयोः।। वस्त्रेणाच्छाद्यतत्पीठंतत्प्रमाणेनधीमता।। तत्र-
चाष्टदलंपद्मंकुर्याच्छ्रेष्ठैः सिताक्षतैरिरिति।। ।। तत्रस्थापनीयदेवताआह।।
।। वसिष्ठः।। ग्रहदेवाधिदेवाश्चतथाप्रत्यधिदेवताः।। लोकपालाक्षेत्र-
पतिर्वास्तोष्पतिस्तथैवच।। इन्द्रादिदशदिक्पालानक्षत्राणिध्रुवादिचेति।।
।। ग्रहनामानि।। मात्स्येकोटिहोमपद्धतौच।। सूर्यः सोमोमहीपुत्रो-
बुधोजीवोथभार्गवः।। शनैश्चरोराहुकेतुनवखेटाः प्रकीर्तिताइति।।
।। अधिदेवतानामानि।। ।। तत्रैव।। ईश्वरश्चउमाचैवस्कंदोविष्णुस्तथै-
वच।। ब्रह्मेन्द्रौयमकालाश्चचित्रगुप्ताधिदेवताइति।। प्रत्यधि-
देवतानामानि।। ।। तत्रैव।। अग्निरापोधराविष्णुरिन्द्रश्चैन्द्रीप्रजापतिः।।
सर्पाब्रह्माचनिर्दिष्टाअधिदेवायथाक्रममिति।। ।। लोकपाल-
देवतानामानि।। ।। तत्रैव।। गणेशदुर्गेवायुश्चआकाशमश्विनौतथेति।।
।। अंगदेवतानामानि।। ।। तत्रैव।। वास्तोष्पतिः क्षेत्रपालौग्रहपीठांग-
देवतेति।। दिक्पतिनामानि।। ।। तत्रैव।। इन्द्राग्नियम नैर्ऋत्यावरुणो-
वायुरेवच।। सोमेशानब्रह्मशेषाः प्रागादिपतयः क्रमात्।।
ग्रहस्थानान्याह।। ।। वसिष्ठः।। मध्येतुभास्करंविंद्याच्छ-
शिनंपूर्वदक्षिणे।। दक्षिणेलोहितंविंद्याद्बुधंपूर्वोत्तरेस्मृतः।।
उत्तरेतुगुरुंविंद्यात्पूर्वेचैवतुभार्गवं।। पश्चिमेतुशनिंविंद्याद्रा-
हुंदक्षिणपश्चिमे।। पश्चिमोत्तरः केतून्स्थाप्यावाशुक्लतंदुलैरिति।। ।।
अधिदेवतादीना स्थानानि।। ।। कोटिहोमपद्धतौसंग्रहेच।।
ग्रहस्यदक्षिणेभागे स्थापयेदधिदेवताः।। ग्रहस्यवामभागेतुस्थाप्याः
प्रत्यधिदेवताः।। राहूमंददिनेशानामुत्तरेचयथाक्रमं।। हेरंब-
दुर्गेवायुश्चराहुकेत्वोश्चदक्षिणे।। आकाशमश्विनौदेवौस्थापयित्वा-

क्रमेणतु।। वास्तोष्पतिः क्षेत्रपालौस्थापनीयौगुरुत्तरे।। इन्द्रादिदशदिक्पालाः स्थाप्याः स्वस्वदिशिक्रमादिति।। ग्रहमंडलान्याह।। ।। वसिष्ठ।। तत्रचाष्टदलेपद्मेवृत्तंसूर्यस्यमंडलं।। चतुष्कोणंतुसोमस्त्रिकोणंमंगलस्यच।। बाणाकारंबुधस्योक्तं-पट्टाकारंबृहस्पतेः।। पंचकोणंतुशुक्रस्य शनेश्चधनुराकृतिः।। राहोः शूर्पाकृतिज्ञेयंकेतूनांचध्वजाकृतिरिति।। ।। ग्रहमंडलव्यासश्च।। ।। मात्स्येकोटिहोमपद्धतौच।। द्वादशांगुलकः सूर्येसोमेतु-द्विगुणोभवेत्।। त्र्यंगुलस्तुभवेद्भौमेबुधेचचतुरंगुलः।। गुरौषडंगुलः प्रोक्तः शुक्रेचैवनवांगुलः।। द्वयंगुलस्तुशनेश्चैवराहौचद्वादशांगुलः।। केतौषडंगुलोव्यासोमंडलेकथितोबुधैरिति।। ग्रहदेशाः।। ।। मात्स्येकोटिहोमपद्धतौच।। उत्पन्नोर्कः कलिंगेषुयमुनायांच चंद्रमाः। अंगारकस्त्ववंत्यांचमगधायांहिमांशुजः। सैंधवेषुगुरुर्जातः शुक्रोभोजकटेतथा।। शनैश्चरस्तुसौराष्ट्रे राहुर्वैराठिनापुरे।। अंतर्वेद्यांत-थाकेतुर्ग्रहदेशाः प्रकीर्तिताइति।। ।। ग्रहगोत्राणि।। तत्रैव।। आदित्यः काश्यपेयस्तुआत्रेयश्चंद्रमाभवेत्।। भारद्वाजोभवेद्भौमस्तथात्रेयश्च सोमजः।। गुरुश्चैवाङ्गिरोज्ञेयः शुक्रोवैभार्गवस्तथा।। शनिः काश्यपएवाथराहुः पैठिनसः स्मृतः।। केतवोजैमिनीयाश्चग्रह-गोत्राणिकीर्तयेदिति।। ।। ग्रहवर्णमाह।। ।। वसिष्ठः।। भास्कराङ्गारकौरक्तौशुक्लौशुक्रनिशाकरौ।। बुधजीवौसुवर्णा-भौकृष्णौराहुशनैश्चरौ।। केतवोधूम्रवर्णाश्चसर्वेतेजोमयाग्रहाइति।। ।। ग्रह दिङ्मुखान्याह।। ।। वसिष्ठः।। शुक्राकौंप्राङ्मुखौज्ञेयौ-गुरुसौम्यावुदङ्मुखौ। प्रत्यङ्मुखौसोमशनीशेषादक्षिणतो मुखाः।। स्थाप्यावासन्मुखाः सर्वेपूजाकालेसदैवहीति।। ग्रहप्रतिमाआह।। ।। याज्ञवल्क्यः।। ताम्रिकात्स्फाटिकाद्रक्तचंदनात्स्वर्णकावुभौ।। राजतादयसः सीसात्कांस्यात्कार्याग्रहाः क्रमात्।। स्ववर्णैर्वापटे-लेख्यागंधैर्मंडलकेषुवेति।। ।। ग्रहप्रतिमाकारः।। मात्स्ये।। पद्मासनः

पद्मकरः पद्मगर्भसमद्युति।। सप्ताश्वरथसंस्थोपिद्विभुजः स्यात्सदा रविः।। श्वेतः श्वेतांबरधरोदशाश्वः श्वेतभूषणः। गदापाणिर्द्विबाहुश्च-कर्तव्योवरदः शशी।। रक्तमाल्यांबरधरः शक्तिशूलगदाधरः।। चतुर्भुजोमेषगमोवरदः स्याद्धरासुत।। पीतमाल्यांबरधरः कर्णिकारसम-द्युतिः।। खड्गचर्मगदापाणिः सिंहस्थोवरदोबुधः। देवदैत्यगुरू तद्वत्पीतश्वेतौचतुर्भुजौ। दंडिनौवरदौकार्यौसाक्षसूत्रकमंडलू।। इंद्रनीलद्युतिः शूलीवरदौगृध्रवाहनः।। बाणबाणासनधरः कर्तव्योर्कसुतः सदा।। करालवदनः खड्गचर्मशूलीवरप्रदः।। नीलसिंहासनस्थश्चराहुरत्रप्रशस्यते।। धूम्राद्विबाहवः सर्वेगदिनो-विकृताननाः।। गृध्रासनगतानित्यंकेतवः स्युर्वरप्रदाः।। सर्वेकिरीटिनः कार्याग्रहालोकहितावहाः।। स्वांगुले नोच्छ्रिताः सर्वेशतमष्टोत्त-रंसदेति।। ग्रहवस्त्रादीन्याह।। याज्ञवल्क्यः।। यथावर्णं-प्रदेयानिवासांसिमकुसुमानिच।। गंधाश्चवलयश्चैवधूपो-देयश्चगुग्गुलइति।। ।। ग्रहविशेषेणधूपश्चोक्तः। मात्स्ये।। रवेः कुंदरुकंधूपंशशिनस्तुघृताक्षताः।। भौमेसर्जरसंचैवअगरुंच बुधेस्मृतं।। सिह्लकंगुरवेदद्याच्छुक्रेबिल्वागरुंतथा।। गुग्गुलंमंदवारे तुलाक्षाराहोश्चकेतवेइति।। ग्रहदीपमाह।। ।। वसिष्ठः।। नववर्तियुतं-दीपंघृतेन परिपूरित।। ग्रहाणामग्रहः कुर्यात्तेजोसीतिप्रकल्पयेदिति।। ग्रहनैवेद्यमाह।। याज्ञवल्क्यः।। गुडौदनंपायसंचहविष्यंक्षीरं षाष्टिकं।। दध्योदनंहविश्चूर्णंमांसं चित्रान्नमेवच।। दद्याद्ग्रहक्रमादेवविप्रेभ्यो-भोजनंबुधः।। शक्तितोवायथालाभं सत्कृत्यविधिपूर्वकमिति।। ।। ग्रहफलान्याह।। ।। वसिष्ठः।। द्राक्षेक्षुपूगनारिंगंजंबीरंबिजपूरकं।। उत्ततिनालिकेरंस्याद्दाडिमानियथाक्रमं।। अलाभेतु यथालाभंतद्-ग्रहेभ्यः प्रदापयेदिति।। ।। तांबूलमाह।। ।। सएव।। खेचराणांतु-तांबूलमेकैकंसंप्रदापयदिति।। ।। दक्षिणामाह।। ।। याज्ञवल्क्यः।। धेनुःशंखस्तथानड्वान् हेमवासोहयः क्रमात्।। कृष्णा

गौरायसच्छागएतावैदक्षिणाः स्मृताइति।। ।। ग्रहहोम द्रव्याण्याह।।
।। वसिष्ठः।। समिदाज्येचरुश्चैवतिलाहोमेप्रकीर्तिताइति।। ।। ग्रहस-
मिधआह।। ।। याज्ञवल्क्यः।। अर्कः पलाशखदिर-
अपामार्गोथपिप्पलः।। उदुंबरः शमीदूर्वाकुशाश्चसमिधः क्रमादिति।।
।। एतेषांअलाभेतु।। ।। वसिष्ठः।। अलाभेतुप्रकर्तव्याः सर्वाः
पालाशजाइति।। समिद्धोमसंख्यामाह।। ।। याज्ञवल्क्यः
एकैकस्यत्वष्टशतमष्टाविंशतिरेववा।। होतव्यामधुसर्पिर्भ्यांद-
ध्नाक्षीरेणवायुताइति।। ।। ग्रहपूजाक्रमः।। कोटिहोमपद्धतौ
हेमाद्रौच।। एकैकस्यावाहनादिपुष्पांजल्यंतपूजनं।। समाप्यचततोन्य
स्यइतिकांडोनुकीर्तितः।। सर्वेषामेकतंत्रेणसूर्यादीनांयथाविधि।।
पूजनंतुप्रकर्तव्यंपदार्थोनुप्रकीर्तितइति।। ।। ग्रहहोमक्रममाह।। ।।
वसिष्ठः।। ततः कुंडेसमागत्यनिर्वर्त्याग्निक्रियांचरुं। श्रपयित्वा-
ततोहोमः कर्तव्यः खेचरान्प्रति।। आघारवाज्यभागौचआज्ये
नैवयथाक्रमं।। समिदाज्यंचरोर्होमस्तिलहोमक्रमेणतु।। समिद्भ्यो-
द्विगुणोहोमः कर्तव्यश्चतिलेनवा।। यदिग्रहाणामष्टौस्यादधिप्रत्य-
धिकेषुच।। चतुश्चतुर्हुनेहेरंबादीनांद्विद्विसंख्यया।। ततः प्रधान-
देवस्यहोमः कार्योयथाविधि।। पूजास्विष्टंनवाहुत्योबलिः पूर्णाहुति-
स्तथेति।। ।। पूर्णाहुतिविधिः।। ।। प्रयोगदर्पणेककारिकायांच।।
।। अन्यदाज्यंसमानीयाधिः श्रितेस्रुक्स्रुवावुभौ।। तौप्रतप्यचसंमार्ग-
कुशैः संमृज्यसिंचयेत्।। पुनः प्रतप्ययाम्यायांनिदध्यात्स्रुक्स्रुवोचतौ।।
आज्यमुद्वास्यचोत्पूयावेक्ष्यापद्रव्यनिष्कृतिः।। चतुर्गृहीतमाज्यंतद्गृही-
त्वास्रुचिमध्यतः।। वस्त्रतांबूलपूगादिफलपुष्पसमन्वितां।। अधोमुख-
स्रुवच्छन्नांगंधमाल्यैरलंकृता।। पूर्वंदक्षिणहस्तेनपश्चाद्वामेनपाणिना।।
गृहीत्वाथस्रुवंकर्ता शंखसन्निभमुद्रया।। वामस्तनांतमानीयनाभिमूला-
त्स्रुचंततः।। मूर्धानंदिवमंत्रेणगृहीतघृतधारया।। सप्ततेऽअग्नइतिवा-
समुद्रादूर्मिसूक्ततः।। हुत्वापूर्णाहुतिंपश्चाद्वसोर्द्धारांसमाचरेत्।। ।।

वसोर्द्धाराविधिस्तु।। ।। तत्रैव।। औदुंबरीमथार्द्रांचऋज्वांकोट-
रवर्जितां।। बाहुमात्रांस्रुचं कृत्वागृहीत्वाज्यंचपूर्ववत्।। ततस्तांविन्य-
सेत्स्तंभद्वयोपरियथादृढा।। घृतकुंभवसोर्द्धारामग्नेरुपरिपातयेत्।।
सप्ततेत्यनुवाकंचमखेसूक्तान्विशेषतः।। श्रावयेत्सूक्तमाग्नेयं-
वैष्णवंरौद्रमैंदवं।। महावैश्वानरंसम्यक्ज्येष्ठसामंततः पठेत्।।
चमकान्वसुधारोक्तांवसोर्द्धाराहुतौपठेदिति।। समास्त्वेतिनवऋच-
माग्नेयं।। वैष्णवंतुविष्णोर्नुकमितिषड्ऋचं।। नमस्तेतिरौद्राध्यायः
रौद्रं। आप्यायस्वेतिषड्ऋचंऐंदवमिति।। ।। वसिष्ठः।।
यथादैवतत्यागंतुपठित्वाग्नेः प्रदक्षिणां।। कृत्वाभस्मग्रहीत्वाथत्र्या-
युषेनैवमंत्रतः।। तत्कृत्वाचयथास्थानंसंस्रवप्राशनादिकं।।
आचार्यमादौसंपूज्यगजाश्वरथकांचनैः।। तोषयित्वामहादानै-
र्नमस्कृत्यक्षमापयेत्।। ऋत्विजस्तुतः पश्चाद्यथोक्तग्रहदक्षिणैः।।
संपूज्या ब्राह्मणाः सर्वे ततस्तुष्यंतिदेवताः।। ब्राह्मणैः
सहभुंजीयात्कथितोयमनुक्रमइति।। ।। अथग्रहस्थापनप्रयोगः।।
।। तत्रपीठमध्येवर्तुलेद्वादशांगुलेमंडले प्राङ्मुखंसूर्यंरक्तपुष्पाक्षतैः।।
ॐ आकृष्णेन०० ॐ भू० कलिंगदेशोद्भवकाश्यपसगोत्ररक्तवर्ण-
भोसूर्येहागच्छेहतिष्ठेतिस्थापयेत्।। एवंसर्वत्र।। तत आग्नेये-
चतुरस्रेचतुर्विंशत्यंगुलेमंडलेप्रत्यङ्मुखंसोमं शुक्लपुष्पाक्षतैः।। ॐ
इमन्देवाऽअसपत्नꣳसुवध्वम्महतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्येन्द्रियाय।। इममुमुष्यपुत्रममुष्यैपुत्रमस्यैविशऽ-
एषवोमीराजासोमोस्माकंब्रह्मणानाꣳ राजा।। ॐ भू० यमुना-
तीरोद्भवआत्रेयसगोत्रशुक्लवर्ण भोसोमेहागच्छेह०।। ततोदक्षिणेत्रि-
कोणेत्र्यंगुलेमंडलेदक्षिणाभिमुखंभौमंरक्तपुष्पाक्षतैः।। ॐ अग्नि-
र्मूर्धादिवः ककुत्पतिः पृथिव्याऽअयम्।। अपाः रेतांसिजिन्वति।।
ॐ भू० अवंतिदेशोद्भवभारद्वाजसगोत्ररक्त वर्णभोभौमेहा०।।
ततईशान्येबाणाकारेचतुरंगुलेमंडलेउदङ्मुखंबुधंपीतपुष्पाक्षतैः ॐ

उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेस ँ सृजेथामयंच।। अस्मिन्स-
धस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत।। ॐ भू० मगध-
देशोद्भवआत्रेयसगोत्रपीतवर्णभोबुधेहा०।। ततोत्तरेदीर्घचतुरस्रेपट्टा-
कारेषडंगुलेमंडलेउदङ्मुखंबृहस्पतिंपीतपुष्पाक्षतैः।। ॐ बृहस्पतेऽ
अतियदर्य्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषु।। यद्दीदयच्छवसऽऋत-
प्प्रजाततदस्मासुद्रविणन्धेहिचित्रम्।। ॐ भू० सिंधुदेशोद्भवआंगिर-
सगोत्रपीतवर्णभोबृहस्पतेइहा०।। ततः पूर्वेपंचकोणेनवांगुलेमंडले-
प्राङ्मुखंशुक्रंशुक्लपुष्पाक्षतैः।। ॐ अन्नात्परिस्रुतोरसम्ब्रह्मणा-
व्व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः।। ऋतेनसत्यमिन्द्रिय-
म्विपानंᳬशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु।। ॐ भू०
भोजकटदेशोद्भवभार्गवसगोत्र शुक्लवर्णभो शुक्रेहा०।। ततः पश्चिमे-
धनुराकारेव्द्यंगुलेमंडलेप्रत्यङ्मुखंशनिंकृष्णपुष्पाक्षतैः।। ॐ
शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये।। शञ्य्योरभिस्रवन्तुनः।। ॐ
भू०सौराष्ट्रदेशोद्भवकाश्यपसगोत्रकृष्णवर्णभोशनैश्चरेहा०।।
ततोनैर्ऋत्येशूर्पाकारेद्वादशांगुलेमंडलेदक्षिणाभिमुखंराहुंकृष्णपुष्पाक्षतैः।।
ॐ कयानश्चित्रऽआभुवदूतीसदावृधः सखा।। कयाशचिष्ठयावृता।।
ॐ भू० राठिनापुरोद्भवपैठिनसगोत्रकृष्णवर्णभोराहोइ०।। ततोवाय-
व्येध्वजाकारेषडंगुलेमंडलेदक्षिणाभिमुखंकेतुंधूम्रपुष्पाक्षतैः।। ॐ
केतुङ्कृण्वन्नकेतवेपेशोमर्ज्जाऽअपेशसे।। समुषद्भिरजायथाः।। ॐ
भू० अन्तर्वेदिसमुद्भव जैमिनिसगोत्रधूम्रवर्णभोकेतोइ०।।
ततोश्वेतपुष्पाक्षतैरधिदेवतास्थापयेत्।। सूर्यदक्षिणपार्श्वे।।
ॐत्र्यंबकञ्यजामहेसगन्धिम्पुष्टिवर्द्धनम्।। उर्व्वारुक मिवबन्धना-
न्मृत्योर्मुक्षीयमामृतात्।। ॐ भू० ईश्वरेहागच्छेहतिष्ठेतिस्थापयेत्।।
एवंसर्वत्र।। सोमदक्षिणपार्श्वे।। ॐ श्रीश्चतेलक्ष्मी०।। ॐ भू०
ऊमेइ०।। भौमदक्षिणपार्श्वे। ॐ यदक्रन्दः प्रथमञ्जायमानोऽउद्य-
त्समुद्रादुतवापुरीषात्।। श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्य-

म्महियातन्तेऽअर्व्वन्।। ॐ भू० स्कंदेहा०।। बुधदक्षिणपार्श्वे।। ॐ विष्णोरराटमसिव्विष्णोः श्नप्त्रेस्थो व्विष्णोस्यूरसिव्विष्णो-र्ध्रुवोसि।। व्वैष्णवमसिव्विष्णवेत्वा।। ॐ भू०विष्णविहा०।। गुरुदक्षिणपार्श्वे।। ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्च्चसीजायता-माराष्ट्रेराजन्यः शूरऽइषव्व्योतिव्याधीमहारथोजायतान्दोग्ध्रीधेनु-र्वोढानड्वानाशुःसप्तिःपुरन्धिर्योषाजिष्णूरथेष्ठाःसभेयोयुवास्य-यजमानस्य व्वीरोजायतान्निकामेनिकामेनः पर्जन्योव्वर्षतुफलवत्यो-नऽओषधयः पच्यन्तान्योगक्षेमोनः कल्पताम्।। ॐ भू० ब्रह्मन्निहा०।। शुक्रदक्षिणपार्श्वे।। ॐ सुयोषाऽइन्द्रसगणोमरुद्भिः सोमम्पिब-वृत्रहाशूरव्विद्वान्।। जहिशत्रूँरपमृधोनुदस्वाथाभयङ्कृणु-हिव्विश्वतोनः।। ॐ भू० इन्द्रेहा० शनिदक्षिणपार्श्वे।। ॐ यमायत्वाङ्गिरस्वतेपितृमते स्वाहा।। स्वाहाघर्म्मायस्वाहाघर्म्मः पित्रे।। ॐ भू० यमेहा०।। राहुदक्षिणपार्श्वे।। ॐ कार्षिरसिसमुद्रस्यत्वा क्षित्याउन्नयामि।। समापोऽअद्भिरग्मतसमोषधीभिरोषधीः।। ॐ भू० कालेहा०।। केतुदक्षिणपार्श्वे।। ॐ चित्रावसो-स्वस्तितेपारमशीय।। ॐ भू० चित्रगुप्तेहा०।। ततः श्वेतपुष्पाक्षतैः प्रत्यधिदेवताः स्थापयेत्।। सूर्यवामपार्श्वे।। ॐ अग्निन्दूत०।। ॐ भू० अग्नेइहा०।। सोमवामपार्श्वे।। ॐ आपोहिष्ठा०।। ॐ आपइहागच्छतेहतिष्ठत।। भौमवामपार्श्वे।। ॐ स्योनापृथिवि०।। ॐ भू० पृथिविइ।। बुधवामपार्श्वे।। ॐ इदम्विष्णुर्व्विचक्रमेत्रे-धानिदधेपदम्।। समूढमस्यपाꣳसुरेस्वाहा।। ॐ भू० विष्णविहा०।। गुरु वामपार्श्वे।। ॐ त्रातारमिन्द्रं०।। ॐ भू० इन्द्रेहा० शुक्रवामपार्श्वे।। ॐ अदित्यैरास्नासी०।। ॐ भू० इंद्राणीह०। शनिवामपार्श्वे।। ॐ प्रजापते नत्वदे तान्यन्यो विश्वा-रूपाणिपरिताबभूव।। यत्कामास्तेजुहुमस्तन्नोऽअस्तुव्वयꣳ स्यामप-तयोरयीणाम्।। ॐ भू० प्रजापतेइहा०। राहुवामपार्श्वे।। ॐ

नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु।। येऽअन्तरिक्षे येदिवितेभ्यः सर्पेभ्योनमः।। ॐ भू० सर्पाइहागच्छतेहतिष्ठत।। केतुवामपार्श्वे।। ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विशीमतः सुरुचोव्वेनऽआवः।। सबुन्ध्याऽउपमाऽअस्यव्विष्ठाःसतश्चयोनिमसतश्चव्विवः।। ॐ भू० ब्रह्मन्निहा०।। ।। ततः शुक्लपुष्पाक्षतैर्विनायकादिपंचलोकपालान्स्थापयेत्।। राहोरुत्तरतः।। ॐ गणानान्त्वा०।। ॐ भू० गणपतेइहा०।। शनेरुत्तरतः।। ॐ अम्बेअम्बिकेम्बालिकेनमानयति कश्चन। ससस्त्यश्श्वकः सुभद्रिकाङ्काम्पीलवासिनीम्।। ॐ भू० दुर्गेइहा०।। रवेरुत्तरतः।। ॐ आनोनियुद्भिः शतिनीभिरध्वरंथ्ठसहस्त्रिणीभिरुपयाहि यज्ञम्।। वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिसदानः भू० ॐ वायविहा०।। राहोर्दक्षिणे।। ॐ घृतङ्घृतपावानःपिबतव्वसाम्व्वसापावानः पिबतान्तरिक्षस्यहविरसिस्वाहा।। दिशः प्रदिशऽआदिशोव्विदिशऽउद्दिशो दिग्भ्यस्वाहा।। ॐ भू०आकाशेहा०।। केतोर्दक्षिणे।। ॐ यावाङ्कशामधुमत्यश्विनासूनृतावती।। तयायज्ञम्मिमिक्षताम्।। ॐ भू० अश्विनाविहा गच्छतमिहतिष्ठतं।। ।। ततः शुक्लपुष्पाक्षतैर्वास्तोष्पतिंक्षेत्राधिपतिंचगुरूत्तरेस्थापयेत्।। ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोऽअनमीवोभवानः।। यत्वेमहेप्रतितन्नोजुषस्वशन्नोभवद्विपदेशंचतुष्पदे।। ॐ भू० वास्तोष्पतेइहा०।। उत्तरे।। ॐ नहिष्पशमविदंनन्न्यमस्माद्वैश्वानरात्पुरऽ एतारमग्नेः।। एमैनमवृधन्नमृताऽअमर्त्यंव्वैश्वानरंक्षैत्रजित्यायदेवाः।। ॐभू० क्षेत्राधिपतेइ०।। ततः पूर्वादितः पीठसमंताच्छ्वेतपुष्पाक्षतैः सूर्याभिमुखान्दिक्पालान्स्थापयेत्।। पूर्वे।। ॐ त्रातारमिन्द्र०।। ॐभू० इन्द्रेहा०।। आग्नेये।। ॐ त्वन्नोऽअग्नेतवदेवपायुभिर्म्मघोनोरक्षतन्वश्चव्वन्द्य।। त्रातातोकस्यतनयेगवामस्यनिमेषँ रक्षमाणस्तवव्व्रते।। ॐ भू० अग्नेइहा०।। दक्षिणे।।

यमायत्वांगिर०।। ॐ भू० यमेहा०।। नैर्ऋत्ये।। असुन्वन्तमय-जमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य।। अन्न्यमस्मदि-च्छसातंऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु।। ॐ भू० निर्ऋतेइ०।। पश्चिमे।। ॐ तत्वायामि०।। ॐ भू० वरुणेहा०।। वायव्ये।। ॐ आनोनियुद्भिःशतिनीभिरध्वरर्ठ० सहस्रि०।। ॐ वायविहा०।। उत्तरे।। ॐ वयर्ठ० सोमव्रतेतवमनस्तनूषुबिभ्रतः।। प्रजावन्तः सचेमहि।। ॐ भू० सोमेहा०।। ईशान्ये।। ॐ तमीशानं-जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहे व्वयम्।। पूषानो-यथाव्वेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये।। भू० ईश्वरेहा०।। शक्रेशानयोर्मध्ये।। ॐ अस्मेरुद्रा मेहनापर्व्वतासोवृत्रहत्ये-भरहूतौसजोषाः।। यःशर्ठ० संते स्तुवतेधायिपज्रऽइन्द्रज्येष्ठाऽ-अस्माँअवन्तुदेवाः।। भू० ब्रह्मन्निहा०।। निर्ऋतिवरुणयोर्मध्ये।। ॐ स्योनापृथिविनो०।। ॐ भू० अनंतेहा०।। ।। यद्यप्यत्र-वसिष्ठेननक्षत्रादिमनुष्यान्तानांस्थापनमुक्तंतथापिबहुषुप्राचीननिबंध-प्रयोगग्रंथेष्वदर्शनावश्यकत्वाद्विस्तरभ्याच्चात्रतन्नलिखितं।। ।। एवंस्थापयित्वा।। ॐ मनोजूतिर्ज्जु०।। एषवैप्रतिष्ठेति ऋग्भ्यांसूर्यः सुप्रतिष्ठितोभवेतिसूर्यादीनांसर्वेषांप्रत्येकंमंत्रावृत्त्याप्रतिष्ठा।। अथताएताभ्यामेव ऋग्भ्यांआदित्याद्यावाहितदेवताः सुप्रतिष्ठिता-वरदाभवत।। एवंप्रतिष्ठाप्यआकृष्णेनेत्यादिस्वस्वस्थापितमंत्रेणनाम-मंत्रेणवाऽदित्यादीनांसर्वेषांकाण्डानुसमयेनपदार्थानुसमयेन-वाषोडशोपचारैः पूजनंकुर्यात्।। यद्वा ॐ भूर्भुवः स्वः आदित्या-द्यावाहितदेवताभ्यो नमइतिमंत्रेणपदार्थानुसमयेनषोडशोपचारैः संपूजयेत्।। तत्रसूर्यादीनांग्रहाणांस्वस्व वर्णानिवासांस्यनुलेपनानि-कुसुमानिचशेषेभ्यश्च सितवस्त्रगंधपुष्पाणिदातव्यानि।। धूपस्तु-सर्वेषांगुग्गुलः।। अथवामात्स्योक्तः प्रदेयः।। प्रागुक्तप्रकारेण-दीपनैवेद्यफलतांबूलदक्षिणाश्चदेयाः।। यथोक्तनैवेद्यालाभेसर्वेभ्यः

पायसंदद्यात्।। फलादीनामलाभेतुयथालाभं।। एवंसंपूज्य प्रार्थयेत्।। आदिदेवनमस्तुभ्यंसप्तसप्तेदिवाकर।। त्वंरवेतारयस्वास्मानस्मात्संसारसागरात्।। रोहिणीशसुधामूर्तेसुधारूपसुधाशन।। सोमसौम्योभवास्माकंसर्वदा ते नमोनमः।। कुजकुप्रभवोपित्वंमंगलः परिगद्यसे।। अमंगलंनिहत्याशुसर्वदायच्छमंगलं।। बुधस्त्वंबुद्धिजननोबोध्यवान्सर्वदानृणां।। तत्वावबोधंकुरुमेसोमपुत्रनमोनमः।। धर्मशास्त्रार्थतत्वज्ञज्ञानविज्ञानपारग।। विबुधार्तिहराचिंत्यदेवाचार्यनमोस्तुते।। भार्गवोभर्गजननश्रुतिस्मृतिविशारदः।। हित्वाग्रहकृतान्दोषानायुरारोग्यदोस्तुसः।। नमस्ते संदसंज्ञायशनैश्चरनमोस्तुते।। प्रसादंकुरुदेवेशदीनस्यप्रणतस्यच।। अर्द्धकायमहावीर्यचंद्रादित्यविमर्दन।। सिंहिकागर्भसंभूतपीडांहरमहातम।। धूम्रवर्णमहाकायघोररूपमहोत्कट।। महाकेतोनमस्तुभ्यंममपीडांनिवारयेति।। अनयापूजयाआदित्याद्यावाहितदेवताः प्रीयंतांनमम।। ततोग्रहवेदीशानभागे गोमयोपलिप्तेसितैस्तंदुलैरष्टदलंकृत्वातत्रमहीद्यौरित्यादिपूर्णपात्रनिधानांतेनकलशस्थापनविधिनाग्रहसंबंधिरुद्रकलशंसंस्थाप्यतस्मिन्कलशेतत्वायामीतिवरुणमावाह्याभ्यर्च्यसर्वेसमुद्राः सरितइतिगंगाद्यावाहयेत्।। ततअसंख्यातेतिमंत्रेणरुद्रंरुद्रघटांभसीतिवसिष्ठोक्तेस्तस्मिन्नेवकलशे।। ॐ असंख्यातासहस्राणियेरुद्राऽअधिभूम्याम्।। तेषांᳪसहस्रयोजनेवधन्वानितन्मसीतिमंत्रेणरुद्रमावाह्यसंपूजयेत्।। तत्रकलशेसांगरुद्रजपःकार्यः।। कर्मांताभिषेकवेलायामस्योदकेनसकलत्रंयजमानमभिषिंचेत्।। ।। इतिग्रहस्थापन प्रयोगः।। ।। अथकुशकंडिकोपयुक्तनिर्णयः।। ।। ब्रह्मासनलक्षणं।। ।। यज्ञपार्श्वे।। आसनंब्रह्मणः कार्यंवारणंवाविकंकतं।। हस्तमात्रं चतुःस्रक्तिर्मूलदंडसमन्वितमिति।। ।। प्रणीताप्रोक्षणीलक्षणमपितत्रैव।। ।। द्विषडंगुलदीर्घश्चतदर्द्धेनतुविस्तृतः।। चतुरंगुलखातस्तुमूल-

दंडोविकंकतः।। प्रस्थामात्रोदक ग्राहीप्रणीताचमसोभवेत्।। वैकंकतंपाणिमात्रंप्रोक्षणीपात्रमुच्यते।। हंसमुखः प्रसेकश्चत्वक्-बिलंचमसांगुलमिति।। ।। आज्यस्थालीतत्प्रमाणंच।। ।। यज्ञपार्श्वे।। आज्यस्थालीचकर्त्तव्याताम्रावासार्वधातुकी।। दशांगुलेन्दीर्घा-सासुदृढाचाव्रणाशुभेति।। ।। चरुस्थाली तत्प्रमाणंच।। ।। तत्रैव।। मृन्मय्यौदुम्बरीवापिचरुस्थालीप्रशस्यते।। तिर्यगूर्ध्वसमिन्मात्रा-दृढानातिबृहन्मुखीति।। ।। स्रुवमाह।। कात्यायनः।। ।। खादिरस्रुवः।। अरत्निमात्रस्रुवोंगुष्ठपर्ववृत्तपुष्करइति। ।। यज्ञपार्श्वेपि।। अंगुष्ठपर्ववृत्तश्चारत्निमात्रः स्रुवोभवेत्।। पुष्करार्द्धंभवेत्खातंपिंडकार्द्धं-स्रुवस्तथेति।। पिंडकार्द्धंमुष्ट्यर्द्धमित्यर्थः।। स्रुक्लक्षणमाह।। ।। कत्यायनः।। वाहुमात्र्यः स्रुचः पाणिमात्रपुष्करास्त्वग्बिलाहँ स मुखप्रसेकामूलदंडाभवंति।। त्रिःप्रादेशोबाहुः।। प्रसृतांगुलिः पाणिरामणिबंधनाद्धस्त उच्यते।। तन्मात्रंपुष्करंभवतीत्यर्थः।। ।। कारिकायांतु।। षड्त्रिंशांगुलदीर्घास्रुक्कारयेत्खादिरादिभिः।। कर्द-मेगोपदाकारापुष्करंतद्वदेवहि। पुष्कराग्रंषडंशंतुखातंव्यंगुल विस्तृतं।। अंगुष्ठैकंस्थूलतरेदंडेतस्यचकंकणमिति।। ।। पूर्णपात्रलक्षणं।। ।। यज्ञपार्श्वे।। यावतान्नेनभोक्तुस्तुतृप्तिः पूर्णैवजायते।। तावताधर्मः कुर्यात्पूर्णपात्रमितिस्थितिः।। यवैर्वाव्रीहिभिः पूर्णंशूर्पंतत्पूर्ण-पात्रकमिति।। अथवापारिभाषिकोक्तमत्रानुसंधेयम्।। समिल्लक्षणं पारिभाषिकोक्तमेवग्राह्यं।। पवित्रलक्षणमपिपारिभाषिकोक्तमेव।। ।। सम्मार्गकुशसंख्या।। ।। कारिकायां।। स्रुवसंमार्जनार्थायपंचवाथ-त्रयोपिवा।। प्रादेशमात्रान्गृह्णीयात्संमार्गकुशसंज्ञकानिति।। ।। उपयमनकुशसंख्या।। ।। तत्रैव।। उपयमनकुशाः सप्तपंचवाथ-त्रयोपिवेति।। ।। ब्रह्मासनस्थानमाह।। पारस्करः।। दक्षिणतो-ब्रह्मासनमिति।। ।। दक्षिणेब्रह्मासनकारणं।। कारिकायां।। दक्षिणेदानवाः प्रोक्ताः पिशाचोरगराक्षसाः।। तेभ्यः संरक्षणार्थाय

ब्रह्मास्थाप्यस्तुदक्षिणेइति।। ।। प्रणीताप्रोक्षण्योःस्थानं।। ।। कारिकायां।। वह्नेरुत्तरतः स्थाप्याप्रणीताप्रोक्षणीतथा।। उभयोरपिकर्त्तव्यमंतरंद्वादशांगुलमिति।। परिस्तरणकारणं।। ।। कारिकायां।। नाग्निनग्नंसमीक्षेतबिभीतःसन्मुखोभवेत्।। तस्मात्परिस्तृणेद्वह्निंकुशमुष्ट्यासमाहितः।। ईशानादिक्रमेणापि-पूर्वाग्रैश्चप्रदक्षिणमिति।। ।। स्थापनीयपात्रान्तरंपरस्परमंतरंच।। ।। कारिकायां।। आसादनंतुपात्राणांप्रादेशांतरकेबुधः।। अंगुल द्वयमानेनद्वंद्वंद्वंद्वान्तरेन्यसेदिति।। ।। पवित्रच्छेदनं।। ।। कारिकायां।। पवित्रद्विकंत्रिकेनछेदयेदनखैः स्पृशन्निति।। ।। उत्पवनोद्दिंगनंच।। ।। कारिकायां।। उत्पवनोद्दिंगनंचत्रिस्त्रिवारंक्रमेणतु।। प्रादेश-मात्रमुत्सार्योत्पवनंतु विधीयते।। उद्दिंगनंतुकर्त्तव्यमूर्ध्वमूर्ध्वं-प्रमाणतइति।। पात्रप्रोक्षणंतत्कारणं चाह।। श्रुतिः।। अथपात्राणिप्रोक्षतीति।। तदेवैषामत्राशुद्धस्तक्षान्योमेध्यः कश्चित्पराहन्तीतितदेवैतेषामद्भिरमेध्यंकरोतीति।। कारिकायामपि।। शूनांचशूद्रजातीनांपतितस्यांत्यजातिनां।। दृष्टिदोषविनाशाय-पात्राणांप्रोक्षणंमतमिति।। असंचरस्थानं।। ।। कारिकायां।। असंचरः प्रणीताग्नयोरंतरेणप्रकीर्तितइति।। प्रोक्षणीस्थानं।। ।। तत्रैव।। पात्राणिक्रमशः प्रोक्ष्यनिदध्यात्तामसंचरइति।। ।। आज्यनिर्वपणं।। ।। तत्रैव।। स्वालंभान्निर्वपेदाज्यमाज्यस्थाल्यांयथार्हतइति।। ।। चर्वर्थं तंदुलनिर्वपणं।। तत्रैव।। तंदुलाश्चतथाः शुभ्राखंडिताः सुमनोहराः।। त्रिः क्षालिताक्रमेणैवस्थाल्यांवानिर्वपेत्तथेति।। ।। आज्यचर्वोः श्रपणं। तत्रैव।। वह्नेर्दक्षिणदिग्भागेआज्यस्यश्रपणंमतं।। मध्येचरुंप्रतिष्ठाप्य-इत्येतत्परिभाषितमिति।। ।। पर्यग्निकरणं।। तत्रैव।। ततोल्मुंकच-संगृह्यनैर्ऋत्याच्चप्रदक्षिणं।। पर्यग्निकारयेत्पश्चादित्येवं परिभाषि-तमिति।। ।। पर्यग्निकरणेकारणमाह।। ।। श्रुतिः।। तंपर्यग्निकरोत्य-च्छिद्रमेवैनमेतदग्निनापरिगृह्णातिनाष्ट्रारक्षाᳪस्यभिमृषेयुरग्निर्हिरक्षसाम-

पहन्तेति।। ।। चरुश्रपणप्रकारः।। ।। कारिकायां।। अन्वर्थः श्रपितः स्विन्नोह्यदग्धोकठिनः शुभः।। नचातिशिथिलः पच्योनचरुश्चारसस्तथेति।। ।। स्रुवप्रतपनकालस्तत्कारणंच।। ।। तत्रैव।। अर्धश्रृतंचरुंज्ञात्वास्रुवंचाग्नौप्रतापयेत्।। स्रुवखातेचये-दैत्यापापिष्ठापापयोनयः।। वह्नौ प्रतापिताः सर्वेभस्मीभवतित-त्क्षणादिति।। ।। स्रुवसंमार्जनप्रकारः।। ।। तत्रैव।। सव्येस्रुवं-दक्षिणेचसंमार्गकुशसंज्ञिकान्।। गृहीत्वासंमृजेत्तैस्तमग्रमग्रैर्यथा-क्रमं।। मूलैर्मूलंतुचाभ्युक्ष्यप्रणीतायाजलेनच।। अधोमुखं-प्रत्याग्नौस्वदेशेनिदधातितं।। संमार्गाणां कुशानांतुत्यागोग्ने-र्दक्षिणेमतइति।। आज्योद्वासनकालस्तत्प्रकारश्च।। ।। तत्रैव।। पूर्णश्रृतंचरुंज्ञात्वाआज्यमुद्वासयेद्बुधः।। अश्रृतंकुरुतेयस्तुचरुंपाप-प्रमोहितः।। स तिष्ठेन्नरकंघोरंलोहगृध्रोपसेवितं।। याजकंशोक-संयुक्तंकारयेत्कालमोहितः।। आज्यंवायव्यदिग्भागेवह्नेः पश्चान्नि-धापयेदिति।। ।। चरोरुद्वासनप्रकारः।। ।। तत्रैव।। मध्याच्चरुं-समुत्तार्यनयत्याग्नेयकोणकं। आग्नेयात्तुनयेद्याम्येयाम्यान्नै-र्ऋत्यकोणके।। नैर्ऋत्यात्तुप्रतीच्यांचप्रतीच्याद्वायुकोणके।। आज्यादुत्तरतोभागेप्रयोक्तव्योयथाविधिरिति।। ।। उपय-मनकुशग्रहणंतत्कारणंच।। ।। तत्रैव।। उपयमनकुशंवै-गृह्णीयात्सव्यहस्तके।। रक्षसांतर्जनार्थाय चायुधंतत्प्रकीर्तितं।। यथा-वज्रधरश्चेन्द्रोयथाकृष्णोगदाधरः।। तथा कुशधरोविप्रइत्ये-तत्परिभाषितमिति।। ।। वज्रोवाआपः आपोहिकुशाइतिश्रुतेः।। तिष्ठत्समिद्धोमकारणं।। ।। तत्रैव।। स्वस्यास्थीनिसमित्त्रीणि-कीर्तितानिश्रुतौयतः।। तिष्ठतास्थीनिचदहेदित्येवंपरिभाषितं।। समित्त्रयाणांयोहोमः सकार्योजोषमेवचेति।। स्वस्यअग्नेः।। जोषंतूष्णीं।। तिष्ठंतीवहास्थीनीतिश्रुतेः।। ।। पर्युक्षणकारणं।। ।। तत्रैव।। अधोमुखश्चोर्ध्वपादः प्राङ्मुखोहव्यवाहनः।।

तिष्ठत्येवस्वभावेनआहुतिः कुत्रदीयते।। सपवित्रांबुहस्तेनवह्नेः कुर्यात्प्रदक्षिणां।। हव्यवाट्सलिलंदृष्ट्वाबिभेतिसन्मुखोभवेदिति।। ।। पर्युक्षणप्रकारः।। ।। तत्रैव।। शेषोदकेनप्रोक्षण्याः पर्युक्षेच्चैव पावकं।। उत्तराच्चार्धदेशात्तुदद्याद्धारांप्रदक्षिणामिति।। अन्वारंभ-कारणं।। तत्रैव। चक्षुषीकरणाच्चैवआचार्यादेकभावतः।। अन्वारंभः सहायार्थेद्वितीयस्तुप्रकीर्तितः।। ब्रह्मणात्रप्रकर्तव्योदक्षिणेन-करेणसइति।। ।। स्रुवधारणप्रकारः।। ।। तत्रैव।। अग्रेधृतोर्थनाशः स्यात्मध्येचैवमृतप्रजा।। मूलेचम्रियतेहोतास्रुवस्तुकुत्रधार्यते।। अग्र-मध्याच्चयन्मध्यं मूलमध्याच्चमध्यतः।। स्रुवंधारयतेविद्वान्ज्ञातव्यं-चसदाबुधैः।। तर्जनींचबहिः कृत्वाकनिष्ठांचबहिस्ततः।। मध्य-मानामिकांगुष्ठैर्स्रुवंधारयतेद्विजइति।। ।। आघारावाज्यभाग होमप्रकारः।। ।। तत्रैव।। स्रुवेणाज्यंगृहीत्वाग्नेः प्रत्यगुत्तरदेशतः।। आरभ्यदिशमाग्नेयीमाज्यधारामृजुंहरेत्।। मनसासंस्मरेत्स्वाहायुक्तं-चैवप्रजापतिं।। नैर्ऋतिंदिशमाश्रित्यऐशानींपूर्ववद्धरेत्।। तत्रेंद्रायपदंस्वाहायुक्तंचोपांशुकंभवेत्।। स्वाहेत्याघारयेदेता-वाघारावितिभाषितौ।। प्राच्यौवाजुहुयादेतावृजूसंततमेवच।। जुहुयादग्नयेस्वाहोसोमायेतितथापरां।। प्रथमेशानकोणाग्रेद्वितीयाग्नेय-कोणगा।। सुसमिद्धेथवावह्नौहोत व्येचोत्तराहुतीति।। ।। अथकुशकंडिका।। ।। अग्न्यायतनाद्दक्षिणतो वितस्त्यंतरेसंस्थापित-वारणादिपीठेउदगग्रान्कुशानास्तीर्यवह्नेरुत्तरतः पूर्वाभिमुखमासीनं-ब्रह्माणंस्वयंचोदङ्मुखमासीनोब्रह्मणोसव्येतरहस्तं गृहीत्वाहे-ब्रह्मन्त्रोपविशेतिवदेत्।। तेनोपविशामीतिपठित्वादक्षिणपादेनाग्नेः पूर्वेणगत्वा स्वासनादंगुष्ठानाममिकाभ्यामेकंतृणंगृहीत्वा तन्नैर्ऋत्यांत्यक्त्वाग्न्यभिमुखउपविशतीतिब्रह्मोपवेशनं।। यदाब्रह्मान-भवतितदाकौशः कार्य इतिहरिहरः।। कौशश्चेत्तदाप्रैषानुप्रैषौनभवतः।। वह्नेरुत्तरतः प्रागग्रैः कुशैरासनत्रयंकल्पयेत्तत्रैकमग्नेरुत्तरतः

द्वितीयंतदुत्तरतस्तृतीयं तत्पश्चिमे।। वायव्याश्रितंवारुणं-
चमसंदक्षिणहस्तेनादायवामपाणौप्रागग्रंनिधायदक्षिणगृहीत-
पात्रस्थाद्भिरात्माभिमुखंसंपूर्यपश्चिमासनेसंस्थाप्यदक्षिणा-
नामिकयाजलमालभ्याग्नेरुत्तरतः प्राक्कल्पितेप्रणीतासनेनिदध्यात्।।
प्रणीता उत्तरेस्थाप्याविस्तयंतरतोग्नितइत्युक्तेः।। एवंचमसंपूर्य।।
दर्भमुष्टिंगृहीत्वा प्राचीतः प्रदक्षिणंपरिस्तरणंकुर्यात्।। तच्चेत्थं।।
प्रागुदगग्रं।। दक्षिणतः। प्रागग्रं।। प्रत्यगुदगग्रं।। उत्तरतः प्रागग्रमिति।।
अर्थवत्पात्रासादनं।। अर्थः प्रयोजनं।। तच्चाग्नेरुत्तरतः पश्चाद्वा।।
द्वंद्वंप्रयोजनवतांपात्राणांपश्चाच्चेत्प्राक् संस्थानामुदगग्राणां-
प्रागग्राणांवासादनं।। उत्तरतश्चेदुदक्संस्थानांप्रागग्राणामुदगग्राणांवा
सादनं।। पश्चादुत्तरतोवास्यात्पात्रासादनमग्नितः।। उत्तरेचेदुदक्-
संस्थंप्राक्संस्थंपश्चिमेभवेदितिकारिकोक्तेः।। एतच्चविपुल-
स्थानसंभवे।। असंभवेत्तुकात्यायनोक्तं। प्रांचंप्रांचमुदगग्ने-
रुदगग्रंसमीपतइतिदेवयाज्ञिकाः।। पवित्रेकृत्वा।। कौशमये-
अप्रशीर्णाग्रेप्रादेशमात्रेअनन्तर्गर्भकुशैश्छिद्यात्।। तच्चेत्थं।।
द्वयोरुपरित्रीणिनिधायतयोर्मूलेनद्वौकुशौप्रदक्षिणीकृत्य त्रयाणां-
मूलाग्रेएकीकृत्यनखैरस्पृशन्ननामिकांगुष्ठाभ्यांद्वयोरग्रंछेदयेत्।।
द्वयोर्मूलंत्रीणिचोत्तरतः क्षिपेदिति।। प्रोक्षणिसंस्कारस्तुयथा।।
प्रोक्षण्यामर्थमात्रंप्रणीतोदकंपात्रांतरेणत्रिवारंगृहीत्वावामकरेपवित्राग्रं
तदितरेतन्मूलं धृत्वाप्रोक्षणीपात्रजलंपवित्राभ्यामुत्पूयतत्पात्रंसव्ये-
कृत्वादक्षिणमध्यमानामिकयोर्मध्यमपर्वाभ्यामपामूर्ध्वनयनंकृत्वा-
प्रणीतोदकेनतत्प्रोक्षणंकुर्यात्।। ततस्तस्मिन्पवित्रनिधानमिति।।
अर्थवत्प्रोक्ष्य।। तज्जलेनयथासादितपात्राणां प्रत्येकंप्रोक्षणं।।
प्रोक्षणावसरेआज्यादिहोमद्रव्याणामपिप्रोक्षणंकुर्यात्।। अनेकस्रुव-
साध्यहोमेअनेकस्रुवासादनंतेषांप्रोक्षणंचेतिसिंधुः।। ततस्तामसंचरे निद-
ध्यादिति।। ।। यजुषामन्वाधानंहरिहरगदाधरादिभिर्नोक्तंतथापिप्रयोग-

रत्नादावन्वाधानोक्तेः प्रचुरतरशिष्टाचारप्राप्तत्वाच्चात्र लिख्यते।। तद्यथा।। आचार्योग्नेः पश्चिमतउपविश्यदेशकालौस्मृत्वास्मिन्सग्रहमखरजो दर्शनशांत्याख्येकर्मणिदेवतापरिग्रहार्थमन्वाधानंकरिष्ये।। अस्मिन्नन्वाहितेग्नौ पूर्वेण ब्रह्मणोगमनं।। उत्तरतः पात्रासादनं।। द्वेपवित्रे।। सार्वधातुकीताम्रमयी वाआज्यस्थाली।। ताम्रमयीचरुस्थाली।। पालाश्यः समिधः।। प्राच्यावाघारौ।। समिद्धतमेआज्यभागौ। पूर्णपात्रंदक्षिणावरोवा।। एतान्वैकल्पिकपदार्थानहंकरिष्ये।। ततोदेवताभिध्यानं।। तत्रप्रजापतिंइंद्रंअग्निसोमएताः प्रत्येकमाज्येनैकैकयाहुत्या।। अत्रप्रधानं।। आदित्यादिनवग्रहान् अर्कादियथा लाभसमिच्चरुतिलाज्यद्रव्यैः प्रत्येकंप्रतिद्रव्येणाष्टासंख्याकाभिराहुतिभिरधिदेवताप्रत्यधिदेवताश्चतैरेवद्रव्यैः प्रत्यैकंप्रतिद्रव्येणचतुश्चतुः संख्याकाभिराहुतिभिर्विनायकादिपंचलोकपालान्क्षेत्रपालंवास्तोष्पतिमिन्द्रादिदशदिक्पालांश्चतैरेवद्रव्यैः प्रत्येकंप्रतिद्रव्येणद्वाभ्यांद्वाभ्यामाहुतिभ्यां।। पुनरत्रप्रधानं।। सूर्यमिन्द्रमिन्द्राणींभुवनेश्वरीं शर्कराघृतसंमिश्रपायसतिलाज्यद्रव्यैः प्रत्येकंप्रतिद्रव्येणाष्टाविंशत्यष्टाविंशतिसंख्याकाभिराहुतिभिर्न्यूनातिरिक्तदोषपरिहारार्थं घृताक्ततिलद्रव्येणसमस्तव्याहृतीरष्टाविंशतिसंख्याकाभिराहुतिभिः शेषेणस्विष्टकृतमग्निवायुंसूर्यंअग्निवरुणौअग्निवरुणौअग्निवरुणंसवितारंविष्णुंविश्वान् देवान्मरुतः स्वर्कान्वरुणमादित्यमदितिंप्रजापतिमेताअंगप्रधानार्था देवताआज्येनास्मिन्सग्रहमखरजोदर्शनशांत्याख्येकर्मण्यहंयक्ष्ये।। ।। दक्षिणतोब्रह्मास्नास्तीर्य।। तत्रब्रह्मोपवेशनं।। उत्तरतः प्रणीतासनं।। यथोक्तप्रकारेणप्रणीताप्रणयनं।। यथोक्तरीत्याग्नेर्दर्भैः प्रदक्षिणंपरिस्तरणं।। पुरस्तात्।। दक्षिणतः।। पश्चादुत्तरतश्च।। अर्थवत्पात्रासादनं।। पवित्रच्छेदनदर्भास्त्रयः।। पवित्रेद्वे।। प्रोक्षणीपात्रं।। आज्यस्थाली।। चरुस्थाली।। संमार्गकुशाः पंच।। उपयमनकुशाः सप्त।। समिधस्तिस्त्रः।। स्रुवः।।

आज्यं।। तंडुलाः।। पूर्णपात्रं। दक्षिणावरोवा।। पवित्रच्छेदनैः पवित्रकरणंयथोक्तं।। प्रोक्षण्यांप्रणीतोदकग्रहणं।। उत्पवनं।। सव्यहस्तेकरणं।। दक्षिणेनोर्दिगनं।। प्रणीतोदकेनप्रोक्षण्याः प्रोक्षणं।। प्रोक्षण्युदकेन आज्यस्थाल्याः प्रोक्षणं।। चरुस्थाल्याः प्रोक्षणं।। संमार्गकुशानांप्रोक्षणं।। उपयमनकुशानांप्रोक्षणं।। समिधांप्रोक्षणं।। स्त्रुवस्यप्रोक्षणं।। आज्यस्यप्रोक्षणं।। तंडुलानांप्रोक्षणं।। पूर्णपात्रस्यप्रोक्षण।। असंचरेप्रोक्षणीनिधानं।। आज्यस्थाल्यामाज्यनिर्वापः।। सपवित्रकेचरुपात्रेप्रणीतोदकमासिच्यक्षालिततंडुलप्रक्षेपः।। दक्षिणतआज्याधिश्रयणं।। चरोरधिश्रयणमाज्योत्तरतः।। ज्वलितोल्मुकेनोभयोः पर्यग्निकरणं।। देशेनिधानं।। श्रृतेचरौस्त्रुवस्यप्रतपनं।। संमार्गकुशैः स्त्रुवस्यसंमार्जनं।। प्रणीतोदकेनाभ्युक्षणं।। पुनः प्रतपनं।। देशेनिधानं।। आज्योद्वासनं।। चरोरुद्वासनं।। प्रत्युत्पवनवत्पवित्रेणाज्योत्पवनं।। अवेक्षणं।। अपद्रव्यनिरसनं।। प्रोक्षण्याः प्रत्युत्पवनं।। उपयमनकुशानादाय।। तिष्ठत्समिधोभ्याधाय।। प्रोक्षण्याः शेषोदकेनसपवित्रहस्तेनाग्नेरीशानकोणादारभ्यप्रदक्षिणवत्पर्युक्षणं।।। पवित्रयोः प्रणीतासुनिधानं।। दक्षिणंजान्वाच्यजुहोति।। तत्राघारावाज्यभागौब्रह्मान्वारब्धः स्त्रुवेणजुहुयात्।। प्रजापतिंमनसाध्यात्वास्वाहाकारमुच्चैः इदंप्रजापतयेउपांशुनममेत्युच्चैः।। ॐ प्रजापतयेस्वाहा।। इदंप्रजापतयेनमम।। ॐ इन्द्रायस्वाहा।। इदमिन्द्रायनमम।। ॐ अग्येस्वाहा।। इदमग्नयेनमम।। ॐ सोमायस्वाहा।। इदंसोमायनमम।। ततोयजमानेनद्रव्यत्यागः कर्तव्यः।। यथाकालंप्रत्याहुतित्यागस्यकर्तुमशक्यत्वात्।। इदंसंपादितंसमिच्चरुतिलाज्यादिहविर्द्रव्यंयायायक्ष्यमाणदेवतातस्यैतस्यै देवतायैनमम।। यथादैवतमस्तु।। ततआकृष्णेनेत्याद्यावाहितमंत्रैरादित्यादिनवग्रहान् क्रमेणपूर्वोक्तार्कादिसमिच्चरुतिलाज्यद्रव्यैरष्टसंख्ययाहुत्वा।।

पूर्वोक्तग्रहहोमद्रव्येणावाहितमंत्रैरधिप्रत्यधिदेवताश्चतुश्चतुः संख्ययाहुत्वा।। यस्यग्रहस्ययासमित्सातस्याधिदेवतायाःप्रत्यधि-देवतायाश्चयोज्या।। विनायकादिदिक्पालांतदेवताःपलाशोदुंबरान्यत-मसमिच्चरुतिलाज्यद्रव्येणावाहितमंत्रैर्द्विद्विसंख्ययाहुत्वा।। सूर्येंद्रेन्द्राणीभुवनेश्वरीणांप्रीत्यर्थंपूर्वोक्तस्थापनमंत्रैस्ति-लपायसाज्यद्रव्येणप्रत्येकमष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशति-संख्ययावाजुहुयात्।। ततः समस्तव्याहृतिभिस्तिलाज्य द्रव्येणाष्टोत्तरशतमष्टाविंशतिसंख्ययावाजुहुयात्।। ।। एवंहोमंसमाप्याग्नेः स्थापितदेवतानांचोत्तरपूजनंकार्यं।। अद्य पू० कृतस्यकर्मणः सांगतासिध्यर्थंस्थापितदेवतानांमृडाग्नेश्चोत्तर-पूजनंकरिष्ये।। मृडाग्निलक्षणं।। ।। यज्ञपार्श्वेरुद्रकल्पद्रुमेच।। पूर्वप्रज्वलितोह्यग्निर्हविर्द्रव्यबुभुंजितः।। तृप्तो निर्धूमनिर्ज्वालोमृडाग्निः परिकीर्तितइति।। ।। ॐ अग्नेनयसुपथारायेऽअस्मान्विश्वानि देवव्वयुनानिव्विद्वान्।। युयोध्यस्मज्जुहुराणमेनोभूयिष्ठा-न्तेनमऽउक्तिम्व्विधेम।। ॐ मृडाग्नयेनमइतिगंधादिपंचोपचारैः संपूज्यस्थापितदेवताः गंधादिपंचोपचारैः संपूजयेत्।। पूजांतेअनयापूजया मृडाग्निः स्थापितदेवताश्चप्रीयंतांनमम।। ततोहुतशेषहविर्द्रव्यंगृहीत्वाब्रह्मान्वारब्धः स्विष्टकृद्धोमंकुर्यात्।। ॐ अग्नयेस्विष्टकृतेस्वाहा।। इदमग्नये स्विष्टकृतेनमम।। ततोभूराद्यानवाहुतयः।। ॐ भूःस्वाहा।। इदमग्नयेनमम।। ॐ भुवः स्वाहा।। इदंवायवे नमम।। ॐ स्वः स्वाहा।। इदंसूर्यायनमम।। ॐ त्वन्नोऽअग्नेव्वरुणस्यव्विद्वान्देवस्यहेडोऽअवयासिसीष्ठाः।। यजिष्ठोव्वह्नितमः शोशुचानोव्विश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहा।। इदमग्नीवरुणाभ्यां।। ॐ सत्वन्नोऽअग्नेवमोभवोतीनेदिष्ठो-ऽअस्याऽउषसोव्युष्टौ।। अवयक्ष्वनोव्वरुणंरराणोव्वीहिमृडीकंसुहवोनऽएधिस्वाहा।। इदमग्नीवरुणाभ्यां।। ॐ अयाश्चाग्नेस्य-

नभिशस्तिपाश्चसत्यमित्वमयाऽअसि।। अयानोयज्ञंव्वहास्ययानोधिहि-भेषजर्ठ्ठस्वाहा।। इदमग्नये अयसे।। ॐ येतेशतंवरुणंयेसहस्त्रं-यज्ञियाः पाशाविततामहान्तः।। तेभिर्नोऽअद्यसवितोतविष्णुर्विश्वेमुञ्चंतु मरुतः स्वर्क्काः स्वाहा।। इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदे-वेभ्योमरुद्भ्यः स्वर्केभ्यश्चनमम।। ॐ उदुत्तमंव्वरुणपाशमस्मद-वाधमंव्विमद्धयमर्ठ्ठश्रंथाय।। अथाव्वयमादित्यव्व्रतेतवा-नागसोऽअदितयेस्यामस्वाहा।। इदंवरुणायादित्यायादितयेच नमम।। ॐ प्रजापतयेस्वाहा।। इदंप्रजापतयेनमम।। इतिनवाहुतयः।। ।। ततोबलिदानं।। ।। तच्चेत्थं।। अग्न्यातनसमंताद्दिक्षुविदिक्षुचमाष-भक्तबलिंदिक्पालेभ्योदद्यात्।। देशकालौस्मृत्वाकृतस्यकर्मणः सांगतासिध्यर्थं दिक्पालेभ्य आदित्यादिस्थापितदेवता-भ्यश्चपूजनपूर्वकंबलि दानंकरिष्ये।। ॐ त्रातारमिन्द्र०।। प्राच्यां।। सांगायसपरिवारायसायुधायसशक्तिकायेन्द्रानमः गंधाक्षत-पुष्पाणिसमर्पयामि।। इन्द्रायसांगायसपरिवारायसायुधाय-सशक्तिकायेमंसदीपमाषभक्तबलिंसमर्पयामि।। भोइन्द्रदिशंरक्षबलिं-भक्षममसकुटुंबस्याभ्युदयंकुरु।। आयुः कर्ताक्षेमकर्ताशांतिकर्ता-पुष्टिकर्तातुष्टिकर्तानिर्विघ्नकर्ता वरदोभव।। अनेनबलिदानेनेन्द्रः प्रीयतां।। एवंसर्वत्रोहः।। ॐ त्वन्नोऽअग्नेतवदेवपा०।। आग्नेय्यां।। सांगायसपरिवारायसायुधायसशक्तिकायाग्नयेनमः गंधाक्षत-पुष्पाणिसमर्पयामि।। अग्नयेसांगायसपरिवारायसायुधाय-सशक्तिकायेमंसदीपमाषभक्तबलिं समर्पयामि।। भोअग्नेदिशं-रक्षबलिंभक्षममसकुटुंबस्याभ्युदयंकुरु।। आयुः कर्ताक्षेमकर्ताशंति-कर्तापुष्टिकर्तातुष्टिकर्तानिर्विघ्नकर्तावरदोभव।। अनेनबलिदानेनाग्निः प्रीयताम्।। ॐ यमायत्वाङ्गिरस्व०।। दक्षिणास्यां।। सांगा० सप० सायु० सशक्तिकाययमायनमः गंधा०।। यमायसां गा०सप० सायु० सश० येमंसदीपमाषभक्तबलिंस०।। भोयमदिशंरक्षबलिं-

भक्षममसकुटुंबस्याभ्युदयंकुरु।। आयुः क० क्षेमक० शांतिक० पुष्टिक० निर्विघ्नकर्ता वरदो भव।। अनेनबलिदानेनयमः प्रीयतां।। ॐ असुंन्वन्तमयंजमान०।। नैर्ऋत्यां। सांगा० सप० सायु० सशक्तिकायनिर्ऋतये नमः गंधा०।। निर्ऋतये- सांगा० सप० सायु० सश० येनं सदीपमाषभक्तबलिंस०।। भोनिर्ऋतेदिशंरक्षबलिं भक्षममसकुटुंबस्याभ्युदयंकुरु।। आयुःक० क्षेमक० शांतिक० पुष्टिक० तुष्टिक० निर्विघ्नक० वरदोभव।। अनेनबलिदानेननिर्ऋतिः प्रीयतां।। ॐ तत्वांयामिब्रह्मंणा०।। पश्चिमायां।। सांगा० सप० सायु० सशक्तिकाय वरुणायनमः गंधा०।। वरुणायसां० सप० सायु० सश० येमंसदीपमाषभक्तबलिंस०।। भोवरुणदि-शंरक्षबलिंभक्षममसकुटुंबस्याभ्युदयंकुरु।। आयुः क० क्षेमक० शांतिक० पुष्टिक० तुष्टिक० निर्विघ्नकर्तावरदो भव।। अनेनबलिदानेनवरुणः प्रीयतां।। ॐ आनोंनियुद्भिःश०।। वायव्यां।। सांगा० सप० सायु० सशक्तिकायवायवेनमः गंधा०।। वायवेसां० सप० सश० येमं सदीपमाषभक्तबलिंस०।। भो वायो दिशंरक्ष-बलिंभक्षममसकुटुंबस्याभ्युदयंकुरु।। आयुः क० क्षेम० पुष्टिक० तुष्टिक० निर्विघ्नकर्तावरदोभव।। अनेनबलिदानेनवायुः प्रीयतां।। ॐ वय थ्ंसोमव्रतेतव०।। उदीच्यां।। सांगा० सप० सायु० सशक्तिकायसोमायनमः गंधा०।। सोमायसांगा० सप० सश० येमंसदीपमाषभक्तबलिंस०।। भोसोमदिशंरक्षबलिंभक्षममस-कुटुंबस्याभ्युदयंकुरु।। आयुःक० क्षेमक० शांतिक० पुष्टिक० तुष्टिक० निर्विघ्नकर्तावरदोभव।। अनेनबलिदानेनसोमःप्रीयतां।। ॐ तमीशांनजगंत स्त०।। ईशान्यां।। सांगा० सप० सायु० सशक्तिकायईशानायनमः गं०। ईशानायसां० स० सायु० सश० येमंसदीपमाषभक्तबलिंस०।। भोईशानदिशंर० बलिंभ० ममसकुटुंबस्याभ्युदयंकुरु।। आयुः क० क्षेमक० शांतिक० पुष्टिक०

तुष्टिक० निर्विघ्नकर्तावरदोभव।। अनेनबलिदानेनईशानः प्रीयतां।। पूर्वेशानयोर्मध्येऊर्ध्वायां।। ॐ अस्मेरुद्रामे०।। सांगायसप० सायु० सशक्तिकायब्रह्मणेनमः गंधा० ब्रह्मणेसांगा० सप० सायु० सशक्तिकायेमंसदीप माषभक्तबलिंस० भोब्रह्मन्दिशंर० ममसकुटुं-बस्याभ्युदयंकुरु।। आयुः क० क्षेम क० शांतिक० पुष्टिक० तुष्टिक० निर्विघ्नकर्तावरदोभव।। अनेनबलिदानेनब्रह्माप्रीयतां।। निर्ऋतिपश्चिमयोर्मध्ये अधः।। ॐ स्योनापृथिवि०।। सांगा० सप० सायु० सश० यानंताय नमः गंधा०।। अनंतायसांगा० सप० सायु० सशक्तिकायेमंसदीपमाषभक्तबलिंस०।। भो अनंतदिशंर० बलिंभ० ममसकुटुंबस्याभ्युदयंकुरु।। आयुः क० क्षेमक० शांतिक० पुष्टिक० तुष्टिक० निर्विघ्नकर्तावरदोभव।। अनेनबलिदानेनानंतः प्रीयतां।। ततोग्रहवेद्याः समंताद्ग्रहाणांबलिः।। ॐ आकृष्णेन-रजसा०।। सांगा० सप० सशक्तिकायईश्वराग्निरूपाधिप्रत्यधि-देवतासहितायसूर्यायनमः गंधाक्षत०।। सूर्यायसांगा० सप० सशक्तिकायईश्वराग्निरूपाधिप्रत्यधिदेवतासहितायेमंसदीपमाष-भक्तबलिं समर्पयामि।। भोसूर्यइमंबलिंगृहाणममसकुटुंबस्या-भ्युदयंकुरु।। आयुः कर्ता क्षेमकर्ताशांतिकर्तापुष्टिकर्तातुष्टिकर्ता-निर्विघ्नकर्तावरदोभव।। अनेनबलिदानेनसूर्यः प्रीयताम्।। ॐ इमन्देवाअसप०।। सांगा० सप० सश० उमांबुरूपाधिप्रत्यधि-देवतासहितायसोमायनमः गंधा०।। सोमायसांगा० सप० सश०उमांबुरूपाधिप्रत्यधिदेवतासहितायेमंसदीपमाषभक्तबलिंस०।। भोसोमइमंबलिं गृहाणममसकुटुंबस्याभ्युदयंकुरु।। आयुः कर्ता क्षेमकर्ताशांतिकर्तापुष्टिकर्तातुष्टिकर्तानिर्विघ्न कर्तावरदोभव।। अनेनबलिदानेनसोमः प्रीयतां।। ॐ अग्निर्मूर्द्धादिवः क०।। सांगा० सप० सश० स्कंदभूमिरूपाधिप्रत्यधिदेवतासहितायभौमायनमः गंधा०।। भौमायसां० सप० सश० स्कंदभूमिरूपाधिप्रत्यधिदेवता

सहितायेमंसदीपमाषभक्तबलिंसमर्पयामि।। भोभौमइमंबलिंगृ० म० सकुटुंबस्याभ्युदयंकुरु।। आयुःक० क्षेमक० शांतिक० पुष्टि० तुष्टि० निर्विघ्नकर्तावरदोभव।। अनेनबलिदानेनभौमः प्रीयतां।। ॐ उद्बुध्यस्वाग्ने०।। सांगा० सप० सश० नारायणविष्णुरूपाधिप्रत्यधिदेवतासहिताय बुधायनमः गंधा०।। बुधायसांगा० सप० सश० नारायणविष्णुरूपाधिप्रत्यधिदेवतासहितायेमंसदीपमाषभक्तबलिंस०।। भो बुधइमंबलिंगृहाणममसकुटुंबस्याभ्युदयंकुरु।। आयुःक० क्षेमक० शांतिक० पुष्टि० तुष्टि क० निर्विघ्नकर्तावरदोभव।। अनेनबलिदानेनबुधः प्रीयतां।। ॐ बृहस्पतेअतिय०।। सांगा० सप० सश० ब्रह्मेन्द्ररूपाधिप्रत्यधिदेवतासहितायबृहस्पतये० गंधा०।। बृहस्पतयेसांगायसपरिवारायसश० ब्रह्मेन्द्ररूपाधिप्रत्यधिदेवतासहितायेमंसदीपमाषभक्तबलिंस०।। भोबृहस्पतेइमंबलिंगृहाणममसकुटुंबस्याभ्युदयंकुरु।। आयुः क० क्षेमक० शांतिक० पुष्टि० तुष्टिक० निर्विघ्नकर्तावरदोभव।। अनेनबलिदानेनबृहस्पतिः प्रीयतां।। ॐ अन्नात्परिस्रुतो०।। सांगा० सप० सश० इन्द्रेन्द्राणीरूपाधिप्रत्यधिदेवतासहितायशुक्रायनमः गंधा०।। शुक्रायसांगा० सप० सश० इन्द्रेन्द्राणीरूपाधिप्रत्यधिदेवतासहितायेमंसदीपमाषभक्तबलिंस०।। भोशुक्रइमंबलिंगृहाणममसकुटुंबस्याभ्युदयंकुरु।। आयुः क० क्षेमक० शांतिक० पुष्टिक० तुष्टिक० निर्विघ्नकर्तावरदोभव।। अननेबलिदानेनशुक्रः प्रीयतां। ॐ शन्नोदेवीर०।। सांगा० सप० सश० यमप्रजापतिरूपाधिप्रत्यधिदेवतासहितायशनैश्चरायनमः गंधा०।। शनैश्चरायसांगा० सप० सश० यमप्रजापतिरूपाधिप्रत्यधिदेवतासहितायेमंसदीपमाषभक्तबलिंस०।। भोशनैश्चरइमंबलिंगृहाणममसकुटुंबस्याभ्युदयंकुरु।। आयुः क० क्षेमक० शातिक० पुष्टिक० तुष्टिक० निर्विघ्नकर्तावरदोभव।। अनेनबलिदानेनशनैश्चरः प्रीयतां।।

ॐ कायानश्चित्र०।। सांगा० सप० सश० कालसर्परूपाधिप्रत्यधिदेवतासहितायराहवेनमः गंधा०।। राहवेसांगा० सप० सश० कालसर्परूपाधिप्रत्यधिदेतासहितायेमंसदीपमाषभक्तबलिंस०।। भोराहोइमंबलिंगृहाणममसकुटुंबस्याभ्युदयंकुरु।। आयुः क० क्षेमक० शांतिक० पुष्टिक० तुष्टिक० निर्विघ्नकर्तावरदोभव।। अनेनबलिदानेनराहुः प्रीयतां।। ॐ केतुंकृण्वंनंके०।। सागा० सप० चित्रगुप्तब्रह्मरूपाधिप्रत्यधिदेवतासहितायकेतवेनमः गंधा०।। केतवेसांगा० सप० सश० चित्रगुप्तब्रह्मरूपाधिप्रत्यधिदेवतासहितायेमंसदीपमाषबलिंस०।। भोकेतोइमंबलिंगृहाणममसकुटुंबस्याभ्युदयंकुरु।। आयुः क० क्षेमक० शांतिक० पुष्टिक० तुष्टिक० निर्विघ्नकर्तावरदोभव।। अनेनबलिदानेन केतुः प्रीयतां।। ।। ग्रहवेद्युत्तरतोगणपत्यादिलोकपालेभ्योबलिः।। ॐ गणानान्त्वागण०।। सांगायसपरिवारायसशक्तिकायगणपतयेनमः गंधा०।। गणपतयेसांगायसपरिवारायसशक्तिकायेमंसदीपमाषभक्तबलिंस०।। भोगणपतेइमंबलिंगृहाणममसकुटुंबस्याभ्युदयंकुरु।। आयुः क० क्षेमक० शांतिक० पुष्टिक० तुष्टिक० निर्विघ्नकर्तावरदोभव।। अनेन बलिदानेनगणपतिः प्रीयतां।। ॐ अम्बेअंबिके०।। सांगा० सप० सश० दुर्गायै० गंधा०।। दुर्गायैसांगायैसपरिवारायैसशक्तिकायैइमंसदीपमाषभक्तबलिंस०।। भोदुर्गेइमंबलिंगृहाणममसकुटुंबस्याभ्यु०।। आयुः कर्त्रीक्षेमकर्त्रीशांतिकर्त्रीपुष्टिकर्त्री तुष्टिकर्त्री निर्विघ्नकर्त्री वरदाभव। अनेनबलिदानेनदुर्गाप्रीयतां।। ॐ आनोंनियुद्भिं०।। सांगा० सप० सश० वायवेनमः गंधा० वायवेसांगा० सप० सश० येमंसदीपमाषभक्तबलिंस०।। भोवायोइ० ब०गृ०म०स० कु०।। आयुः क० क्षेमक० शांतिक० पुष्टिक० तुष्टिक० निर्विघ्नकर्ता वरदोभव।। अनेनबलिदानेनवायुः प्रीयतां।। ॐ घृतंघृतपा०।। सांगा० सप० सश० आकाशायनमः।

गंधा० ।। आकाशायसांगा० सप० सश० येमंसदीपमाषभक्तबलिंस० ।। भोआकाशइमंबलिंगृ० म० स० कु० ।। आयुः क० क्षे० शां० पु० तु० निर्विघ्नकर्तावरदोभव ।। अनेनबलिदानेनआकाशः प्रीयतां। ॐ यावांकशा० ।। सांगाभ्यांसपरिवाराभ्यांसशक्तिकाभ्यां-अश्विभ्यांनमः गंधा० अश्विभ्यांसांगाभ्यांसपरिवाराभ्यांसशक्तिका-भ्यामिमंसदीपमाषभक्तबलिंस० ।। भोअश्विनौइमंबलिंगृह्णीतंमम-सकुटुंबस्याभ्युदयंकुरुत ।। आयुः कर्तारौक्षेमकर्तारौशांति-कर्तारौपुष्टिकर्तारौतुष्टिकर्तारौनिर्विघ्नकर्तारौवरदौभवत ।। ॐ वास्तोष्पते० ।। सांगा० सप० सश० वास्तोष्पतये० गंधा० ।। वास्तोष्पतयेसांगा० सप० सश० येमंसदी० मा० भ० बलिसं० ।। भोवास्तोष्पतेइमंब० गृ० म० स० कुरु ।। आयुः क० क्षेमक० शांतिक० पुष्टिक० तुष्टिक० वरदोभव ।। अनेनबलिदानेनवास्तोष्पतिः प्रीयतां ।। ।। इंद्रादिदिक्पालेभ्यः पृथक्पृथक्बलिदानंकर्तुमशक्तश्चे-त्सर्वेभ्योदिक्पालेभ्यएकतंत्रेणैकमेवबलिंदद्यात् ।। ।। ॐ प्राच्यैदिशे स्वाहाव्वार्च्यैदिशेस्वाहादक्षिणायैदिशेस्वाहाव्वार्च्यैदिशेस्वाहा-प्रतीच्यै दिशेस्वाहाव्वार्च्यैदिशेस्वाहोदीच्यैदिशे-स्वाहाव्वार्च्यैदिशेस्वाहोर्ध्वायैदिशेस्वाहाव्वार्च्यैदिशेस्वाहा-व्वार्च्यैदिशेस्वाहाव्वार्च्यैदिशे स्वाहाव्वार्च्यैदिशेस्वाहा ।। सांगेभ्यः स० सश० इंद्रादिदशदिक्पालेभ्योनमः गंधा० ।। इंद्रादिदशदिक्-पालेभ्यः सां० स० स० इमंसदी० मा० भ० बलिं स० ।। भोभोइंद्रादिदशदिक्पालाः दिशंरक्षतबलिंभक्षतममसकुटुंबस्या-भ्युदयंकुरुध्वं ।। आयुः कर्तारः क्षेमकर्तारः शांतिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः निर्विघ्नकर्तारः वरदाः भवत ।। अनेनव० इंद्रादिदशदिक्-पालाः प्रीयंतां ।। ।। एवंग्रहपीठस्थसूर्यादिदेवताभ्यएकएवबलिः ।। ॐ ग्रहाऽऊर्ज्जा० ।। सांगाभ्यः सपरिवाराभ्यः सशक्तिकाभ्यः अधिप्रत्यधिदेवताविनायकादिपंचलोकपालवास्तोष्पतिसहिताभ्य

आदित्यादिनवग्रहदेवताभ्योनमः गंधा०।। सां गा० सप० सश० अधिप्रत्यधिदेवताविनायकादिपंचलोकपालवास्तोष्पतिसहिताभ्य-आदित्यादिनवग्रहदेवताभ्यइमंसदीपमाषभक्तबलिंस०।। भोभोआदि-त्यादिनवग्रहदेवता अधिप्रत्यधिदेवताविनायकादिपंचलोक-पालवास्तोष्पतिदेवता सहिताः इमंबलिंगृह्णीत ममसकुटुंबस्याभ्यु-दयंकुरुध्वं।। आयुः क० क्षेम० शांति० निर्विघ्न० वरदाः भवत।। अनेनबलिदानेनाधिप्रत्यधिदेवताविनायकादिपंचलोकपालवास्तो-ष्पतिदेवतासहितआदित्यादिनवग्रहदेवताः प्रीयंताम्।। ।। एवंमातृ णामेकएवबलिः।। ॐ समख्येदे०।। सांगाभ्यः सप० सश० गौर्यादिमातृभ्योनमः गंधा०। गौर्यादिमातृभ्यः सांगाभ्यः सप० सश० इमंसदीपमाषभक्तबलिंस०।। भो भो गौर्यादिमातरइमंबलिं-गृह्णीतममसकुटुंबस्याभ्युदयंकुरुष्वं।। आयु कर्त्र्यः क्षेमकर्त्र्यः शांतिकर्त्र्यः पुष्टिकर्त्र्यःनिर्विघ्नकर्त्र्यः वरदाः भवत।। अनेन-बलिदानेनगौर्यादिमातरः प्रीयंतां।। मातृविसर्जनपक्षे नात्रबलिदानं।। प्रधानदेवताभ्यएकतंत्रेणैकएवबलिः।। ॐ आकृष्णेनरजसा०।। त्रातारमिन्द्रं०।। अदित्यै०। श्रीश्चते०।। सांगाभ्यः सप० सश०सूर्येंद्रेंद्राणीभुवनेश्वरीदेवताभ्योनमः गंधा०।। सूर्येंद्रेंद्राणी-भुवनेश्वरीदेवताभ्यः सांगाभ्यः सप० सश० इमंसदीपमाष-भक्तबलिंस०।। भोभोसूर्येंद्रेंद्राणीभुवनेश्वरीदेवताइमंबलिंगृह्णीत-ममसकुटुंबस्याभ्युदयंकुरुध्वं।। आयुः कर्तारः क्षेम० शांति० पुष्टि० तुष्टि० निर्वि० वरदाः भवत।। अनेनबलिदानेन-सूर्येंद्रेंद्राणीभुवनेश्वरीदेवताःप्रीयता।। ।। ततः क्षेत्रपालमहाबलिः।। अत्रशिष्टाचारान्नृत्यगीतवादित्राणांघोषः कार्यः।। कुशास्तृतै-कस्मिन्वंशपात्रेपुरुषचतुष्टयाहारपर्याप्तंतदर्धंवामाषभक्तादिबलिद्रव्यं-जलपात्रंचनिधायक्षेत्रपालंपूजयेत्।। देशकालौ स्मृत्वासकला-रिष्टशांतिपूर्वकंप्रारीप्सितस्यकर्मणः सांगतासिद्ध्यर्थंक्षेत्रपालपूजनं-

बलिदानंचकरिष्ये।। ॐ नहिस्प श०।। इतिमंत्रेणक्षेत्रपालायनमः गंधाद्युपचारैः संपूज्य।। क्षेत्रपालायसांगायभूतप्रेतपिशाचशाकिनी डाकिनीवेतालादिपरिवारयुतायसायुधायसशक्तिकायसवाहनाय- इमंसदीपमाषभक्तबलिंस०।। भोभोक्षेत्रपालसर्वतोदिशंरक्षबलिंभक्ष- ममसकुटुंबस्याभ्युदयंकुरु।। आयुः कर्ता क्षेम० शांति० पुष्टि० तुष्टि० निर्वि० वरदोभव।। अनेनबलिदानेनक्षेत्रपालः प्रीयतां।। ततः पश्चादनवेक्षमाणेनदुर्ब्राह्मणेन[10]बलिं नीत्वाचतुष्पथेक्षिपेत्।। ततोयजमानस्तस्यपृष्ठेजलंक्षिपेद्धिंकारेतिमंत्रेण।। ॐ हिङ्काराय- स्वाहाहिङ्कृंतायस्वाहाक्रन्दंतेस्वाहावक्रन्दायस्वाहाप्रोथंते स्वाहाप्र- प्रोथायस्वाहागन्धायस्वाहाघ्रातायस्वाहानिविष्टायस्वाहोपविष्टाय- स्वाहासन्दितायस्वाहावल्गतेस्वाहासीनायस्वाहाशयानायस्वाहा- स्वपतेस्वाहाजाग्रतेस्वाहाकूजतेस्वाहाप्रबुद्धायस्वाहाव्विजृम्भ- माणायस्वाहाव्विचृत्तायस्वाहास ँ् हानायस्वाहोपस्थितायस्वाहाय- नायस्वाहाप्प्रायणायस्वाहा।। ततोयजमानः पाणिपादंप्रक्षाल्याचम्य- पूर्णाहुतिहोमंकुर्यात्।। ।। देशकालौस्मृत्वाकर्मणःसांगतासिद्ध्यर्थंव- सोर्द्धारासमन्वितंपूर्णाहुतिहोमंकरिष्ये।। तत्रान्यदाज्यमाज्य- स्थाल्यानिरूप्याग्नावधिश्रित्यस्रुवौप्रतप्यतौचसंमार्गकुशैः संमृज्यपुनः प्रतप्यचदेशेनिदद्ध्यात्।। आज्यमुद्वास्यपवित्राभ्यांतमुत्पूयावेक्ष्याप- द्रव्यंनिरस्यचचतुष्कृत्वोद्वादशकृत्वोवाज्यंस्रुचिगृहीत्वाशिष्टाचारात्त- स्यांरक्तसूत्रवस्त्रबद्धपुष्पमालापरिवेष्टितंनारिकेलादिफलं- निधायाधोमुखस्रुवच्छन्नां पूर्वं दक्षिणहस्तेनशंखसंनिभमुद्रयातामादाय- पश्चाद्वामेनगृहीत्वानाभिमूलाद्वामस्तनांतमानीयपूर्णाहुतिंयजमानान्वार- ब्धआचार्योजुहुयात्।। ।। तत्रमंत्राः।। ॐ समुद्रादूर्म्मिर्धुमा2ँ ऽउदार- दुपा ँ शुनासमंमृतत्वमानट्।। घृतस्यनामगुह्यन्यदस्तिजिह्वा- देवानाममृतस्यनाभिः।। व्वयन्नामप्प्रब्रवामाघृतस्यास्मिन्यज्ञे- धारयामानमोभिः।। उपब्रह्माशृणवच्छस्यमानञ्चदंशृङ्गोव्वमीद्-

गौरऽएतत्।। चत्वारिशृङ्गात्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य।। त्रिधाबद्धोव्वृषभोरोरवीतिमहोदेवोमर्त्याऽर्रआविवेश।। त्रिधाहितम्पणिभिर्गुह्यमानङ्गविदेवासोघृतमन्वविन्दन् ।। इन्द्रएकꣳसूर्यऽएकञ्जजानव्वेनादेकꣳस्वधयानिष्टतक्षुः।। एताऽअर्षन्तिहृद्यात्समुद्राच्छतव्रजारिपुणानाव्वचक्षे।। घृतस्यधाराऽअभिचाकशीमिहिरण्ययोव्वेतसोमध्यऽआसाम् । सम्यक्स्रवन्तिसरितोनधेनाऽअन्तर्हृदामनसापूयमानाः।। एतेऽअर्षन्त्यूर्मयोघृतस्य मृगाऽइवक्षिपणोरीषमाणाः।। सिन्धोरिवप्राध्वनेशूघनासोव्वातप्रमियःपतयन्तियह्वाः।। घृतस्यधाराऽअरुषोनव्वाजीकाष्ठाभिन्दन्नूर्म्मिभिः पिन्वमानः।। अभिप्रवन्तसमनेव्वयोषाः कल्याण्यस्मयमानासोऽअग्निम्।। घृतस्यधाराःसमिधोनसन्तताजुषाणोहर्य्यतिजातवेदाः।। कन्याऽइवव्वहतुमेतवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशीमि।। यत्रसोमःसूयतेयत्रयज्ञो घृतस्यधाराऽअभितत्पवन्ते।। अभ्यर्षतसुष्टुतिङ्गव्यमाजिमस्मासुभद्राऽद्रविणानिधत्त।। इमञ्ज्यज्ञन्नयतदेवतानोघृतस्यधारामधुमत्पवन्ते।। धामन्तेव्विश्वम्भुवनमधिश्रितमन्तःसमुद्रेहृद्यन्तरायुषि।। अपामनीकेसमिथेयऽआभृतस्तस्तमस्याममधुमन्तन्तऊर्म्मिम्।। मूर्द्धानन्दिवोऽअरतिम्पृथिव्याव्वैश्वानरमृतऽआजातमग्निम्।। कविꣳ सम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः।। पुनस्त्वादित्यारुद्राव्वसवः समिन्धताम्पुनर्ब्रह्माणोव्वसुनीथ यज्ञैः।। घृतेनत्वन्तन्वव्वर्धयस्वसत्याःसन्तुयजमानस्यकामाः।। सप्ततेऽअग्नेसमिधःसप्तजिह्वाःसप्तऽऋषयः सप्तधामप्रियाणि सप्तहोत्राःसप्तधात्वायजन्तिसप्तयोनीरापृणस्वघृतेनस्वाहा।। पूर्णादर्व्विपरा प०।। अथप्रातराहुतेवाहुतेवायदरथाः कामयेतसोस्याऽअनिरसितायैकुंभ्यैदर्व्योपहन्तिपूर्णादर्व्विपरापतसुपूर्णापुनरापत।। व्वस्नेवव्विक्रीणावहाऽइषमूर्यꣳशतक्रतो स्वाहा।। इदमग्नयेवैश्वानरायवसुरुद्रा-

दित्येभ्यः शतक्रतवेसप्तवतेअग्नेद्भ्यश्चनमम।। ततोवसोर्द्धारां-
जुहुयात्।। तत्रायंप्रकारः।। वह्नेरुपरिस्तंभद्वयविधृतामौदुंबरीमृज्वीम-
कोटरांबाहुप्रमाणामार्द्रांचतुर्गृहीतंस्रुचंप्रागग्रांनिधायतदुपरि शृङ्खला-
वद्धतेननिर्मलघृतपूरितेनताम्रादिकुंभेनाधोयवमात्रच्छिद्रेणाज्यंविमुं-
चताग्नेरुपरिवसोर्धारांपातयेत्।। तत्रमंत्राः।। ॐ सप्ततेअग्ने-
समिधः स०।। शुक्रज्योतिश्चचित्रज्योतिश्चसत्यज्योतिश्च-
ज्योतिष्माँश्च।। शुक्रश्चऽऋतपाश्चात्यं ँ हाः।। ईदृङ्चान्यादृङ्च-
सदृङ्चप्रतिसदृङ।। मितश्चसम्मितश्चसभराः।। ऋतश्चसत्यश्चध्रुव-
श्चधरुणश्च।। धर्त्ताचव्विधर्ताच व्विधारयः।। ऋतजिच्चसत्यजि-
च्चसेनजिच्चसुषेणश्च।। अन्तिमित्रश्चदूरेऽअमित्रश्चगणः।। ईदृक्षास-
ऽएतादृक्षासऽऊषुणः सदृक्षासः प्रतिसदृक्षासऽएतन।। मितासश्च-
सम्मितासो नोऽअद्यसभरसोमरुतोयज्ञेऽअस्मिन्।। स्वतवाँश्चप्रघासीच-
सान्तपनश्चगृहमेधीच।। क्रीडीचशाकी चोज्येषि।। इन्द्रन्दैवीर्व्वि-
शोमरुतोनुवर्त्मानोभवन्यथेन्द्रन्दैवीर्व्विशोमरुतोनुवर्त्मानोभवन्।।
एवमिमञ्यजमानन्दैवीश्चव्विशोमानुषीश्चानुवर्त्मानोभवन्तु।।
इमथ्ठ्स्तनमूर्ज्जस्वन्तन्धयापाम्प्रपीनमग्नेसरिरस्यमध्ये।। उत्सञ्जुषस्व-
मधुमन्तमर्व्वन्त्समुद्रियथ्ठ्सदनमाव्विशस्व।। घृतम्मिमिक्षे०।।
अत्रपूर्वोक्तान्याग्न्येयादिसूक्तानिपठनीयानिविस्तरभयान्नलिखितानि।।
ब्राह्मणं।। अथातोव्वसोर्धारान्जुहोत्यत्रैषसर्वोग्निः संस्कृतः
सऽएषोत्रव्वसुस्तस्मैदेवाऽएतान्धाराम्प्रागृह्णँस्तयैनप्रीणँस्तद्यदेत
स्मैव्वसवऽएतान्धाराम्प्रागृह्णँस्तस्मादेनाम्व्वसोर्द्धारित्याचक्षतेतथैवास्माऽ
अयमेतान्धाराम्प्रगृह्णातितथैनंप्रीणाति।। यद्वेवै ताम्व्वसोर्धा-
राञ्जुहोत्यभिषेकऽ एवास्यैषऽएतद्वाऽएनन्देवाः सर्वंकृत्स्न ँ
संस्कृत्याथैनमेतैः कामैरभिषिञ्चत्येतयाव्वसोर्द्धारयातथैनमयमेतत्सर्वं-
कृत्स्नथ्ठ् सँस्कृत्याथैनमेतैः कामैरभिषिञ्चत्येतयाव्वसोर्द्धारया-
ज्येनपञ्चगृहीतेनौदुम्बर्यास्रुचातस्योक्तोबन्धुः।। वैश्वानर हुत्वाशिरो

वैव्वैश्वानरःशीर्ष्णोवाऽअन्नमद्यतेथोशीर्षतोवाऽअभिषिञ्चयमानोभिषिञ्च्य-
तेमारुतान्हुत्वाप्प्राणावैमारुताः प्राणावैमारुताःप्राणैरुवाऽ-
अन्नमद्यतेथोप्राणेषुवाऽअभिषिञ्च्यमानोभिषिञ्च्यते।। तद्वाऽअरण्येनू-
च्यो वाग्वा ऽ अरण्ये नू च्यो व्वा चो वा ऽ अ न्न मद्यते थो व्वा-
चावाऽअभिषिञ्च्यमानोभिषिञ्च्यतेतदेतत्सर्वम्व्वसुसर्वेह्येतेकामाः
सैषावसुमयीधारायथाक्षीरस्यवासर्पिषोवैवमारम्भायैवेयमाज्या-
हुतिर्हूयतेतद्यदेषाव्वसुमयीधारातस्मादेनाम्व्वसोर्द्धारित्याचक्षते।।
सऽआहेदञ्चमऽइदञ्चमऽइत्यनेनचत्वाप्रीणाम्यनेनचानेनचत्वाभि-
षिञ्चाम्यनेन चेत्येतदथोऽइदञ्चमेदेहीदञ्चमऽइतिसायदेवैषाधाराग्नि-
म्प्राप्नुयादथैतद्यजुः प्रतिपद्यते।। एतद्वाऽएनन्देवाएतेनान्नेन प्रीत्येतैः
कामैरभिषिञ्च्यत्येतयाव्वसोर्द्धारयाथैनमेतान्कामानयाचन्ततेभ्यऽइष्टः
प्रीतोभिषिक्तऽएतान्कामान्प्रयच्छन्तथैवैनमतदेतन्नान्नेनप्रीत्येतैः कामैर-
भिषिञ्च्येतयाव्वसोर्द्धारयाथैनमेतान्कामान्याचक्षतेतस्माऽइष्टः
प्रीतोभिषिक्तऽएतान्कामान्प्रयच्छतिद्वौद्वौकामौसंयुनक्तयव्यवच्छे-
दाथयथाव्योमाकसौसयजुन्देवन्यज्ञेनकल्पतामिति।। एतद्वैदेवाऽ-
अब्रुवन्केनेमान्कामान्प्रतिगृहीष्यामऽइत्यात्मनेनैवेत्यब्रुव-
न्यज्ञोवैदेवानामात्मायज्ञऽउऽएवयजमानस्यसयदाहयज्ञेनकल्पतामि-
त्यात्मनामेकल्पतामित्येवैतदाह।। द्वादशसुकल्पयतिद्वादश
मासाःसँव्वत्सरः सँव्वत्सरोग्नि र्यावानग्निर्यावत्यस्यमात्राता-
वतैवैनमेतदन्नेनप्रीणात्यथोतावतैवैनमेतदन्नेनाभिषिञ्चतिचतुर्दशसु-
कल्पयत्यष्टासुकल्पयतिदशसुकल्पयतित्रयोदशसुकल्पयति।।
अथार्धेन्द्राणिजुहोतिसर्वमेतद्यदर्धेन्द्राणिसर्वेणैवैनमेतत्प्रीणात्यथो-
सर्वेणैवैनमेतदभिषिञ्चति।। अथग्रहाञ्जुहोतियज्ञावैग्रहायज्ञेनैवैन-
मेतदन्नेनप्रीणात्यथोयज्ञेनैवैनमेतदन्नेनाभिषिंचति।। अथैतान्यज्ञकृ-
तूञ्जुहोत्यग्निश्चमेघर्मश्चमऽइत्येतैरेवैनमेतद्यज्ञकृतुभिः प्रीणात्यथाऽएतै-
रेवैनमेतद्यज्ञकृतुभिरभिषिञ्चति।। अथायुषस्तोमाञ्जुहोतिसहैष-

यज्ञऽउवाचनग्नतायावैबिभेमीतिकातेनग्नतेत्यभितएवमापरिस्तृणी-
युरितितस्मादेतदग्निमभितः परिस्तृणन्तितृष्णायावैबिभेमीतिकाते-
तृप्तिरितिब्राह्मणस्यैवतृप्तिमनुस्तृप्येयमितितस्मात्सँ स्थितेयज्ञेब्राह्म-
णन्तर्प्पयितवैब्रूयाद्यज्ञमेवैतत्तर्प्पयति।। यत्कर्मणात्यरीरिचन्य-
द्वान्यूनमिहाकरम्।। अग्निष्टत्स्विष्टकृद्विद्वान्स्विष्टंसुहुतंकरोतु-
स्वाहा।। इदमग्नयेनममेतित्यागः।। ।। ततस्त्र्यायुषकरणं।। श्रद्धां-
मेधांयशः प्रज्ञांविद्यांपुष्टिंश्रियंबलं।। तेजआयुष्यमारोग्यंदेहिमे-
हव्यवाहन।। ॐ त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम्।।
यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम्।। अनेनयथोक्तस्थानेभस्म-
धारयेत्।। ततः संस्रवप्राशनं।। पवित्राभ्यांमार्जनं।। अग्नौपवित्र-
प्रतिपत्तिः।। ब्रह्मणेपूर्णपात्रदानंप्रणीतोदकेन।। कृतस्यकर्मणः
सांगतासिद्ध्यर्थंब्रह्मन्इदंपूर्णपात्रंसदक्षिणाकंतुभ्यमहंसंप्रददे।।
प्रतिगृह्यतां।। देवस्यत्वेतिप्रतिगृह्णाति।। प्रणीताविमोकः।।
विमोकोदकंआपः शिवेतियजमानः स्वमूर्ध्न्यभिषिंचेत्।। ॐ आपः
शिवाः शिवतमाः शान्ताः शान्ततमास्तास्तेकृण्वन्तुभेषजं।। ततः
श्रे[11]यः संपादनं।। ।। वरणक्रमेणाचार्यादयऋत्विजउदङ्मुखाः
प्राङ्मुखयजमानहस्तेस्वं स्वंश्रेयोदानंकुर्युः।। तच्चैवं।। शिवाआपः
संत्वितिजलं।। संतुशिवाआपः।। सौमनस्यमस्त्वितिपुष्पाणि।।
अस्तुसौमनस्यं।। अक्षतंचारिष्टंचास्त्वित्यक्षताः।। अस्त्वक्षतमरिष्टंच।।
यत्पापंरोगः अशुभंअकल्याणंतद्दूरेप्रतिहतमस्त्वितिपुनर्जलं।।
भवन्नियोगेन मयाअस्मिन्नारदोक्तसग्रहमखरजोदर्शनशांत्याख्ये-
कर्मणियत्कृतं आचार्यत्वंतदुत्पन्नंश्रेयः तदमुनाक्षतादिनातु-
भ्यमहंसंप्रददे।। प्रतिगृह्यतां। प्रतिगृह्णामि।। तेनश्रेयसात्वंश्रेयस्वान्भव।
भवामीतिप्रतिवचनं।। एवमेवब्रह्मादयऋत्विजो जापकादयश्च।।
अथवाब्रह्मादयऋत्विजआचार्यद्वाराश्रेयोदानंकुर्युः।। तद्यथा।।
भवन्नियोगेनमयाअस्मिन्सग्रहमखरजोदर्शनशांत्याख्येकर्मणियत्कृतं

आचार्यत्वंतथाचएभिर्ब्राह्मणैः सहयत्कृतंब्रह्मत्वंगाणपत्यं-
सादस्यंतथाचयः कृतोहोमः यः कृतोजपः आचार्यत्वात्-
ब्रह्मत्वात्गाणपत्यात्सादस्यात् होमात्जपात्यदुत्पन्नंश्रेयस्तद-
मुनाक्षतादिनातुभ्यमहंसंप्रददे।। तेनश्रेयसात्वं श्रेयस्वान् भव।।
भवामीतिप्रतिवचनं।। ।। ततआचार्यादीनांगंधवस्त्रालंकारादिभि-
र्यथाविभवं पूजनंकार्यं।। ततः पूर्वोक्तानिस्वर्णादिदानानिदेयानि।।
तत्र स्वर्णदानमंत्रः।। हिरण्यगर्भगर्भस्त्वंहेमबीजंविभावसोः।।
अनंतपुण्यफलदमतः शांतिंप्रयच्छमे।। इदंयथाशक्तिसुवर्ण-
मग्निदैवतंवातन्निष्क्रयीभूतयथाशक्तिरजतद्रव्यंसग्रहमखरजो-
दर्शनशांतिसांगतासिद्ध्यर्थं अमुकशर्मणे आचार्यायतुभ्यमहंस-
प्रददेनमम।। ॐ देवस्य० अग्नयइदंमसुवर्णंप्रतिगृह्णामीति।।
गोदानमंत्रः।। यज्ञसाधनभूतायाविश्वस्याघप्रणाशिनी।। विश्वरूपधरोदेवः
प्रीयतामनयागवा।। इमांगांरुद्रदैवतांवागोनिष्क्रयीभूतयथा-
शक्तिरजतद्रव्यंसग्रह० आचार्यायतुभ्यमहंसंप्रददे।। नमम।। ॐ
देवस्य० रुद्रायगांप्रतिगृह्णामि।। भूमिदानमंत्रः।। सर्वभूताश्रयाभूमिर्व-
राहेणसमुद्धृता।। अनंतसस्यफलदाअतः शांतिंप्रयच्छमे।।
इमांभूमिंविष्णुदैवतांवातन्निष्क्रयीभूतयथाशक्तिरजतद्रव्यंसग्रह०
आचार्यायतुभ्यमहंसंप्रददे।। नमम।। ॐ देवस्य० विष्णवेभूमिं-
प्रतिगृह्णामीति।। तिलदानमंत्रः।। महर्षेर्गोत्रसंभूताः काश्यपस्यतिलाः
स्मृताः।। तस्मादेषांप्रदानेनममदोषोविनश्यतु।। द्रोणपरिमितानेतांस्ति-
लान्प्रजापतिदैवतान्वातन्निष्क्रय० रजतद्रव्यंसग्रह० आचार्यायतुभ्य-
महंसंप्रददेनमम।। ॐ देवस्य० प्रजापतयेतिलान्प्रतिगृ०।।
रुद्रजापिनेब्राह्मणायसदक्षिणमनड्वाहमुक्तनिष्क्रयंवादद्यात्।।
अन्येभ्योऋत्विग्भ्योयथाशक्तिहेमतन्निष्क्रयंरजतद्रव्यंवादद्यात्।।
ततोहेमकदलीदानं।। तत्रमंत्रः।। सुपत्रे सुभगेदेविरंभेभास्करवल्लभे।।
रक्षमांरजसोदोषाद्दुष्टस्यास्यविगर्हितात्।। दानेननानेनमेदेवः

सविताविश्वतोमुखः।। प्रीतोभवतुमेसद्योदोषंहरतु दुष्करं।। अनेनस्वर्णकदलीदानेनश्रीसूर्यः प्रीयतांनममेति।। अथमूर्तिदानं।। देवदेव जगन्नाथजगतांकारणाव्यय।। मनोहरनमस्तुभ्यंभास्करः प्रीयतामिति।। इमाः सूर्यादिचतस्रोमूर्तीः सकलशाः सवस्त्राआचार्या-यतुभ्यमहंसंप्रददे।। तेनसूर्यादिदेवताः प्रीयंतांनममेति।। ।। ततोग्रह-संबंधिरुद्रकलशस्थापितदेवताकलशानामुदकमेकस्मिन्पात्रे-कृत्वोदङ्मुखस्तिष्ठन्नाचार्यश्चत्वारऋत्विजश्चप्राङ्मुखोपविष्टंस-पत्नींकंयजमानं दूर्वापंचपल्लवैरभिषिंचेयुः।। अभिषेकेपत्नी वामभागेइतिदर्पणकारः।। अत्रगीतवाद्यादिमंगलघोषः कार्यइतिमदनः।। तत्रमंत्राः।। ॐ आपोहिष्ठा०।। योवःशि०।। तस्माऽअरं०।। स्तोकानामिन्दुम्प्रतिशूरऽइन्द्रोवृषायमाणोवृषभस्तुराषाट्।। घृतप्रुषामनसामोदमानाःस्वाहादेवाऽअमृतामादयन्ताम्।। आयात्विन्द्रोव्वसऽउपनऽइहस्तुतः संधमादस्तु शूरः व्वावृधा-नस्तविंषीर्यस्यपूर्व्वीद्यौर्नक्षत्रमभिभूतिपुष्यात्।। आनऽइन्द्रो दूरादानऽआसादभिष्टिकृदवसेयासदुग्रः।। ओजिष्ठेभिर्नृपतिर्व्वज्रबाहुः सङ्गेसमत्सुतुर्व्वणिःपृतन्यून्।। आनऽइन्द्रोहरिभिर्यात्वच्छार्वा-चीनोव्वसेराधसेच।। तिष्ठातिव्वज्रीमघवाव्विरप्सीमन्यज्ञ-मनुनोव्वाजसातौ।। त्रातारमिन्द्रं०।। इमम्मेव्वरुणश्रुधीह-वमद्याचमृडय।। त्वामवस्युराचके।। तत्वा यामि०।। त्वन्नोअग्ने०।। सत्वन्नोअग्ने०।। उदुत्तमम्व्वरुणं।। भगप्रणेतर्भगसत्यराधोभगेमा-न्धियमुदवाददन्नः।। भगप्रनोजनयगोभिरश्वैर्भगप्रनृभिर्न्नृवन्तःस्याम्।। इदमापःप्प्रवहताव्वद्यंचमलंचयत् यच्चाभिदुद्रोहान्नृतन्यच्चशेपेऽअ-भीरुणम्।। समुद्रायत्वाव्वातायस्वाहासरितायत्वाव्वातायस्वाहा अनाधृष्यायेत्वाव्वातायस्वाहाप्रतिधृष्यायत्वाव्वाताय स्वाहा।। अवस्यवेत्वाव्वातायस्वाहाशिमिदायत्वावातायस्वाहा।। पुनन्तुमादेव०।। आप्याय०।। पंचनद्यः स०।। शिरोमेश्रीर्य-

शोमुखन्विषिः केशांश्चश्मश्रूंणि।। राजामेप्राणोऽअमृतंᳬ सम्राट्चक्षुर्विराट् श्रोत्रंम्।। जिह्वामेंभद्रँवाङ्महोमनोंमन्युः स्वराड्भामंः।। मोदांप्रमोदाऽअङ्गुलीरङ्गांनिमित्रम्मेसहंः।। बाहूमेबलमिन्द्रिय ँ हस्तौमेकर्म्मव्वीर्यम्।। आत्माक्षत्रमुरोममं।। पृष्टिर्म्मेराष्ट्रमुदरमᳬसौंग्रीवाश्चश्रोणीं।। ऊरुऽअरत्नीजानुंनीव्विशोमङ्गांनिसर्व्वतंः।। नाभिंर्म्मेचित्तम्विज्ञानंम्पायुर्म्मेपंचितिर्भसत्।। आनन्दनन्दावाण्डौमेभगःसौभाग्यम्पसंः।। जङ्घांभ्याम्पद्भ्यान्धर्मोंस्मिव्विशिराजाप्रतिंष्ठितः।। देवस्यंत्वा० देवस्यंत्वा०।। देवस्यंत्वा०।। पालाशंभवति०।। औदुंबरंभवति।। नैय्यग्रोध०।। आश्वत्थं भवति०।। यद्देवकल्पांजुहोति०।। सर्वेषांवा०।। अथपुराणोक्तमंत्राः।। सुरस्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः।। वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः।। प्रद्युम्नश्चानिरुद्धश्च भवंतुविजयायते।। आखंडलोग्निर्भगवान्यमोवैनैर्ऋतिस्तथा।। वरुणः पवनश्चैवधनाध्यक्षस्तथाशिवः।। ब्रह्मणा सहिताः सर्वेदिक्पालाः पांतुतेसदा।। कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिः श्रद्धाक्रियामतिः।। बुद्धिर्लज्जावपुः शांतिस्तुष्टिः कांतिस्तुमातरः।। एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः।। आदित्यश्चंद्रमाभौमबुधजीवसितार्कजाः।। ग्रहास्त्वामभिषिंचंतु राहुःकेतुश्चतर्पिताः।। देवदानवगंधर्वायक्षराक्षसपन्ननगाः।। ऋषयोमानवागावोदेवमातरएवच।। देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः।। अस्त्राणिसर्वशास्त्राणिराजानोवाहनानिच।। औषधानिचरत्नानिकालस्यावयवाश्चये।। सरितः सागराः शैलास्तीर्थानिजलदानदाः।। एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये।। द्यौः शान्तिंरत०।। अमृताभिषेको स्तु।। एवमभिषेकानंतरंसर्वोषधीरनुलिप्यदंपतीभ्यांशुद्धोदकेनस्नात्वोभयोः स्नानवस्त्रत्यागः।। स्नानवस्त्रण्याचार्यायदद्यात्।। शुक्लमाल्यांबरधरोधृतकुंकुमतिलकः सपत्नीकोयजमानः स्वासनेउपविश्याचम्याज्यावलोकनंकुर्यात्।। ॐ

रूपेणवोरूपमभ्यागान्तुथोवोव्विश्ववेदा व्विभजतु।। ऋतस्य-पथाप्रेतचन्द्रदक्षिणाव्विस्वपश्यव्यन्तरिक्षन्यतस्वसदस्यैः।। रूपँ रूपम्प्रतिरूपोबभूवतदस्यरूपम्प्रतिचक्षणाय।। इन्द्रोमायाभिः पुरुरूपऽएतेयुक्ताह्यस्यहरयः शतादशेत्ययंवैहरयोयम्वैदशच-सहस्राणि बहूनिचनन्तातदेतद्ब्रह्मपूर्वमनमबाह्यजमनुःसर्वानुशासनम्।। इदंआज्यपात्रं सदक्षिणाकंआचार्यायतुभ्यमहंसंप्रददे।। ततो ब्राह्मण-भोजनसंकल्पः।। कृतस्यकर्मणः सांगतासिद्ध्यर्थंयथाशक्तिब्राह्मणान् भोजयिष्ये।। तेनश्रीकर्मांगदेवताः प्रीयंतांनमम।। कर्मसांगतासिद्ध्यर्थं आचार्यायदक्षिणांदद्यात्।। ततो ऽन्येभ्योनानागोत्रेभ्योयथाशक्तिभूय-सींदक्षिणांदातुमहमुत्सृजइतिदत्वा।। तेषामाशिषोगृह्णीयात्।। ततोदेवताग्निविसर्जनं।। यांतुग्रहगणाः सर्वेस्वशक्त्या पूजितामया।। इष्टकामप्रसिद्ध्यर्थंपुनरागमनायच।। ॐ उत्तिष्ठब्रह्मणस्पतेदेव यन्तस्त्वेमहे।। उपप्रयन्तुमरुतः सुदानवऽइन्द्रप्राशूर्भवासचा।। आवाहित देवताः स्वस्थानेगच्छत।। ग्रहमंडलमाचार्यायदद्यात्।। गच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर।। यत्रब्रह्मादयोदेवास्तत्रगच्छ-हुताशन।। ॐ यज्ञयज्ञङ्गच्छयज्ञपतिङ्गच्छस्वाँयोनिङ्गच्छस्वाहा।। एषतेयज्ञोयज्ञपतेसहसूक्तवाकःसर्व्ववीरस्तन्जुषस्वस्वाहा।। मयाद्ययथाकालंयथादेशंयथाज्ञानंयथाशक्तियत्कृतं सग्रहमखरजो-दर्शनशांतिकर्मतेनश्रीपरमेश्वरः प्रीयतां।। ॐ तत्सत्ब्रह्मार्पणमस्तु।। ततः सदस्यान्गंधादिभिः संपूज्यांजलिंबध्वा।। मयाद्यामुकमास-पक्षतिथ्यादियथाकालंयथादेशंयथाशक्ति यत्कृतंनारदोक्तरजोदर्शन-शांत्याख्यं कर्मतत्कालहीनंभक्तिहीनंश्रद्धाहीनं ब्राह्मणानांवचनात् श्रीगणपतिप्रसादात्सर्वंपरिपूर्णमस्त्वितियजमानः।। अस्तुपरिपूर्णमिति-ब्राह्मणाः।। प्रमादात्कुर्वता कर्मप्रच्यवेदाध्वरेषुयत्।। स्मरणादेवत-द्विष्णोः संपूर्णंस्यादितिश्रुतिः।। यस्य स्मृत्याचनामोक्त्यात-पोयज्ञक्रियादिषु।। न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतं।। ॐ

विष्णवेनमः।। एवंयः कुरुतेशांतिंनारदोक्तप्रमाणतः।। तदनिष्टंतुसकलं सद्यएवविनश्यतीति।। इतिसंस्कारभास्करेसग्रहमखरजोदर्शन-शांतिप्रयोगः।। ।। अथप्रथमर्तौकर्तव्यमाह।। कश्यपः।। प्रथमर्तौतुपुष्पिण्याः पतिपुत्रवती स्त्रियः।। अक्षतैरासनंकुर्युस्त-स्मिंस्तामुपवेशयेत्।। हरिद्रापुष्पगंधादीन्दद्यात्तांबूलकंस्रजं।। आशिषोवाचयेयुस्ताः पतिपुत्रवतीभव।। दीपैर्नीराजनंकुर्युः सदीपेवासयेद्गृहे।। ताः सर्वाः पूजयेत्पश्चाद्गंधपुष्पाक्षतादिभिः।। लवणापूपमुद्गादिदद्यात्ताभ्यः स्वशक्तितइति।। ।। सर्वर्तुसाधारण-नियममाह।। ।। वसिष्ठः।। त्रिरात्रंरजस्वलाऽशुचिर्भवतिसानां-ज्यान्नाभ्यंज्यान्नाप्सुस्नायादधः शयीतनदिवास्वप्यान्नाग्नि-स्पृशेन्नरज्जुंसृजेन्नदंतान्धावयेन्नमांसमश्नीयान्नगृहान्निरी-क्षेतनाश्लीलंकिंचिदाचरेन्नखर्वेणपिबेदंजलिनावापिचेल्लोहेनायसेन-वाविज्ञायतइति।। लोहेनताम्रेण।। ।। प्रवासगंधमाल्यादिधारण-तांबूलगोरसभक्षणपीठाद्यारोहणंचवर्जयेत्।। मृण्मयेआयसेभूमौवा-भूंजीतेतिधर्मसिंधौ।। यद्यपिदक्षेण।। अंजनाभ्यंजनेस्नानंप्रवासंदंत-धावनं।। नकुर्यात्सार्तवानारीगृहाणामीक्षणंतथेतिनस्नानमात्रंनिषिद्धं।। तथाप्युपरागादिनिमित्तकस्नानेप्रसक्तेवसिष्ठेननाप्सुस्नायादिति-मज्जनंनिषिध्यते।। अतएवपराशरेणनियमः स्मर्यते स्नानेनैमित्तिके-प्राप्तेनारीयदिरजस्वला।। पात्रांतरिततोयेनस्नानंकृत्वाव्रतंचरेत्।। रिक्तगात्राभवेदद्भिः सांगोपांगाकथंचन।। नवस्त्रपीडनंकुर्यान्ना-न्यद्वासश्चधारयेदिति।। ।। ऋतुमत्याः प्रथमदिननिर्णयः। ।। पारिजातेचतुर्विंशतिमते।। पूर्वांशयोस्तुरात्रौचेज्जननंमरणंरजः। दृष्टंपूर्वदिनादित्वंतृतीयेतूत्तरेहनि। केचिद्दिवोदितेसूर्येजननंमरणं तथा रजोवादृश्यतेस्त्रीणांयस्याहस्तस्यशर्वरी। अपरे त्वर्धरात्रात्प्राङ्-मृतौरजसिसूतके।। पूर्वमेवदिनंप्राहुरूर्ध्वंचेदुत्तरेहनीति।। अत्रदेशा-चारतोव्यवस्था।। ।। रजस्वलाशुद्धिप्रकारः।। स्मृत्यर्थसारे।।

रजस्वलाषष्टिमृत्तिकाभिः शौचंकृत्वामलंप्रक्षाल्यदंतधावन-
पूर्वकंसंगवेस्नायादिति।। स्नानोत्तरंविशेषः।। लैंगे।। स्नात्वान्यंपुरुषं
नारीनस्पृशेत्तुरजस्वलेति।। ।। अन्यपुरुषस्पर्शेप्रायश्चित्तमुक्तं।। ।।
तत्रैव।। ईक्षयेद्भास्करंदेवंब्रह्मकूर्चंततः पिबेत्।। केवलंपंचग-
व्यंचक्षीरंवाचात्मशुद्धयइति।। ज्वरितायाः रजस्वलायाः शुद्धिप्रकारः।।
।। संग्रहे।। आतुराचेदृतुमतीतस्याः स्नानंकथभवेत्।। स्पृष्ट्वातुतांपरा-
स्नायाद्दशकृत्वोह्यनातुरा।। वासोभिर्दशभिश्चैवपरिधाप्ययथाक्रमं।।
ब्राह्मणान्भोजयित्वाथपुण्याहेनविशुद्ध्यतिः।। आतुराणांतुसर्वेषामेवं-
शुद्धिर्विधीयतइति।। ।। अथगर्भाधानकालमाह।। ।। पारस्करः।।
तामुदुह्य यथर्तुप्रवेशनं।। तांवधूंपूर्वोक्तविधिनाउदुह्यविवाह-
यित्वायथर्तुऋतावृतौप्रवेशनमभिगमनंकुर्यादित्यर्थः।। याज्ञवल्क्यः।।
शोडशर्तुनिशाः स्त्रीणांतस्मिन्युग्मासुसंविशेत्।। ब्रह्मचार्येव-
पर्वण्याद्याश्चतस्त्रश्चवर्जयेदिति।। स्त्रीणांगर्भधारणयोग्यावस्थोपलक्षितः
कालः ऋतुः।। सचरजोदर्शनदिवसादारभ्यषोडशाहोरात्रात्मक-
स्तस्मिन्नृतौयुग्मासुसमासु रात्रिषु।। रात्रिग्रहणाद्दिवसप्रतिषेधः।।
तथाचपारस्करः।। तस्मिन्प्रजायाः संभवकाले निशायां-
कुर्याद्यदिदिवामैथुनंव्रजेत्क्लीबा अल्पवीर्याअल्पायुषाश्चप्रसूयंतेत-
स्मादेतद्वर्जयेदिति।। संविशेद्गच्छेत्पुत्रार्थं।। युग्मास्वितिबहुवचनं-
समुच्चयार्थं।। अतश्चैकस्मिन्नपिऋतावप्रतिषिद्धासुयुग्मासुसर्वा-
सुरात्रिषुगच्छेत्।। एवंगच्छन्ब्रह्मचार्येवभवति।। अतोयत्रब्रह्मचार्यं
श्राद्धादिषुचोदितंतत्रगच्छतोपिनब्रह्मचर्यस्खलनदोषोस्ति।। किंचपर्व-
ण्याद्याश्चवर्जयेत्पर्वणीतिबहुवचनादाद्यर्थावगमादष्टमीचतुर्दश्यो-
र्ग्रहणमितिविज्ञानेश्वरः।। यथाहमनुः।। अमावास्यामष्टमींच-
पौर्णमासींचतुर्दशीं।। ब्रह्मचारी भवेन्नित्यमप्यृतौस्नातकोद्विजइति।।
अतोमावास्यादीनिरजोदर्शनादारभ्य चतस्रोरात्रीश्चवर्जयेदिति।। ।।
हारितस्तु।। शुद्धाभर्तुश्चतुर्थेह्निस्नानेनस्त्रीरज स्वला।।

दैवेकर्मणिपित्र्येचपंचमेहनिशुद्ध्यतीति।। ततश्चतुर्थ्यांस्त्रीगमनस्य
विहितप्रतिषिद्धत्वाद्विकल्पः।। सचव्यवस्थितः।। रजोनिवृत्तौचतुर्थ्यां-
विधिः।। तदनिवृत्तौप्रतिषेधः।। मनुः।। रजस्युपरतेसाध्वीस्नानेन
स्त्रीरजस्वलेतिसाध्वीगर्भाधानादिविहितकर्मयोग्येत्यर्थः।। ।।
अत्रसमासुपुत्रोविषमासुपुत्रीतिज्ञेयं। तथाहेमाद्रौशंखः।। युग्मासुपुत्रा
जायंतेस्त्रियोयुग्मासुरात्रिषु।। तत्राप्युत्तरोत्तराप्रशस्तेति।। ।।
तच्चैकस्यांरात्रौ सकृदेवकार्यं।। इदंचर्तौगमनमन्यकाले प्रति-
बंधादिनासंभवेश्राद्धैकादश्यादावपिकार्यं।। यत्तुदिवाजन्मदिनेचैवन-
कुर्यान्मैथुनंव्रती।। श्राद्धंदत्वाचभुक्त्वा चश्रेयोर्थीनचपर्वस्विति-
हेमाद्रौतदनृतुविषयं।। ।। स्त्रीणांबहुत्वेऋतौ यौगपद्येचगमनक्रममाह।।
।। देवलः।। यौगपद्येतुतीर्थानांविप्रादिक्रमशोव्रजेत्।। रक्षणार्थाय-
पुत्राणांग्रहणक्रमशोपिवेति।। तीर्थंऋतुः।। विप्रादिक्रमो वर्णक्रमः।।
ग्रहणक्रमोविवाहक्रमः।। ।। अगमनेदोषमाह।। ।। पराशरः।।
ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति।। घोरायांब्रह्महत्यायांयुज्यते-
नात्रसंशयइति।। ।। अस्यापवादमाह।। ।। मदनरत्नेव्यासः।। व्याधि-
तोबंधनस्थोवाप्रवासेष्वथपर्वसु।। ऋतुकालेपि नारीणांब्रह्म-
हत्याप्रमुच्यते। वृद्धांवंध्यामसद्वृत्तांमृतापत्यामपुष्पिणीं।।
कन्यासूंबहुपुत्रांच वर्जयेन्मुच्यतेभयादिति।। ।। ऋतौगमनेशुद्धिमाह।।
।। आपस्तंबः।। ऋतौतुगर्भशंकित्वात्स्नानं मैथुनिनः स्मृत।।
अनृतौतुयदागच्छेच्छौचंमूत्रपुरीषवत्।। स्त्रीणांतुनस्नानं।।
उभावप्यशुचीस्यातांदंपतीशयनंगतौ। शयनादुत्थितानारीशुचिः
स्यादशुचिः पुमानिति वृद्धशातातपवचनात्।। ।। प्रथमऋतोः
पूर्वंस्त्रीगमनेदोषमाह।। ।। आश्वलायनः।। प्राग्रजोदर्शना-
त्पत्नींनेयाद्गत्वापतत्यधः।। व्यर्थीकारेण शुक्रस्यब्रह्महत्या-
मवाप्नुयादिति।। गर्भाधानसंस्कारनिर्णयः।। ।। गर्भाधानसीमंतो-
न्नयनेतुस्त्रीसंस्कारत्वात्प्रतिगर्भंनावर्तेते।। किंतुप्रथमगर्भेएव कार्येइति-

धर्मसिंधौ।। ।। गर्भाधानाकरणेप्रायश्चित्तमाह।। ।। पारिजातेआश्व-
लायनः।। गर्भाधानस्मकरणात्तस्यांजातस्तुदुष्यति।। अकृत्वागांद्विजेद-
त्वाकुर्यात्पुंसवनंपतिरिति।। ।। आद्यर्तौगर्भाधानंमलमास-
शुक्रास्तादावपिकार्यं ।। उत्सवेषुचसर्वेषुसीमंतेतुजन्मसु।।
सुरासुरगुरोश्चैवमौढ्यदोषोनविद्यतइति भृगुवचनात्।। ।।
दिनशुद्धिस्तुज्योतिः शास्त्रोक्ताग्राह्या।। ।। अथगर्भाधानप्रयोगः।। ।।
तत्रायंक्रमः।। गर्भाख्येमातृनांदींयजतिविधुबलंप्रातः सुस्नाप-
येत्तांदोषेशांतिंप्रकुर्याद्वसनसुफलधान्यार्पणंसूर्यमीक्ष्य।। यत्तद्रात्रौस्व-
भार्यांरमयतिकुशलोबाह्यरत्यासुताप्त्यैगत्वातां नागरेणप्रतिकुसुममु-
रोलंभनंस्यात्तुयते।। ।। अथर्तुमतीस्त्रीनूतनवस्त्रादिकंपरिधाय शुभासने
प्राङ्मुखमुपविशेत्।। ततः पतिपुत्रवतींभिः कुलवृद्धसुमंगलस्त्रीभि-
र्गोधूमैर्नारिकेलादिनानाफलैस्तत्पल्लवैश्चप्रक्षेपणंयथावृद्धाचारंकारयेत्।।
।। शांत्यभावेपत्न्यासहकर्ता प्रातरभ्यंगस्नानंकृत्वातया-
सहोपविश्याचम्यप्राणा नायम्यदेशकालौसंकीर्त्य अस्याः मम भार्यायाः
प्रथमगर्भातिशयद्वाराअस्यांजनिष्यमाणसर्वगर्भाणांवीजगर्भसमुद्भवैनो-
निबर्हणार्थं गर्भाधानाख्य संस्कारकर्माहंकरिष्ये।। तत्रादौ-
निर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंतदंगत्वेन स्वस्तिपुण्याहवाचनंमातृका-
पूजनंनांदीश्राद्धंचकरिष्ये।। इतिकृत्वा।। ।। कर्त्तुः क्षपा कर्मणो-
मंत्राभिज्ञानेसतिसूर्यमवलोक्यकर्मांगब्राह्मणान्संभोज्यवि-
प्राशिषंगृहीत्वामातृगणंविसृज्यक्षपायामभिगमनादिकंकुर्यात्।। मंत्राणाम-
ज्ञानेतु।। सूर्यावलोकनोत्तरंदिवैवमंत्रजपमात्रंनाभिदेशाभिमर्शनादि-
हृदयालंभनांतंगर्भाधानाख्यंकर्मकृत्वा तदंगब्राह्मणान्संभोज्यतेभ्यश्च-
दक्षिणांदत्वातेषामाशिषोगृहीत्वामातृगणंविसर्जयेदिति।।
आदित्यंगर्भमित्यादित्यमवेक्षते।। ॐ आदित्यंगर्भम्पयसासमंङ्धि-
सहस्रस्यप्रतिमाम्विश्वरूपम्।। परिवृङ्धिहरसामाभिमंस्थाः-
शतायुषङ्कृणुहिचीयमानाः।। अनेनमंत्रेणदंपतीभ्यां सूर्या-

वलोकनंनमस्कारश्च।। ततः सायंकालीनंनित्यंसंपाद्योभौश्वेतवस्त्र-
धारणानुलेपनमाल्याभरणालंकृतौसदीपशयनागारेप्रविश्य-
तत्रसुप्रसारितशय्यामारुह्यसुमुहूर्तेप्राक्शिरःशयितांस्त्रिय-
मुत्तानांकृत्वाभर्तातस्याः नाभिदेशेहस्तंदत्वा भिमृश्यजपेत्।। ॐ
पूषाभगꣳसवितामेददातुरुद्रः कल्पयतुललामगुम्विष्णुर्योनिङ्कल्प-
यतुत्वष्टारूपाणिपिꣳशतु। आसिंचतुप्रजापतिर्धातागर्भन्दधातुते।।
गर्भंधेहिसिनीवालिगर्भंधेहिपृथुष्टुके।। गर्भंतेऽअश्विनौदेवावा-
धत्तांपुष्करस्त्रजौ।। तेजोवैश्वानरोदद्यादथब्रह्मानुमन्त्र्यते।। ब्रह्मागर्भं-
दधातुते।। अथाभिगमनं।। ॐ गायत्रेणंत्वाछन्दसामन्था-
मित्रैष्टुभेनत्वाछन्दंसामन्थामि जागतेनत्वाछन्दंसामन्थामि।।।
रेतोमूत्रँविजंहातियोनिंम्प्रविशदिंन्द्रियम्।। गर्भोजरायुणावृंत-
उल्बंन्जहातिजन्मंना।। ऋतेनंसत्यमिंन्द्रियँविपानंशुक्रमन्धं-
सऽइन्द्रंस्येन्द्रियमिदम्पयोमृतम्मधुं।। अभिगमनोत्तरंतस्याः दक्षिणस्कं-
धोपरिहस्तंनीत्वातेनहृदयमालभते।। ॐ यत्तेसुशीमेहृदय-
न्दिविचन्द्रमसिश्रितम्।। वेदाहन्तन्मान्तद्विद्यात्पश्येमशरदः शतं
जीवेमशरदःशतꣳ शृणुयामशरदः शतम्।। कृतस्यकर्मणः
सांगतासिद्ध्यर्थंस्मृत्युक्तान्दश संख्याकान्ब्राह्मणान्भोजयिष्ये।।
तेनश्रीकर्मांगदेवताः प्रीयंतां।। ब्राह्मणेभ्योदक्षिणादत्वातैराशिषो-
गृहीत्वा।। यांतुमातृगणाः सर्वेइतिमातृणांविसर्जनंकार्यम्।। ।।
इतिसंस्कार-भास्करेगर्भाधानसंस्कारप्रयोगः।। ।। अथगर्भधार-
णार्थमौषधमाह।। ।। पारस्करः।। सायदिगर्भंनदधीतसिꣳह्याः
श्वेतपुष्प्याउपोष्यपुष्येणमूलमुत्थाप्यचतुर्थेहनिस्नातायांनिशायामुदपेषंपिष्ट्वा
दक्षिणस्यानासिकायामासिंचति।। ।। साव्यूढास्त्रीगर्भकामायदिगर्भंन-
दधीतनधारयतितदापतिरौषधंकुर्यात्।। पुष्यनक्षत्रदिनात्पूर्व-
दिनेस्वयमुपवासंकृत्वा पुष्यनक्षत्रदिनेश्वेतपुष्प्याः सिंह्याः[12] मूलमुत्पा-
ट्यतद्यत्नेनस्थापयित्वाऋतुयुक्ता भार्यायदाभवति तदाचतुर्थेह-

निस्नातायांरात्रौतन्मूलमुदकेनपेषयित्वा दक्षिणनासापुटेआसिंचतिभर्ता।।
।। तत्रमंत्रः।। ॐ इयमौषधीत्रायमाणा सहमानासरस्वती।।
अस्याऽअहंबृहत्याः पुत्रः पितुरिवनामजग्रभम्।। इत्यनेनमंत्रेण।।
।। अत्रौषधसेकानंतरंभर्त्राभोजनंकार्यमितिगर्गपद्धतावुक्तत्वात्त-
स्मिन्नहन्यपिभर्तुरुपोषणमवगम्यते।। ।। इतिसंस्कारभास्करेगर्भ-
धारणार्थमौषधं।। ।। अथपुंसवनसंस्कारः।। तत्रतावत्कालमाह।।
।। पारस्करः।। अथपुᳲसवनंपुरास्पंदतइतिमासेद्वितीयेतृतीयेवा।।
।। पुंसवनमितिगर्भसंस्कारकर्मणोनामधेयं।। तच्चपुरागर्भस्पंदनात्-
भवतीतिहेतोः शुद्धेद्वितीयेतृतीयेवामासेगर्भाधानाद्भवति।।
प्रथममेमासेवापूर्णेभवति।। द्वितीयेवातृतीयेवेतिभर्तृयज्ञः।। तथाहे-
माद्रौयमः।। प्रथमेमासिद्वितीयेवातृतीये वायदापुन्नक्षत्रेणचंद्रमायुक्तः
स्यादिति।। गर्भसंस्कारत्वात्प्रतिगर्भमावर्तनीयमेतत्।।
तथाचकारिकायां।। गभसंस्कारएवायमितिकर्कस्य संमतिः।।
अतस्तद्गर्भसंस्कारादगर्भं प्रयुज्यतइति।। बह्वृचकारिकायामप्येवं।।
कालातिक्रमेस्पंदितेपिकार्यमेव।। तदुक्तंकारिकायां।। एतदेव-
पुरागर्भचलनादकृतंयदि सीमंतात्प्राग्विधातव्यंस्पंदितेपिबृहस्पतिरिति।।
अत्रनियतकालत्वाद्गुरुशुक्रास्तबालवार्द्धक्यमलमासादिष्वपिन-
दोषोदोषरहितकालालाभे।। तद्रहितविहितकाललाभेतुगुरु-
शुक्रास्तादौनकार्यं।। कालातिक्रमेतुसीमंतदिनेकार्यमितिगदाधरभाष्ये।।
।। तथाचजातूकर्ण्यः।। द्वितीयेवातृतीये वामासिपुंसवनंभवेत्।।
व्यक्तेगर्भेथवाकार्यंसीमंतेनसहाथवेति।। व्यक्तेअन्येनानुक्ते-
पिज्ञातुंशक्ये।। ।। यदहः पुᳲसानक्षत्रेणचंद्रमायुज्येतदहरुपवा
स्याल्पाव्याहतेवाससीपरिधाप्यन्यग्रोधावरोहांश्छुंगांश्चनिशायामु-
दपेषांपिष्ट्वा पूर्ववदासेचनहिरण्यगर्भोद्भ्यः संभृतइत्येताभ्यां।। ।।
तच्चगर्भाधानप्रभृति मासेद्वितीयेतृतीयेवा यस्मिनन्नहनिपुन्नामन-
क्षत्रेणपुष्यादिनानक्षत्रेणचंद्रोयुक्तो भवतितस्मिन्दिनेगर्भिणीमुप-

वास्यस्नापयित्वाअहतेवाससीपरिधाप्यचरात्रौन्यग्रोधोवटस्तस्याव-रोहान्अवः अधः रोहंति तथातान्।। शुंगान् तदूर्ध्वांकुरानुद-केनपिष्ट्वाहिरण्यगर्भोद्भ्यः सम्भृतइत्येताभ्यामृग्भ्यांदक्षिणस्यांना सिकायामासिंचतिभर्ता।। ।। अथवा।। कुशकंटकथ्ठंसोमाथ्ठं-शुंचैकै।। ।। कुशकंटकंकुशमूलसोमांशुंसोमलताखंडंचपिष्यमाणे-षुन्यग्रोधावरोहशुंगेषुप्रक्षिपंत्येकेआचार्याः।। अस्मिन्पक्षेद्रव्य-चतुष्टयस्यपेषणं।। ।। काम्यमाह।। कूर्मपित्तंचोपस्थे कृत्वासयदि-कामयेतवीर्यवान्स्यादितिविकृत्यैनमभिमंत्रयतेसुपर्णोसीतिप्राग्विष्णु-क्रमेभ्यः।। ।। सभर्तायदिकामयेतायंगर्भोवीर्यवान्भवतु।। तदाअस्यास्त्रियाअंकेउदकपूर्णशरावंनिधायगर्भिण्याउदरं-विकृत्याअनामिकाग्रेणस्पृशन्नभिमंत्रयते।। विकृतेरप्रसिद्ध-त्वादाहसुपर्णोसिगरुत्मानित्यारभ्यविष्णुक्रममंत्रेभ्यः प्राक्विकृतिरिति।। अथप्रयोगः।। ।। तत्रायंक्रमः।। पुंसाख्येमातृनांदीन्यजतिपुरुषभेस्पंदनात्प्राग्द्विमासेत्रिमासे वाप्युपोष्यानिशिसुवटभवानंकुरान्पेष्यवार्भिः।। सोमांशुंकौश-कंटान्क्षिपतिचवसनेगालितंदक्षिनासारंध्रेक्षिप्त्वासमंत्रंसजल-मभिमृषेदंकमध्येशरावं।। आचम्यप्राणानायम्य देशकाल-कीर्तनांतेअस्यांममभार्यायामुत्पत्स्यमानस्यगर्भस्यबैजिक-गार्भिकदोषपरिहारार्थंपुंरूपताज्ञानोदयप्रतिरोधपरिहारद्वाराश्रीपरमेश्वर-प्रीत्यर्थंपुसवनंकरिष्ये।। तत्रनिर्विघ्नार्थंगणपति पूजनंतदंगत्वेन-स्वस्तिपुण्याहवाचनंमातृकापूजनंवसोर्धाराआयुष्यमंत्रजपंनांदी-श्राद्धंचकरिष्ये।। इतिकृत्वाअत्रपुण्याहवाचनांतेप्रजापतिः प्रीयता-मितिवदेत्।। ततस्तस्मिन्नहनिगर्भिणींस्नापयित्वाहतेवाससीपरिधाप्य।। रात्रौ न्यग्रोधावरोहांकुरांश्चोदकेनपिष्ट्वावस्त्रगालितंतदुदकंगर्भिणी-दक्षिणनासिकायामासिंचतिभर्ता।। तत्रमंत्रौ।। ॐ हिरण्यगर्भः० ।। अद्भ्यःसम्भृतः पृथिव्यैरसाच्चविश्वकर्म्मणःसमवर्त्तताग्रे।।

तस्य त्वष्टा व्विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ।। कूर्मपित्तं चोपस्थे कृत्वा गर्भमभिमंत्रयते । तत्रमंत्रः ।। ॐ सुपर्णोसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथंतरे पक्षौ ।। स्तोम ऽआत्मा च्छन्दाᳪंस्यङ्गानि यजूᳪंषि नाम ।। सामं ते तनूर्व्वामदेव्यं यज्ञायज्ञियम्पुच्छन्धिष्ण्याः शफाः ।। सुपर्णोसि गरुत्मान्दिवंगच्छ स्वः पत ।। इत्यनेनमंत्रेण ।। कृतस्यकर्मणः सांगतासिद्ध्यर्थंस्मृत्युक्तान्दशसंख्याकान्ब्राह्मणान्भोजयिष्ये ।। ब्राह्मणेभ्योदक्षिणांदत्वातेषामाशिषोगृहीत्वा ।। यांतुमातृगणाः सर्वेइतिमातृगणंविसर्जयेत् ।। इतिसंस्कारभास्करेपुंसवनसंस्कार-प्रयोगः ।। अथ सीमंतसंस्कारः ।। तत्रपारस्करः ।। अथसीमंतोन्नयनं-पुᳪंसवनवत् ।। सीमंतोन्नयनमिति वक्ष्यमाणकर्मणोनामधेयं ।। तच्चपुंसवनत् ।। अनेनयदहः पुᳪंसानक्षत्रेणचंद्रमसोयोगस्त-दहरुपवास्याल्पाव्याहतेवाससीपरिधाप्ययेतिलभ्यतेनतुसर्व-मितिकर्कः ।। एतच्चगर्भसद्भावे क्रियमाणत्वात्तदभावे चाभावाद्-गर्भसंस्कारोयमितिकर्कोपाध्यायाः ।। अतश्चतेषांमतेप्रतिगर्भंक्रिया ।। तथाचहेमाद्रौकारिकायांचविष्णुवचनं ।। सीमंतोन्नयनंकर्मनस्त्री-संस्कारइष्यते ।। केचित्तुगर्भसंस्काराद्गर्भंगर्भंप्रयुज्यतइति ।। ।। स्त्रीसंस्कारएवायमित्यन्ये ।। तथाचदेवलः ।। यासकृत्संस्कृता-नारीसर्वगर्भेषुसंस्कृता ।। सीमंतोन्नयनंकर्मस्त्रीसंस्कारकइष्यत इति ।। पारस्करोपि ।। प्रथममेगर्भेइति ।। एतत्सीमंतोन्नयनंप्रथमगर्भे-आद्यगर्भेभवतीतिः ।। तथाचापस्तंबः ।। सीमंतोन्नयनं प्रथमेगर्भे-चतुर्थेमासीति ।। ।। हारितोपि ।। सकृत्संस्कृतसंस्काराः सीमंतेनद्वि जस्त्रियः ।। यंयंगर्भंप्रसूयंतेससर्वः संस्कृतोभवेदिति ।। कर्को-पाध्यायैस्तु प्रथमगर्भेमासेषष्ठेष्टमेवेतिसूत्रंयोजयित्वाद्वितीयादिष्व-नियमइत्युक्तं ।। ननुप्रथमगर्भएवसीमंतोन्नयनेक्रियमाणेद्वितीयादि-गर्भाणांतत्संस्कारलोपः स्यादितिचेन्न ।। यंयंगर्भं प्रसूयंतेससर्वः

संस्कृतोभवेदितिहारीतवचनादाद्यगर्भे संस्कारेकृतेसर्वगर्भाणांसंस्कार-
इतिनसंस्कारलोपः।। सीमंतकालमाह।। ।। पारस्करः।। मासेषष्ठेष्ट-
मेवा।। ।। सीमंतोन्नयनंगर्भाधानात् षष्ठेष्टमेवामासि भवति।। ।।
उक्तकालालाभेकालान्तरमाह।। अत्रिः।। आधानादष्टमेमासि
सीमंतोन्नयनंभवेत्।। नवमेमासिवाकुर्याद्यावद्गर्भविमोचनमिति।। ।।
अकृतसीमंतायाः प्रसवेतुसत्यव्रतः।। स्त्रीयद्यकृतसीमंताप्रसूयेत-
कदाचन।। गृहीतपुत्राविधिवत्पुनः संस्कारमर्हतीति।। ।।
अत्रभोजनेप्रायश्चित्तमुक्तं।। ।। पाराशरमाधवीयेधौम्येन।।
ब्रह्मौदनेचसोमेचसीमंतोन्नयनेतथा।। जातकर्मनवश्राद्धे भुक्त्वा
चांद्रायणंचरेदिति।। इदंचकर्मांगब्राह्मणभोजन विषयं।।
नस्विष्टकुटुंबादिभोजनविषयमितिमुरारिमिश्राः।। तच्चगर्भमासापे-
क्षयाषष्ठेष्टमेवामासिअसंभवेतावत्प्रसवं शुक्लपक्षेपुनर्वस्वादिपुन्न-
क्षत्रेचंद्रानुकूल्ये ज्योतिः शास्त्रोक्तोशुभदिनेसुलग्नेकार्यं।। अत्रा-
प्यधिकमासगुरुशुक्रास्तादीनांनदोषः।। कालांतरासंभवेपूर्ववन्नियत-
कालत्वात्।। अथ सीमंतोन्नयन प्रयोगः।। ।। तत्रायंक्रमः।।
सीमंताख्यंरवीज्येभवतिचयुवतेर्वाष्टमेमासिषष्ठेशालाकर्मादिनांदीं-
श्रपयतिसतिलंमुद्गमिश्रंचरुंप्राक्।। प्राजापत्यैक हुत्वोदितमनुहवनं-
सर्वपंचादशस्यात्पश्चात्पीठोपविश्यविनयतिपुलिकास्थाप्यतांप्रेष्यगानं।।
तत्रपत्न्यासहबहिः शालायांशुभासनेउपविश्याचम्यप्राणाना-
यम्यदेशकालकीर्तनांतेतनुरुधिर प्रियालक्ष्मीभूतराक्षसीगणदूरनिरसन-
क्षमसकलसौभाग्यनिदानभूतमहालक्ष्मीसमावेशनद्वाराप्रतिगर्भबीज-
गर्भसमुद्भवैनोनिबर्हणजनकातिशयद्वाराचश्रीपरमेश्वरप्रीत्यर्थं
स्त्रीसंस्काररूपंसीमंतोन्नयनाख्यंकर्मकरिष्यइतिसंकल्पः।। तत्र-
निर्विघ्नार्थंगणपतिपूजनं तदंगत्वेन स्वस्तिपुण्याहवाचनंअविघ्न-
पूजनंमंडपस्थापनंमातृकापूजनंवसोर्धाराआयुष्यमंत्रजपंनांदीश्राद्धंच-
करिष्यइतिकृत्वा।। अत्रपुण्याहवाचनांतेधाताप्रीयतामितिवदेत्।।

तत्रबहिः शालायांस्थंडिलेपंचभूसंस्कारपूर्वकंमंगलनामाग्नेः स्थापनं।। ततोदक्षिणतोब्रह्मासनादिआज्यासादनानंतरंतंडुलतिलमुद्गानांपृथक्पृथगासादनं।। ततउपकल्पनीयानि।। मृदुपीठं।। युग्मान्यौदुंबरफलान्यपक्कान्येकस्तबकनिबद्धानि।। त्रयोदशपरिमाणकास्त्रयोदर्भपिंजुलाः।। त्र्येणिशलली।। वीरतरशंकुः[13]।। [14]पूर्णपात्रं।। वीणागाथिनौचेति[15]।। आज्यनिर्वपणानंतरं।। चरुपात्रेमुद्गप्रक्षेपंकृत्वाधिश्रयणं।। ईषच्छृतेषुतिलतंडुलप्रक्षेपः।। पर्यग्निकरणांतेआघारावाज्यभागौस्त्रुवेणजुहुयात्।। मनसा ॐ प्रजापतयेस्वाहा।। इदं प्रजापतये०।। ॐ इंद्रायस्वाहा।। इदमिंद्राय०।। ॐ अग्नयेस्वाहा।। इदमग्नये०।। ॐ सोमायस्वाहा।। इदंसोमाय०।। ततश्चरुमभिघार्यस्त्रुवेणचरुंजुहुयात्।। ॐ प्रजापतयेस्वाहा।। इदंप्रजापतये०।। ततः स्थालीपाकेनस्विष्टकृत्।। ॐ अग्नयेस्विष्टकृते स्वाहा।। इदमग्नयेस्विष्टकृते०।। ततोभूराद्यानवाहुतयः।। ॐ भूःस्वाहा इदम०।। ॐ भुवः स्वा० इदंवायवे०।। ॐ स्वः स्वा० इदंसू०।। ॐ त्वन्नोऽअग्ने०इदम० वरु०।। ॐ सत्वन्नोऽअग्ने० इदं० वरु०।। ॐ अयाश्चाग्ने० इदम० अयसे०।। ॐ येतेशतं० इदंव० सवि०।। ॐ उदुत्तमं० इदंव० दित्यायादि०।। मनसा ॐ प्रजापत० इदंप्र०।। ततः संश्रवप्राशनादिप्रणीताविमोकांतंहोमशेषंसमाप्य।। ततोग्नेः पश्चात् भद्रपीठनिधानं।। तदुपरिगर्भवतीमुपवेशयेत्।। ततोयुग्मेनसटालुग्रप्सेनौ दुंबरेणत्रिभिश्चदर्भपिंजुलैस्त्र्येण्याशलल्यावीरतरशंकुनापूर्णचात्रेणचेत्येतैः सर्वैः पुंजीकृतैः सीमंतंमूर्ध्निविन[16]यतिभर्ता।। ततोविनयनं।। ॐ भूर्विनयामि।। ॐ भुवर्विनयामि।। ॐ स्वर्विनयामि।। तत औदुंबरस्यादिपंचकस्यवेण्यां बंधनं।। ॐ अयमूर्जावतोवृक्षऽऊर्ज्जीवफलिनीभव।। इत्यनेनमंत्रेण।। ततोभर्तावीणागाथिनौराजानꣳसंगायेतामिति प्रैषमाह।। ततश्चतौसोत्साहौगायेतां।। ॐ

सोमऽएवनोराजेमामानुषीः प्रजाः।। अविमुक्तचक्रऽआसीरंस्तीरेतुभ्य-
मसाविति।। असौस्थानेसमीपावस्थितायाः नद्यानामग्रहणंस्त्र्येव-
करोति।। गंगायमुनेत्येवमादिप्रथमांतं।। कृतस्यकर्मणः सांगता-
सिद्ध्यर्थंस्मृतयुक्तान्दशसंख्याकान्ब्राह्मणान्भोजयिष्ये।। तेन-
श्रीकर्मांगदेवताः प्रीयंतां।। ब्राह्मणान्गंधादिभिः संपूज्यतेभ्यश्चदक्षिणां
दत्वातेषामाशिषोगृहीत्वाअग्निंविसृज्यमातृर्णांविसर्जनं।। यांतुमातृगणाः
सर्वेपूजामादायपार्थिवीं।। इष्टकामप्रसिद्ध्यर्थंपुनरागमनायचेति।। ।।
इतिसंस्कारभास्करेसीमंतोन्नयनसंस्कारप्रयोगः।। ।। अथगर्भिणी-
धर्माः।। कारिकायां।। अंगारभस्मास्थिकपालचूल्लीशूर्पादिकेषू-
पविशेन्ननारी।। सोलूखलाद्यैर्दृषदादिकेवायंत्रेतुषाद्येनतथोपविष्टा।।
नोमार्जनीगोमयपिंडकादौ मूत्रंपुरीषंशयनंचकुर्यात्।। नोमुक्तकेशी-
विवशाथवास्याद्धुंक्तेनसंध्यावसरेनशेते।। नामंगलंवाक्यमुदीरये-
त्साशून्यालयंवृक्षजलंनयायादिति।। गर्भिण्यधिकारेपाद्मे।।
नायस्करेषूपविशेन्मुसलोलूखलादिषु।। जलंचनावगाहेतशून्या-
गारंचवर्जयेत्।। वल्मीकंनाधितिष्ठेतनचोद्विग्नमनाभवेत्।।
विलिखेन्ननखैर्भूमिंनांगारेणनभस्मना।। नशयालुः सदातिष्ठेत्-
खट्वाछायांविवर्जयेत्।। नतुषांगारभस्मास्थिकपालेषुसमाविशेत्।।
वर्जयेत्कलहंगेहे गात्रभंगंतथैवच। नमुक्तकेशातिष्ठेतनाऽशुचिः
स्यात्कदाचन।। नशयीतोत्तरशिरानचैवाऽधः शिराः क्वचित्।।
नवस्त्रहीनानोद्विग्नानचार्द्रचरणातथा।। नामंगल्यंवदेद्वाक्यंनचहास्या-
धिकाभवेत्।। कुर्याच्छ्वशुरयोर्नित्यंपूजांमांगल्यतत्परा।।
तिष्ठेत्प्रसन्नवदनाभर्तुः प्रियहितेरतेति।। मात्स्ये।। संध्यायांनैवभोक्त
व्यंगर्भिव्यावरवर्णिनि।। नस्थातव्यंनगंतव्यंवृक्षमूलेचसर्वदा।। सर्वौष-
धिभिः कोष्णेनवारिणास्नानमाचरेत्।। कृतरक्षासुभूषाच-
वास्तुपूजनतत्परा।। दानशीलातृतीयायांपार्वत्यांनक्तमाचरेत्।।
गर्भिणीकुंजराश्वादिउशैलहर्म्यादिरोहणम्।। व्यायामंशीघ्र-

गमनंशकटारोहणंत्यजेत्।। शोकंरक्तविमोकंचसाध्व-
संकुक्कुटासनं।। व्यवसायंदिवास्वापंरात्रौजागरणंत्यजेत्।।
अतिक्षारंतुनाश्नीयादत्याम्लमतिभोजनम्।। अत्युष्णमतिशीतं-
चगुर्वाहारंपरित्यजेत्।। इतिवृत्ताभवेन्नारीविशेषेणतुगर्भिणी।।
यश्चतस्यांभवेत्पुत्रः स्थिरायुर्वृद्धिसंयुतः।। अन्यथागर्भपतनम-
वाप्नोतिनसंशय इति।। ।। गर्भकृत्यं।। मार्कंडेय पुराणे।।
तस्यरक्षांसदाकुर्यान्नित्यंशौचनिषेवणात्।। प्रशस्त मंत्र-
लिखनाच्छस्तमाल्यानुलेपनात्।। विशुद्धगेहवसनादनाया-
साच्चवैद्विजेति।। तत्रैवगर्भिंणींप्रकृत्य।। अतोनवृक्षंनैवाद्रिं-
प्राकारंनपयोनिधिं।। परिखांवासमाक्रामेदबलागर्भधारिणीति।।
इतिगर्भिणीधर्माः।। ।। अथगर्भिणीपतिधर्माः।। ।। संग्रहे।।
गर्भिणीवांछितंद्रव्यंतस्यैदद्याद्यथोचितम्।। सूतेचिरायुषं-
पुत्रमन्यथादोषमर्हतीति।। कालविधाने।। क्षौरंशवानुगमनं-
नखकृंतनंचयुद्धंच वास्तुकरणंत्वतिदूरयानम्।। उद्वाहमंबुधि-
जलस्पृशतोपयोगमायुः क्षयोभवतिगर्भिणिकापतीनामिति।। क्षौरंवपनं।।
तच्चात्रकर्तनस्याप्युपलक्षणं। नोदन्वतोंभसिस्नायान्नचश्म-
श्रवादिकर्तयेत्।। अंतर्वत्नयाः पतिः कुर्वन्नप्रजाभवतिध्रुवमिति-
क्रतुस्मरणात्।। यत्तुवपनस्यनिषेधेपिकर्तनंचविधीयतइतिस्मृत्यंतरवचनं
तद्गर्भिणीपतिव्यतिरिक्तानांजीवत्पितृकादीनांयोवपननिषेधस्तत्र-
कर्तनविधानपरं।। संग्रहे।। दहनंवपनंचैवचौलंवैगिरिरोहणं।।
नावआरोहणंचैववर्जयेद्गर्भिणीपतिरिति। स्मृत्यंतरे।। सिंधु-
स्नानंद्रुमच्छेदंवपनंप्रेतवाहनं।। विदेशगमनंचैवनकुर्याद्गर्भिणी-
पतिरिति।। एतदपवादस्तत्रैव।। क्षौरंनैमित्तिकंकुर्यान्निषेधेसत्यपि-
ध्रुवं।। पित्रोः प्रेतविधानंच गर्भिणीपतिराचरेत्।। एतेचनियमाः
सप्तमासादूर्ध्वंभवंतिच।। वपनंमैथुनं तीर्थंवर्जयेद्गर्भिणीपतिः।।
श्राद्धंचसप्तमादूर्ध्वमित्याश्वलायनोक्तेः।। श्राद्धंश्राद्धभोजनम्।।

तीर्थंतीर्थयात्रां।। ।। इतिगर्भिणीपतिधर्माः।। ।। अथसूतिकागृहस्थान-
माह।। ।। वसिष्ठः।। ऐंद्रेतुविक्रमस्थानमाग्नेय्यांपचनालयः।।
वारुण्यांभोजनगृहंनैर्ऋत्यांसूतिकागृहमिति।। सूतिकागृहनिर्माण-
प्रकारः।। ।। पाद्मे।। सुभूमौनिर्मितंरम्यंवास्तुविद्याविशारदैः।।
प्राक्द्वारमुत्तरद्वारमथवासुदृढंशुभमिति।। सूतिकागृहप्रवेशकालमाह।।
गर्गः।। रोहिण्यैंदवपौष्णेषुस्वातीवारुणयोरपि।। पुनर्वसौपुष्यहस्त-
धनिष्ठा- त्र्युत्तरासुच।। मैत्रेत्वाष्ट्रेतथाश्विन्यां सूतिकागारवेशनम्।।
ग्रहेनुकूलेराशौतुरिक्ताषष्ठ्यष्टवर्जिते।। सर्वेवाऽथशुभाःकेंद्रेपापाश्च
त्रिषडायगाः।। शुभांशेशुभदृष्टौतुसूतिकावेशनंशुभमिति।। सूतिकागृह-
प्रवेशविधिः।। पाद्मे।। प्रविशेत्सूतिका संज्ञंकृतरक्षंसमंततः।।
देवानाब्राह्मणानांचगवाकृत्वाचपूजनम्।। विप्रपुण्याहशब्दे-
नशंखवाद्यरवेणच।। प्रसूताबहवस्तत्रतथाक्लेशक्षमादयः।।
हृद्याविश्वसनीयाश्चप्रविशेयुस्त्रियश्चतत्।। एरंडमूलचूर्णेनसघृतेन-
तथैवताम्।। सुखप्रसवनार्थाय पश्चात्कार्येतुतत्क्षिपेदिति।। ।।
प्रसवप्रतिबंधेसुखप्रसवोपायः।। ।। ऋग्विधाने।। प्रमंदिने-
ऋचंत्वेतांजपेद्गर्भप्रमोचनीम्।। इंद्रंचमनसाध्यायेन्नारीगर्भंप्रमुंच-
तीति।। तथा विजिहीष्ववनस्पतेतदिदंव्याख्यानेस्मृतम्।
प्रच्यावयतुकामः स्याच्च्यावयेत्तमिदंजतपन्। स्त्रियंगर्भप्रमूढांवा-
पाययेदनुमंत्रितम्।। उदकच्यावनेनैवगर्भोधश्च्यवतेसुखमिति।। ।।
शीघ्रप्रसवोपायः।। ।। धर्मसिंधौ।। हिमवत्युत्तरेपार्श्वे-
सुरथानामयक्षिणी।। तस्याः स्मरणमात्रेणविशल्यागर्भिणीभवेत्।।
ॐ क्षीं ॐस्वाहेतिमंत्रेणदूर्वांकुरेणतिलतैलंशतं सहस्रं-
वाऽभिमंत्र्यकिंचित्पाययेत्। किंचिन्मात्रस्यगर्भेलेपश्च।।
सम्यग्लेपेशीघ्रंसुखप्रसवइति।। प्रसववेदनाहरोपायमाह।। पारस्करः।।
सोष्यंतीमद्भिरभ्युक्षत्येजतुदशमास्यइति। गर्भंविमुंचंतीप्रसव-
कालेशूलादिप्रसववेदनान्वितांस्त्रियंभर्ताएजतुदशमास्य इति

मंत्रेणाम्नज्जरायुणासहेत्यंतेनोदकेनप्रसिंचति।। ॐ एजंतुदशमास्यो-गर्भोजरायुणा सह।। यथायम्व्वायुरेयंतियथासमुद्रऽएषंति।। एवायन्दशमास्योऽअस्त्रंज्जरायुणासह।। इत्यभ्युक्षणानंतरमवरावपतन-संज्ञकंमंत्रंजपतिभर्ता।। ॐ अवैतुपृश्निशेवलंशुनेजराय्वत्तवेनैव-माँसेनपीवरीनकस्मिँश्चनायतनमवजरायुपद्यतामिति।। ।। अथजातकर्म।। ।। तत्रकर्तव्यमाह।। ।। वसिष्ठः।। जातमात्रकुमार-स्यमुखमस्यावलोकयेत्।। पिताऋणाद्विमुच्येतपुत्रस्यमुखदर्शनादिति।। ज्योतिर्वसिष्ठः।। श्रुत्वाजातंपितापुत्रंसचैलंस्नानमाचरेत्।। उत्तराभिमुखो भूत्वानद्यांवादेवखातकइति।। ।। अत्रासन्निधौश्रवणानंतरंस्नानं।। सन्निधौमूलाद्यजातस्यमुखदर्शनानंतरंस्नानं।। पूर्ववाक्येमात्रपदेनजन्मानंतरं मुखावलोकनेव्यवधाननिषेधात्।। मूलादिजातस्यतुमुखमदृष्ट्वैवस्नानमिति बोध्यं।। नतन्मुखंविलोकयेदितिभल्लाटवाक्येनतज्जातस्यमुखदर्शन-निषेधात्।। मुखावलोकनंजातकर्मादिशांतिविनानकुर्यात्।। एवंसंक्रांतिविष्ट्यादिप्रसवेष्वपि।। शांतयस्तु शांतिमयूखादि-ग्रंथेभ्योऽवगंतव्याइति।। एतच्चरात्रावपिकार्यं।। नैमित्तिकंतुकुर्वीत-स्नानंदानंचरात्रिषु।। पुत्रजन्मनियात्रायांशर्वर्यांदत्तमक्षयमिति व्यासोक्तेः।। ।। रात्रौनद्यादिगमनाशक्तंप्रत्याह।। सांख्यायनः।। दिवायदाहृतंतोयंकृत्वास्वर्गयुतंतुतत्।। रात्रिस्नानेतुसंप्राप्तेकुर्यादनल-सन्निधाविति।। ।। हेमाद्रौजाबालिः।। जन्मनोनंतरंकार्यंजातकर्म-यथाविधि।। दैवादतीतकालं चेदतीतेसूत्रकेभवेदिति।। एतच्चाशौच-मध्येपिकार्यमित्याह।। प्रजापतिः।। आशौचेतुसमुत्पन्नेपुत्रजन्म-यदाभवेत्।। कर्तुस्तात्कालिकीशुद्धिः पूर्वाशौचेनशुद्ध्यतीति।। मदनपारिजातेप्येवं।। केचित्तुमृताशौचस्यमध्येतुपुत्रजन्मयदा भवेत्।। आशौचापगमेकार्यंजातकर्मयथाविधीतिस्मृतिसंग्रहोक्तेराशौचांते कार्यमित्याहुः।। स्मृत्यर्थसारेपिविकल्पउक्तः।। पुत्रजन्मनिमित्त-शुद्धेरवधिमाह।। जैमिनिः।। यावन्नछिद्यतेनालंतावन्नाप्नोतिसूतकम्।।

छिन्नेनालेततः पश्चात्सूतकंतुविधियतइति।। विष्णुधर्मोत्तरे।। अच्छिन्ननाभ्यांकर्तव्यं श्राद्धंवैपुत्रजन्मनीति।। श्राद्धंचात्राभ्युदयिकमेवनस्वतंत्रं।। तच्चश्राद्धमानेन।। स्त्रीशूद्राश्वपचश्चैवजातकर्मणिवाप्यथ।। आमश्राद्धंसदाकुर्याद्विधिनापार्वणेनत्वितिप्रचेतोक्तेः।। आमाभावेहेम्नाकार्यं।। द्रव्याभावेद्विजाभावेप्रवासेपुत्रजन्मनि।। हेमश्राद्धंप्रकुर्वीतयस्यभार्यारजस्वलेतिव्यासोक्तेः।। द्रव्याभावेआमद्रव्याभावे।। ।। प्रतिग्रहश्चनाभिवर्द्धनात्पूर्वंतदहर्वा।। यथाहशंखः।। कुमारप्रसवेनाभ्यामच्छिन्नायांगुडतिलहिरण्यवस्त्रागोधान्यप्रतिग्रहेष्वदोषः।। तदहस्त्वेकेकुर्वतइति।। वृद्धयाज्ञवल्क्योपि।। कुमारजन्मदिवसेविप्रैः कार्यः प्रतिग्रहः।। हिरण्यभूगवाश्वादिधान्यशय्यासनादिकं।। तत्रसर्वंप्रतिग्राह्यं पक्वान्नंतुविवर्जयेत्।। भक्षयित्वातुतन्मोहाद्विजश्चांद्रायणंचरेदिति।। सकुल्यानांतुनदोषः।। तदाहमनुः।। सूतकेतुसकुल्यानामदोषोमनुरब्रवीदिति।। ब्राह्मे।। देवाश्चपितरश्चैवपुत्रेजातेद्विजन्मनां।। आयांतितस्मात्तदहः पुण्यंपूज्यंचसर्वदेति।। ।। अत्रदेयमुक्तं।। तत्रैव।। तत्रदद्यात्सुवर्णंचभूमिं गांतुरगंरथं।। छत्रंचगंधमाल्यंचशयनंचासनं गृहमिति।। ।। पितुःपातित्यादौविशेषमाह।। आश्वलायनः।। पत्यौमृतेवापतिते संन्यस्तेवाविदेशगे।। तद्गोत्रजेन श्रेष्ठेनकार्याः पुंसवनादयः।। दीक्षांतेदीक्षितोभर्त्ताजातकृत्यादिकंचरेत्।। अकृतेन्यकृतेकर्माण्यापत्सुस्वास्थ्यमागते।। दानैर्ब्राह्मणवाक्यैश्चपुत्रकर्मोत्तरं चरेदति।। श्रेष्ठेनेतितादृशएव प्रतिनिधिरित्येवमर्थं। दीक्षितेनतुदीक्षाकालेस्वयमपिजातकर्मनकार्यं।। नापितत्प्रतिनिधिनान्येन्।। किंतुतदंतेस्वयमेवकुर्यादित्यर्थः।। अकृतइतिनिषिद्धप्रतिनिधिनाकृतं।। अन्यकृतंकर्माक्रांतंकेनापिकृतं।। किंचित्कालं स्वयंकर्तुमसमर्थोपिनान्येनकारयेत्।। स्वास्थ्योत्तरंदानसहितब्राह्मणाशीर्वचनैः सोत्कर्षंपुत्रसंस्कारंकुर्यादित्यर्थः।। महारोगार्तस्तुसत्यपिसामर्थ्ये-

स्वयंजातकर्मनकुर्यात्।। रोगार्दितस्तुतत्कालंस्पृशन्नन्येनकारयेत्।।
यावत्स्वास्थ्यंभवेत्तावन्नाचरेज्जातकक्रियामित्याश्वलायनोक्तेः।। ।।
उक्तकालातिक्रमेकालमाह।। ।। जैमिनिः।। देशकालोपघाताद्यैः
कालातिक्रमणंयदि।। अनस्तकेज्येंदुसिते तत्कार्यंचोत्तरायणेइति।।
।। उक्तकालेतुनायंनियमः।। निमित्तानंतरभावित्वान्नैमत्तिकस्येति।।
अथजातकर्मप्रयोगः।। ।। तत्रायंक्रमः।। जातेपुत्रेसचैलंभवतिजनयतो-
मातृनांदीयमेधायुष्येत्वेनंजपः स्याज्जननभुवममुंमंत्रयेन्मातरंच।।
दक्षंप्रक्षाल्यवामंस्तनमुदकयुतंपात्रमुच्छिद्यनालंसूत्यग्निस्थाप्यहु-
त्वाद्वितयमनुदिनंर्विंशतिद्वेदशाहं।। तत्रजातमात्रेपिता तस्यमुखंनिरीक्ष्य-
नद्यादावुदङ्मुखंस्नायात्।। तदसंभवेदिवाहृताभिः शीताभिरद्भिः
सुवर्णयुताभिरात्रावनलसन्निधौगृहेएवस्नात्वाऽहतेवाससीपरि-
धायसितचंदनमाल्यादिभिरलंकृतः शुभासनेउपविश्याकृतनालच्छेद-
मपीतस्तन्यं सूतिकादिव्यतिरिक्तैरस्पृष्टंप्रक्षालितमलंकुमारंमातु-
रुत्संगेप्राङ्मुखमवस्थाप्यचाचम्यप्राणानायम्यदेशकालौस्मृत्वा-
ममास्यजातशि[17]शोर्गर्भांबुपानजनितसकलदोषनिबर्हणायुर्मेधाभि-
वृद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वाराश्रीपरमेश्वरप्रीत्यर्थं
जातकर्मकरिष्ये।। तत्रनिर्विघ्नतार्थंगणपतिपूजनंतदंगत्वेनचस्वस्ति-
पुण्याहवाचनंमातृकापूजनायुष्यमंत्रजपपूर्वकमाभ्युदयिक-
श्राद्धंहेम्नैवकरिष्येइति कृत्वा।। अत्रस्वस्तिपुण्याहवाचनांतेसविता-
प्रीयतामितिवदेत्।। ततएकस्मिन्पात्रेमधुघृतेमिश्रीकृत्याथवा-
केवलंघृतमनामिकयासुवर्णांतर्हितयाप्राशयतिकुमारंसकृत्।। ॐ
भूस्त्वयिदधामि।। ॐ भुवस्त्वयिदधामि।। ॐ स्वस्त्वयिदधामि।।
ॐ भूर्भुवः स्वः सर्वंत्वयिदधामीत्यनेनमंत्रेण।। अथायुष्यकरणं।।
तत्रशिशोर्नाभिसमीपेस्थित्वादक्षिणकर्णसमीपेवाऽग्निरायुष्मानित्यादि-
मंत्रान् [18]त्रिर्जपति।। ॐ अग्निरायुष्मान्त्सवनस्पतिभिरायुष्माँस्ते-
नत्वायुषायुष्मंतंकरोमि।। ॐ सोमऽआयुष्मान्त्यसऽओषधी-

भिरायुष्माँस्तेनत्वायुषायुष्मंतंकरोमि।। ॐ ब्रह्मऽआयुष्मत्त-
द्ब्राह्मणैरायुष्मत्तेनत्वायुषायुष्मंतं करोमि।। ॐ देवाऽआयुष्मं-
तस्तेमृतैरायुष्मंतस्तेनत्वायुषा युष्मतंकरोमि।। ॐऋषयऽआयुष्मंत-
स्तेव्रतैरायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि।। ॐ पितरऽआयुष्मंतस्ते-
स्वधाभिरायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि।। ॐ यज्ञऽआयुष्मा-
न्त्सदक्षिणाभिरायुष्माँस्तेनत्वायुष्मंतंकरोमि।। ॐ समुद्रऽआयुष्मा-
न्त्सस्रवंतीभिरायुष्माँस्तेनत्वायुषायुष्मंतंकरोमि।। ततस्त्र्यायुषमिति-
चत्रिर्जपेत्। ॐ त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम्। यद्देवेषु-
त्र्यायुषन्तन्नोऽअस्तुत्र्यायुषमिति।। पितायदिकामयेदयंकुमारः
सर्वमायुरियात्तदैनंवात्सप्रसंज्ञिकैर्दिवस्परीत्येकादशभिः
ऋग्भिरभिमन्त्रयेत्।। ॐ दिवस्परिप्रथमन्यज्ञेऽअग्निरस्म-
द्द्वितीयम्परिजातवेदाः।। तृतीयमप्सुनृमणाऽअजस्रमिन्धानऽएनञ्जरते-
स्वाधीः।। व्विद्मातेअग्नेत्रेधात्रयाणिव्विभृतापुरुत्रा।। व्विद्माते-
नामपरमङ्गुहायद्विद्मातमुत्सन्यतऽआयगन्थ।। समुद्रेत्वा-
नृमणाऽअप्स्वन्तर्नृचक्षाऽईधेदिवोऽअग्नऊधन्।। तृतीयेत्वा-
रजसितत्स्थिवाꣳसमपामुपस्थे महिषाअवर्धन्।। अक्रन्ददग्नि-
स्तनयन्निवद्यौःक्षामारेरिहद्वीरुधःसमञ्जन्।। सद्योयज्ञानो-
व्विहीमिद्धोऽअख्यदारोदसीभानुनाभात्यन्तः।। श्रीणामुदारोध-
रुणोरयीणाम्मनीषाणाम्प्रार्प्पणःसोम गोपाः।। व्वसुःसूनुःसहसोऽ-
अप्सुरा जाव्विभात्यग्रऽउषसामिधानः।। व्विश्वस्यकेतु-
र्भुवनस्यगर्भऽआरोदसीऽअपृणाज्जायमानः।। व्वीडुञ्चिदद्रिमभि-
नत्परायञ्जनायदग्निमयजन्त पञ्च।। उशिक्पावकोऽअरतिः सुमेध
ामर्त्येष्वग्निरमृतोनिधायि।। इयर्तिधूममरुषम्भरिभ्रदुच्छु-
क्रेणशोचिषाद्यामिनक्षन्।। दृशानोरुक्मऽऊर्व्याव्यद्यौदुर्म्मऽ-
ऋषमायुःश्रियेरुचानः।। अग्निरमृतोऽअभवद्वयोभिर्य्यदेन-
न्द्यौरजनयत्सुरेताः।। यस्तेअद्य कृणवद्भद्रशोचे पूपन्देवघृतवन्तमग्ने।।

प्रतन्नयप्रतरम्व्वस्योऽअच्छाभिसुम्नन्देवभक्तन्यविष्ट।। आतम्भजसौश्रवसेष्वग्नऽउक्थऽउक्थआभजशस्यमाने।। प्रियःसूर्ये-प्प्रियोऽअग्नाभवात्युज्जातेन भिनददुज्जनित्वैः।। त्वामग्ने-यजमानाऽअनुद्यून्विश्वाव्वसुदधिरेव्वार्याणि।। त्वयासहद्रविण-मिच्छमानाव्व्रजङ्गोमन्तमुशिजोव्विवव्रुः।। ततः कर्ताबालस्य-पूर्वादिचतसृषुदिक्षुचतुरोब्राह्मणानेकंमध्येनैर्ऋत्येवाव-स्थाप्यतान्प्रतीममनुप्राणेतिप्रैषंब्रूयात्।। ततस्ते प्रेषिताः पूर्वादिक्रमेणकुमारंलक्षीकृत्यप्राणेतिपूर्वोब्रूयात्।। एवंप्रैषानुप्रैषंसर्वत्र।। व्यानेतिदक्षिणतः।। अपानेत्यपरः।। उदानेत्युत्तरः।। समानेति-पंचमउपरिष्टादवेक्षमाणोब्रूयात्।। अविद्यमानेषुविप्रेषुस्वयमेवपूर्वादि-दिशंपरिक्रम्य प्राणेत्यादिब्रूयात्।। नात्रप्रैषः।। सबालो यस्मिन्भूभागेजातोभवतितमभिमंत्रयते।। वेदतेभूमीति।। ॐ वेदतेभूमिहृदयन्दिविचन्द्रमसिश्रितं।। वेदाहन्तन्मान्तद्विद्यात्पश्येमशरदः शतञ्जीवेमशरदः शतꣳशृणुयामशरदः शतम्। तत स्तस्तमभि-मृशत्यश्माभवेति।। ॐ अश्माभवपरशुर्भवहिरण्यमस्तृतम्भव।। आत्मावैपुत्रनामासिसजीवशरदः शतम्।। ततः कुमारमातुरभि-मंत्रणमिडासीति।। ॐ इडासिमैत्रावरुणीवीरेवीरमजीजनथाः।। सात्वम्वीरवतीभवयास्मान्वीरवतोकरत्।। ततःकुमारस्यमातु-र्दक्षिणस्तनमुदकेनप्रक्षाल्य पिता कुमाराय पानाय प्रयच्छतीमꣳस्तन-मिति।। ॐ इमꣳस्तनमूर्य०।। ततोवामस्तनंप्रक्षाल्ययस्तेस्तनइमꣳ स्तनमितिमंत्राभ्यांप्रयच्छति।। ॐ यस्तेस्तनः शशयोजोमयोभूर्यो-रत्नन्धाव्वसुविद्यःसुदत्रः।। येनव्विश्वापुष्यसिव्वार्याणि-सरस्वतीतमिहधातवेकः।। ॐ इमꣳस्त०।। ।। अत्रोक्तदानानिदत्वा।। अष्टांगुलंपरित्यज्य नालंछिद्यात्क्षुरादिनेतिभारतोक्तरीत्यानालच्छेदनं-कार्यं।। ततः सूतिकायाः शिरः प्रदेशेखट्वाधस्तादुदकपूर्णपात्रंनि-दधात्यापोदेवेष्विति।। ॐ आपोदेवेषुजाग्रथयथादेवेषुजाग्रथ।।

एवमस्याᳪं सूतिकायाᳪं सपुत्रिकायांजाग्रथ।। तत्पात्रंससूति-
कोत्थानपर्यंतंतत्रैवचतिष्ठति।। ततः सूतिकागृहद्वारदेशेस्थंडिले-
पंचभूसंस्कारान्कृत्वातस्मिन्सू[19]तिकाग्नेः स्थापनं।। तस्मिन्नग्नौ-
सायंप्रातः संध्याद्वयेप्रत्यहंयावत्सूतिकास्नानंकरोतितावद्ध-
स्तेनतंडुलकणमिश्रान्सर्षपाञ्जुहोतिशंडामर्काइतिद्वाभ्यां।। ॐ
शंडामर्का उपवीरः शौंडिकेयऽउलूखलः।। मलिम्लुचोद्रोणा
सश्चवनोनश्यतादितः स्वाहा।। इदंशंडामर्कायउपवीरायशौंडि-
केयायउलूखलायमलिम्लुचोद्रोणासश्चवनोनश्यतादितेभ्यश्चनमम।। ॐ
आलिखन्ननिमिषः किम्वदन्तऽउपश्रुतिः। हर्यक्षः कुम्भीशत्रुः
पात्रपाणिर्नृमणिर्हंत्रीमुखः सर्षपारुणश्च वनोनश्यतादितः स्वाहा।।
इदमालिषन्ननिमिषायकिंवद्भ्यः उपश्रुतयेहर्यक्षायकुंभीशत्रवे-
पात्रपाणयेनृमणयेहंत्रीमुखाय सर्षपारुणायचवनायच नमम।।
इदमग्नयेनममेत्युभयोस्त्यागइतिहरिहरगदाधरौ।। यदिक्रूरग्रह-
उपद्रवतितदातंजालेनोत्तरीयेणवाच्छाद्यपितास्वोत्संगेनिधा-
यजपतिकूर्कुरइति।। ॐ कूर्कुरः सुकूर्कुरः कूर्कुरोबालबंधनः।।
चेच्चेच्छुनकसृजनमस्तेऽअस्तुसीसरो लपेतापह्वरतत्सत्यं।।
यत्तेदेवावरमददुः सत्वंकुमारमेववावृणीथाः।। चेच्चेच्छुनकःसृजन-
मस्तेऽअस्तुसीसरोलपेतापह्वरतत्सत्यं।। यत्तेसरमा मातासीसरः
पिताश्यामशबलौभ्रातरौ।। चेच्चेच्छुनकः सृजनमस्तेऽअस्तुसी-
सरोलपेतापह्वर।। ततएनमभिमृशतिननामयतीति।। ॐ ननामयति
नरुदतिनहृष्यतिनग्लायतियत्रवयंवदामोयत्रचाभिमृशामसि।।
कृतस्यकर्मणः सांगतासिद्ध्यर्थंसूतकांतेस्मृत्युक्तान्दशसंख्या-
कान्ब्राह्मणान्भोजयिष्ये।। तेनश्रीकर्मांग०।। ब्राह्मणान्गंधादिभिः
संपूज्य।। तेभ्यश्चदक्षिणांदत्वातेषामाशिषोगृहीत्वा।। मातृणां-
विसर्जनंकार्यं।। ।। यांतुमातृग०।। अत्रायुष्यकरणादिमातुरभिमंत्रणान्तं
कालातिक्रमेपिक्रियते।। तथाचकारिकायां।। अनुप्राणनवात्स-

प्राभिमर्शनानुमंत्रणे।। कालांतरेपिकुर्वीतआयुष्यकरणंतथेति।। मेधाजननंतुमुख्यकालातिक्रमेनिवर्तते।। तस्मात्कुमारंजातंघृतंवैवाग्रे-प्रतिलेहयंतिस्तनंवानुधापयंतीतिजातमात्रस्यकुमारस्यश्रुत्या-मेधाजननोपदेशात्।। कुमार्याश्चैतज्जातकर्मामंत्रकंकार्यमिति।। इतिसंस्कारभास्करेजातकर्मप्रयोगः।। ।। अथषष्ठीपूजनं।। तदाह।। व्यासः।। विघ्नेशजन्मदानांचजीवत्याश्चप्रपूजनम्।। जातादिपंचमेषष्ठे-निशीथेबलिमाहरेदिति।। सूतिकावासनिलयाजन्मदानामदेवताः।। तासांयागनिमित्तंतुशुद्धिर्जन्मनिकीर्तितेति।। जन्मनिमित्ताशौचे-सत्यपीत्यर्थः।। जननाशौचमध्येप्रथमषष्ठदशमदिनेषुदाने-प्रतिग्रहेचनदोषः।। प्रथमेदिवसे षष्ठेदशमेचैवसर्वदा।। त्रिष्वाशौचंन-कुर्वीतसूतकेपुत्रजन्मनीतिव्यासोक्तेः।। अत्रशृतमन्नंतुनिषिद्धं।। ।। अत्रकर्तव्यमाह।। ।। मिताक्षरायांमार्कंडेयः। रक्षणीयातथाषष्ठी-निशातत्रविशेषतः।। रात्रौजागरणंकार्यंजन्मदानां तथाबलिः।। पुरुषाःशास्त्रहस्ताश्चनृत्यगीतैश्चयोषितइति।। सूतिकागृहंशस्त्र-मुशलांबुविभूतियुतंकार्यं। सर्षपांश्चसर्वतोऽवकिरेत्। अन्यदपियथा-चारंसर्वंकार्यं।। जन्मदाभ्योन्नादिनाबलिर्देयः।। एतत्प्रतिमाश्चचंदनादि-नाकुड्येलेखनीयाः।। पीठादौवाक्षतपुंजरूपेणनिवेश्याः।। ।। अथप्रयोगः।। ।। पंचमेषष्ठेचदिवसे रात्रेः प्रथमयामेपित्रादिः स्नात्वाचम्यप्राणानायम्यदेशकालौस्मृत्वाऽस्यशिशोरायुरारोग्य-प्राप्तिसकलारिष्टशांतिद्वाराश्रीपरमेश्वरप्रीत्यर्थंविघ्नेशस्यजन्मदानां जीवंत्यपरनाम्न्याः षष्ठीदेव्याः शस्त्रगर्भाभगवत्याश्चपूजनंकरिष्ये इतिसंकल्प्य।। श्रीश्चतइतिमंत्रेणवानाममंत्रेणैकतंत्रेणषोडशोपचारैः पूजयेत्।। पृथक्वासंकल्प्यपृथगेवपूजाकार्या।। ।। आयाहिवरदेदेविमहाषष्ठीतिविश्रुते।। शक्तिभिः सहबालंमेरक्षर-क्षवरानने।। मनोजूतिरितिप्रतिष्ठा।। अथध्यानं।। देवीमंजन-संकाशांचंद्रार्धकृतशेखरां।। सिंहारूढांजगद्धात्रीं कौमारीभक्त-

वत्सलां।। खड्गंखेटंचबिभ्राण्यामभयंवरदांतथा।। तारकाहार-
भूषाढ्यांचिंतयामिनवांशुकां।। ॐ श्रीश्चंते०।। इतिमंत्रेणवा।। ॐ
भूर्भुवः स्वः विघ्नेशजन्मदाषष्ठीदेवीजीवंतिकाभ्योनमः ध्यायामि।।
एवंसर्वत्र।। आगच्छवरदेदेविस्थानेचात्रस्थिराभव।। आराध-
यामिभक्त्यात्वां रक्ष बालंचसूतिकां।। ॐ भूर्भुवस्वः विघ्नेश-
जन्मदाषष्ठीदेवीजीवंतिकाभ्योनमः विघ्नेशजन्मदाषष्ठीदेवी-
जीवंतिकाआवाहयामि।। संध्यारागनिभंरक्तमासनंस्वर्णनिर्मितं।।
गृहाणसुमुखी भूत्वारक्षबालंचसूतिका।। ॐ भू० आसनंस०।।
गंगाजलंसमानीतंसुवर्णकलशेस्थितं।। पाद्यंगृहाणमेबालंसूति-
कांचैवपालय।। ॐ भू० पाद्यंस०।। गंधपुष्पाक्षतैराढ्य-
मर्घ्यार्थंनिर्मलंजलं।। गृहाणपाहिमेपुत्रंसूतिकाभयहारिणि।। ॐ भू०
अर्घ्यं०।। गृहाणाचमनीयंतु कर्पूरैलादिवासितं।। सबालांसूति-
कांपाहिजगन्मातर्नमोस्तुते।। ॐ भू० आचमनं।। पंचामृतं-
गृहाणेदंपयोदधिघृतंमधु।। शर्करासहितंदेविपाहिबालं समातृकं।।
ॐ भू० पंचामृतस्नानं।। गंगाजलंमयानीतंस्नानार्थंतेसुरेश्वरि।।
गृहाणश्रेष्ठंपानीयंरक्षत्वाबालसूतिके।। ॐ भू० शुद्धोदकस्नानं।।
स्नानाचमनीयंदद्यात्।। दुकूलादिमयंदेविनानारत्नैः परिष्कृतं। परि-
धत्स्वामलंवस्त्रंरक्षमेसुतसूतिके।। ॐ भू० वस्त्रं०।। वस्त्राचमनीयं-
दद्यात्।। नानारत्नमयंदिव्यंमुक्ताहारमयंशुभं।। गृहाणकालरात्रित्वंरक्ष-
मेसुतसूतिके।। ॐ भू० अलंकारान्स०।। कर्पूरागरुकुस्तूरी-
कंकोलादिसमन्वितं।। चंदनंस्वीकुरुत्वंमे रक्षबालं चसूतिका।।
ॐ भू० चंदनं०।। सुमाल्यानिसुगंधीनिमालत्यादीनिवैप्रभो।।
गृहाणवरदेदेविरक्षबालंचसूतिकां।। ॐ भू० पुष्पाणि०।। हरिद्रा-
कुंकुमादीनिनानापरिमलानिच।। गृहाणसुभगेदेविरक्षबालंचसूतिकां।
ॐ भू० परिमलद्रव्यं०।। वनस्पत्युद्भवंधूपंदिव्यंस्वीकुरुदेविमे।।
प्रसीदसुमुखीभूत्वारक्षमेसुतसूतिके।। ॐ भू० धूपं०।।

आज्यंवर्तियुतंदेविज्योतिषांज्योतिषंतथा।। जीवंतिकेगृहाणे-
दंरक्षमेसुतसूतिके।। ॐ भू० दीपं।। अन्नंचषड्रसोपेतंनाना-
भक्ष्यसमन्वितं।। भुंक्ष्वदेविगणैर्युक्तारक्षमेसुत सूतिके।। ॐ भू०
नैवेद्यं०।। नैवेद्याचमनीयंदद्यात्।। इदंफलंमयादेविस्थापितंपुरतस्तव।
तेनमेपरितुष्टात्वंरक्षबालंचसूतिकां।। ॐ भू० फलं०।।
नागवल्लीदलंरम्यंपूगीफलसमन्वितं।। भद्रेगृहाणतांबूलंपाहिमेसुत
सूतिके।। ॐ भू० तांबूल०।। हिरण्यगर्भगर्भस्त्वंहेम-
बीजंविभावसोः।। अनंतपुण्यफलदमतः शांतिंप्रयच्छमे।। ॐ भू०
दक्षिणां०।। रंभागर्भसमुद्भूतकर्पूरंसुप्रदीपितं।। आरार्तिकमहंकुर्वे-
रक्षामेसुतसूतिके।। ॐ भू० कर्पूरनीराजनं।।
यथाकालोद्भवानांचचंपकादिसुगंधिनां।। पुष्पांजलिंगृहाणे-
मंरक्षमेसुतसूतिके।। ॐ भू० पुष्पांजलिं०।। अथ प्रार्थना।।
लंबोदरमहाभागसर्वोपद्रवनाशन। त्वत्प्रसादादविघ्नेशचि-
रंजीवतुबालकः।। जननीसर्वभूतानांबालानांचविशेषतः।।
नारायणीस्वरूपेणबालंमेरक्षसर्वदा।। प्रेतभूतपिशाचेभ्योडा-
किनीयोगिनीषुच।। मातेवरक्षबालंमेश्वापदेपन्नगेषुच।।
षष्ठीदेविनमस्तुभ्यंसूतिकाग्रहशालिनी।। पूजितापरयाभक्त्यादीर्घमायुः
प्रयच्छमे।। जननीजन्मसौख्यानांवर्धिनीधनसंपदां।। साधिनी-
सर्वभूतानांजन्म देत्वांनतावयं।। गौरीपुत्रोयथास्कंदः शिशुत्वे-
रक्षितःपुरा।। तथाममाप्यमुंबालंषष्ठिकेरक्षतेनमः।। यथादाशरथी-
रामश्चतुर्मुर्तिर्भवप्रदे।। त्वयासंरक्षितस्तद्वद्बालंपाहिशुभप्रदे।।
विष्णुनाभिस्थितोब्रह्मादैत्येभ्योरक्षितस्त्वया।। तथामेबालकंरक्ष
योगनिद्रेनमोस्तुते।। रक्षितौपूतनादिभ्योनंदगोपसुतौयथा।।
तथामेबालकंपाहिदुर्गेदेविनमोस्तुते।। यथावृत्रासुरादिंद्रोरक्षितो-
दितिबालकः।। त्वयातथामेबालोयंरक्षणीयोमहेश्वरि।।
यथात्वयांजनीपुत्रोहनुमान्रक्षितः शिशुः।। तथामेबालकंरक्षदुर्गे-

दुर्गार्तिहारिणि।। रुद्रः स्वर्गाद्यथादेविकश्यपादिसुतास्त्वया।। मातस्त्राहितथाबालंविष्णुमायेनमोस्तुते।। सर्वविघ्नानपाकृत्य सर्वसौख्यप्रदायिनी।। जीवंतिकेजगन्मातः पाहिनः परमेश्वरि।। अनयापूजयाविघ्नेशजन्मदाजीवंत्यपरनाम्नीषष्ठीदेवीशस्त्रगर्भाभगवत्यः प्रीयंतां।। ततोनीराजनंसूतिकागृहेबलिंसोपस्करंदद्यात्।। क्षेत्रस्या-धिपतेदेविसर्वारिष्टविनाशिनी।। बलिं गृहाणमेरक्षक्षेत्रंसूतींचबालकं।। इमंयथोपस्करबलिंक्षेत्राधिपत्यैदेव्यैसमर्पयामिनमम।। ततः सूतिकागृहाद्बहिरागत्यद्वारस्योभयतोमातृकाद्वंद्वंलिखेत्।। तन्नामानि।। धिषणावृद्धिमाताचतथागौरीचपूतना।। आयुर्दात्र्योभवंत्वेताअद्य-बालस्यमेशिवाः।। एतानाममंत्रेणपंचोपचारैः संपूज्य-सुवासिनीभोजनीया।। विप्रेभ्यश्चखाद्यतांबूलदक्षिणादिदद्यात्।। तेषामाशिषोगृह्णीयात्।। दशमेह्निबलिंदत्वाविसर्जयेत्।। ।। इतिसंस्कारभास्करेषष्ठी पूजनप्रयोगः।। ।। अथाशौचेकर्तव्यनिर्णयः।। ।। तत्रभारद्वाजः।। सूतकेमृतकेकुर्यात्प्राणायाममममंत्रकम्।। तथा-मार्जनमंत्रांस्तुमनसोच्चार्य मार्जयेत्।। गायत्रींसम्यगुच्चार्यसूर्याया-र्घ्यंनिवेदयेत्। मार्जनं तु न वा कार्यमुपस्थानंनचैवहीति।। पैठीनसिः।। सूतकेसावित्र्याजलंप्रक्षिप्यप्रदक्षिणंकृत्वासूर्यंध्या-यन्नमस्कुर्यादिति।। प्राप्तायाः सावित्र्याः पुनर्वचनंस्पष्टोच्चारणार्थं।। विष्णुः।। आशौचेहोमदानप्रतिग्रहस्वाध्यायानिवर्तंते।। नाशौचे कस्यचिदन्नमश्नीयादिति।। अत्रहोमोवैश्वदेवाख्यः।। पंचयज्ञवि-धानंतुनकुर्यान्मृतिजन्मनोरितिस्मृत्यंतरात्।। नतुअग्निहोत्रो-पासनाख्यः।। वैतानोपासनाः कार्याः क्रियाश्च श्रुति-चोदिताइतियाज्ञवल्क्योक्तेः।। कर्मवैतानिकंकार्यंस्नानोप-स्पर्शनात्स्वयमितिहारीतोक्तेश्च।। वेतानिकग्रहणमौपासन-होमोपलक्षणार्थं।। तस्यापिश्रौतत्वेनमिताक्षरोक्तेः।। स्नानाचमनेच तात्कालिके।। अग्निहोत्रस्यहोमार्थंशुद्धिस्तात्कालिकीभवेदिति

गोभिलोक्तेः।। स्थालीपाकपिंडपितृयज्ञादिस्मार्तत्वाशौचेप्य-न्यद्वाराकारयेत्।। नत्यजेन्नापिस्वयंकुर्यात्।। सूतकेतुसमुत्पन्नेस्मार्तं-कर्मकथंभवेत्।। पिंडयज्ञंचरुंहोममसगोत्रेणकारयेदिति।। एतच्चप्रथमारंभोत्तरं।। होमऔपासनहोमः।। सगोत्रेणापिकारणीय-इत्याशयेनतदुक्तिः।। नतुतत्रापिनियमः।। अग्निहोत्रतुल्यत्वात्।। अन्येतुस्थालीपाकादिवत्।। औपासनहोमेप्यन्यकर्तृत्वनियमंमन्यंते।। काम्यस्यापि प्रतिप्रसवमाह।। ।। पुलस्त्यः।। सद्यः शौचमित्यनु-वृत्तौ।। सान्निहित्यमुपस्पृश्यराहुग्रस्तेदिवाकरे। सत्रधर्मप्रवृत्तस्यदान-कर्मफलैषिणइतिसन्निहिततीर्थेस्नात्वाराहूपरागेकाम्यदानंकुर्यात्।। तथान सप्रवृत्तोपिइतिव्याख्यातंपारिजाते।। तथाचबृहस्पतिः।। कन्याविवाहेसंक्रांतौसूतकंन कदाचनेति।। जमदग्निः।। सूतकेमृत-केवापिजाह्नव्याः सलिलेस्थितः।। नाभिमात्रेजले स्थित्वा-कुर्याद्दानजपादिकमिति।। एतदुभयमपिकाम्यविषयमितितत्रैवोक्तम्।। ।। इत्याशौचेकर्तव्यनिर्णयः।। ।। अथसूतिकाशुद्धिः।। ।। दशाहांतेसूतिकायाअस्पृश्यत्वनिवृत्तिर्जातकर्मनामकर्मादिप्राप्तकर्मा-धिकारश्च।। जातेष्टिविवाहोपनयनादिकर्मसुतुपुत्रप्रसूनांविंशतिरात्रांते-धिकारः।। कन्याप्रसूनांमासांतेधिकारइति।। अथसूतिकास्नानं।। ज्यौतिषे।। करेंद्रभाग्यानिलवासवात्यमैत्रेंदवाश्विध्रुवमह्निपुंसां।। तिथावरिक्तेशुभमामनंतिप्रसूतिकास्नानविधिंमुनींद्राः।। हस्तज्येष्ठापूर्वा-फाल्गुनीस्वातीधनिष्ठारेवत्यनुराधामृगशीर्षाश्विनीरोहिणीषुत्रिषूत्तराषुच।। पुंसामह्निरविभौमगुरुवारेषु।। अरिक्तेचतुर्थीनवमीचतुर्दशीवर्ज्य-सर्वासुतिथिषुसूतिकास्नानंशुभमित्यर्थः।। ।। अथनामकरणं।। तत्रकालमाह।। ।। पारस्करः।। दशम्यामुत्थाप्यब्राह्मणान्भोजयित्वा-पितानामकरोतीति।। प्रसवाद्दशम्यां रात्र्यामतीतायामेकादशेहनिसूति-कागृहात्सूतिकामुत्थाप्यश्राद्धव्यतिरेकेण त्रीन्ब्राह्मणान्भोजयित्वा-पिताकुमारस्यनामसंज्ञासंव्यवहारार्थंकरोति।। अत्र पितृग्रहणाद-

न्यत्रापिपितुर्नियमोवगम्यते।। अत्राप्यसन्निधौपितरिअन्यः-
कश्चित्कुलवृद्धः करोति।। अत्रदशम्यामितिसूत्रकांतोपलक्षणं।।
तथाचमदनरत्नेनारदीये।। सूतकांतेनामकर्मविधेयंस्वकुलोचितमिति।।
ततश्चयस्ययावंति दिनानिसूतकंतदंतदिनेकार्यमिति हरिहरः।।
सूत्रकारवचनादेकादशेहनिएवेत्यन्ये।। गोभिले।। दशरात्रेव्युष्टेनाम-
करणमिति।। याज्ञवल्क्यः।। अहन्येकादशेनामेति।। मदनरत्ने-
विशेषः।। द्वादशेदशमेवापिजन्मतोपि त्रयोदशे।। षोडशेविंशतौचैव-
द्वाविंशेवर्णतः क्रमादिति।। कारिकायां।। एकादशेद्वादशेवा-
मासेपूर्णेथवापरे।। अष्टादशेहनितथावदंत्यन्येमनीषिणः।।
शतरात्रेव्यतीतेवापूर्णेसंवत्सरेथवेति।। ज्योतिर्निबंधेगर्गः।।
अमासंक्रातिविष्ट्यपादौप्राप्तकालेपिनाचरेदिति।। नियतकाले-
क्रियमाणेमलमासगुरुशुक्रास्तादिदोषोनास्तीत्युक्तंधर्मसिंधौ-
प्रयोगरत्नेपि।। अपराह्णेरात्रौचनामकर्म नकार्यं।। एकादशेह-
निनामकरणाशक्तौ स्मृत्यंतरोक्तकालोग्राह्यः।। तथाचोक्तंकारिकायां।
मुख्यकालेयदानामधेयंकर्तुंनशक्यते।। उक्तानामन्यतमेदिने-
स्यात्तुगुणान्वितइति।। ।। अथोक्तकालातिक्रमेऽपेक्षितशुभतिथ्यादि।।
चतुर्थीषष्ठ्यष्टमीनवमीद्वादशीचतुर्दशीपंचदशीरहितास्तिथयः
प्रशस्ताः चंद्रबुधगुरुशुक्रवासराः।। अश्विनीत्र्युत्तरारोहिणीमृगपुनर्वसु-
पुष्यहस्तस्वात्यनुराधाश्रवणधनिष्ठाशततारकारेवतीनक्षत्राणि।।
वृषभसिंहवृश्चिक लग्नानिप्रशस्तानीति।। ।। तानिनामानि चतु-
र्विधानि।। देवतानाममासनामनाक्षत्रनामव्यावहारिकंनामेति।।
तत्रामुकदेवताभक्तइत्याकारकंदेवतानाम प्रथमम्।। मासनामानि-
तुयथा।। चैत्रादिमासनामानिवैकुंठोथ जनार्दनः।। उपेंद्रोयज्ञपुरुषो-
वासुदेवस्तथाहरिः।। योगीशः पुंडरीकाक्षः कृष्णोनंतोच्युतस्तथा।।
चक्रीतिद्वादशैतानिक्रमादाहुर्मनीषिणइति।। अत्रकेचिन्मार्गशिर्षादि-
मासाः गृह्यंते।। तत्पक्षेकृष्णोनंतोच्युतश्चक्रीवैकुंठोऽथजनार्दनः।।

उपेंद्रोयज्ञपुरुषोवासुदेवोहरिस्तथा।। योगीशः पुंडरीकाक्षोमास-नामान्यनुक्रमादित्यनुसारेणमासनामद्वितीयकं।। मासाश्चात्रचांद्रास्ते-ष्वेवचैत्रादिशब्दानां मुख्यत्वात्।। तेचशुक्लादिकृष्णांताएव।। तादृशचांद्रमासस्यैवब्राह्मणानां मुख्यत्वात्।। अमावास्यापरिच्छिन्नोमासः स्याद्ब्राह्मणस्य त्वित्युक्तेः।। ।। यस्मिन्नक्षत्रेजन्मतन्नक्षत्रा-वाचकशब्दात्तत्रजातइत्याधिकारेविहिततद्धितप्रत्ययेकृतेनिष्पन्नं-नाक्षत्रनामतृतीयम्।। तद्यथा। आश्वयुक्आपभरणः।। कार्तिकः रौहिणः मार्गशीर्षः आर्द्रकः पुनर्वसुः तिष्यः आश्लेषः मघः पूर्वाफाल्गुनः उत्तराफाल्गुनः हस्तः चैत्रः स्वातिः वैशाखः अनुराधः ज्यैष्ठः मूलकः पूर्वाषाढः उत्तराषाढः अभिजितः श्रावणः श्रविष्ठः शतभिषक्पूर्वाप्रौष्ठपादः उत्तराप्रौष्ठपादः रैवतइति।। केचित्तुचूचेचो-लाश्विनीप्रोक्तेत्यादिज्योंतिर्ग्रंथोक्तावकहडाचक्रानुसारेणाश्विन्यादयश्च-तुर्षुचरणेषुचूडामणिश्चेदीशश्चोलेशोलक्ष्मणइत्यादिकानिनाक्षत्रनामानि-कुर्वंतितन्नश्रौतग्रंथादिबहुसंमतं। शांखायनास्तुकृत्तिकोत्पन्नन-स्याग्निशर्मेतिनाक्षत्रंनामकुर्वंति।। एवंकातीयाअपि।। नाक्षत्रनामैवाभि-वादनीयंगुप्तंचामौंजीबंधनात्।। मातापितरावेवजानीयाताम्।। व्यावहारिकंनामचतुर्थं।। तत्रपारस्करः।। [20]व्द्यक्षरंचतुरक्षरंवेति।। अनयोर्विकल्पः।। घोषवदाद्यंतरंतस्थंदीर्घाभिनिष्ठानंकृतंकुर्यान्न-तद्धितं।। तेचगघङ।। जझञ।। डढण।। दधन।। बभमेतिनामादौ।। अंतस्थाः यरलवाएतेनाम्नोमध्येकर्तव्याइत्यर्थः।। दीर्घाभिनिष्ठानं-अवसानं दीर्घंयस्यतत्।। कृतंकृत्प्रत्ययांतंकुर्यात्।। नतद्धितंतद्धित-प्रत्ययांतंकुमारस्य नामकुर्यादिति।। स्त्रीणांतुविशेषः।। अयुजाक्षरमा-कारांतꣳस्त्रियैतद्धितमिति।। अयुग्माक्षरं।। आकारांत।। तद्धिततप्रत्य-यांतंस्त्रियाः नामकुर्यादित्यर्थः।। ।। अत्रशर्मब्राह्मणस्यवर्म-क्षत्रियस्यगुप्तेतिवैश्यस्येति।। शर्मशब्दः सुखनीयवचनः।। सुखनीयंब्राह्मणस्यनामकर्तव्यं।। यथाशुभंकरः प्रियंकर इतिकर्कः।।

ब्राह्मणस्यनाम्निशर्मेत्यनुषंगोभवतीतिभर्तृयज्ञहरिहरौ।। वर्मशब्दशौर्य-
वचनः।। शौर्ययुक्तंक्षत्रियस्यनामकार्यमितिकर्कः।। क्षत्रियनाम्निवर्मे-
त्यनुषंगइत्यन्ये।। गुप्तशब्दआढ्यत्वाभिधायीवैश्यस्यनामभवतीति
कर्कः।। वैश्यनाम्निगुप्तेप्यनुषंगइत्यन्ये।। तथाचमनुः।। शर्मांतं-
ब्राह्मणस्य स्याद्वर्मांतंक्षत्रियस्तु।। वैश्यस्यधनसंयुक्तंशूद्रस्य-
प्रेषसंयुतमिति।। तच्चऋऌवर्णरहितंविसर्गांतंपित्रादिपुरुषत्रयान्यत-
मवाचकंशत्रुवाचकभिन्नंकार्यं।। यथादेवदत्तः।। हरिरिति।। उक्तसर्व-
लक्षणाभावेसमाक्षरंपुसां अयुग्माक्षरंस्त्रीणांकार्यं।। यथा भक्तेत्याबंतं-
देवतानाम।। मासनामसुचक्रिणिवैकुंठिवासुदेवीतित्रीणिङीबंतानि।।
हरिरित्यविकृतं।। अवशिष्टान्यष्टावाबंतानि।। रौहिणीकृत्तिकेत्येव-
यथायथं नाक्षत्रनामेतिमातृदत्तमते।। आश्वलायनैर्नाक्षत्रं
नामस्त्रीणांनकार्यं।। व्यावहारिकंयज्ञदाशर्मेतिपुंवत्कार्यमितिधर्म-
सिंधौ।। यद्युक्तकालेजातकर्मनकृतंचेत्तदाअनादिष्टप्रायश्चित्त-
होमंकृत्वानामकरणकालेजातकर्मनामकर्मचैकतंत्रेणकार्यमिति। ।।
अथनामकरणसंस्कारप्रयोगः।। ।। तत्रायं क्रमः।। नामाख्येमातृ-
नांदीन्यजतिजननतो द्वादशैकादशेवाविप्रांस्त्रीन् भोजयित्वाकृतमपिच-
भवेत्तद्धितंनैवपुंसः।। तस्यादौघोषवंतौ यरलवपुरतः शर्मवर्मेतिगुप्ते-
त्यंतेविप्रादिवर्णत्रितयमभिधाबंतमीबंतमस्याः।। जन्मतएकादेशेद्वादशेवा
यथाचारनियतदिनेपूर्वाह्णेकुमारपितामंगलंस्नात्वाऽहतवाससीपरिधायकृत
मंगलतिलकः शुभासनेउपविश्याचम्यप्राणानायम्यदेशकालौ-
स्मृत्वास्यशिशोर्बीजगर्भसमुद्भवैनोनिबर्हणायुरभिवृद्धिव्यवहारसिद्धि-
द्वाराश्रीपरमेश्वरप्रीत्यर्थंनामकरणंकरिष्ये।। तत्रनिर्विघ्नार्थंगणपति-
पूजनंतदंगत्वेनस्वस्तिपुण्याहवाचनंमातृका पूजनंनांदीश्राद्धंचकरिष्ये-
इतिकृत्वा।। अत्रपुण्याहवाचनांतेप्रजापतिः प्रीयतामित्युहः।।
अद्यकरिष्यमाणनामकरणेअधिकारार्थंत्रीन्ब्राह्मणान्भोजयिष्यइति
संकल्प्यतान्भोजयित्वानामकरणंकुर्यात्।। तत्रायंशिष्टाचारः।।

कांस्यपात्रे तंडुलान्प्रसार्यतदुपरिसुवर्णशलाकयाकुलदेवताप्रयुक्तमादावमुकदेवताभक्त इतिनाम।। मासनाम।। नक्षत्रनाम।। व्यवहारनाम।। इत्थंनामचतुष्टयं लिखित्वा।। अस्यशिशोर्ब्रह्मायुष्यप्राप्त्यर्थंनामदेवतापूजनंकरिष्ये।। मनोजूतिरितिप्रतिष्ठां कृत्वा।। नामदेवताभ्योनमइतिषोडशोपचारैःसंपूज्य।। स्वदक्षिणस्थमातुरुत्संगस्थस्यंशिशोर्दक्षिणकर्णे कथयति।। हे कुमार त्वंअमुकदेवताभक्तोसि।। हे कुमारत्वंमासनाम्नाकृष्णोसि।। हे कुमारत्वंनक्षत्र नाम्नाआश्वयुगसि।। अथवाअग्निशर्म्मासि।। अथवाचूडामणिरसि।। हे कुमारत्वंव्यवहारनाम्नारामचंद्रशर्म्मासीतिकथयित्वा।। मनोजूतिरितिमंत्रपठनांतेविप्रैर्नामसुप्रतिष्ठितमितिवाचयित्वा।। तानभिवादयेत्।। तद्यथा।। हेकुमारत्वममुकदेवताभक्तोसि सर्वान्ब्राह्मणानभिवादय।। आयुष्मान्भवसौम्य अमुकदेवताभक्तइतितेब्रूयुः।। हेकुमारत्वमासनाम्नाकृष्णोसिसर्वान्ब्रा०।। आ० कृष्णइति।। कर्तोपांशुवदेन्नाक्षत्रेणनाम्नाआश्वयुगसि।। अथवाग्निरसि।। अथवाचूडामणिरसि।। सर्वान्ब्राह्मणानभिवादयइत्युच्चैः।। आयुष्मान्भवतुभवदुक्तनामेतितेवदेयुः।। हे कुमारत्वंव्यवहारनाम्नारामचंद्र शर्मासिस०।। आ० रामचंद्रशर्मा।। ब्राह्मणस्तुवेदोसीतिमंत्राशिषंपठेयुः।। ॐ व्वेदोसियेनत्वंदेवव्वेददेवेभ्योव्वेदोभवस्तेनमह्यंव्वेदोभूयाः।। अथास्यायुष्यंकरोतिदक्षिणकर्णमभिनिधायवाग्वागितित्रिरथास्यनामधेयंकरोतिवेदोसीतितदास्यैतद्गुह्यमेवनामस्यादथदधिमधुघृतँसमृज्ययानंतर्हितेनजातरूपेण प्राशयतिभूस्त्वयिदधामिस्वस्त्वयिदधामिभूर्भूवः स्वः सर्वंत्वयिदधामीति।। अत्राग्निरायुष्मानित्यादिभिरायुष्यकरणं।। अथदधि मधुघृतंसंसृज्यप्राशयति।। ॐ भूस्त्वयिदधामि।। ॐ भुवस्त्व०।। ॐ स्वस्त्व०।। ॐ भूर्भुवःस्वः सर्वंत्व०।। अथैनमभिमृशति।। ॐ अश्माभवपरशुर्भवहिरण्यमस्तृतम्भव।। आत्मावैपुत्रनामासिसजीवशरदः शतमिति।।

अथास्यमातरमभिमंत्रयते।। ॐ इडा सि०।। अथैनंमातुः स्तनंप्रक्षाल्यप्रयच्छति।। ॐ इमश्रृंस्त०।। यस्तेस्तनंइतिऋग्भ्यां।। तं वाऽएतमाहुः अतिपितावताभूरतिपितामहोवताभूः परमांबतकाष्ठां- प्रापश्रियायशसाब्रह्मवर्चसेनयऽएवंविदोब्राह्मणस्यपुत्रोजायते।। ततः कर्तादेवताभ्योब्राह्मणेभ्यश्चनत्वादशसंख्याकान्ब्राह्मणान्भोजयिष्ये।। ब्राह्मणेभ्योदक्षिणांदत्वातेषामाशिषोगृहीत्वा।। यांतुमातृगणाः सर्वइति मातृणांविसर्जनंकुर्यात्।। कुमार्याअपिनामकरणममंत्रकंकार्यं।। ।। इतिसंस्कारभास्करेनामकरणप्रयोगः।। ।। अथदोलारोहणं।। ।। पारिजाते बृहस्पतिः।। दोलारोहस्तुकर्तव्योदशमेद्वादशेपिवा।। षोडशेदिवसेवापिद्वाविंशदिवसे[21]पिवेति।। ।। ज्योतिर्निबंधे।। करत्रयेवैष्णवरेवतीषुदितिद्वयेचाश्विनकध्रुवेषु।। कुर्याच्छि- शूनांनृपतेश्चतद्वदांदोलनंवैसुखिनोभवंतीति।। तत्रैव।। आंदोलाश- यनेपुंसोद्वादशोदिवसः शुभः।। त्रयोदशस्तुकन्यायाननक्षत्र- विचारणा।। अन्यस्मिन्दिवसेचेत्स्यात्तिर्यगास्यैप्रशस्यत इति।। तत्रनामकरणदिनेषोडशेद्वात्रिंशेन्यस्मिन्वाज्योतिर्विदादिष्टेशुभेकालेयथा- चारंकुलदेवतादिपूजांविधायालंकृतंशिशुंहरिद्राद्यलंकृतेआंदोलेमात्राद्याः सौभाग्ययुक्ताः स्त्रियो योगशायिनंहरिंस्मरंत्योगीतवाद्यादिसमकालं- प्राक्शिरसंन्यसेयुः।। स्वस्वाचारप्राप्तं चान्यदपिकार्यं।। एतच्चप्राप्त- कालेकुयोगसत्वेपिजातकर्मवत्कार्यमिति।। ।। इतिसंस्कारभास्करे- दोलारोहणम्।। अथदुग्धपानम्।। ।। नृसिंहः।। एकत्रिंशद्दिनेचैव पयः शंखेनपाययेत्।। अन्नप्राशन नक्षत्रेदिवसेवापरेशिशुमिति।। अत्रोक्तदिनेशुभकालेगणपतिंकुलदेवतांचपूजयित्वाधात्री- माताअलंकृतंशिशुंस्वांकेदक्षिणशिरसंप्राक्शिरसंवा निधायगोक्षीरं- शंखेनपाययेत्।। ।। इतिसंस्कारभास्करेदुग्धपानम्।। ।। अथतां- बूलभक्षणम्।। ।। चंडेश्वरः।। सार्द्धमासद्वयेद- द्यात्तांबूलंप्रथमं- शिशोः।। कर्पूरादिकसंमिश्रंविलासायहितायच।। मूलार्कचित्रकर-

तिष्यहरींद्रभेषुपौष्णेतथामृगशिरोदितिवासवेषु।। अर्केंदुजीवभृगु–बोधनवासरेषुतांबूलभक्षणविधिर्मुनिभिः प्रदिष्टइति।। ।। इति–संस्कारभास्करेतांबूलभक्षणम्।। अथनिष्क्रमणसंस्कारः।। ।। तत्रतावत्तत्कालमाह।। पारस्करः।। चतुर्थेमासिनिष्क्रमणिकेति।। कुमारस्यजननाच्चतुर्थेमासिनिष्क्रमणिका गृहाद्बहिर्निर्गमनंकर्त्तव्य–मित्यर्थः।। ज्योतिर्निबंधे।। तृतीयेवाचतुर्थेवामासि निष्क्रमणं भवेदिति।। मदनरत्ने।। अन्नप्राशनकालेवाकुर्यान्निष्क्रमणक्रियामिति।। ।। व्यासः।। मैत्रेपुष्यपुनर्वसुप्रथमभेपौष्णेनुकूलेविधौहस्तेचैव–सुरेश्वरेचमृगभेतारासुशस्तासुच।। कुर्यान्निष्क्रमणंशिशोर्बुध–गुरौशुक्रेष्वरिक्तातिथौ कन्याकुंभतुलामृगारिभवनेसौम्यग्रहालोकित–इति।। ।। अथप्रयोगः।। ।। तत्रायंक्रमः।। निष्क्रामस्तूर्यमासे–भवतिसुदिवसे मातृनांदी मुखांतेतच्चक्षुर्ऋक्प्रपाठैर्दर्शयति–सविताजातपुत्रस्यनार्याः।। कुर्यात्सर्वंविमंत्रं ग्रहमखमथवा–केचिदिच्छंतिविप्रान्भोज्यंदानादिकृत्यंभवतिविधिरयंसर्व–संस्कारमुख्यः।। ।। यथोक्तकालेशिशुनासहपितायथोक्तमंगलं–स्नात्वाऽहते वाससीपरिधायशुभासनेउपविश्याचम्यप्राणानायम्यदेश–कालौस्मृत्वाममास्यशिशोरायुः श्रीवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं–गृहान्निष्क्रमणंकरिष्ये।। तत्रनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंतदंगत्वेन–चस्वस्तिवाचनमातृपूजावसोर्द्धाराकरणमाभ्युदयिकंकरिष्ये।। इतिकृत्वा।। अत्रस्वस्तिवाचनांतेसवितापीयतामितिवदेत्।। ततः पितामातृगृहीतमलंकृतंशिशुंसवाद्यघोषंगृहाद्बहिरानीयसूर्यमुदीक्ष–यतितच्चक्षुरिति।। ।। ॐ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत्।। पश्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्यामशरदः शतम्भूयश्चशरदः शतात्।। कृतस्य–निष्क्रमणाख्यस्यकर्मणः सांगतासिद्ध्यर्थंस्मृत्युक्तान्दश–संख्याकान्ब्राह्मणान्भोजयिष्ये।। ततोब्राह्मणेभ्योदक्षिणांदत्वा–

तेषामाशिषोगृहीत्वायान्तुमातृगणाः सर्वइतिमातृणांविसर्जनं।। ।।
शिशोरस्मिन्नेवमासेशुभदिनेरात्रौ सुसमयेचंद्रदर्शनं कारयेत्।। ।।
ततः चंद्रार्कयोर्दिगीशानांदिशांचवरुणस्यच।। निक्षेपार्थमिदंद-
ध्मितेत्वांरक्षंतुसर्वदा।। अप्रमत्तंप्रमत्तंवादिवारात्रमथापिवा।।
रक्षंतुसततंतेत्वां देवाः शक्रपुरोगमाः।। इत्येवंशिशुरक्षणार्थं-
देवान्प्रार्थयेत्।। ।। इति निष्क्रमणसंस्कारः।। ।। अथभूम्युपवेशनं।।
।। प्रयोगपारिजाते।। पंचमेचतथामासेशिशुंभूमौनिवेशयेत्।।
तत्रसर्वेग्रहाः शस्ताभौमोप्यत्र विशेषतः।। उत्तरात्रितयंसौम्यंपुष्यर्क्षं-
शक्रदैवतं।। प्राजापत्यंचहस्ताश्चशस्तमाश्विनमित्रभमिति।। तच्च-
पंचमेमासेशुक्लपक्षेशुभतिथ्यादौपूर्वाह्णेगणपतिपूजनस्वस्ति-
वाचनंकृत्वा वाराहंकूर्ममनंतपृथ्वींचसंपूज्यगोमयोपलिप्त
भूमौरंगवल्लीमंडलंकृत्वातत्रशंखतूर्यादिमंगलगीतवाद्यघोषपुरः
सरमलंकृतंशिशुमुपवेशयेदेतैर्मंत्रैः।। रक्षैनंवसुधादेविसदा-
सर्वगतेशुभे।। आयुः प्रमाणंनिखिलंनिक्षिपस्वहरिप्रिये।। अचिरादा-
युषस्तस्ययेकेचित्परिपंथिनः।। जीवितारोग्यवित्तेषुनिर्दहस्वाचि-
रेणतान्।। धारिण्यशेषभूतानांमातस्त्वमधिकाह्यसि।। अजराचा-
प्रमेयाचसर्वभूतनमस्कृता।। त्वमेवाशेषजगतांप्रतिष्ठा चाश्रयाह्यसि।।
कुमारंपाहिमातस्त्वंब्रह्मातदनुमन्यतामिति।। ततोब्राह्मणान्संपूज्य-
तेभ्यश्चदक्षिणांदत्वाशिषोवाचयित्वानीराजनाद्युत्सवं कुर्यात्।।
एवंकुमार्याअपि।। ।। इतिभूम्युपवेशनं।। ।। अथान्नप्राशनसंस्कारः।।
।। तत्रतावत्तत्कालमाह।। ।। पारस्करः।। षष्ठेमासेन्नप्राशनमिति।।
जन्मतः षष्ठेमासेकुमारस्यान्नप्राशनाख्यंकर्मकुर्यादित्यर्थः।। नारदः।।
षष्ठेवाप्यष्टमेमासिपुंसांस्त्रीणांतुपंचमे।। सप्तमे मासिवाकार्यं-
नवान्नप्राशनंशुभं।। रिक्तांदिनक्षयंनंदाद्वादशीमष्टमीमिमाम्।।
त्यक्त्वान्यतिथयः श्रेष्ठाः सितजीवज्ञवासराः।। चंद्रवारंप्रशंसंतिकृष्णे-
चांत्यत्रिकंविनेति।। बृहस्पतिः।। पौष्णादितींदुहस्ताश्वि-

त्वाष्ट्रवैष्णववासवाः।। रोहिणीमैत्रतिष्याश्चवरुणश्चौत्तरात्रयं।। श्रविष्ठाचशुभाह्येतेषोडशान्नाशनेशुभाइति।। पौष्णरेवती।। अदितिः। पुनर्वसुः।। इंदुर्मृगः।। वासवंधनिष्ठा।। वरुणः शतभिषक्।। वसिष्ठः।। बालान्नभुक्तौव्रतबंधनेचराजाभिषेकेखलुजन्मधिष्ण्यं।। शुभंत्वनिष्टंसततं विवाहेसीमंतयात्रादिषुमंगलेष्विति।। बृहस्पतिः।। नवैधृतौव्यतीपातेविष्ट्यांगंडातिगंडयोः।। शूलेवज्रेनपरिघेबालान्न-प्राशनंशुभमिति।। षष्ठेमासिक्रियतेचेत्तदागुरुशुक्रमौढ्यबाल्यास्ता-धिकमासादिदोषश्चनास्ति।। ।। अथप्रयोगः।। ।। तत्रायंक्रमः।। अन्नप्राशोथनांदौश्रपयतिचचरुंपायसंचाथहुत्वातत्राघाराज्यभागौद्वितय-मथघृताद्देवदेवींतुवाजः।। प्राणाद्याः स्युश्चतस्त्रश्चरुतइह-हुनेत्स्विष्टकृत्भूर्भुवाद्याः सर्वास्ताविंशतिः स्युर्मुदितमथशिशुंप्राशये-द्धन्त हेम्ना।। पितासभार्यःशिशुनासहमंगलस्नानंकृत्वाहतवस्त्रं-परिधायासनेचोपविश्याचम्यप्राणानायम्य देशकालौ स्मृत्वाममास्य-शिशोर्मातृगर्भमलप्राशनशुद्ध्यर्थमन्नाद्यब्रह्मवर्चसतेजइंद्रियायु-र्बललक्षणफलसिद्धिबीजगर्भ समुद्भवैनोनिबर्हणद्वाराश्रीपरमेश्वरप्रीत्यर्थं अन्नप्राशनाख्यंकर्मकरिष्ये।। तत्रनिर्विघ्नार्थंगणपतिपूजनंत-दंगत्वेनस्वस्तिवाचनंमातृकापूजनमाभ्युदयिकश्राद्धंचकरिष्ये। इतिकृत्वा।। अत्रस्वस्तिवाचनांतेसविताप्रीयतामित्यूहः कार्यः।। ततः स्थंडिलेपंचभूसंस्कारपूर्वकंशुचिनामानंलौकिकाग्निप्रतिष्ठाप्य ब्रह्मोपवेशनादिकुशकंडिकां कुर्यात्।। ।। तत्रासादनेविशेषः।। क्षारकटुतिक्तकषायमधुराम्लान्सर्वान्षड्रसान्घृतपाचितमन्नादितैजस-पात्रेएकीकृतंततः पुस्तकशस्त्रवस्त्रादिशिल्पंचोपकल्पयेत्।। पवित्रच्छेदनाद्याज्यभागांतेआज्येनाहुतिद्वयंजुहुयात्।। ॐ देवींवाचमजनयंतदेवास्तांविश्वरूपाः पशवोवदंति।। सानोमंद्रेष-मूर्ज्जंदुहानाधेनुर्वागस्मानुपसुष्टुतैतुस्वाहा।। इदंवाचेनमम।। ॐ देवींवाचम० सुष्टुतैतु।। ॐ व्वाजोंनोऽअद्यप्रसुंवातिदानंव्वाजों-

देवाँ2ऽऋतुभिः कल्पयाति।। व्वाजोहिमासर्व्ववीरञ्जानुव्विश्वाऽ-
आशाव्वाजपतिर्जयेयथ्ं स्वाहा।। इदंवाचेवाजायन०।। ततः
स्थालीपाकेनचतस्रआहुतयः।। ॐ प्राणेनान्नमशीयस्वाहा।।
इदंप्राणाय०।। ॐ अपानेनगंधानशीयस्वाहा।। इदमपानाय०।। ॐ
चक्षुषारूपाण्यशीयस्वाहा।। इदंचक्षुषे०।। ॐ श्रोत्रेणयशोशीय-
स्वाहा।। इदंश्रोत्राय०।। ततः स्थालीपाकेनस्विष्टकृद्धोमः।।
ततोमहाव्याहृत्यादिप्राजापत्यांतानवाहुतयः।। ततः संस्रवप्राशनं।।
पवित्राभ्यां मार्जनं।। पवित्रप्रतिपत्तिः।। ब्रह्मणेपूर्णपात्रदानं।
प्रणीताविमोकः।। ततः सर्वान्नरसान्सर्वमन्नंचैकस्मिन्पात्रेउद्धृत्य-
सकृदेवहंतेतिमंत्रेणकुमारंप्राशयेत्।। ॐ [22]हन्त।। काम्यंतुभारद्वाज्या-
माथ्ंसेनवाक्प्रसारकामस्येत्यादिसूत्रोक्तमत्रानुसंधेयं।। अस्यान्नप्राशना-
ख्यस्य कर्मणः सांगतासिद्ध्यर्थंदशसंख्याकान् ब्राह्मणान्भोजयिष्ये।।
ततोबालंभूमावुपवेश्यतदग्रे पुस्तकशस्त्रवस्त्रादिशिल्पानिविन्यस्य-
जीविकापरीक्षांकुर्यात्।। शिशुः स्वेच्छयायत्प्रथमंस्पृशेत्सास्य[23]-
जीविकेतिविंद्यात्।। अस्यकर्मणः समृद्ध्यर्थं ब्राह्मणमेकंभोजयिष्ये।।
ततोब्राह्मणेभ्योदक्षिणांदत्वातेषामाशिषोगृहीत्वा यांतुमातृगणाइति-
मातृणांगच्छगच्छेत्यग्नेश्च विसर्जनंकृत्वाबंधुभिः सहभुञ्जीत।।
कुमार्याअप्येतदमंत्रकं कार्यं।। ।। इतिसंस्कारभास्करेअन्नप्राशन-
प्रयोगः।। ।। अथसंतत्यभावेदत्तकपुत्रस्वीकारः।। ।। तत्रतावद्-
ग्राह्याग्राहविचारमाह।। शौनकः।। ब्राह्मणानांसपिंडेषुकर्त्तव्यः
पुत्रसंग्रहः।। तदभावेऽसपिंडेषुअन्यत्रतुनकारयेदिति।। अत्रचस-
पिंडेष्वपिभ्रातृसुतोमुख्यः।। तदभावेसगोत्रः सपिंडोयः कश्चित्।।
तदभावेत्वसगोत्रः सपिंडः।। तदभावेत्वसपिंडः सगोत्रः।। तदभावे
सपिंडोऽसगोत्रोपि।। तत्रापिभागिनेयदौहित्रौवर्ज्यौ।। एवंविरुद्ध-
संबंधापत्यापुत्रत्वबुद्ध्यनर्हभ्रातृपितृव्यमातुलवर्जं।। विप्रादीनां-
त्रयाणांवर्णानांस्वसमानवर्णएव।। तत्रापिदेशभेदप्रयुक्त-

गुर्जरत्वादिजात्यासमानजातीयएव।। सर्वोपिसभ्रातृकएवग्राह्यः।।
तत्रापि ज्येष्ठपुत्रोनग्राह्योनदेयश्च।। शूद्रस्यतुभागिनेयदौहित्रावपिग्राह्यौ।।
।। अत्रमूलं।। भ्रातृणामेकजातानामेकश्चेत्पुत्रवान्भवेत्।।
सर्वेतेतेनपुत्रेणपुत्रिणोमनुरब्रवीत्।। अनेन वचनेनापुत्रस्यलोको
स्तिजायमानोवैब्राह्मणस्त्रिभिर्ऋणवान्जायतइत्यादिशास्त्रबोधि-
तस्याप्रजस्त्वप्रयुक्तदोषस्यनिवृत्तिर्विधिनाअस्वीकृतेनापिभ्रातृपुत्रेण-
पितृव्यस्य भवतीतिबोध्यते।। अतः पुत्रसदृशत्वाद्ग्राह्येषुमुख्य-
इतिज्ञाप्यते।। मुख्याभावेतत्सदृशः प्रतिनिधिरितिन्यायात्।।
नचास्मादेववाक्याद्विधिवत्प्रतिग्रहंविनैवतस्यपुत्रत्वमितिशंक्यं।। तथा
सतिऔरसदत्तकादिद्वादशविधपुत्रवदेतस्यपत्नीतः पूर्वमेवधन-
हारित्वपिंडदत्वौचित्येन।। पत्नीदुहितरश्चैवपितरौभ्रातरस्तथा।।
तत्सुतागोत्रजाबंधुरितितत्क्रमवाक्येभ्रातुरनंतरं भ्रातृसुतनिवेशानुपपत्तेः।।
तस्मात्पत्नीतः पूर्वंमदीयपिंडदानधनग्रहणेधिकारीकश्चिद्भव-
त्वितिकामनायांविधिवत्स्वीकृतएवतथाधिकारीभवतिनान्यथा।।
तादृशकामनायाअभावेतुपितृऋणापाकरणादिपारलौकिकमात्रार्थंदत्त
पुत्रोतग्राह्यः।। भ्रातृपुत्रेणैवतत्सिद्धेरित्येवनुवचनतात्पर्यं।। सर्वासामेक
पत्नीनामेकाचेत्पुत्रिणीभवेत्।। सर्वास्तास्तेनपुत्रेण पुत्रिण्योमनुरब्रवीत्।।
इतिवचनंतुसापत्नपुत्रस्यागृहीतस्यापिपुत्रत्वपिंडदानाद्यधिकारित्व-
विधायकम्।। तेनएकसपत्न्याः सपुत्रत्वेअन्यसपत्न्यापुत्रोनग्राह्यः।।
दौहित्रोभागिनेयश्चशूद्राणांविहितः सुतः।। ब्राह्मणादित्रये-
नास्तिभागिनेयसुतः क्वचित्।। नत्वेवैकंपुत्रंदद्यात्प्रतिगृह्णीया-
द्वेतिनज्येष्ठंपुत्रंदद्यादितिच।। अत्रौरसानेकपुत्रेणपुत्रदानंकार्यमितिवि-
धीयते।। तेनपूर्वदत्तकोगृहीतस्ततऔरसोजातस्तादृशानेकपुत्रेणदत्त-
एकलऔरसोवा नदेयः।। सधवयास्त्रियापत्यनुज्ञयापुत्रोगृहीतव्योदात-
व्यश्च।। भर्त्रनुज्ञाभावेतुनग्राह्योनदेयः।। एवंविधवयापिस्त्रियात्वयापुत्रः
स्वीकार्यइत्युक्त्वाभर्त्तरिमृतेग्राह्यः।। स्पष्टमीदृशानुज्ञाभावेभर्तृजीवन-

दशायांतन्मरणोत्तरमाप्तमुखाद्वापुत्रस्वीकारविषयकभर्त्रभिप्रायंज्ञातवत्यापि-
ग्राह्यइतिसर्वसंमतम्।। एतदुभयविधभर्त्रनुज्ञाभावेपितत्तच्छास्त्रान्नित्य-
काम्यव्रतादिधर्माचरणइवपुत्रप्रतिग्रहेपिनापुत्रस्यलोकोस्तीत्यादिसामान्य
शास्त्रादेवविधवायाअधिकारः।। नस्त्रीपुत्रंदद्यात्प्रतिगृह्णीया-
द्वान्यत्रभर्त्रनुज्ञानादितिवसिष्ठवाक्यंतु भर्त्रनुज्ञारहितांप्रतिपुत्रा
प्रतिग्रहाभ्यनुज्ञापरंनतुपुत्रप्रतिग्रहणनिषेधपरं।। शास्त्रप्राप्तनिषेधा-
योगात्।। अतस्तादृशस्त्रियाः पुत्रग्रहप्रतिबंधेनवृत्तिलोपपिंडविच्छे-
दादिकुर्वन्नरकभाग्भवतियोब्राह्मणस्यवृत्तौतुप्रतिकूलंसमाचरेत्।।
विट्भुजांतुकृमीणास्यादितिशास्त्रादि कौस्तुभेविस्तरः।। स्त्रीभिः
पुत्रस्वीकारे व्रतादिवद्विप्रद्वाराहोमादिकंकार्यं।। एवंशूद्रेणापि।। विप्रः
शूद्रदक्षिणामादाय वैदिकमंत्रैस्तदीयहोमादिकरोतितत्र शूद्रः
पुण्यफलभाग्भवति किंतुविप्रस्यैव प्रत्यवायः।। पुत्रंप्रतिगृह्यगृहीत्रा-
जातकर्माद्याश्चूडाद्यावासंस्काराः कार्यइति मुख्यपक्षः।।
असंभवेसगोत्रसपिंडेषुकृतोपनयनोपिविवाहितोपिदत्तकोभवति।।
असंजातपुत्रएवविवाहितोग्राह्यइतिमेभाति।। असपिंडसगोत्रेषुकृतो-
पयनएवेत्यपिभातिभिन्नगोत्रस्तुअकृतोपनयनएवग्राह्यः।। केचित्तु-
कृतोपनयनोपिभिन्नगोत्रोग्राह्यइत्याहुः।। ।। इतिग्राह्याग्राह्यविचारः।।
।। कथंग्राह्यइत्यपेक्षायामाह।। ।। शौनकः।। अपुत्रोमृतपुत्रोवा-
पुत्रार्थसमुपोष्यच।। वाससी कुंडलेछत्रमुष्णीषंचांगुलीयकं।।
दद्यादितिशेषः।। आचार्यधर्मसंयुक्तंवैष्णवंवेदपारगम्।। बर्हिः
कुशमयंचैवपालाशंचेध्ममेवच।। एतान्याहृत्यबधूंश्चज्ञाती-
नाहूययत्नतः। बंधूंश्चान्नेनसंपूज्यब्राह्मणांश्चविशेषतः।। अग्न्या-
धानादित्तंत्रंकृत्वाज्योत्पवनांतकम्। दातुः समक्षंगत्वातुपुत्रं-
देहीतियाचयेत्।। दानेसमर्थो दातास्मैयेयज्ञेनेतिपंचभिः।
देवस्यत्वेतिमंत्रेणहस्ताभ्याप्रतिगृह्यच।। अंगादंगात्यृचं जप्त्वाचा-
घ्रायशिशुमूर्धनि।। वस्त्रादिभिरलंकृत्यछत्रेणाच्छादितंशिशुम्।।

नृत्यगीतैश्चवाद्यैश्चस्वस्तिशब्दैश्चसंयुतः। गृहमेत्येध्ममाधाय-
चरुंहुत्वाविधानतः। यस्त्वाहृदेति द्वाभ्याचतुभ्यमग्नेत्यृचैकया।
सोमोददित्येताभिः प्रत्यृचंपंचभिस्तथा। स्विष्टकृदादि
शेषंचहोमंकृत्वासमापयेत्। दक्षिणांगुरवेदद्याद्याथाशक्तिद्विजोत्तमः।
नृपोराष्ट्रार्द्धमेवापिवैश्योरत्नशतद्वयं।। शूद्रःसर्वस्वमेवापि-
अशक्तश्चेद्यथाबलं।। बंधुभिः सहभुंजीतब्राह्मणांश्चविशेषतइति।।
।। इतिशौनकोक्तपुत्रप्रतिग्रहविधिः। ।। अयंचपुत्रप्रतिग्रहविधि-
र्बह्वृचविषयोबह्वृचगृह्यप्रतिपादकत्वाच्छौनकस्य ।। ।।
यजुर्वेदिनांतुपुत्रप्रतिग्रहमाह।। ।। बोधायनः।। पुत्रप्रतिग्रहं-
व्याख्यास्यामः शोणितशुक्रसंभवोमातृपितृनिमित्तकस्त-
स्यप्रदानपरित्यागविक्रयेषुमातापितरौभवतोनत्वेकंपुत्रंदद्यात्प्रति-
गृह्णीयाद्वासहिसंतानायपूर्वेषांनस्त्रीपुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्रानु-
ज्ञानाद्भर्त्तुः प्रतिग्रहीष्यन्नुपल्पयतेद्वेवाससीद्वेकुंडलेअंगुलीय-
कंचाचार्यंचवेदपारगंकुशमयंबर्हिः पर्णमयमिध्ममित्यथबंधूनाहूय
मध्येराजनिचावेद्यपरिषदिवागारमध्येब्राह्मणानन्नेनपरिविष्य पुण्याहंस्व-
स्त्यृद्धिमितिवाचयित्वाथदेवयजनोलेखनप्रभृत्याप्रणीताभ्यः कृत्वादातुः
समक्षंगत्वापुत्रंमेदेहीतिभिक्षेत ददामीतीतरः अतोहंपरिगृह्णामिधर्मा-
यत्वागृह्णामिसंतत्यैत्वागृह्णामीत्यथैनंवस्त्रकुंडलाभ्यामंगुलीयकेन चालं
कृत्यपरिधानप्रभृत्यग्निमुखंकृत्वापक्वान्नंजुहोति यस्त्वाहृदाकीरिणाम-
न्यमानइति पुरोनुवाक्यामनूच्ययस्मैत्वंसुकृतेजातवेदइतियाज्य-
याजुहोत्यथव्याहृतीर्हुत्वास्विष्टकृत्प्रभृतिसिद्धमाधेनुवरप्रदानाद्द-
क्षिणांददात्येवतेवाससीपरिधाय एतेकुंडलेएतच्चांगुलीयकंयद्यैवं-
कृत्वौरसः पुत्रउत्पद्यतेतुरीय भागेप्रभवतीतिहस्माहबौधायनइति।।
।। अथबह्वृचाधिकारिकः शौनकोक्तप्रकारेणपुत्रप्रतिग्रहप्रयोगः।।
।। तत्रतिथ्यादिमूहूर्त्त विचारः।। ज्योतिः सारसंग्रहे।। हस्तादिपंचक-
भिषग्वसुपुण्यभेषुसूर्येचभौमगुरुभार्गववासरेषु।। रिक्ताविवर्जित-

तिथिष्वलिकुंभलग्नेसिंहेवृषेभवतिदत्तपरिग्रहोयमिति।। पूर्वेद्युः कृतोपवासः पवित्रपाणिः सपत्नीकः शुभासनेउपविश्याचम्य-प्राणानायम्य लक्ष्मीनारायणादिदेवान्प्रणम्यगणेशंस्मृत्वादेश-कालौसंकीर्त्यममाप्रजस्त्वप्रयुक्तऋणापाकरणपुन्नामनरकत्राणद्वारा-श्रीपरमेश्वरप्रीत्यर्थंशोनकोक्तविधिनापुत्रप्रतिग्रहंकरिष्ये।। तदंगत्वेन-स्वस्तिवाचनमाचार्यवरणंतस्यमधुपर्केणार्हणंविष्णुपूजनंबंधु-वर्गब्राह्मणेभ्योन्नदानंचकरिष्ये।। तत्रादौनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजन-करिष्ये।। इतिकृत्वाचार्यमधुपर्कांते विष्णुपूजनार्थंहोमस्थंडिलात्पूर्वे तंडुलाष्टदलोपरिमहीद्यौरित्यादिकलशस्थापनविधिना कलशं-संस्थाप्यतदुपरिहेमींविष्णुप्रतिमांविष्णुशिलावापुरुषसूक्तविधि-नासंपूज्यपितृणां कुलदेवतानांगुरूणांचप्रीत्यर्थंब्राह्मणान्बंधूं-श्चभोजयिष्यइतिसंकल्पयेत्।। ततआचार्यः यजमानानुज्ञयापुत्र-प्रतिग्रहांगत्वेनविहितंहोमंकरिष्यइतिसंकल्प्य स्थंडिलेपंच-भूसंस्कारपूर्वकमग्निप्रतिष्ठाप्य।। अस्मिन्दत्तपुत्रप्रतिग्रहाख्येकर्मणि-देवतापरिग्रहार्थमन्वाधानं करिष्ये।। अस्मिन्नन्वाहितेग्नौपूर्वेपूर्वेण ब्रह्मणोगमनं।। उत्तरतः पात्रासादनं।। द्वेपवित्रे।। ताम्रमयीआज्य-स्थाली।। ताम्रमयीचरुस्थाली। पालाश्यः समिधः।। प्रांच्यावा-घारौसमिद्धतमेआज्यभागौ।। पूर्णपात्रं।। एतान्वैकल्पिक-पदार्थानहंकरिष्ये।। अथदेवताभिध्यानं।। तत्रप्रजापतिमिंद्रम-ग्निसोममाज्येनैकैकयाहुत्या।। अत्रप्रधानं।। सकृदग्नि-सूर्यासावित्रींषड्वारंचरुणाअग्निवायुसूर्यं प्रजापतिं चाज्येन।। शेषेणस्विष्टकृतं।। अग्निवायुं सूर्यमग्नीवरुणावग्नीवरुणावग्नि वरुणंसवितारंविष्णुंविश्वान्देवान्मरुतः स्वर्क्कान्वरुणमादित्य-मदितिंप्रजापतिमेताअंगप्रधानार्थदेवताआज्येनैकैकयाहुत्यायक्ष्ये।। ततोदक्षिणतो ब्रह्मासनादिप्रोक्षण्याः प्रत्युत्पवनांतंकृत्वाऽऽचार्यादि-ब्राह्मणैः सहदातुः समक्षंगच्छेत्।। आचार्योदातारंप्रत्यस्मैपुत्रं-

देहीतियाचयेत्।। ततोदातादादामीत्युक्त्वाचम्यप्राणानायम्यदेश–
कालौसंकीर्त्यश्रीपरमेश्वरप्रीत्यर्थंपुत्रदानं करिष्ये।। तत्रनिर्विघ्नता–
सिद्ध्यर्थंगणपतिपूजनंकरिष्ये।। गणानांत्वेतिमंत्रेणयथालाभोप–
चारैर्गणपतिंसंपूज्ययथाशक्तिचंदनादिनाप्रतिग्रहितारंसंपूज्य।।
येयज्ञेनेतिपंचानांनाभानेदिष्ठोमानवोविश्वेदेवास्त्रिष्टुप्पंचम्यनुष्टुप्पुत्र–
दानेविनियोगः।। ॐ येयज्ञेनदक्षिणयासमक्ताइंद्रस्यसख्य–
ममृतत्वमानश।। तेभ्योभद्रमंगिरसोवोऽअस्तुप्रतिगृभ्णीतमानवं–
सुमेधसः।। यऽउदाजन्पितरोगोमयं वस्वृतेनभिंदन्परिवत्सरेबलं।।
दीर्घायुत्वमंगिरसो०।। यऽऋतेनसूर्यमारोहयन्दिव्यप्रथय–
न्पृथिवींमातरंवि।। सुप्रजास्त्वमंगिरसो०।। अयन्नाभावदतिवल्गुवो–
गृहेदेवपुत्राऋषयस्तच्छृणोत्तन।। सुब्रह्मण्यमंगिरसो०।। विरूपा–
सऽइदृषयस्तऽइद्गंभीरवेपसः।। तेऽअंगिरसः सूनव स्तेऽअग्नेः
परिजज्ञिरे।। 5।। इतिऋक्पंचकांतेइमंपुत्रंतवपैतृकऋणापाकरण–
पुन्नामनरकत्राणसिद्ध्यर्थंआत्मनश्चश्रीपरमेश्वरप्रीत्यर्थंतुभ्यमहंसं–
प्रददेनममप्रतिगृह्णातुपुत्रंभवानित्यं तेप्रतिगृहीतृहस्तेजलंक्षिपेत्। ततः
प्रतिगृहीतादेवस्यत्वेतिमंत्रेणहस्तद्वयेनप्रतिगृह्यस्वांकेउपवेश्य
अंगादंगादितिशिशुमूर्धन्याजिघ्रेत्।। ॐ अंगादंगात्संभवसिहृदया–
दधिजायसे।। आत्मावैपुत्रनामासिसजीवशरदः शतम्।। ततोयुवा–
सुवासाइतिवस्त्रंपरिधाप्यतूष्णीमुष्णीषंबध्वाकुंकुमादिनातिलकं–
कृत्वाहिरण्यरूपाइतिकुंडलाभ्यामलंकृत्यछत्रेणाच्छादितं
बालंनृत्यगीतवाद्यैः स्वस्तिनइत्यादिभिर्मंत्रैश्चस्वगृहमानीयहस्तौपादौ–
प्रक्षाल्याचम्याग्नेः पश्चिमतोमातुरुत्संगेस्वदक्षिणतोबालमुपवेश्याचार्य–
दक्षिणतः स्वयमुपविशेत्।। ततआचार्यउपयमनकुशानादायेत्याद्या–
ज्यभागांतेचरुमभिघार्य। यस्त्वाहृदेतिद्वयोरात्रेयोवसुश्रुतोग्नि–
स्त्रिष्टुप्पुत्रप्रतिग्रहांगहोमेविनियोगः।। ॐ यस्त्वाहृदाकीरिणा–
मन्यमानामर्त्यंमर्त्योजोहवीमि।। जातवेदोयशोऽअस्मासुधे–


हिप्रजाभिरग्नेऽअमृतत्वमस्यां।। यस्मैत्वंसुकृतेंजातवेदऽउलोक-
मग्नेंकृणवंः स्योनं।। अश्विनंसपुत्रिणंवीरवंतंगोमंतरयिन्नं-
शतेस्वस्तिस्वाहा।। इदमग्नयेनममेतियजमानः।। तुभ्यमग्नइत्यस्य-
सूर्यासावित्रीसूर्यासावित्र्यनुष्टुप्पुत्रप्र०।। ॐ तुभ्यमग्नेपर्यव-
हन्त्सूर्यांवंहतुनांसह।। पुनः पतिंभ्योजायांदाअंग्नेप्रजयांसहस्वाहा।।
इदंसूर्यासावित्र्यैन०।। सोमोददिदितिपंचानांसूर्यासावित्रीसूर्यासावित्री-
आद्येद्वेअनुष्टुभौतृतीयाजगती चतुर्थीत्रिष्टुप्पंचम्यनुष्टुप्पुत्रप्र०।। ॐ
सोमोददद्गंधर्वायगंधर्वोददद्ग्नयें।। रयिंचंपुत्राँश्चांदादग्निर्मह्यमथोंऽइ-
मांस्वाहा।। इदंसूर्यासावित्र्यैनमम।। ॐ इहैवस्तंमावियौष्टं-
विश्वमायुर्व्यंश्नुतं।। क्रीडंतौपुत्रैर्नप्तृंभिर्मोदंमानौस्वेगृहे स्वाहा।।
इदंसूर्यासावित्र्यैन०।। ॐ आनंः प्रजांजंनयतुप्रजापंतिराजरसाय
समंनक्त्वर्यमाः।। अदुंर्मंगलीः पतिलोकमाविंशशन्नोंभवद्विपदेशं
चतुंष्पदेस्वाहा।। इदंसूर्यासावित्र्यैन०।। ॐ अघोंरचक्षुरपंतिघ्न्ये-
धिशिवापशुभ्यंः सुमनांः सु वर्च्चाः।। वीरसूर्द्देवकांमा-
स्योनाशन्नोंभवद्विपदेशंचतुंष्पदेस्वाहा।। इदंसूर्यासावित्र्यैनमम।। ॐ
इमांत्वमिंद्रमिढ्वः सुपुत्रांसुभगांकृणु।। दशांस्यांपुत्रानाधेंहि-
पतिंमेकादशंकृंधिस्वाहा।। इदंसूर्यासवित्र्यैनमम।। 6।।
ततोव्यस्तसमस्तव्याहृतिभिराज्यंहुत्वास्विष्टकृदादिप्रणीताविमोकांतं-
होमशेषंसमाप्याचार्यंयथाशक्तिवस्त्रालंकारादिभिः पूजयित्वातस्मै-
धेनुंदद्यात्।। ब्राह्मणेभ्योदक्षिणां दत्वासभ्यान्गंधादिभिः संपूज्य
तेभ्योवस्त्रादिदक्षिणांदत्वा तेषामाशिषोगृहीत्वा विप्रान्भोजयेत्।।
कर्मणः संपूर्णतांवाचयित्वा ईश्वरार्पणंकुर्वीत।। इतिशौनकोक्त-
पुत्रपरिग्रहप्रयोगः।। ।। अथयजुर्वेदिनांबौधायनोक्तरीत्याप्रयोगः।।
तत्रराज्ञः शिष्टानांबंधूनांचानुमतिंलब्ध्वासंकल्पाद्याचार्यपूजनांतं-
प्राग्वत्कुर्यात्।। ब्राह्मणभोजनसंकल्पांतेआचार्योदेवयजनोल्लेखनादि
आप्रणिताभ्यःकुर्यात्।। ग्रहीतादातुः समक्षंगत्वापुत्रंमेदेहीतिस्वय

मेवभिक्षेत्।। दातादवामीत्याह।। दातुः संकल्पादिपुत्रदानांतंपूर्ववत्।।
ग्रहीताधर्मायत्वागृह्णामि संतत्यैत्वागृह्णामीतिपरिगृह्यैनंपुत्रंवस्त्र-
कुंडलांगुलीयकैरलंकुर्यात्।। आचार्यः कुशमयंबर्हिः पालाशमिध्-
मंचसंपाद्यपरिधानप्रभृतिअग्निमुखंकृत्वाचरुश्रपणासादनांतेपूर्वां-
गहोमंकृत्वायस्त्वाहृदाकीरिणेतिपुरोनुवाक्यामुक्तायस्मैत्वंसुकृतेइतिया-
ज्ययाहुत्वाव्यस्तसमस्तव्याहृतीर्हुत्वास्विष्टकृदादिकुर्यात्।।
आचार्यायदक्षिणा वस्त्रकुंडलांगुलीयकंचदद्यादिति।। ।। इति-
बौधायनोक्तरीत्यापुत्रप्रतिग्रह प्रयोगः।। ।। अथदत्तकोपयोगि-
संक्षिप्तगोत्रादिनिर्णयः।। ।। परगोत्रोत्पन्नदत्तकस्योपनयनमात्रेपालक-
गोत्रेणकृतेउपनयनोत्तरंप्रतिग्रहेवादत्तकेनाभिवादनश्राद्धादिकर्म-
सुगोत्रद्वयोच्चारः कार्यः।। चूडादिसंस्कारेपालकेनकृते पालकैक-
गोत्रएवविवाहेतुसर्वदत्तकेनजनकपालकयोरुभयोरपिपित्रोर्गोत्र-
प्रवरसंबंधिनीकन्यावर्जनीया।। नात्रसाप्तपौरुषंपांचपूरुषमित्ये-
वंपुरुषनियमउपलभ्यते।। सापिंड्यंतुजनकगोत्रेणोपनयनेजनक-
पितृमात्रोः कुलेसाप्तपुरुषं पांचपुरुषंग्रहीतृमातृपितृकुलेत्रिपुरुषं।।
ग्रहीतृगोत्रेणोपनयनमात्रेकृतेउभयत्र पांचपुरुषंपितृकुले।। मातृकुले-
तुत्रिपुरुषं।। जातकर्माद्युपनयनांतसंस्कारेग्रहीत्राकृतेग्रहीतृ-
कुलेसाप्तपुरुषं।। मातृतःपंचपुरुषंअतोन्यूनंजनककुलेकल्प्यं।।
केचित्तुदत्तकप्रवेशेकुलद्वयेपिसर्वथान्यूनमेवसापिंड्यंमित्याहुः। एवं
दत्तकसंग्तेरपिसापिंड्यंज्ञेयं।। दत्तकस्यमरणे पूर्वापरपित्रोस्त्रिरात्रम्।।
सपिंडानामेकाहमाशौचम्।। उपनीतदत्तकमरणादौपालकसपिंडानां-
दशाहादीतिनीलकंठीयेदत्तकनिर्णये।। एवंदत्तकेनापिपूर्वापर-
पित्रोर्मृतौत्रिरात्रं।। पूर्वापरसपिंडानांमरणेएकाहम्।। पित्रो-
रौर्ध्वदेहिककरणेतुकर्मांगंदशाहमेव।। दत्तकस्यपुत्रपौत्रादेर्जन-
नमरणयोः सपिंडानामेकाहः।। सगोत्रसपिंडेदत्तीकृतेतु-
सर्वेषांदशरात्रमेव।। पत्नीदुहित्रादिसत्वेपिदत्तकएवपितृधन-

भागीभवति।। दत्तकग्रहणोत्तरमौरसेजाते दत्तकश्चतुर्थांशभागीन-
समभागी।। केचित्तुप्रतिग्रहीत्राजाताद्युपनयनांत संस्कारविधाने-
चकृतेऔरससमानांशभागित्वम्।। संस्कारमात्रकरणेविधा-
नाभावेविवाहमात्रलाभोनान्यधनलाभः।। कतिपयसंस्कार-
करणेचतुर्थांशलाभइत्याहुः।। दत्तसत्वेप्यौरसस्यैवपित्रोः पिंडदाने-
धिकारः।। जनकस्यपिंडदाभावेदत्तएवजनकपालकयोरुभयो-
रपिश्राद्धंकुर्यात्।। धनंचोभयोर्गृह्णीयादितिनीलकंठीये।। एवंदत्त-
कन्यायाअपिस्वीकारउक्तविधिनाकार्यः।। तत्रपरगोत्रोत्पन्ना-
याग्रहणेविवाहेगोत्रद्वयवर्जनंप्राग्वत्।। पुत्रपत्योरभावेदत्तकन्यैवपितृ-
धनभागिनी।। इतिदत्तकोपयोगिसंक्षिप्तगोत्रादिसर्वनिर्णयः।। ।।
अथकर्णवेधसंस्कारः।। ।। तत्र कालंतत्क्रियांचाहुः।। ।। याज्ञिकाः।।
।। अथकर्णवेधोवर्षेतृतीयेपंचमेवापुष्येंदुचित्राहरिरेवतीषु-
पूर्वाह्णेकुमारस्यमधुरंदत्वाप्रत्यङ्मुखायोपविष्टायदक्षिणंकर्णमभिमंत्रयते
भद्रंकर्णेभिरितिसव्यंवक्ष्यंतीवेदितिचाथभिद्यात्ततोब्राह्मणभोजन-
मिति।। ।। मदनरत्ने।। प्रथमेसप्तमेमासिअष्टमेदशमेपिवा।।
द्वादशेचतथाकुर्यात्कर्णवेधंशुभावहमिति।। ।। तृतीयादि-
वत्सरेचनियममाह।। ।। व्यासः।। कार्तिकेपौषमासेवाचैत्रेवा-
फाल्गुनेपिवा।। कर्णवेधंप्रशंसंतिशुक्लपक्षेशुभेदिनइति।। ।।
तिथीराह।। मदनरत्नेबृहस्पतिः।। द्वितीयादशमीषष्ठीसप्तमी-
चत्रयोदशी।। द्वादशीपंचमीशस्तातृतीया कर्णवेधनइति।। ।। आर्यः
पुष्यः।। ।। कश्यपः।। शुभयोगेषुसर्वेषु कर्णवेधः शुभावहइति।।
।। लग्नव्यवस्थामाह।। ।। नारदः ।। वृषभेमिथुने मीने-
कुलीरेकन्यकासुच।। तुलाचापेतुकुर्वीतकर्णवेधंशुभंद्वये।।
मेषश्चमकरश्चैवमध्यमौगुरुणोदितौ।। सिंहवृश्चिककुंभाश्च
अधमत्वाद्विवर्जिताइति।। ।। अत्रसूचीव्यवस्थामाह।। बृहस्पतिः।।
सौवर्णीराजपुत्रस्यराजतीविप्रवैश्ययोः।। शूद्रस्यचायसीसूचीमध्य-

माष्टांगुलात्मिकेति।। बालस्यमध्यमांगुलिमध्यपर्वमितां-
गुलेनाष्टांगुलेत्यर्थः।। ।। वृद्धिमानमाह।। ।। हेमाद्रौदेवलः।।
कर्णरंध्रे रवेश्छायानविशेदग्रजन्मन।। तंदृष्ट्वाविलयंयांति-
पुण्यौघाश्चपुरातनाइति।। स्त्रीणांतुयथेच्छं।। ।। अथप्रयोगः।। ।।
यथोक्तकालेकृतमंगलस्नानअहतवाससीपरिधायधृततिलकः-
शुभासनेप्राङ्मुखउपविश्याचम्य प्राणानायम्यदेशकालौस्मृत्वाऽ-
स्यकुमारस्यायुरभिवृद्धिद्वाराश्रीपरमेश्वप्रीत्यर्थं कर्णवेधंकरिष्ये।।
तत्रनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंतदंगत्वेनचविष्णुरुद्रब्रह्मसूर्यचंद्रादि-
दिक्पालानांसत्यसरस्वतीगोब्राह्मणगुरूणांचयथाविभवं पूजनंकरिष्य-
इतिसंकल्प्यगणपतिंविष्ण्वादिदेवांश्चसंपूज्यवरासनेशुक्लांबरेधृतांधात्री-
मुपवेशयेत्।। तदुत्संगेसांत्वितमलंकृतंप्रत्यङ्मुखंबालमुपवेशयेत्।।
तस्मैशर्करादिमधुरंदत्वाभद्रंकर्णेभिरितिमंत्रेणदक्षिणंकर्णम-
भिमंत्र्यवक्ष्यंतीवेदितिमंत्रेणसव्यकर्णस्याभिमंत्रणंकुर्यात्।। ॐ
भद्रंकर्णे०।। ॐ वक्ष्यन्तीव्वेदागनीगन्तिकर्णम्प्रियꣳ सखायं-
म्परिषस्वजानाः।। योषेवशिङ्क्तेव्विततताधिधन्वञ्ज्याऽइयꣳ समने-
पारयन्ति।। इत्यभिमंत्र्यकुमारकर्णवेधस्थलमालक्तरसेनांकयित्वा-
सूत्रोपेतयायथोक्तसूच्यादक्षिणं कर्णंवेधयेत्।। ततोवामं।।
स्त्रीणांतुपूर्वंवामंवेधयेत्।। ततोयथाशक्तिब्राह्मणान्भोजयित्वातेभ्यश्च
दक्षिणांदत्वातेषामाशिषोगृहीत्वागणपत्यादिदेवान्विसृज्यकर्ण-
वेधनक्षत्रात्तृतीयनक्षत्रेकर्णक्षालनमुष्णवारिणारोहणार्थंकार्यं।।
रुठौचकर्णौयथाभरणधरणक्षमता भवतितथावर्धनीयाविति।। ।
इतिसंस्कारभास्करेकर्णवेधप्रयोगः।। ।। अथबाल-
स्यदुष्टदृष्टिदोषादौरक्षाविधिः।। पारिजातेकपिलसंहितायां।
शिशुसंरक्षणार्थायाऽशुभग्रहनिवारिणीम्।। रक्षां संध्या-
सुकुर्वीतनिंबसर्षपगृंजनैः।। फलीकरणसंमिश्रैः करंजैरवलोकने।।
वचो धरान्नदेशेषुबालग्रहविमुक्तये।। वासुदेवोजगन्नाथः

पूतनातर्जनोहरिः।। रक्षतुत्वरितोबालंमुंचमुंचकुमारकं।। कृष्णरक्ष–
शिशुंशंख मधुकैटभमर्दन।। प्रातः संगवमध्याह्नसायाह्नेषुच
संध्ययोः।। महानिशिसदा रक्षकंसारिष्टनिषूदन।। यद्गोरजः
पिशाचांश्चग्रहान्मातृग्रहान्पि।। बालग्रहान्विशेषेणछिंधिछिं–
धिमहाभयात्।। त्राहित्राहिहरेनित्यंत्वद्रक्षाभूषितंशिशुं।। इतिभस्मा–
भिमंत्र्यैवभूषयेत्तेनभस्मना।। शिरोललाटाद्यंगेषुरक्षांकुर्याद्यथा–
विधि।। मंत्रसंरक्षणादेवंशिशुः संवर्धतेऽन्वहमिति।। वचनकाले–
धरारिंगणकाले अन्नप्राशनकालेवृक्षादिच्छायादेशेचदुष्टदृष्ट्य–
वलोकनेनिमित्तेकरंजांतद्रव्यैरक्षांकुर्वीतेत्यन्वयः।। यद्गोरजइति
गोरजसः प्रार्थनाप्रतीतेर्गोरजः सहितभस्माभिमंत्रणंद्रष्टव्यम्।। ।।
इतिसंस्कारभास्करेदृष्टिदोषरक्षाविधिः।। ।। बालस्यस्खलनादौरक्षा–
विधिः।। ।। हरिवंशे।। नंदोंकमेनमारोप्यभूरेणुंपरिगृह्यच।। शिरः
प्रदक्षिणंकुर्वन्मंत्रमेनंजजापह।। विष्णुस्तेपूर्वतः पातुरुद्रोरक्षतुदक्षिणे।।
ब्रह्माचपश्चिमेपायाच्चंद्रोरक्षत्वथोत्तरम्।। उपरिष्टात्तथा सूर्यः पायाच्चा–
धश्चवासुकिः।। पायादूर्ध्वमधोवत्सशिष्टाःकाष्ठाः समीरणः।।
स्वस्तिकरोतुभगवान्पिनाकीवृषभध्वजः।। गावोरक्षंतुसर्वत्रभूमिः
पातुसदाशिवा।। एवमुच्चार्यनंदस्तुकृष्णंपस्पर्शसर्वतः।। एषमंत्रोहि–
बालानांरक्षायैपरिकीर्तितः।। इतिसंस्कारभास्करेस्खलनादौरक्षा–
विधिः।। ।। बालरोदनपरिहारार्थंयंत्रं।। ।। मयूखे।। षडस्रमध्ये–



ह्रींकारस्तन्मध्येशिशोर्नामविलिख्यषट्कोणेषु।। ॐ लुलुबस्वाहेति-
मंत्रषडक्षराणिविलिख्य तद्बहिर्नेमिवद्वृत्तद्वयंविलिख्यतद्बहिरधोमुखैर्-
र्धचैद्द्रावेष्ट्यंपंचोपचारैः संपूज्यबालहस्तेबध्नीयादिति।। बालग्रहशां-
त्यादिकंबालग्रहस्तवश्चशांति कमलाकरशांतिमयूखयोर्द्रष्टव्यं।। ।।
इतिसंस्कारभास्करेबालरोदनपरिहारार्थंयंत्रं।। ।। अथवर्धापन-
विधिः।। ।। तत्रनिर्णयः।। सचवर्षपर्यंतंप्रतिमासं जन्मतिथौकार्यः।।
वर्षोत्तरंप्रत्यब्दंजन्मतिथौकार्यः।। तिथिद्वैधेयत्रजन्मर्क्षयोगः साग्राह्या।
दिनद्वयेजन्मनक्षत्रयोगसत्वासत्वयोरौदयिकीद्विमुहूर्ताधिकाग्राह्या।।
द्विमुहूर्तन्यूनत्वेपूर्वा।। जन्ममासाधिमासत्वेशुद्धेमासेप्रत्याब्दिकव-
र्धापनविधिर्नत्वधिके।। इदंवर्धापनंयावद्बाल्यंतावत्पित्रादिभिः
कार्यंपश्चात्तुप्रतिवर्षंस्वयमेवेति।। ।। अत्रकर्त्तव्यतोक्तागर्गसंहितायां।।
सर्वैश्चजन्मदिवसेस्नानैर्मंगलवारिभिः।। गुरुदेवाग्निविप्राश्चपूजनीयाः
प्रयत्नतः।। स्वनक्षत्रंचपितरौतथादेवः प्रजापतिः।। प्रतिसंवत्सरंचैव-
कर्त्तव्यश्चमहोत्सवः।। गुडदुग्धतिलान्दद्याज्जन्मग्रंथेश्चबंधनं।।
सर्वपदेनशूद्राणामपिसंग्रहः।। देवतात्रगणपत्यादिः।। बंधन-
मित्यत्रकुर्यादितिशेषः।। तदुपयोगिद्रव्याण्यपितत्रैवोक्तानि।।
गुग्गुलंनिंबसिद्धार्थदूर्वागोरोचनायुतमिति।। उक्तपंचद्रव्यगर्भपोटलि-
काबंधनंदक्षिणहस्तेकार्यमित्याशयः।। अत्रमार्कंडेयादीनामा-
पिपूजोक्ताश्रीपतिव्यवहारे।। ततोदीर्घायुष्यंव्यासंरामं द्रौणिंकृपंबलिं।।
प्रह्लादंचहनूमंतंबिभीषणमथार्चयेत्।। संपूज्यदेवताः सर्वामहर्षिं-
प्रार्थयेत्ततः।। षष्ठींचदधिभक्तेनशेषावैपायसेनच।। लौकिकाग्नौ-
ततोहोमोदेवतानामभिस्तिलैः।। तिलतंदुलशुक्राणांदानंदद्याद्यथा-
विधि।। शुक्रंघृतं।। ततोगुडतिलैर्युक्तमंजल्यर्द्धंपयः पिबेत्।।
गुरुंसंपूज्य विधिवत्तस्मैदद्याच्चदक्षिणां।। अन्यानपियथाशक्ति-
ब्राह्मणांश्चैव भोजयेदिति।। ।। तद्दिननियमाश्चस्कांदे।।
खंडनंनखकेशानांमैथुनाध्वगमौ तथा।। आमिषंकलहंहिंसांवर्ष-

वृद्धौविवर्जयेदिति।। ।। अथप्रयोगः।। ।। जन्मदिवसेबालक-पत्नीसहितोयजमानः मगलस्नानंकृत्वाहतवाससीपरिधाया-चांतोगृहाभ्यंतरे शुभासने यथोक्तमुपविश्याचम्य प्राणानायम्य-श्रीगुर्वादीन्नत्वासुमुखश्चेत्यादिपठित्वा देशकालौसंकीर्त्या-स्यबालस्यायुष्याभिवृद्ध्यर्थंवर्धापनाख्यंकर्मकरिष्ये।। स्वयंकरणे-चममायुष्याभिवृद्ध्यर्थमित्यूहः।। तत्रनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनं-सदाचारात्पुण्याहवाचनंचकरिष्ये।। इतिकृत्वा।। देवदारुपीठेपंक्ति-रूपाक्षतपुंजेषुदेवताः स्थापयेत्।। ॐ गणपतयेनमः गणपतिआवाहयामिस्थापयामि।। सर्वत्रेत्थंप्रयोगः।। ॐ दुर्गायै०।। ॐ कुलदेवतायै०।। ॐ गुरुभ्यो०।। ॐ प्रजापतये०।। ॐ विष्णवे०।। ॐ महेश्वराय०।। ॐ अग्नये०।। ॐ विप्रेभ्यो०।। ॐ पितृभ्यो०।। ॐ सूर्याय०।। ॐ सोमाय०।। ॐ भौमाय० ॐ बुधाय०।। ॐ बृहस्पतये०।। ॐ शुक्राय०।। ॐ शनैश्चराय०।। ॐ राहवे०।। ॐ केतवे०।। ॐ पंचभूतेभ्यो०।। ॐ कालाय०।। ॐ युगाय०।। ॐ संवत्सराय०।। ॐ अयनाय०।। ॐ ऋतवे०।। ॐ मासाय०।। ॐ पक्षाय०।। ॐ जन्मतिथये०।। ॐ जन्मर्क्षाय०।। ॐ जन्मयोगाय०।। ॐ जन्मकरणाय०।। ॐ जन्मराशये०।। ॐ जन्मलग्नाय०।। ॐ शिवायै०।। ॐ संभूत्यै०।। ॐ प्रीत्यै०।। ॐ संतत्यै०।। ॐ अनुसूयायै०।। ॐ क्षमायै०।। ॐ वैष्णव्यै०।। ॐ भद्रायै०।। ततस्तदग्रे पंक्तिरूपाष्टदलानित्रीणिविरच्यतदुपरिदेवताः स्थापयेत्।। ॐ षष्ठीदेव्यै०।। ॐ मार्कंडयेयाय०।। ॐ जमदग्नये०।। पुनस्तत्पुरतः पंक्तिरूपेणाक्षतपुंजेषु।। ॐ व्यासाय०।। ॐ अश्वत्थाम्ने०।। ॐ परशुरामाय०।। ॐ कृपाचार्याय०।। ॐ बलये०।। ॐ प्रह्लादाय०।। ॐ हनुमते०।। ॐ विभीषणाय०।। पुनस्तदग्रेपंक्तिरूपाक्षतपुंजेषु।। ॐ स्थानदेवतायै०।। ॐ वास्तुदेवतायै०।। ॐ क्षेत्रपालाय०।।

ॐ पृथिव्यै०।। ॐ अद्भ्यः।। ॐ तेजसे०।। ॐ वायवे०।। ॐ आकाशाय०।। सर्वासांसमंतात्प्रागादिदिक्षुदशदिक्-पालान्स्थापयेत्।। ॐ इंद्राय०।। ॐ अग्नये०।। ॐ यमाय०।। ॐ निर्ऋतये०।। ॐ वरुणाय०।। ॐ वायवे०।। ॐ कुबेराय०।। ॐ ईशानाय०।। ॐ ब्रह्मणे०।। ॐ अनंताय०।। इत्यावाह्य।। मनोजूतिरिति प्रतिष्ठांकृत्वानाममंत्रेणपृथक्पृथक्सर्वासांपूजनं।। यद्वासर्वाएकतंत्रेणसंपूजयेत्।। तत्र नैवेद्यदानेषष्ठ्यैदधिभक्तं।। अन्येभ्यः पायसं।। ततः प्रार्थयेत्।। जगन्मातर्जगद्धात्रिजग-दानंदकारिणि।। प्रसीदमम कल्याणिनमस्तेषष्ठिदेवते।। रूपंदेहियशोदेहि भद्रंभगवति देहिमे।। पुत्रान्देहिधनं-देहिसर्वान्कामांश्चदेहिमे।। आयुः प्रदमहाभागसोमवंशसमुद्भव।। महातपोनिधिश्रेष्ठमार्कंडेयनमोस्तुते।। चिरंजीवोयथात्वंभोभविष्या-मितथामुने।। रूपवान्वित्तवानायुः श्रियायुक्तश्चसर्वदा।। मार्कंडेयनमस्तेस्तु सप्तकल्पांतजीवन।। आयुरारोग्यसिद्ध्यर्थं-प्रसीदभगवन्मुने।। चिरंजीवोयथात्वंभोमुनीनांप्रवरोद्विज।। कुरुष्वमुनि शार्दूलतथामांचिरजीविनं।। जमदग्ने महाभागमहातेजोमयोज्वल।। आयुरारोग्यसिद्ध्यर्थमस्माकंवरदोभव।। त्रैलोक्येयानिभूतानि-स्थावराणिचराणिच।। ब्रह्मविष्णुशिवैः सार्धंरक्षांकुर्वंतुतानिमे।। प्रीयंतांदेवताः सर्वाः पूजांगृह्णंतुताममम। प्रयच्छंत्वायुरारोग्यंयशः सौख्यंचसंपदः।। मंत्रन्यूनंक्रियान्यूनंद्रव्यन्यूनंमहामुने।। यदर्चितंमया-देवपरिपूर्णंतदस्तुमे।। अनयापूजयामार्कंडेयाद्यावाहितदेवताः प्रीयंतां।। ततः पायसेनसर्वेभ्योभूतेभ्यो नमइतिमंत्रेणसर्वभूतबलिंदद्यात्।। ततः स्थंडिलेपंचभूसंस्कारपूर्वकंलोकिकाग्निसंस्थाप्य ब्रह्मोपवेशना-द्याज्यभागांतेघृताक्ततिलैर्नाममंत्रेणषष्ठीदेवीमार्कंडेयजमदग्नीनां-प्रीत्यर्थमष्टाविंशतिसंख्ययावाष्टाष्टसंख्ययाशेषावाहितदेवतानामे-कैकयाहुत्यामहाव्याहृत्याष्टाविंशतिसंख्यया चजुहुयाच्छेषेणस्विष्ट-

कृच्च।। ततो भूराद्यानवाहुतयआज्येन।। ततः संस्रवप्राशनादिहोम-
शेषंसमाप्यतिलादिदानानिदद्यात्।। देयद्रव्यंब्राह्मणंचसंपूज्य-
कुशत्रयतिलजलान्यादायाद्यमदीयजन्मदिनेदीर्घायुः प्राप्त्यर्थंसुवर्ण-
युक्ततिलान्सोमदैवतान्यथानाम गोत्रब्राह्मणायतुभ्यमहंसंप्रददेनमम।।
तंडुलदानं।। तंडुलेभ्योनमइतितंडुलान्ब्राह्मणं चसंपूज्यकुशत्रय-
तिलतंडुलानादायअद्यमदीयजन्मदिनेदीर्घायुः प्राप्त्यर्थंएतान्सोप-
स्करान्तंडुलान्यथानामगोत्रब्राह्मणायतुभ्य०।। घृताय नमइतिघृतं-
ब्राह्मणंचसंपूज्यघृतंजलेन सिक्त्वाकुशजलमादायाद्यमदीय-
जन्मदिनेदीर्घायुः प्राप्त्यर्थंइदंघृतंप्रजापतिदैवतंयथानामगोत्राय-
ब्राह्मणायतुभ्यमहंसं प्रददेनमम। ततस्तिलगुडसहितंपयः पिबेत्।।
तत्रमंत्रः। अंजल्यर्धमितंक्षीरं संतिलंगुडमिश्रितं।। मार्कंडेयवरं-
लब्ध्वापिबाम्यायुर्विवृद्धये।। ततोगुरुंसंपूज्यतस्मैदक्षिणांदद्यात्।।
अन्येभ्योब्राह्मणेभ्यो यथाशक्तिदक्षिणांदत्वातेषामाशिषोगृहीत्वावा-
हितदेवताअग्निंचविसृज्ययथाशक्तिब्राह्मणान्भोजयित्वायस्यस्मृत्येति-
नत्वासुहृद्बंधुभिःसहस्वयंभुंजीतेति।। ग्रथांतरेतुमांगल्यस्नानंकृत्वा-
कुमुदांषष्ठीदेवींजन्मर्क्षदेवतांकुलदेवतांचसंपूज्यब्राह्मणान्संपूज्य
तेभ्यश्चापूपपूरिकाः साज्याः कुमुदादिदेवताप्रीतयेपुत्रायुर्वृद्धये-
चदत्वासुवासिनीभिर्नीराजितोधृतनूतनवस्त्रोब्राह्मणीभ्यः शिशुभ्यश्च-
अपूपपूरितानिवायनानिदद्यात्।। ब्राह्मणान्भोजयित्वातेभ्योदक्षिणां-
दत्वातेषामाशिषोगृहीत्वायांतुदेवगणाइतिदेवताविसृज्य यस्यस्मृत्येति
नत्वा स्वयंसुहृदादियुतोभुंजीतेति।। इतिसंस्कारभास्करेवर्धा-
पनप्रयोगः।। ।। अथगर्भाधानादिसंस्काराणांस्वकालातिक्रमे-
प्रायश्चित्तम्।। संतिगर्भाधानादिसंस्कारकर्माणिनियतकालानि तेषांयदि
दैववशात्पुरुषापराधाद्वाकालातिक्रमोभवतितदाचौलादर्वाक्त-
त्प्रायश्चित्तंकृत्वा गतकालीनसंस्काराः कार्याः।। तदुक्तंमनुना।।
जातकर्मादिसंस्काराः स्वकालेनकृतायदि।। चौलादर्वाक्प्रकुर्वीत-

प्रायश्चित्तादनंतरमिति।। ।। प्रायश्चित्तमाहकात्यायनः।। आरभ्याधा-
नमाचौलात्कालेतीतेतुकर्मणां। व्याहृत्याज्यंसुसंस्कृत्यहुत्वा-
कर्मयथाक्रमं।। व्यस्तैः समस्तैव्याहृत्या चत्वारिपंचवारुणम्।।
प्रतिसंस्कारलोपेतुहुत्वाज्येनपृथक्पृथगिति।। ।। प्रायश्चित्तान्तर-
मपिसएवाह।। एतेष्वेकैकलोपेतुपादकृच्छ्रंसमाचरेत्। चूडायाअर्ध-
कृच्छ्रंस्यादापदीत्येवमीरितं।। अनापदितुसर्वत्रद्विगुणंद्विगुणंचरेत्।।
लुप्ते कर्मणिसर्वत्रप्रायश्चित्तंविधीयते।। प्रायश्चित्तेकृतेपश्चाल्लुप्तकर्म-
समाचरेदिति।। ।। रेणुकारिकायामपि।। मुख्यकालेनरैः
कर्मयदिकर्त्तुंनशक्यते।। गौणकालेपिकर्त्तव्यंतदनादिष्टपूर्वकमिति।।
।। प्रायश्चित्तेकृतेपश्चाल्लुप्तकर्म कृताकृतमित्याश्वलायनकारिकायां-
यदुक्तंतत्ऋग्वेदिविषयंबोध्यम्।। ।। कात्यायनैस्तु प्रायश्चित्तेकृते-
पश्चाल्लुप्तकर्मसमाचरेदिति कात्यायनोक्तेर्लुप्तकर्मनिमित्तं-
प्रायश्चित्तंकृत्वा तत्कर्मकर्त्तव्यमेव।। स्मृत्यर्थसारेप्येवम्।। ।।
अथानादिष्टप्रायश्चित्तप्रयोगः।। ।। कर्त्ता चौलघस्रेप्रातर्यथोक्त-
कृतनित्यक्रियः कुमारेणसहमंगलस्नातः शुभासनेउपविश्याचम्य-
प्राणानायम्य देशकालौस्मृत्वास्यममकुमारस्य गर्भाधानाद्यन्न-
प्राशनांतसंस्काराणांवा जातकर्माद्यन्नप्राशनांतसंस्काराणां-
कालातिपत्तिदोषनिवृत्ति द्वाराश्रीपरमेश्वरप्रीत्यर्थमनादिष्टप्रायश्चित्तहोमं
करिष्येइतिसंकल्प्य स्थंडिलेपंचभूसंस्कारपूर्वकं लौकिकाग्नि-
स्थापयित्वास्थाल्यामाज्यं निरूप्याग्नावधिश्रित्यस्रुचंदर्भैः
संमृज्याज्यमुद्वास्य कुशतृणाभ्यामुत्पूयावेक्ष्य स्रुवेणादायोपरिसमिधं-
निधायोत्थाय सव्येकृत्वा दक्षिणेनाग्नौ तिष्ठन्समिधमाधायो
पविश्यजुहुयात्।। ॐ भूःस्वाहा।। इदमग्नयेनमम।। ॐ भुवः
स्वाहाइदंवायवे०।। ॐ स्वः स्वाहाइदंसूर्याय०।। ॐ भूर्भुवः
स्वः स्वाहाइदंप्रजापतयेनमम।। ॐ त्वोंअग्ने्व्वरुंण०।।
इदमग्नीवरुणाभ्यां०।। ॐ सत्वन्नों०।। इदमग्नीवरुणाभ्यां०।। ॐ

अयाश्चग्ने०।। इदमग्नये अयसे०।। ॐ येतेशतं०।। इदंवरुणायसवित्रे विष्णवे विश्वेभ्योदेवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च०।। ॐ उदुत्तमं०।। इदंवरुणायादित्यायादितये०।। इदंनवाहुतिहोमात्मकंप्रायश्चित्तं यत्रयत्रप्रायश्चित्तानादेशः कर्मणां नियतकालातिक्रमो वा तत्रतत्रवेदितव्यं।। इतिहुत्वापूर्वोक्तसंस्काराणां प्रमादादकरणेप्रत्येकं पादकृच्छ्रंकारयित्वातीतानिजातकर्मादीनिचकृत्वावक्ष्यमाणप्रकारेण चौलंकुर्यात्।। ।। यदोपनीत्यासाकंचौलंकुर्याच्चैत्तदोपनयनपूर्वेद्युः प्रातःकृतनित्यक्रियः कुमारेणसहमंगलस्नातः शुभासनेउपविश्या-चम्यप्राणानायम्यदेशादिकीर्तनांतेममास्यकुमारस्यगर्भाधानादि-चौलान्तसंस्काराणां वा जातकर्मादिचौलान्तसंस्काराणां-कालातिपत्तिजनितदोषनिवृत्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थमनादिष्ट-प्रायश्चित्तहोमंकरिष्यइतिसंकल्प्यपूर्वोक्तप्रकारेणहोमं कृत्वाचौला-तिरिक्तसंस्काराणांप्रमादादकरणेप्रत्येकंपादकृच्छ्रं चौलाकरणे ऽर्द्धकृच्छ्रंबुद्धिपूर्वकंतुचौलातिरिक्तकरणे प्रत्येकमर्द्धकृच्छ्रं चौलाक-रणे कृच्छ्रं प्रायश्चित्तं कुमारस्यकारयित्वातीतसंस्कारान्कृत्वा परेद्युश्चौलोपनयनेवक्ष्यमाणप्रकारेणकुर्यात्।। ।। तत्रेत्थंसंकल्पः।। देशकालौस्मृत्वास्यममकुमारस्यबीजगर्भसमुद्भवैनोनिबर्हण-पुंरूपताज्ञानोदयमातृगर्भांबुपानादिसर्वैनोनिरसनायुरभिवृद्धिपूर्वक-व्यवहारसिद्धिरायुर्मातृगर्भामंगलप्राशनशुद्धिद्वारा परमेश्वरप्रीत्यर्थंगर्भा-धानादि वा जातकर्माद्यन्नप्राशनान्तसंस्कारानेकतंत्रेणाद्यतथाच-बलायुर्वर्च्चोभिवृद्धिद्विजतासिद्धिपूर्वकवेदाध्ययनाधिकारार्थंश्वश्चौ-लोपनयने करिष्ये।। अत्रनांदीश्राद्धान्तंसकृदेव।। देशकालकर्त्रैक्यात्।। गणशः क्रियमाणानांमातृणांपूजनंसकृत्। सकृदेव भवेच्छ्राद्धंहोममंत्राः पृथक्पृथगितिकारिकोक्तेश्चेतिदिक्।। ।। अथचूडाकरणं।। ।। तत्रकालमाह।। पारस्करः।। सांवत्सरिकस्यचूडाकरणं।। संवत्सरोजातोयस्यतस्यबालकस्य चूडाकरणाख्यंकर्मकुर्यात्।।

तृतीयेवाप्रतिहते। अथवातृतीयेसंवत्सरेअपूर्णेचूडाकरणंकुर्यात्।। यथामंगलंवासर्वेषां।। अथवायथाकुलाचारंचूडाकरणंकार्यं।। यस्यकुलेसांवत्सरिकस्यकुर्वंतितस्यतथाकार्यं।। यस्यकुले तृतीयेब्दे चौलं कुर्वतितस्य तृतीये अपूर्णे कार्यमितिव्यवस्था।। यस्यकुलेनियमोनास्तितस्यविकल्पः।। ।। प्रयोगपारिजाते।। आद्येब्देकुर्वतेकेचित्पंचमेब्देद्वितीयके।। उपनीत्यासहैवेतिविकल्पाः कुलधर्मतइति।। नारदः।। जन्मतस्तुतृतीयेब्देश्रेष्ठमिच्छंति पंडिताः।। पंचमेसप्तमेवापिजन्मतोमध्यमं भवेत्।। अधमंगर्भतः स्यात्तन्न- वमैकादशेपिवेति।। कारिकायां।। संभवत्युदगयनेशुक्ल- पक्षेविशेषतइति।। नक्षत्राणितत्रैव।। अश्विनीश्रवणस्वातिचित्रा- पुष्यपुनर्वसु।। धनिष्ठारेवतीज्येष्ठा मृगहस्तेषुकारयेत्।। वर्ज्यतिथ्या- दिरपितत्रैव।। तिथिंप्रतिपदांरिक्तांपातंविष्टिं चवर्जयेत्।। वारांछनैश्चरा- दित्यभौमानांरात्रिमेवचेति।। सर्वेषामितिसर्वेषांवर्णानामित्यर्थः।। ।। मातरिरजस्वलायांतुविशेषमाह।। बृहस्पतिः।। प्राप्तमाभ्युदय- श्राद्धंपुत्रसंस्कारकर्मणि। पत्नीरजस्वलाचेत्स्यान्नकुर्यात्तत्पितातदेति।। अत्रपितेतिकर्तृमात्रोपलक्षणं।। ।। अत्रदोषमाहगर्गः।। विवाहोत्सवयज्ञेषुमातायदिरजस्वला।। तदासमृत्युमाप्नोतिपंचमेंदिवसं विनेति।। सुमुहूर्त्तांतरालाभेतुवाक्यसारे।। अलाभेसुमुहूर्त्तस्य- रजोदोषेउपस्थिते।। श्रियंसंपूज्यविधिवत्ततोमंगलमाचरेदिति।। ।। कुमारस्यमातरि गर्भिण्यां चूडाकरणं न कार्यं। तथा च बृहस्पतिः। गर्भिण्यांमातरिशिशोः क्षौरकर्मनकारयेत्।। व्रताभिषेकेप्येवंस्यात्कालो वेदव्रतेष्वपीति।। मदनरत्ने।। पुत्रचूडाकृतौमातायदि सागर्भिणीभवेत्।। शस्त्रेणमृत्युमाप्नोतितस्मात्क्षौरंविवर्जयेदिति।। एतदपवादोपितत्रैव।। सूनोर्मातरिगर्भिण्यांचूडाकर्मनकारयेत्।। पंचमाब्दात्प्रागूर्ध्वंतु- गर्भिण्यामपि कारयेत्।। सहोपनीत्याकुर्याच्चेत्तदादोषोनविद्यतइति।। ।। ज्वरितस्यकुमारस्यचौलंनकार्यं।। तदाहगर्गः।। ज्वरस्योत्पादनं-

यस्यलग्नंतस्यनकारयेत्।। दोषनिर्गमनात्पश्चात्स्वस्थोधर्मंसमाचरेदिति।।
अत्रलग्नमितिसर्वमंगलोपलक्षणं।। ।। अथप्रयोगः।। ।। तत्रायंक्रमः।।
चौलंस्यात्र्येकवर्षाद्युदितमथकुलान्मातरोबाह्यशालांत्रीन्विप्रान्भोज्य-
हुत्वामनुमितमुदकैश्चोंदनंदक्षिणेप्राक्।। त्रेण्याशलल्याविनी-
यत्रिकुशतरुणकंधार्यक्षूरैः सकेशांश्छित्वोक्ष्णोगोमयेस्यादिति-
वदपरयोः केशमेवंनृपाब्देति।। उदगयनेशुक्लपक्षेगुरुशुक्रयोर्बाल्य-
वार्द्धक्यास्तमयाभावेअक्षयेअनधिकेचमासिज्योतिः शास्त्रोक्तप्रशस्त
तिथिवारलग्नेसुमुहूर्तेबहिः शालायांशुभासनेउपविश्याचम्य-
प्राणानायम्यदेश कालौस्मृत्वाअस्यकुमारस्यबीजगर्भसमुद्भवैनो-
निबर्हणेनबलायुर्वर्चोभिवृद्धि द्वाराश्रीपरमेश्वरप्रत्यर्थंचूडाकरणाख्यं-
कर्मकरिष्ये।। तत्रनिर्विघ्नार्थंगणपतिपूजनंतदंगत्वेनचस्वस्तिपुण्याह-
वाचनंअविघ्नपूजनं मंडपस्थापनंमातृकापूजनं वसोर्द्धारांनांदीश्राद्धं-
करिष्यइतिकृत्वा।। अत्रपुण्याहवाचनांतेप्रजापतिः प्रीयतामित्यूहः
कार्यः।। ततोचूडाकरणाधिकारसिद्ध्यर्थंत्रीन्ब्राह्मणान्भोजयि-
ष्यइतिसंकल्प्यब्राह्मणत्रयंसंभोज्यस्थंडिलेपंचभूसंस्कारान्कृत्वातत्र-
सभ्यनाम्नो लौकिकाग्नेः स्थापनम्।। ततोमाताकुमारमादायाप्ला-
व्याहतेवाससीपरिधाप्यांकआधायपश्चादग्नेरुपविशति।। ततोवैकल्पि-
कावधारणं।। तत्र ब्रह्मणोगमनादिपूर्ववत्।। घृतपिंडप्रासनं।।
सकेशगोमयपिंडस्योदकांते प्रासनमित्यवधारणं।। ततोब्रह्मोपवेशनादि-
चरुवर्जपात्रासादनम्।। तत्रोपकल्पनीयानि।। शीतोदकं।। उष्णोदकं।।
नवनीतपिंडघृतपिंडदधिपिंडानांमध्येवधारितान्यतमं।। त्र्येणीशलली।।
सप्तविंशतिकुशतरुणानिताम्रपरिष्कृतआयसक्षुरः।। आनडुहगोमय-
पिंडः।। नापितः।। वरश्चेति।। पवित्रच्छेदनादिपवित्रनिधानांतंकृत्वा
दक्षिणंजान्वाच्यब्रह्मणान्वारब्धेस्रुवेणहोम।। मनसा ॐ
प्रजापतयेस्वाहाइदं प्रजापतयेनमम।। ॐ इंद्राय०।। इदंइन्द्राय०।।
ॐ अग्नये० इदमग्नये०।। ॐ सोमाय० इदंसोमाय०।। ॐ

भूः० इदमग्नये०।। ॐ भुवः० इदंवायवे०।। ॐ स्वः० इदंसूर्याय०।। ॐ त्वन्नोअग्ने० इदमग्नीवरुणाभ्यां०।। ॐ सत्वन्नोऽअग्ने० इदमग्नीवरुणाभ्यां०।। ॐ अयाश्चाग्ने० इदमग्नयेअयसे०।। ॐ येतेशतम्० इदंवरुणायसवित्रेविष्णवे-विश्वेभ्योदेवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च०।। ॐ उदुत्तमं ० इदंवरुणायादित्यायादितये०।। ॐ प्रजापतये० इदंप्रजापतये०।। ततः स्विष्टकृत्।। ॐ अग्नयेस्विष्टकृते० इदमग्नयेस्विष्टकृते०।। ततः संस्रवप्राशनादिब्रह्मणेपूर्णपात्रवरान्यतर-दानान्तंकृत्वैकस्मिन्पात्रेशीतास्वप्सूष्णाआप आसिंचति[24]।। ॐ उष्णेनवायउदकेनेह्यदितेकेशान्वपेत्यनेनमंत्रेण।। अथात्रनवनीत-पिडंघृतपिंडंदध्नोवाप्रास्यति।। ततआपआदायदक्षिणगोदानमुंद[25]ति।। ॐ सवित्राप्रसूता दैव्याऽआपऽउंदंतुतेतनूं।। दीर्घायुत्वायबलाय-वर्चसे।। इत्यनेनदक्षिणपार्श्वस्थकेशानामार्द्रीकरणं।। ततस्त्रेण्या-शलल्याविनीय[26]।। त्रीणिकुशतरुणान्यंतर्दधाति।। ॐ ओषधेत्रायस्व।। इत्यनेन।। शिवोनामेतिलोहक्षुरमादाय।। ॐ शिवोनामासिस्वधि-तिस्तेपितानमस्तेअस्तुमामाहिँ सीः।। निवर्तयामीति[27]प्रवपति।। ॐ निवर्तयाम्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वाय-सुवीर्याय।। ॐ येनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान्।। तेनब्रह्मणोवपतेदमस्यायुष्यंजरदृष्टिर्यथासं।। अनेनसकेशानिकुश-तरुणानिप्रच्छिद्यानडुहेगोमयपिंडेप्रास्यत्युत्तरतोध्रियमाणे।। एवंद्विरपरंतूष्णीं।। उक्तप्रकारेण दक्षिणगोदानेद्विवारंतूष्णीं कुर्यात्।। तद्यथा।। उंदनं।। विनयनं।। त्रीणिकुशतरुणांतर्धानं।। संलग्नीकरणं।। छेदनं।। एवंपुनरेकवारं।। एवमितरयोश्चोंदनादि।। पश्चिमोत्तर-योर्गोदानयोरुंदनादिचकारादेवमेवसकृन्मंत्रेणद्विस्तूष्णींकर्म कुर्यात्।। पश्चिमे।। ॐ सवित्राप्र०।। इत्येनोंदनं।। त्र्येण्याशलल्याविनयनं।। ॐ ओषधेत्रायस्वेतित्रिदर्भतृणांतर्द्धानं।। ॐ शिवोनामेतिलोहक्षु-

रग्रहणं।। ॐ निवर्तयामीतिसंलग्नीकरणं।। छेदनेमंत्रविशेषः।। ॐ त्र्यायुषंजमदग्नेरितिछेदनं।। गोमयपिंडेप्रासनं।। एवंद्विरपरंतूष्णीं।। उंदनं।। विनयनं।। त्रिदर्भतृणांतर्द्धानं।। संलग्नीकरणं।। छेदनं।। गोमयपिंडेप्रासनं।। एवमुत्तरगोदाने।। ॐ सवित्राप्रसूताइत्युंदन।। त्र्येण्याशलल्याविनयनं।। ॐ ओषधेत्रायस्वेतित्रीणिकुशत-रुणांतर्द्धानं।। शिवोनामेतिलोहक्षुरग्रहणं।। ॐ निवर्तयामीति-संलग्नीकणं।। छेदनेमंत्रविशेषः।। ॐ येनभूरिश्चरादिवंज्योक्च-पश्चाद्धिसूर्यं।। तेनतेवपामिब्रह्मणाजीवातवेजीवनायसुश्लोक्या-यस्वस्तये।। इतिछेदनं।। गोमयपिंडेप्रासन।। एवंद्विरपरंतूष्णीं।। उंदनं।। विनयनं।। त्रीणिकुशतरुणांतर्द्धानं।। संलग्नीकरणं।। छेदनं।। गोमयपिंडेप्रासनं।। ततस्त्रिःक्षुरेणशिरः प्रदक्षिणंपरिहरति[28] ।। ॐ यत्क्षुरेणमज्जयितासुपेशसावप्त्वावपतिकेशान्छिन्धिशिरोमास्यायुः प्रमोषीः।। इतिसकृन्मंत्रेणद्विस्तूष्णीं।। ततस्ताभिरद्भिः शिरः समुद्यनापितायक्षुरंप्रयच्छति।। ॐ अक्षण्वंपरिवपइत्यनेन।। सनापितोप्युदङ्मुखस्थस्यकुमारस्यप्राक्संस्थंप्राङ्मुखस्थस्यो-दक्संस्थंशिरोवपेत्।। यथामंगलंकेशशेषकरणं।। क्षुरसमर्पणा-नंतरंनापितेनवपनंकार्यंतत्रकेशानांशेषकरणंशिखार-क्षणंस्थापनंयथामंगलं यस्यकुलेयथा प्रसिद्धंतस्यतथैवशिखा-स्थापनंकार्यं।। अत्रकारिकायां।। केशशेषंततःकुर्या-द्यस्मिन्गोत्रेयथोचितं।। वसिष्ठादक्षिणेभागेउभयत्रापिकश्यपाः।। शिखा कुर्वंत्यंगिरसः शिखाभिः पंचभिर्युताः।। परितः केशपंक्तिर्वामुंडाश्च-भृगवोमताः।। कुर्वंत्यन्येशिखामात्रंमंगलार्थमिहक्वचित्।। लौगाक्षिः।। दक्षिणतः कंबूजवसिष्ठानामुभयतोत्रिकश्पानांमुंडाभृगवः पंचचूडा-अंगिरसोवाजसनेयिनामेकेति।। ।। ततः सर्वान्केशान्गोमयपिं-डेकृत्वातंगोमयपिंडंवस्त्रादिनावेष्ट्यअनुगुप्तंकृत्वागवांगोष्ठेपल्व[29]-लउदकांतेवास्थापयेत्।। ततश्चूडाकरणकर्मकर्तास्वाचार्यायवरंददाति[30] ।।

।। कृतस्यचूडाकरणकर्मसांगतासिद्ध्यर्थं स्मृत्युक्तान्दशसंख्याकान् ब्राह्मणान्भोजयिष्ये।। ब्राह्मणेभ्योभूयसींदत्वा तेषामाशिषो-गृहीत्वाकर्मसंपूर्णतां वाचयित्वायांतुदेवेतिमातृगणंविसर्जयेत्।। ।। इति संस्कारभास्करेचूडाकरणं।। ।। अथविद्यारंभः।। ।। तत्कालमाह।। ।। मार्कंडेयः।। प्राप्तेथपंचमेवर्षेअविसुप्तेजनार्दने।। षष्ठींप्रतिपदंचैववर्जयित्वातथाष्टमीं। रिक्तांपंचदशींचैवसौरि-भौमेदिनेतथा।। उत्तरायणगेसूर्ये कुंभमासंविवर्जयेत्।। एवं-सुनिश्चितेकालेविद्यारंभंतुकारयेदिति।। महेश्वरः।। हस्तादित्रितये-तथानिर्ऋतिभेपूर्वांत्यभेष्वश्विभेमित्रर्क्षेचमृगादिपंचसुशुभः प्रारंभआद्यः स्मृतः।। विद्यानांहरिभत्रयेचदिवसेसूरेर्भृगोर्वादिनेऽनध्यायाख्य तदाद्यवर्जिततिथौकेंद्रस्थितैः सद्ग्रहैरिति।। राजमार्तंडे।। विद्यारंभः प्रशस्तोभवतिमधुरिपौप्राप्तबोधे शशांकेशस्तेतीक्ष्णद्युतौ-चत्रिदशगतिगुरावुद्गतेचाथशुक्रे।। स्वाध्यायेसिंहसंस्थंखरकिरण-युतंदेवपूज्यंविहायशुक्रादित्येज्यवारेत्रिदशपथिगुरौकेंद्रसंस्थेतुपापे।। पापेनिषिद्धस्थानस्थिते।। ।। अक्षरारंभप्रकारस्तुमाधवीयेमार्कंडेयः।। ।। पूजायित्वाहरिंलक्ष्मींदेवीं चैवसरस्वतीम्।। स्वविद्यासूत्रकारांश्च-स्वविद्यांचविशेषतः।। एतेषामेवदेवानांनाम्नातुजुहुयाद्घृतं।। दक्षिणाभिर्द्विजेन्द्राणांकर्तव्यंचात्रपूजनं।। प्राङ्मुखो गुरुरासीनो-वरुणाभिमुखं शिशु।। अध्यापयेत्तुप्रथमंद्विजाशीर्भिः सुपूजितइति।। ।। अथप्रयोगः।। ।। तत्रोक्तकाले सुमुहूर्ते कर्त्ता कुमारे-णसहमंगलस्नानंकृत्वाऽहतेवाससीपरिधायधृतकुंकुमतिलकःशुभास-नेउपविश्याचम्यप्राणानायम्यदेशकालौस्मृत्वावऽस्यकुमारस्यलेखनादिबहुल-विद्याप्राप्त्यर्थंविद्यारंभंकरिष्ये।। तत्रादौनिर्विघ्नतासिद्ध्यर्थंगण-पतिपूजनंकरिष्ये।। गणपतिंसंपूज्य कृततंडुलाष्टदलमध्येहरिं-लक्ष्मींकुलदेवतांसरस्वतींचनाममंत्रेणावाह्यतदग्रेऽक्षतपुञ्जे-षुपंक्तिरूपेणनारदंपाणिनिंपतंजलिंकात्यायनंसांख्यंपार-

स्करंयास्कंकपिङ्गलंगोभिलंजैमिनिंविश्वकर्माणंआचार्यंव्यासंचावाह्यस्व-
विद्यासूत्रंव्याकरणंभाष्यादिकंचतत्रसंस्थाप्यावाहितमंत्रेणषोडशोपचारैर्यथा-
मिलितोपचारैर्वासंपूज्यपूजासमर्पणंकृत्वास्थंडिलेपंचभूसंस्कारपूर्वकमग्नि
संस्थाप्यब्रह्मासनाद्याज्यभागांतेआवाहितदेवतानामाज्येनप्रत्येकमष्टा-
विंशतिरष्टौवानाममंत्रेणहुत्वास्विष्टकृदादिहोमशेषंसमाप्यकुमारआवाहितदेवता-
अध्यापकगुरुंचनत्वागुरोः समीपेपश्चिमाभिमुखमुपविश्यात्रसदाचाराद्रज-
तादिपट्टेकुंकुमादिप्रसार्यतत्रसुवर्णशलाकयागणेशंसरस्वतींकुलदेवतागुरु-
चतुष्टयंलक्ष्मीनारायणंचतुर्थ्यंतं लिखित्वासरस्वत्यावाहनप्रकारेणसरस्वतीं
चावाह्यपूजयेत्।। तद्यथा।। स्थापितदेवताग्रे स्थलंकृत्वापालाशकी-
लेनमृदंखनित्वातस्यांसरस्वतीमावाहयेत्।। ॐ भुवनमातः सर्व-
वाङ्मयरूपेणागच्छेत्यावाह्यप्रणवेनार्घ्यपाद्याचमनीयगंधपुष्पाक्ष-
तधूपदीपपायसगुडौदननैवेद्यसमर्पणनमस्कारान्कृत्वाचार्यं
शक्तितोवस्त्रालंकारादिभिः पूजयित्वासरस्वतीविघ्नेशाचार्यांस्त्रिः
प्रदक्षिणीकृत्यगुरुः पट्टोपरिलिखिताक्षरंप्रणवपूर्वकंत्रिवारंलेखन-
वाचनादि कारयेत्।। ततोगुरुंसंपूज्यवस्त्रादिभिश्चसंतोष्याचार्या-
भिवंदनंकृत्वासरस्वत्यादीनावाहनक्रमेणोद्वासयेद्विद्यावृद्धिर्भवतीति।।
।। इतिसंस्कारभास्करेविद्यारंभः।। ।। अथानुपनीतधर्माः।। ।।
प्रागुपनयनात्कामचारकामवादकामभक्षाः तेनमूत्रपुरीषोत्सर्गादावाच-
मनाद्याचारोनास्ति।। लघुपातकहेतुलशुनपर्युषितोच्छिष्टादिभक्षणे-
दोषाभावः।। एवमपेयपाने अनृतावाच्य भाषणेपि।। महादोषहेतु-
मांसांत्यजरजस्वलादिस्पृष्टान्नभक्षणेमद्यादिपानेचदोषोस्त्येव।।
रजस्वलादिसंस्पर्शेस्नानमेवकुमारके।। शिशोरभ्युक्षणंप्रोक्तंबाल-
स्याचमनंस्मृतं।। तत्रप्रागन्नप्राशनाच्छिशुसंज्ञा।। ततऊर्ध्वंप्राक्चौ-
लात्रिवर्षाद्वाबालसंज्ञा।। ततआमौंजीबंधनात्कुमारसंज्ञा।।
अत्राचमनमितित्रिरुदकपानमेव।। नतुओष्ठमार्जनादिकल्पइतिज्ञेयम्।।
नचानुपनीतोवेदमुच्चारयेत्।। पित्रोरंत्यक्रियायांत्वनुपनीतेनापिमंत्रोच्चारः

कार्यः।। सचद्वित्रिवर्षयोः कृतचूडस्यैव।। त्रिवर्षोर्ध्वंत्वकृतचूडस्यापि एतच्चौरसपुत्रविषयम्।। पित्रोरनुपनीतोपिविदध्यादौरसः सुतः।। और्ध्वदेहिकमन्येतु संस्कृताः श्राद्धकारका इतिस्कांदात्।। ।। इतिसंस्कारभास्करेअनुपनीतधर्मा।। ।। अथबालपितृधर्माः।। ।। विष्णुधर्मोत्तरे।। अपथ्यंनचबालानांतथाभार्गवपश्यताम्।। पश्यद्भिः पित्रादिभिरपथ्यंनिवारणीयमित्यर्थः।। बालकाश्चानुनेयाः स्युर्धर्मकामैः सदानरैः।। तेषांभोज्यप्रदानेनगोदानफलमाप्नुयात्।। तेषांक्रीड-नकंदत्वामोदतेनंदतेदिवि।। तस्मात्सर्वप्रयत्नेनबालानग्रेतुभोजयेत्।। अभुक्तवत्सुबालेषुनचाश्नीयात्कदाचनेति।। ।। इतिसंस्कारभास्करे-बालपितृधर्माः।। ।। अथोपनयनम्।। ।। उपनयनंनामआचार्यसमीप-नयनांगकोगायत्र्युपदेशप्रधानकः कर्मविशेषः।। उपनयनपदस्ययोग-रूढत्वात्।। गायत्र्याब्राह्मणमसृजदितिश्रुत्युक्तेः।। गायत्र्याब्राह्मणामुप-नयीतेतिकातीय वाक्याच्चयोगरूढमेतत्पदम्।। ।। अत्राधिकारिणः।। पितैवोपनयेत्पुत्रंतदभावे पितुः पिता।। तदभावेपितु-र्भ्रातातदभावेतुसोदरः।। तदभावेसगोत्रसपिंडज्ञाः।। तदभावेमातुला-दयोसगोत्रसपिंडाः।। तदभावेअसपिंडसगोत्रजाः।। एतेचकुमारा-पेक्षयावयोज्येष्ठाविवक्षिताः।। कनिष्ठकर्तृकोपनयनस्यनिषिद्धत्वात्।। सर्वाभावेश्रौत्रियः।। जन्मनाब्राह्मणोज्ञेयः संस्कारैर्द्विजउच्यते।। विद्यत्त्वाच्चापिविप्रत्वंत्रिभिः श्रोत्रियउच्यतइति।। ।। उपनेत्रुपनेययो-रधि कारसंपादनार्थंप्रायश्चित्तमाह।। ।। वृद्धविष्णुः।। कृच्छ्रत्रयंचोपने-तात्रीन् कृच्छ्रांश्चबटुश्चरेदिति।। ।। आचार्यस्यविशेषंसएवाह।। ।। सावित्रीमभ्यसेदग्निं पवित्राणिचसंस्मरन्।। सहस्रंद्वादशाख्यंचसावि-त्रींप्रजपेद्बुधः।। स्वाधिकारार्थमेवास्याः प्रदानार्थंहितत्स्मृतमिति।। अथोपनयनकालमाह।। ।। पारस्करः।। अष्टवर्षंब्राह्मणमुपनयेदिति।। गर्भाष्टमेवा।। अथवाब्राह्मणं गर्भसहिताष्टवार्षिकमुपनयेत्।। ततश्चजन्मतोनवमेष्टमेवाउपनयेदित्यर्थः।। एकादशवर्षंराजन्यं।।

एकादशवर्षाण्यतीतानियस्यासावेकादशवर्षस्तं राजन्यंक्षत्रियमुपनयेत्।।
जन्मतोद्वादशेवर्षेइत्यर्थः।। द्वादशवर्षंवैश्यं।। द्वादशवर्षाण्यतीतानि
यस्यासौतथातंवैश्यंवर्णतृतीयंउपनयेत्।। जन्मतस्त्रयोदशवर्षेइत्यर्थः।।
यथामंगलंवासर्वेषां।। अथवासर्वेषामेववर्णानां ब्राह्मणेक्षत्रियविशां-
यथामंगलंशास्त्रांतरविहितकालांतरेउपनयनंभवतीतिनित्यकालः।। ।।
अथकाम्यकालमाह।। मनुः।। ब्रह्मवर्चस कामस्यकार्यं विप्रस्यपंचमे।।
राज्ञोबलार्थिनः षष्ठेवैश्यस्यार्थार्थिनोष्टमे।। विष्णुः।। षष्ठेतुधन-
कामस्यविद्याकामस्यसप्तमे।। अष्टमेसर्वकामस्यनवमेकान्तिमिच्छ-
तेतिकाम्यकालः।। ।। उपनयनकालस्यपरमावधिमाह।। ।। पारस्करः।।
आषोडशाद्वर्षाद्ब्राह्मणस्यानतीतः कालो भवति।। अर्वाक्षोडशाद्वर्षा-
द्ब्राह्मणस्य अनतीतः अनतिक्रांतएवोपनयनस्यकालोभवति।।
आद्वाविꣳशाद्राजन्यस्य।। अर्वाक्द्वाविंशाद्वर्षात्क्षत्रियस्यानतीत-
एवोपनयनकालोभवति।। आचतुर्विँशाद्वैश्यस्य ।। अर्वाक्
चतुर्विंशाद्वर्षात्वैश्यस्यानतीतएवोपनयनकालो भवति।। अत-
ऊर्ध्वंपतितसावित्रीकाभवंति।। अतउक्तकालादूर्ध्वंअनुपनीताब्राह्मणा-
दयः पतितसावित्रीकाभवंतिसंपद्यते।। अधिकाराभावात्पति-
तास्खलितासावित्रीयेभ्यस्ते पतितसावित्रीकाः।। नैनानुपनयेयुर्नाध्
यापयेयुर्नयाजयेयुर्नचैभिर्व्यवहरेयुः।। एतान्पतितसावित्रीकान्नोपनयेयुः-
शास्त्रज्ञाः।। एवमग्रेपियोज्यं।। त्रिपुरुषंपतितसावित्रीकाणाम-
पत्येसंस्कारोनाध्यापनंच।। त्रीन्पुरुषान्यावद्येपतितसावित्रीकाः
पितृपुत्रपौत्रास्तेषामपत्येचतुर्थपुरुषेअसंस्कारउपनयनसंस्कारोन
भवति।। अध्यापनंचनभवति।। तेषाꣳसंस्कारेप्सुर्व्रात्यस्तो-
मेनेष्ट्वाकाममधीयीरन्व्यवहार्याभवंतीतिवचनात्।। तेषांपितृपुत्रपौत्राणां-
त्रयाणांपतितसावित्रीकाणांमध्ये यः संस्कारेप्सुः आत्मानंसंस्कारयितु-
कामः सव्रात्यस्तोमेनयज्ञेनेष्ट्वाअबधीयिरन्वेदंपठेयुः व्यवहार्याः शिष्टाना
ध्यापनादिकर्मसुयोग्याभवंतीतिवचनात्श्रुतेः।। याज्ञवल्क्योपि।।

अतऊर्ध्वंपतन्त्येतेसर्वधर्मबहिष्कृताः।। सावित्रीपतिताव्रात्या-
व्रात्यस्तोमादृतेक्रतोरिति।। ।। वर्णविशेषेणायननियममाह।। ।।
वसिष्ठः।। विप्रस्यक्षत्रियस्यापिमौंजीस्यादुत्तरायणे।। दक्षिणेतुविशां-
कुर्यान्नानध्यायेनसंक्रम इति।। ।। वर्णविशेषंप्रतिऋतुविशेषप्राशस्त्य-
मुक्तंश्रुतौ।। वसंतेब्राह्मणमुपनयीतग्रीष्मे राजन्यंशरदिवैश्यंवर्षा-
सुरथकारमिति।। ।। अथमासनिर्णयः।। ।। ज्योतिः शास्त्रे।।
माघादिषुतुमासेषुमौञ्जीपंचसुशस्यतइति।। गर्गः।। ज्येष्ठमासे-
विशेषेणसर्वज्येष्ठस्यचैवहि।। उपनीतस्यज्येष्ठस्यमृत्युरेवनंसशयइति।।
एतदपवादमाह।। ।। बृहस्पतिः।। मिथुनेसंस्थितेभानौजेष्ठमासोन-
दोषकृदिति।। ।। इदंजन्ममासेनकार्यं।। तदुक्तंसंग्रहे।। विवाहेचोप-
नयनेजन्ममासंविवर्जयेदिति। वृत्तशतेतुविशेषः।। नजन्मधिष्ण्येनच-
जन्ममासेनजन्मकालीय दिनेविदध्यादिति।। राजमार्तंडे।। जातंदिनं-
दूषयतेवसिष्ठोह्यष्टौचगर्गोनियतंदशात्रिः।। जातस्यपक्षंकिल-
भागुरिश्चशेषाः प्रशस्ताः खलुजन्ममासइति।। ।। अस्यापवादस्तत्रैव।।
जनममासेतिथौभेचविपरीतदलेसति।। कार्यंमंगलमित्याहुर्गर्गभार्गव-
शौनकाइति।। ।। पक्षविचारमाह।। ।। अश्वलायन।। आपूर्यमाण-
पक्षइति।। आपूर्यमाणपक्षः शुक्लपक्षः।। शुक्ल पक्षोत्रमुख्यः।।
।। अनुकल्पमाह।। ।। बृहस्पतिः।। शुक्लपक्षः शुभः प्रोक्तः
कृष्णश्चांत्यत्रिकंविनेति।। ।। तिथिविचारमाह।। ।। नृसिंहः।।
तृतीयापंचमीषष्ठीद्वितीयाचापिसप्तमी।। उभयोः पक्षयोश्चैवविशेषेण-
सुपूजिताः।। धर्मकामौसितेपक्षेकृष्णेचप्रथमातथा।। कृष्णेत्रयोदशीं-
केचिदिच्छंतिमुनयस्तथा।। द्वादश्येकादशीचैवमध्यमेचप्रचक्षतइति।।
धर्मोदशमी।। कामस्त्रयोदशी।। तेअपिसितेकृष्णेचेत्यन्वयः।।
प्रथमातथाकृष्णे।। कृष्णेत्रयोदशीमिति मध्यममणिन्यायेनान्वयः।।
मध्यमेचैवपक्षद्वयइतिबोध्यम्।। नारदः।। एकांचतुर्थींसंत्यज्यकृष्ण-
पक्षेतुमध्यगाः।। आपंचम्या स्तुतिथयः पराः स्युरतिनिंदिताइति।।

परास्तृतीयांशगताः।। यस्तुप्रथमातथेतिप्रतिपद्विधिः सकृतप्रायश्चित्त-
व्रात्योपयनविषयः।। प्रशस्ता प्रतिपत्कृष्णे कदाचिच्छुभगेविधौ।
चंद्रेबलयुतेलग्नेवर्षाणामतिलंघनइतिव्यासोक्तेः।। एवं।। चंद्रेबलयुते-
लग्नाच्छुभभावेशुभेक्षिते।। चतुर्दशींप्रशंसंतिकुमारेवयसाधिकेइति।।
चतुर्दशीविधिरपिअतिलंघनाधिकशब्दाभ्यांगौणकालातिक्रमस्य-
विवक्षितत्वात्।। अपरार्के।। नष्टेचंद्रेष्टमेशुक्रेनिरंशेभास्करेतथा।।
कर्तव्यंनोपनयनंनानध्यायेगलग्रहेइति।। राशिप्रथमांशगः सूर्योनिरंशः।।
अनध्यायास्तुज्योतिर्निबंधे।। अष्टकासुचसर्वासुयुगमन्वन्तरादिषु।।
अनध्यायंप्रकुर्वीततथासोपपदास्वपीत्यादि।। सोपपदास्तुस्मृत्यर्थसारे।।
सिताज्येष्ठेद्वितीयाचआश्विनेदशमीसिता।। चतुर्थीद्वादशीमाघेएताः
सोपपदाः स्मृताइति।। गलग्रहास्तुरत्नकोशे।। त्रयोदशीचतुष्कंतु-
सप्तम्यादित्रयं तथा।। चतुर्थ्येकाकिनी प्रोक्ताअष्टावेतेगलग्रहाइति।।
।। युगादिदिनानध्यायानांप्रतिप्रसवमाह।। ।। भरद्वाजः।। याचैत्र-
वैशाखसितातृतीयामाघस्य सप्तम्यथफाल्गुनस्य।। कृष्णेद्वितीयो-
पनयेप्रशस्ताप्रोक्ताभरद्वाजमुनीन्द्रमुख्यैरिति।। अत्रचैत्रसित-
तृतीयामाघशुक्लसप्तम्योर्मन्वाद्योः प्रतिप्रसवः।। मन्वादिषुतयोः
स्मृत्यर्थसारेपाठात्।। वैशाखतृतीयायायुगादेरपि।। ।। उपनयने-
सोपपदावर्ज्याः।। सोपपदासूपनीतः पुनः संस्कारमर्हतीति-
स्मृत्यर्थसारे दर्शनात्।। अयंचनिषेधोयजुषांनभवति।। वेदव्रतोपनयने-
स्वाध्यायाध्ययनेतथा ।। नदोषोयजुषां सोपपदास्वध्यापनेपिचेति-
स्मृतिदर्पणेचंडेश्वरोक्तेः।। केचित्तुमहानिबंधेष्वदर्शनादिदंनिर्मूल-
मित्याहुः।। गलग्रहापवादस्तुषष्ठी सप्तमीत्रयोदशीनांविनायोगो-
पन्यासेनदर्शितः।। स्मृत्यंतरे।। अनध्यायस्यपूर्वेद्युरनध्यायात्परेहनि।।
व्रतारंभंविसर्गंचविद्यारंभंविवर्जयेदिति।। एतदपवादोपिद्वितीया-
सप्तमीत्रयोदशीविनियोगेनदर्शितः।। अयंगलग्रहापवादश्चभूपाद्यु-
पनयनविषयइतिकेचित्।। ।। वासरनियममाह।। ।। नारदः।। गुरु

शुक्रबुधानांतुवाराः श्रेष्ठतमाः स्मृताः।। अधमःसोमवारस्तुसूर्यवारस्तु-
मध्यमः।। वारौमंदारयोर्वर्ज्यौकृष्णेवर्ज्योनिशापतेः।। अस्तंगतस्य-
सौम्यस्यवारोवर्ज्यो द्विजन्मनामिति। तथा।। शाखाधिपतिवारश्चशाखा-
धिपबलंतथा।। शाखाधिपतिलग्नंचदुर्लभंत्रितयंव्रतइति।। शाखा-
धिपवारानाह।। बृहस्पतिः।। बह्वृचानांगुरोर्वारोयजुर्वेदजुषांकवेः।।
सामगानां धरासूनोरथर्वविदुषांरवेरिति।। बलंगोचराष्टवर्गादि।। ।।
शाखाधिपबलासंभवेदोषमप्याह।। मदनरत्नेवृद्धगार्ग्यः।। शाखा-
धिपेबलिनिकेंद्रगतेचमौंजीबंधस्तदीयदिवसेषुशुभायक्लृप्तः।।
अस्मिन्बलेनरहितेतुपुनर्द्विजानांस्याद्वर्णसंकरइतिप्रवदंतितज्ज्ञा इति।।
तथावर्णाधिपबलमप्यपेक्ष्यते।। सदानुकूलेचैकस्मिन्वर्णेशेबल-
शालिनि।। ब्राह्मणादेःप्रकुर्वीतकुमारंव्रतचारिणमितिपराशरोक्तेः।।
पतीसितेज्यौ विप्राणांनृपाणांकुजभास्करौ।। वैश्यानांशशभृत्सौम्या-
वितिवर्णाधिपाः स्मृताइतितेनैवव्यवस्थाप्रदर्शनाच्च।। मदनरत्ने-
राजमार्तंडः।। पितुः सूर्यबलंश्रेष्ठशाखावर्णेशयोर्बटोः।।
सर्वेषांगुरुचंद्रर्क्षबलंश्रेष्ठंव्रतादिषु।। मौंजीबंधेविवाहेचप्रतिष्ठायां-
विशेषतः।। गोचरणैवकर्तव्येवैधंबलमकारणमिति।।
सर्वेषामित्यनेनयेषांनशाखाधिपोगुरुस्तेषामपिबटूनांतत्पितृ
णांचगुरुबलमावश्यकम्।। उभयोरलाभेबटोरावश्यकमितिध्वन्यते।।
वैधंवामवेधप्रयुक्तं। गर्भाष्टमादिनित्यकालेबटोर्गुरुबलालाभे-
शांत्यातल्लाभः।। ।। तदाहनारदः।। बालस्यबलहीनोपिशांत्याजीवो-
बलप्रदः।। यथोक्तवत्सरेकार्यमनुक्तेनोपनायनमिति।। अनुक्तेनित्य-
त्वेतिशेषः।। केचित्तुदुष्टस्थानस्थितेबृहस्पतावुपनयनंनकार्य-
मित्याहुः।। द्वादशाष्टमबंधुस्थेमनसापिनचिंतयेदितिकारिकोक्तेः।
ग्रंथांतरेतु।। शुद्धिर्नैवगुरोर्यस्यवर्षे प्राप्तेष्टमेयदि।। चैत्रेमीनगतेभानौ
तस्योपनयनंशुभमिति।। कारिकायामपि।। अतीवदुष्टेसुरराजपूज्ये-
सिंहस्थितेवाद्विजपुंगवानां।। व्रतरयबंधः खलुमासिचैत्रेकृतश्चिरायुः

शुभसौख्यदः स्यादिति।। एतदप्यष्टवर्षविषयं।। अष्टमादिस्थित-
स्यापिराशिविशेषस्थस्यगुरोर्नदोषइत्याह।। भरद्वाजः।। धनुर्मीन-
कुलीरस्थोजीवोजन्मात्यमृत्युगः।। अतिसौख्यंबटोः कुर्याद्वसिष्ठ-
वचनंयथेति।। सूत्रोक्तमुख्यकालेजीवबलाभावेपिमीनस्थ-
दिवाकरयुक्तमधौवातदभावेशांत्याव्रतंकार्यम्।। नमुख्यकालातिक्रमः
कार्यः।। नित्यकालस्य बलीयस्त्वात्।। नक्षत्राणि।। ।।
मदनपारिजाते।। हस्तत्रयेदैत्यरिपुत्रयेचशक्रेन्दुपुष्याश्विनिरेवतीष्विति।।
।। वेदविषेशेणनक्षत्रविशेषविधिः।। ।। ज्योतिर्निबंधे।।
मूलेहस्तत्रयेसार्पेशैवेपूर्वात्रयेतथा।। ऋग्वेदाध्यायिनांकार्यं मेखला-
बंधनंबुधैः।। पुष्येपुनर्वसौपौष्णेहस्तेमैत्रेशशांकभे।। ध्रुवंषुचप्रश-
स्तंस्याद्यजुषांमौंजिबंधनम्।। पुष्यवासवहस्ताशिवशिवविष्णू-
त्तरात्रयम्।। प्रशस्तंमेखलाबंधेबटूनांसामगायिनां।। मृगमैत्राश्विनी-
हस्तरेवत्यादित्यवासवम्।। अथर्वशाखिनां शस्तोभगणोयं-
व्रतार्पणइति।। ।। एषामसंभवे सारसमुच्चये।। मघाग्नेयविशाखेन्द्र
याम्यंहित्वाचवारुणं।। व्रतेशस्तानिसर्वेषांचेच्छाखोक्तंनलभ्यतइति।।
।। राजमार्तंडस्तुपुनर्वसुंब्राह्मणस्यनिषेधति।। चंद्रतारानुकूलेषु-
ग्रहाब्देषुशुभेष्वपि।। पुनर्वसौकृतोविप्रः पुनः संस्कारमर्हतीति।।
अयंचनिषेधः ऋक्सामवेदीयविषयः।। व्यवस्थावाक्यानुसारेण-
तदितराणांपुनर्वसुविधेः प्रतीतेः।। वस्तुतस्तुज्योतिर्वित्प्रसिद्ध-
वसिष्ठादिसंहितासुक्कचिदपिपुनर्वसुनिषेधादर्शनाद्धेमाद्र्यादिमहा-
निबंधेषुचपुनर्वसुविधेरेवप्रतीतेः सकलशिष्टानांपुनर्वसावुपनयना-
चारस्योपलंभाच्चराजमार्तंडवाक्यंनिर्मूलं।। समूलत्वेपिनयजुर्वेद्यथर्व-
वेदिविषयं।। उक्तव्यवस्थौचित्यादिति।। त्याज्ययोगव्यवस्थामाह।।
।। श्री पतिः।। सवैधृतिस्तु व्यतिपातनामासर्वोप्यनिष्टः परिघस्य-
चार्धम्।। तिस्रस्तुयोगेप्रथमेसवज्रे व्याघातसंज्ञेनवपंचशूले।।
गंडेतिगंडेचषडेवनाड्यः शुभेषुकार्येषुविवर्जनीया इति।। ।।

उक्तान्यविषयेत्वाह।। ।। बृहस्पतिः।। शिष्टाष्टादशयोगेषुशस्तं ह्योपनायनमिति।। ।। करणेव्यवस्थामाह।। ।। सएव।। बवादीनां-तुषट्कं स्याद्व्रतबंधेसु पूजितम्।। शकुन्यादीनिविष्टिंचवर्जयेच्च-विशेषतइति।। ।। दिनभागव्यवस्थामाह।। ।। मनुः।। सर्वदेशेषु-पूर्वाह्णेमुख्यंस्यादुपनायनम्।। मध्याह्नेमध्यमंप्रोक्तमपराह्णेचगर्हितमिति।। ।। एवंव्यवस्थितेपिशुभकालेनिमित्तविशेषेणनिषेधमाह।। ।। गर्गः। ग्रहेरवींद्वोरवनिप्रकंपेकेतूद्गमोल्कापतनादिदोषे।। व्रतेदशाहानि-वदंतितज्ज्ञास्त्रयोदशाहानिवदंतिकेचिदिति।। वर्ज्यानीतिशेषः।। ।। अत्रतुसंकटेचंडेश्वरः।। दाहेदिशांचैव धराप्रकंपेवज्रप्रपातेचवि-दारणेच।। केतौतथोल्कांसशुकणप्रपातेत्र्यहंनकुर्याद्व्रतमंगलानीति।। ।। चंद्रसूर्योपरागेतुमंगलकार्येषुपूर्णग्रासेचंद्रग्रहेद्वादश्यादितृतीयां-तंदिनसप्तकंवर्ज्यं।। सूर्यपूर्णग्रासे एकादश्यादिचतुर्थ्यंतदिना-निवर्ज्यानि।। खंडग्रहणेचचतुर्दश्यादिदिनत्रयंवर्ज्यमितिधर्मसिंधौ।। ।। मेघगर्जने।। ।। लल्लः।। व्रतेह्निपूर्वसंध्यायांवारिदोयदिगर्जति।। तद्दिनेस्यादनध्यायोव्रतं तत्रविवर्जयेदिति।। ।। अनेनसर्वौपनयिक-क्रियाकदंबस्यनिषेधेप्राप्तेविशेषस्तुज्योतिर्निबंधे।। नांदीश्राद्धेकृते-चेत्स्यादनध्यायस्त्वकालिकः।। तदोपनयनंकार्यंवेदारंभंनकारयेदिति।। मृगशीर्षादिविशाखांतातिरिक्तकालेषुयन्मेघगर्जनादिकंतदकालिकं।। तन्निमित्तोनध्यायोऽकालिकएव।। सयदिनांदी श्राद्धोत्तरंभवति-चेत्वेदारंभरहितंकृत्स्नमुपनयनंकुर्यादित्यर्थः।। नांदीश्राद्धत्प्राङ्मेघ-गर्जनेसमग्रमुपनयनंनभवतीत्यनेनवचनेनसूचितं।। अस्मिन्वचने-योवेदारंभनिषेधः सबह्वृचेतरविषयः।। तेषामुपनयनेवेदारंभाभावेन-निषेधासंभवादिति।। ।। अथलग्नग्रहविचारः।। ।। व्रतेग्राह्या-द्वादशाष्टषट्वर्ज्याः शुभखेचराः।। खलाख्यायारिगाश्चंद्रः शुक्लगोकर्कगस्तनौ।। क्वचित्सूर्यस्तनौश्रेष्ठोऽष्टमेवर्ज्योऽखिलग्रहः।। लग्नेशः शुक्रचंद्रौचषष्ठे वर्ज्यःसितोंत्यगः।। लग्नेचंद्रखलाश्चैवें-

दुर्वर्ज्यौद्वादशाष्टमे।। पंचेष्टग्रहहीनंचलग्नं सर्वत्र वर्जयेत्।। तुलामिथुनकन्याख्याधनुर्वृषझषाह्वयाः।। नवमांशाः शुभाः प्रोक्ताककांशंवर्जयेद्व्रते।। षड्वर्गशुद्ध्यादिकमिष्टकालसाधनादि-विचारश्चज्योतिर्ग्रंथेभ्योज्ञातव्यइति।। ।। मंडपमाह।। ।। वसिष्ठः।। षोडशारत्निकंकुर्याच्चतुर्द्वारोपशोभितं।। मंडपंतोरणैर्युक्तं तत्रवेदींप्रकल्पयेत्।। अष्टहस्ततुरचयेन्मंडपंवाद्विषट्करमिति।। अन्यत्रतु।। मंगलेषुच सर्वेषुमंडपोगृहवामतः।। कार्यः षोडश-हस्तोवान्यूनहस्तोदशावधिः।। स्तंभैश्चतुर्भिरेवात्रवेदीमध्येप्रतिष्ठितेति।। ।। वेदिमानमाह।। ।। गौतमः।। बटुहस्तेनचतुर्हस्ताचतुरस्रा हस्तोच्छ्रितासुश्लक्ष्णासोपानसप्तकेनपंचकेनचवांकिताप्रागुदक्प्रवणा-कदलीस्तंभतोरणपुष्पमालाद्यलंकृतावेदिः कार्येति।। ।। वर्णक्रमेण-परिधानवस्त्राण्याह।। ।। पारस्करः।। वासाꣳसिशाणक्षौमाविकाणि।। ब्राह्मणक्षत्रियविशांत्रयाणां ब्रह्मचारिणांशाणक्षौमाविकाणिवासांसियथा-संख्यंभवति।। शाणंशणमयं।। क्षौमंक्षुमाअतसीतद्विकारमयं।। आविकंअविर्मेषः तद्विकारमाविकं।। मेषरोमनिर्मितमित्यर्थः।। गौतमस्तुसर्वेषांकार्पासं वाऽविकृतमिति।। वसिष्ठः।। शुक्लमहतं-वासोब्राह्मणस्यमांजिष्ठंक्षौमंचक्षत्रियस्यपीतंकौशेयंवैश्यस्येति।। ।। उत्तरीयमाह।। ।। पारस्करः।। ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य रौरवꣳराजन्यस्यआजंगव्यंवैश्यस्येति।। एणीहरिणीतस्याइदं ऐणेयंचर्मउत्तरीयंब्राह्मणस्यब्रह्मचारिणोभवति।। राजन्यस्यक्षत्रिस्यब्रह्म चारिणोरुरुर्बिंदुमान्मृगः तदीयंचर्मउत्तरीयंभवति।। अजस्येदंचर्म-आज्यंद्वागव्यंगोरिदंचर्मगव्यंवैश्यस्योत्तरीयंभवतीति।। अत्रकारिकायांप्रयोगरत्नेच विशेषः।। त्र्यंगुलंतुबहिर्लोमय-द्वास्याच्चतुरंगुलं।। एकखंडत्रिखडंवाधार्यंतदुपवीतवदिति।। ।। अत्रानुकल्पमाह।। ।। पारस्करः।। सर्वेषांवागव्यमसतिप्रधानत्वात्।। असत्यथोदितेचर्मणिसर्वेषांवर्णानांगव्यंवाचर्म भवति।। कुतएतत्-

पुरुषप्रधानत्वाद्गव्यस्यचर्मणः।। पुरुषप्रधानंहिगव्यंचर्म श्रूयते।। तेअवस्थाय्पुरुषंगव्येतांत्वचमदधुरिति।। तंदेवाः पुरुषात्वचमवस्थाय उक्षत्यएतांत्वचंगविअदधुः धृतवंतइतिश्रुत्यर्थः।। ।। मेखलामाह।। ।। सएव।। मौंजीरशनाब्राह्मणस्यधनुर्ज्या राजन्यस्यमौर्वीवैश्यस्येति।। मुंजःशरः तन्मयीमौंजीमेखलाब्राह्मणस्यब्रह्मचारिणोभवति।। धनुर्ज्या- धनुषश्चापस्य ज्यागुणः मेखलाक्षत्रियस्यब्रह्मचारिणोभवति।। सामर्थ्याच्च।। स्नायुमयीवेणुमयीवाइयंचित्रवृतानकार्या।। ज्यात्व- चिनाशप्रसंगात्।। मुरुरितितृणविशेषः।। तन्मयीमौर्वीमेखलावैश्यस्य- ब्रह्मचारिणोभवति।। ।। अत्रानुकल्पमाह।। ।। सएव।। मुंजाभावेकुशाश्मंतकबल्वजानामिति।। मुंजाद्यभावेवर्णक्रमेण- कुशमयीअश्मंतकाख्यतृणमयीबैल्वजाख्यतृणमयीरशनाभवति।। ।। दंडंतत्प्रमाणंचाह।। ।। सएव।। ।। पालाशोब्राह्मणस्यदंडो- बैल्वोराजन्यस्यौदुंबरोवैश्यस्यकेशसंमितोब्राह्मणस्यललाटसंमितः क्षत्रियस्यघ्राणसंमितोवैश्यस्यसर्वेवासर्वेषामिति।। ब्राह्मणस्य- ब्रह्मचारिणः केशसंमितः पालाशदंडो भवति।। क्षत्रियस्य- ब्रह्मचारिणोललाटसंमितोबिल्ववृक्षोद्भवोदंडोभवति।। वैश्यस्य- ब्रह्मचारिणोघ्राणसंमितउदुंबरवृक्षोद्भवोदंडोभवति।। अथवा सर्वेपालाशादयोदंडाः सर्वेषांब्राह्मणक्षत्रियविशामनियमेनभवंति।। नप्रतिवर्णं जातिव्यवस्थयेति।। ।। यज्ञोपवीतलक्षणंस्मृत्यर्थसारे।। कार्पासक्षौमगोवालशणवल्कतृणादिकं।। यथासंभवतोधार्य- मुपवीतंद्विजातिभिः।। शुचौदेशेशुचिः सूत्रंसंहतांगुलिमूलके। आवेष्ट्यषण्णवत्यातत्त्रिगुणीकृत्ययत्नतः।। अब्लिंगकैस्त्रिभिः संम्यक्प्रक्षालयोर्ध्वकृतंतु तत्।। अप्रदक्षिणमावृत्तंसावित्र्या- त्रिगुणीकृतं।। अधः प्रदक्षिणाद्वृत्तंसमंस्यान्नवसूत्रकं।। त्रिरावेष्ट्यदृढंबध्वाहरिब्रह्मेश्वरान्नमेत्।। यज्ञोपवीतंपरममितिमंत्रेण- धारयेदिति।। ।। अत्रयज्ञोपवीतधारणसंख्या तु परिभाषा-

प्रकरणोक्ताग्राह्या।। ।। अथप्रयोगः।। ।। तत्रायं क्रमः।। दत्वाप्रेष द्वयंप्राग्वसनरशनेब्रह्मसूत्राजिनस्थोदंडः पूर्णांजल्यर्घः प्रणतरविगुरोलं-भप्रच्छाप्रदानं।। वह्निचावृत्तचास्तेमनुमितहवनंस्वीयसावित्रिदानंवह्नेः कार्यंस्वभिक्षाकथयतिनियमंब्रह्मचर्येविकल्पः।। ।। तत्रोदगयनेशुक्ल-पक्षे द्वितीयादिस्वाध्यायतिथिषुनानध्यायेननैमित्तिकानध्यायेपूर्वाह्ने-शुभमुहूर्ते शुभचंद्रादौगुरुशुक्रयोर्बाल्यवार्धकास्तराहित्यादौ-ज्योतिर्वित्प्रोक्ते शुभकाले उपनयनंकार्यं।। तत्रपित्राउपनेतृत्वाधि-कारार्थमुक्तंप्रायश्चित्तंकार्यं।। तत्रेत्थं संकल्पः।। आचम्यप्राणाना-यम्यदेशकालौस्मृत्वास्वस्योपनेतृत्वाधिकारसिद्ध्यर्थंकृच्छ्रत्रयात्मक-प्रायश्चित्तपूर्वकंद्वादशसहस्रंगायत्रीजपमहंकरिष्ये।। अथ-वाब्राह्मणद्वाराकारयिष्ये।। ततः कुमारेणापिदेशकालसंकीर्तनांतेमम कामचारकामवादकामभक्षणादिदोषापनोदनार्थंकृच्छ्रत्रयप्रायश्चित्त-पूर्वकंद्वादशसहस्रगायत्रीजपंतदधिकंवा ब्राह्मणद्वाराअहमाचरिष्ये। इतिकृत्वा।। उक्तकालेउपनिनीषुः पितापूर्वेद्युर्बटोः परिधानार्थं शुक्लमीषद्धौतंनवंसदशंपरेणाधृतंवस्त्रमुत्तरीयार्थंचाजिनंयज्ञोपवीतं-मेखलामव्रणमृजुंसौम्यदर्शनंदंडंकौपीनंअंजलिपूर्णार्थमुदकमाचाराद्-गायत्र्युपदेशार्थंकांस्यपात्रंसुवर्णशलाकां तंडुलानुपदेशवस्त्रंभिक्षा-भाजनंचसंपाद्याचम्यप्राणानायम्यदेशकालौस्मृत्वा ममास्यकुमारस्य-द्विजत्वसिद्ध्यावेदाध्ययनाधिकारार्थंश्चउपनयनंकरिष्ये।। उपनयनेनसहचौलकरणपक्षेश्वश्चौलोपनयनेकरिष्येइतिकीर्तयेत्।। तत्रादौनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंतदंगत्वेन चस्वस्तिपुण्याह-वाचनमविघ्नपूजनं मंडपस्थापनंमातृकापूजनंवसोर्धारामायुष्यमंत्रजपं नांदीश्राद्धंग्रहानुकूल्यसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंग्रहयज्ञंचाद्यक-रिष्येइतिसंकल्प्यगणपतिपूजनादिनांदीश्राद्धांतंकृत्वाब्रह्माचार्यऋत्वि-ग्वरणादिसांगंग्रहयज्ञंकुर्यात्।। यदोपनयनदिनेगणपतिपूजनादि-ग्रहयज्ञांतंकरोतिचेत्तदाश्वः करिष्ययमाणेतिनोहः।। अत्रस्वस्तिपुण्या-

हवाचनांतेइन्द्रः प्रीयतामितिवदेत्।। अपरेद्युः कृतनित्यक्रियः सपत्नीकः कुमारेण सहबहिः शालायांशुभासनेयथार्थंप्राङ्मुख उपविश्याचम्यप्राणानायम्यदेशकालकीर्तनांतेउपनयनांगभूतमस्य-कुमारस्यवपनं करिष्येइतिसंकल्प्यवपनंकारयित्वासुस्नातेकुमारे अस्यकुमारस्योपनयनेअधिकारार्थंत्रीन्ब्राह्मणान्भोजयिष्येइति-संकल्प्यानुच्छिष्टपाकेन ब्राह्मणत्रयभोजनं तत्पङ्क्तौमुंडितशिर-संकुमारमपिभोजयेत्।। ततः कुमारपिताबहिः शालायांवेद्युपरिपंच-भूसंस्कारपूर्वकंसमुद्भवनामानंलौकिकाग्निस्थापयेत्।। ततोवैकल्पि-कावधारणं।। तूष्णींमेखलाबंधनं।। दंडः पालाशः।। आसीनाय-गायत्रीप्रदानं।। एषातइतिसमिदाधान।। मातृपूर्वकमपरिमिताश्च-भिक्षणियाः।। नवाग्यतोहः शेषंतिष्ठेदितिपक्षः।। तत आचार्योपनीताः पुरुषाः कृतमंगलस्नानंस्रङ्मालाद्यैरलंकृतंबटुमाचार्यसमीपे-आनयन्ति।। ततः स्वाचारोद्वेद्यास्सोपानेस्थितेबटौब्राह्मणैर्मध्येन्तर-पटंधृत्वासुमंगलपद्यपठनपूर्वकंसुलग्नसमयेमनोजूतिरितिप्रतिष्ठा-मंत्रांते।। ॐ प्रतिष्ठेतिसुमुहूर्तमस्त्वितिच सर्वैः पठनीयं।। ततोन्तः पटमुदगपसार्याचार्योबटुमग्नेः पश्चात्स्व दक्षिणतोवस्थाप्य[31]ब्रह्म-चर्यमागामितिब्रूहीतिवदति।। ॐ ब्रह्मचर्यमागामितिब्रह्मचारीब्रूयात्।। ततोब्रह्मचार्यसानीति ब्रूहीत्याचार्योवदति।। ब्रह्मचार्यसानीति बटुर्ब्रूयात्।। ततआचार्योमाणवकंवासः परिधापयति।। ॐ येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतं।। तेनत्वापरिदधाम्यायुषेदीर्घायुत्वाय बलाय वर्चसे।। इत्यनेन।। ततआचार्योब्रह्मचारिणः कटिप्रदेशे-यथोक्तमेखलांबध्नाति।। ॐ इयन्दुरुक्तम्परिबाधमानावर्णम्पवित्र-म्पुनतीमऽआगात्।। प्राणापानाभ्याम्बलमाददानास्वसादेवीसुभगा-मेखलेयं।। इत्यनेनयुवासुवासाइतिमंत्रेणवाबंधनंतूष्णींवा।। माणवकस्यमंत्रपाठः।। ततोयज्ञोपवीतपरिधानं।। तत्रादावाचार्येणा-पोहिष्ठेतित्रिभिर्मंत्रैर्यज्ञोपवीतंप्रक्षाल्य।। ब्रह्मयज्ञानं० इदंविष्णु०

नमस्तेरुद्रेतित्रिभिर्मंत्रैरंगुष्ठमुपवीतेभ्रामयित्वा।। पुनस्तथैवनव तंतुषुदेवताः न्यसेत्।। तद्यथा।। प्रथमतंतौओंकारायनमः ओंकाकारंन्यसामि।। द्वि० अग्नये० अग्निन्य०।। तृ० नागेभ्यो० नागान्नय०।। च० सोमाय० सो० न्य०।। पं० इन्द्राय० इन्द्रंन्य०।। ष० प्रजापतये० प्रजापतिं०।। स० वायवे० वायुंन्य०।। अ० सूर्याय० सूर्यंन्य०।। न० विश्वेभ्योदेवेभ्यो० विश्वेदेवान्नय०।। ततस्तच्चक्षुरित्यनेनोपवीतंसूर्याय प्रदर्शयित्वातंकरसंपुटेकृत्वादशवा-रंगायत्र्याभिमंत्रयेत्ततोत्रब्रह्मचारी।। ॐ यज्ञोपवीतम्परमम्पवित्र-म्प्रजापतेर्यत्सहजम्पुरस्तात्।। आयुष्यमग्र्यम्प्रतिमुञ्चशुभ्रं-यज्ञोपवीतम्बलमस्तुतेजः।। यज्ञोपवीतमसियज्ञस्यत्वायज्ञो-पवीतेनोपनह्यामि।। इतिमंत्रपठित्वादक्षिणबाहुमुद्धृत्यवामस्कंधे-यज्ञोपवीतंनिवेशयति।। अत्राचमनंबटोः।। अथाचार्योमाणवकस्या-जिनंप्रयच्छति।। ॐ मित्रस्यचक्षुर्द्धरुणम्बलीयस्तेजोयशस्वी-स्थविरर्ठ्ठंसमिद्धम्।। अनाहनस्यम्वसनञ्जरिष्णुः परीदम्वाज्यजिनन्द-धेहम्।। इतिमाणवकस्यमंत्रपाठः।। तत आचार्योमाणवकायदंडं-प्रयच्छति।। तंप्रतिगृह्णाति।। ॐ योमेदंडः परापतद्वैहायसोधिभूम्याम्।। तमहम्पुनराददाम्यायुषेब्रह्मणेब्रह्मवर्चसाय।। इतिमाणवकस्यंत्रपाठः।। तूष्णींवादंडग्रहणं।। दीक्षावदेकेदीर्घसत्रमुपैतीति वचनात्।। अथाचार्योबटोरञ्जलिमद्भिः पूरयत्यापोहिष्ठेतितिसृभिराचार्य-पठितैस्त्रिभिर्मंत्रैस्त्रिवारमुदकासेकंकरोतिमाणवकः।। ॐ आपोहिष्ठा०।। ॐ योवः शिवत्र०।। ॐ तस्माऽअरङ्ग०।। ततआचार्योमाणवकंप्रेषयतिसूर्यमुदीक्षस्वेति।। ततोमाणवकस्त-च्चक्षुरितिसूर्यंपश्यति।। ॐ तच्चक्षुर्द्देव हितं०।। माणवकस्य-मंत्रपाठः।। तत आचार्योमाणवकस्यदक्षिणांसस्यो परिहस्तंनी-त्वातस्यहृदयमालभतेममव्रतेति।। ॐ ममव्रतेतेहृदयन्दधामिमम चित्तमनुचित्तन्तेअस्तु।। ममवाचमेकमनाजुषस्वबृहस्पतिष्ट्वानियुन-

क्तुमर्ह्यं।। इत्याचार्यस्यमंत्रपाठः।। ततआचार्योमाणवकस्य-दक्षिणहस्तंगृहीत्वाह।। को नामासि।। एवंपृष्टेमाणवकः प्रत्याह।। अमुकशर्माअहंभोः।। पुनराचार्यः पृच्छतिमाणवकं।। कस्यब्रह्मचार्यसीति।। भवतइत्युच्यमानेमाणवकेन।। तंप्रत्याचार्योब्रूयात्।। इन्द्रस्यब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्य-स्तवासौ अमुकशर्मन्निति।। अथैनंमाणवकम्भूतेभ्यः परिद-दात्याचार्यः।। ॐ प्रजापतयेत्वापरिददामिदेवाय त्वासवित्रेपरिद-दाम्यद्भ्यस्त्वौषधीभ्यः परिददामिद्यावापृथिवीभ्यान्त्वापरिददा-मिविश्वेभ्यस्त्वादेवेभ्यः परिददामि सर्वेभ्यस्त्वाभूतेभ्यः परिददाम्य-रिष्ट्यै।। इत्याचार्यपठितमंत्रेणमाणवकरक्षणं।। प्रदक्षिणमग्निं-पर्युक्ष्योपविशत्याचार्यस्योत्तरतोमाणवकः।। ततोब्रह्मोपवेशनादिच-रुवर्जंसर्वंप्रकृतिवत्पवित्रप्रणीतानिधानान्तेदक्षिणं जान्वाच्यस्त्रुवेण-मनसा।। ॐ प्रजापतयेस्वाहा।। इदंप्रजापतयेनमम।। ॐ इन्द्रायस्वा० इदमिन्द्राय०।। ॐ अग्नये० इदमग्ने०।। ॐ सोमायस्वाहा।। इदंसोमाय०।। ॐ भूः० इदमग्नये०।। ॐ भुवः स्वा० इदंवायवे०।। ॐ स्वः० इदं सूर्याय।। त्वन्नोऽअग्ने० इदमग्नीवरुणाभ्यां०।। ॐ सत्वन्नोऽअग्ने० इदमग्नीवरुणाभ्यां।। ॐ अयाश्चाग्ने० इदमग्नयेअयसे०।। ॐ येतेशतं० इदंवरुणायसवित्रेविष्णवेविश्वेभ्यो-देवेभ्योमरुद्भ्यः स्वर्केभ्यश्च०।। ॐ उदुत्तमम्० इदं वरुणायादित्यायादितये०।। ॐ प्रजापतये० इदंप्रजापतये०।। ॐअग्नयेस्विष्टकृते० इदमग्नयेस्विष्टकृतेनमम।। संस्रवप्राशनं।। पवित्राभ्यांमार्जनं।। अग्नौपवित्रप्रतिपत्तिः।। पूर्णपात्रवरयोरन्यत-रस्यब्रह्मणे प्रदानं।। प्रणीताविमोकः।। ॐ आपः शिवाइतिमंत्रेण-मार्जनं।। प्राशनान्तेथैन ꣳ स ꣳ शास्ति।। ब्रह्मचार्य-सीत्याचार्यआह।। भवानीतिब्रह्मचारीवदति।। अपोशानेत्याचार्यआह।। अशानीतिब्रह्मचारी।। कर्मकुर्वित्याचार्यआह।। करवाणीतिब्रह्मचारी।।

मादिवासुषुप्ताइत्याचार्यः।। नस्वपामीतिब्रह्मचारी।। वाचंयच्छे-
त्याचार्यः।। यच्छामीतिब्रह्मचारी।। समिधमाधेहीत्याचार्यः।।
आदधामीतिब्रह्मचारी।। आपोशानेत्याचार्यः।। अशानीतिब्रह्मचारी।।
अथास्मैब्रह्मचारिणेसावित्रीमन्वाहआचार्यः।। किंभूताय।। प्रत्यङ्मु-
खायपश्चिमाभिमुखाय।। पुनः किंभूताय।। उपविष्टायासीनाय।।
क्वइत्यपेक्षायामुत्तरतोग्नेरुत्तरस्यांदिशि।। उपसन्नायपादोपग्रहादिभ-
जमानाय।। पुनः किंभूताय।। गुरुंसमीक्षमाणाय।। पुनः किंभूताय।।
समीक्षिताय।। गुरुणासम्यगवलोकितायेति।। दक्षिणतस्तिष्ठतआ-
सीनायवैके।। एकेआचार्याअग्नेर्दक्षिणस्यां तिष्ठतेस्थितायोर्ध्व-
भूतायब्रह्मचारिणेआसीनायोपविष्टायवासावित्रीप्रदानमाहुः।।
एकग्रहणाद्विकल्पः।। कथमुपदेशइत्यपेक्षायां।। पच्छोर्द्धर्च्चशः सर्वां
चतृतीयेनसहानुवर्तयन्।। प्रथमं पच्छः पादंपादं।। ततोर्द्धर्चं।।
ततस्तृतीयेनवारेणबटुनासहसर्वांसावित्रींपठेत्।। ।। अत्राहलौगाक्षिः।।
ॐ भूर्भुवः स्वरित्युक्त्वातत्सवितुरितिसावित्रींत्रिरन्वाहपच्छोर्द्धशः
सर्वामंततइति। ।। सावित्रीप्रदानस्य कालविकल्पाः।। संवत्सरे-
षण्मास्येचतुर्विंᳪशत्यहेद्वादशाहेषडहेत्र्यहेवा।। उपनयनदिनमारभ्य-
एतेकालविकल्पाः क्षत्रियवैश्ययोः।। ब्राह्मणस्यतुसद्यस्त्वेवगायत्रीं-
ब्राह्मणायानुब्रूयात्।। आग्नेयोवैब्राह्मणइतिश्रुतेः।। त्रिष्टुभᳪरा-
जन्यस्य।। त्रिष्टुप्छंदस्कांसावित्रींक्षत्रिस्यानुब्रूयात्।। जगतींवैश्यस्य।।
जगतीछंदस्कांगायित्रींवैश्यस्यानुब्रूयात्।। सर्वेषांवा गायत्रीं।।
गायत्रीछंदस्कांगायत्रींब्राह्मणक्षत्रियविशांवानुब्रूयात्।। ।। अथोपदेशः।।
तत्रादावाचारात्कांस्यपात्रेतंदुलान्प्रसार्यतत्रसुवर्णशलाकया ॐ
कारब्याहृतिपूर्वकंगायत्रीमंत्रंलिखित्वा।। ममब्रह्मवर्चससिद्धि-
पूर्वकवेदाध्ययनाधिकारसिद्ध्यर्थंगायत्र्युपदेशांगतयाविहितं-
गायत्रीपूजनमाचार्यपूजनंचकरिष्ये। मनोजूतिरितिप्रतिष्ठाप्य।।
नाममंत्रेणयथालाभोपचारैर्गायत्रींसंपूज्याचार्यंपूजयेत्ततोपदिशेन्माण-

वकमाचार्यः।। तत्रमंत्रः।। ॐ भूर्भुवस्वः तत्सवितुर्वरेण्यम्भर्गो-देवस्यधीमहि।। धियोयोनः प्रचोदयात्।। उक्तप्रकारेणोपदेशं-गृहीत्वाप्रणवपूर्वकंस्वस्तीतिब्रूयाद्ब्रह्मचारी।। ततोयथोक्तमुपविश्य प्रकृतेग्नौसमिदाधानंकरोतिब्रह्मचारी।। तत्रपूर्वमग्नेः संधुक्षणं-पंचभिर्मन्त्रैरिंधनप्रक्षेपेण।। तद्यथा।। ॐ अग्नेसुश्रवः सुश्रव-संमाकुरु।। ॐ यथात्वमग्ने सुश्रुवः सुश्रवाऽअसि।। ॐ एवंमाथ्ठंसुश्रवः सौश्रवसंकुरु।। ॐ यथात्वमग्नेदेवानांयज्ञस्यनि-धिपाअसि।। ॐ एवमहं मनुष्याणांवेदस्यनिधिपोभूयासम्।। प्रदक्षिणमग्निमुदकेनपर्युक्ष्योत्थायसमिधआदधाति।। ॐ अग्नयेसमि-धमहार्षम्बृहतेजातवेदसे।। यथात्वमग्नेसमिधासमिध्यसऽएव-महमायुषामेधयावर्च्चसाप्रजयापशुभिर्ब्रह्मवर्चसेनसमिन्धेजीवपुत्रो ममाचार्योमेधाव्यहमसान्यनिराकरिष्णुर्यशस्वीतेजस्वीब्रह्मवर्चस्य-न्नादोभूयासथ्ठं स्वाहा।। इत्यनेनमंत्रेणप्रथमांतथाद्वितीयांतथैवतृतीयां।। एषातइतिमंत्रेणवासमिदाधानं।। मंत्रसमुच्चयोवा।। उपविश्य।। पुनः पूर्वोक्तपंचभिर्मंत्रैरग्नेः संधुक्षणंपर्युक्षणंचकुर्यात्।। ततस्तूष्णींपाणी-प्रतप्य तनूपाअग्नेत्यादिसप्तभिर्मंत्रैः प्रतिमंत्रंमुख-विमा[32]र्जनंकरोतिब्रह्मचारी।। ॐ तनूपाऽअग्ने सितन्वम्मे पाहि।। ॐ आयुर्दाऽअग्नेऽस्यायुर्मेदेहि।। ॐ वर्च्चोदाऽअग्नेसिवर्चो मेदेहि।। ॐ अग्नेयन्मेतन्वाऽऊनन्तन्मआपृण।। ॐ मेधांमेदेवः सविताऽआदधातु।। ॐ मेधांमेदेवीसरस्वतीआदधातु।। ॐ मेधामश्विनौदेवावाधत्तांपुष्करस्रजौ।। इत्येतेमुखमार्जनमंत्राः।। अत्रशिष्टाचारतोनुष्ठेयाःपदार्थाः।। ॐ अंगानिचमआप्यायतामितिशिरः प्रभृतिपादांतसर्वांगाण्यालभते।। ॐ वाक्चमऽआप्यायतामिति-मुखालंभनं।। ॐ प्राणश्चमऽआप्यायतामितिनासिकयोरालंभनं।। ॐ चक्षुश्चमऽआप्यायतामितिनेत्रयोरालंभनंयुगपत्।। ॐ श्रौत्रंचमऽ-आप्यायतामितिदक्षिणकर्णमालभ्यानेनैवमंत्रेणवामालंभनं।। ॐ

यशोबलं चमऽआप्यायतामितिमंत्रजपः।। ततस्त्र्यायुषाणि करोति।। भस्मनाललाटेग्रीवायांदक्षिणेऽꣳसे हृदिच।। त्र्यायुषमितिप्रतिमंत्रं।। ३ꣳ त्र्यायुषञ्जमदग्नेरितिललाटे।। कश्यपस्य त्र्यायुषमितिग्रीवायां।। ३ꣳ यद्देवेषुत्र्यायुषमितिदक्षिणेंसे।। ३ꣳ तन्नोअस्तुत्र्यायुषमिति हृदि।। ततः गोत्रनामपूर्वकंवैश्वानरादीनामभिवादनं।। तत्रब्रह्मचारीदक्षिण-कर्ण[33]समौहस्तौकृत्वाभिवादयेत्।। अमुकसगोत्रः अमुकप्रवरान्वितः [34]अमुकंशर्माअहंभोवैश्वानरत्वामभिवादये।। [35]आयुष्मान्भवसौम्य-अमुकशर्म्मन्नितिप्रत्यभिवादनं।। एवंभोसूर्यत्वामभिवादये।। आ० भव०।। भोचंद्रत्वामभिवादये।। आ० भव०।। भो[36]आचार्यत्वामभि-वादये।। आ० भव०।। भोअध्यापकत्वामभिवादये। आ० भव०।। ततो[37]वृद्धाभिवादनं।। अथभिक्षा [38]चर्यचरणं।। ।। तत्रब्रह्मचारीपात्रं-गृहीत्वाभवतिभिक्षांदेहीत्येवंभिक्षांयाचते।। भिक्षाग्रहणोत्तरं ३ꣳ स्वस्तीत्याशीर्वचनंदद्याद्ब्रह्मचारी।। भिक्षांभवतिदेहीतिक्षत्रियः।। भिक्षांदेहिभवतीतिवैश्यः।। एवंतिस्त्रोऽप्रत्याख्यायिन्यः षट्द्वादशा-परिमितावा।। [39]मातरंप्रथमामेके।। एवंयथार्हभिक्षांभिक्षयित्वा-चार्यायतांनिवेदयेत्।। अत्रमध्याह्नसंध्यांकुर्यादितिप्रयोगपारिजाते।। ततोभैक्षंभुंक्ष्वेतिगुरुणानुज्ञातेभोजनंकुर्यादितिभिक्षाचर्यचरणं।। ।। वाग्यतोहः शेषंतिष्ठेदित्येकं।। इतः प्रभृतियावदस्तमयंसंमित-वाक्तिष्ठेत् आसीतेत्येकेवदन्ति।। अत्रैकग्रहणाद्विकल्पः।। अहिꣳसन्नरण्यात्समिधऽआहृत्यतस्मिन्नग्नौपूर्ववदाधायवाचंविसृजते।। ततः सायंकालेसंध्यावंदनपूर्वकमग्निपरिचरणंपाणिनाग्निपरिसमूहती-त्यादिअभिवादनांतंकुर्यात्।। अत्रवाग्विसर्गोवा।। उपनयनाग्निस्त्रिरात्रं धार्यः।। त्र्यहमेतमग्निंधारयंतीत्यापस्तंबोक्तेः।। अतआरभ्यआब्रह्मचर्य परिसमाप्तेर्ब्रह्मचारिणोयमनियमाः कथ्यंते।। अधः शायीस्यात्।। अक्षारालवणाशीस्यात्।। दंडधारणंकर्तव्यं।। अरण्यात्स्वयंप्रशीर्णाः समिधआहृत्यसायंप्रातः संध्योपासनंकृत्वापरिसमूहनाद्यभिवादनांतं-

यथोक्तंकर्म कर्तव्यं।। गुरुशुश्रूषाकर्तव्यास्वाध्यायाविरोधेन।।
सांयप्रातर्भोजनार्थेभोजनसन्निधानेवारद्वयंभिक्षाचरणंकर्तव्यं।।
मधुमांसाशनंनकर्तव्यं।। मज्जनं न कर्तव्यं।। उद्धृतोदकेनस्नाया-
दित्यर्थः।। आसनोपरिमसूरिकाद्युपधानंकृत्वानोपविशेत्।। स्त्रीणां-
मध्येअवस्थानंनकर्तव्यं।। अनृतंनवक्तव्यं। अदत्तंनगृह्णीयात्।।
स्मृ[40]त्यंतरोक्ताश्चयमनियमाअनुष्ठेयाः।। यथा।। परिधृत-
वस्त्रंक्षालनंविनानादधीत।। भग्नंसुसंल्लग्नितंविकृतवस्त्रंनदधीत।।
अस्तसमयेभास्करावलोकनंनकुर्यात्।। शुल्कवदनंपरिवादादिवर्जयेत्।।
पर्युषितमन्नंभिस्सटान्नंचनभक्षयेत्।। कांस्यायसवंगमृद्पात्रेभोजन-
तेनपानंचनकुर्यात्।। तांबूलभक्षणंनकुर्यात्।। अभ्यंगमक्ष्णोरंजनमु-
पानच्छत्रादर्शंचवर्जयेदिति।। ।। अथाशीर्वादः।। ।।ओ३म् ब्रह्मचर्यमा-
गामित्याहब्रह्मणऽएवैतदात्मानन्निवेदयतिब्रह्मचार्यसानीत्याह-
ब्रह्मणऽएवैतदात्मानम्परिददात्यथैनमाहकोनामासीतिप्रजापतिर्वैकः
प्राजापत्यमेवैनन्तत्कृत्वोपनयते।। अथास्यहस्तङ्गृह्णातिइन्द्रस्य-
ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासावित्येतेवैश्रेष्ठे बलिष्ठे-
देवतेऽएताभ्यामेवैनꣳश्रेष्ठाभ्याम्बलिष्ठाभ्यान्देवताभ्याम्परिददातित-
थाहास्यब्रह्मचारीनकाञ्चनार्तिमार्च्छतिनसयऽएवंवेद।। अथैनम्भू-
तेभ्यःपरिददातिप्रजापतयेत्वापरिददामिदेवायत्वासवित्रेपरिददामीत्येते-
वैश्रेष्ठेव्वर्षिष्ठे देवतेऽएताभ्यामेवैनꣳश्रेष्ठाभ्याम्ब्वर्षिष्ठाभ्यान्देवताभ्या-
म्परिददातितथाहास्यब्रह्मचारीनकाञ्चनार्तिमार्च्छतिनसयऽएवंवेद।।
अद्भ्यस्त्वौषधीभ्यः परिददामीतितदेनमद्भ्यश्चौषधीभ्यश्चपरिददाति-
द्यावापृथिवीभ्यान्त्वापरिददामीतितदेनमाभ्यान्द्यावापृथिवीभ्याम्परिद-
दातिययोरिदꣳ सर्वमधिव्विश्वेभ्यस्त्वाभूतेभ्यः परिददाम्यरिष्ट्याऽ-
इतितदेनꣳसर्वेभ्योभूतेभ्यः परिददात्यरिष्ट्यैतथाहास्यब्रह्मचारीन-
काञ्चनार्तिमार्च्छतिनसुयऽएवंवेद।। ब्रह्मचार्यसीत्याहब्रह्मणऽएवैनन्त-
त्परिददात्यपोशानेत्यमृतंवाऽआपोमृतमशानेत्येवैनन्त दाहकर्मकुर्व्वि-

तिव्वीर्यंवैकर्मव्वीर्यङ्कुर्व्वित्येवैनन्तदाहसमिधमाधेहीतिसमित्स्वात्मा–
नन्तेजसाब्रह्मवर्चसेनेत्येवैनन्तदाहमासुषुप्थाऽइतिमामृथाऽइत्येवैनन्तदा–
हापोशानेत्यमृतंवाऽआपोमृतमशानेत्येवैनन्तदाहतदेनमुभयतोऽमृतेनपरिगृह्णा–
तितथाहास्यब्रह्मचारीनकाञ्चनार्तिमार्च्छतिनसयऽएवंवेद।। अथास्मै–
सावित्रीमन्वाहताꣳहस्मैताम्पुरासंवत्सरेन्वाहुः संवत्सरसम्मिता–
वैगर्भाः प्रजायन्ते जातऽएवास्मिँस्तद्वाचन्दध्मइति।। अथषड्सुमा–
सेषुषड्वाऽऋतवः संवत्सरस्यसंवत्सरम्मितावैगर्भाः प्रजायन्ते–
जातऽएवास्मिंस्तद्वाचन्दध्मइति।। अथचतुर्विꣳशत्यहेचतुर्विꣳश–
तिर्वैसंवत्सरस्यार्धमासाः संवत्सरसम्मितावैगर्भाः प्रजायन्तेजातऽ–
एवास्मिंस्तद्वाचन्दध्मइति।। अथद्वादशाहेद्वादशवैमासाः संवत्सरस्य–
संवत्सरसम्मितावैगर्भाः प्रजायन्तेजातऽएवास्मिंस्तद्वाचंदध्मइति।।
अथषडहेषड्वाऋतवः संवत्सरस्यवत्सरसम्मितावैगर्भाः
प्रजायन्तेजातऽएवास्मिंस्तद्वाचन्दध्मइति।। अथत्र्यहेत्रयोवाऽऋतवः
संवत्सरस्यसंवत्सरसम्मिता वैगर्भाः प्रजायन्तेजातऽएवास्मिंस्त–
द्वाचन्दध्मइति।। तदपिश्लोकङ्गायन्ति आचार्योगर्भीभवतिहस्त–
माधायदक्षिणम्।। तृतीयस्याꣳसजायतेसावित्र्यासहब्राह्मणऽ–
इतिसद्योहत्वावब्राह्मणायानुब्रूयादाग्नेयोवैब्राह्मणः सद्योवाऽअग्निर्ज्जा–
यतेतस्मात्सद्यऽएवब्राह्मणायानुब्रूयात्।। ताँ हैतामेकेसावित्रीमनुष्टुभ–
मन्वाहुर्व्वाग्वाऽअनुष्टुप्तदस्मिन्वाचन्दध्मऽइतिनतथाकुर्याद्यो–
हैनन्तत्रब्रूयादान्वाऽअयमस्यव्वाचमदितमूकोभविष्यतीतीश्वरोहतथै–
वस्यात्तस्मादेताङ्गायत्रीमेवसावित्रीमनुब्रूयात्।। अथहैकेदक्षिणतः
तिष्ठतेवासीनायवान्वाहुर्नतथा कुर्याद्योहैनन्तत्रब्रूयाद्बुल्वन्वाऽअयमिम–
मजीजनतबुल्वोभविष्यतीतीश्वरोहतथै वस्यात्तस्मात्पुरस्ता–
देवप्रतीचेसमीक्षमाणायानुब्रूयात्।। तांवैपच्छोन्वाहत्रयोवैप्राणाःप्राणऽ–
उदानोव्यानस्तानेवास्मिंस्तद्दधात्यथार्द्धर्च्चशोद्वौवाऽइमौप्राणौ
प्राणोदानावेवप्राणोदानावेवास्मिँस्तद्दधात्यथार्द्धर्च्चशोद्वौवाऽइमौ प्राणौ

प्राणोदानावेवप्राणोदानावेवास्मिँस्तद्दधात्यथकृत्स्नामेकोवाऽ-
अयम्प्राणः कृत्स्नऽएवप्राणमेवास्मिंस्तत्कृत्स्नान्दधाति।। तदाहुः
नब्राह्मणम्ब्रह्मचर्यमुपनीयमिथुनञ्चरेद्गर्भोवाऽएषभवतियोब्रह्मचर्यमु-
पैतिनेदिमब्राह्मणंविषिक्तादद्रेतसोजनयानीति।। तदुवाऽआहुःकाममेव-
चरेद्व्य्योवाऽइमाः प्रजोदैव्यश्चैव मनुष्यश्चतावाऽइमामनुष्यः प्रजाःप्रजन-
नात्प्रजायन्तेच्छन्दाꣳसिवैदैव्यः प्रजास्तानिमुखतोजनयतेततऽ-
एतञ्जनयतेतस्मादुकाममेवचरेत्।। तदाहुनब्रह्मचारीसन्मध्वश्नीया-
दोषधीनांवाएषपरमोरसोयन्मधुनंदन्नाद्यस्यान्तङ्गच्छानीत्यथह-
स्माहश्वेतकेतुरारुणेयोब्रह्मचारीसन्मध्वश्नंस्त्रय्यौवाऽएतद्विद्यायैशिष्टंय-
न्मधुसतुरसोयस्यैदृक्शिष्टमिति यथाहवाऽऋचंवायजुर्वामामवा
भिव्याहरेत्तादृक्तद्यऽएवंविद्वान्ब्रह्मचारीसन्मध्वश्नातितस्मादुकाममेव-
वाश्नीयात्।। ॐ ब्रह्मवैमृत्यवेप्रजाः प्रायच्छत्तस्मैब्रह्मचारिणमेव-
नप्रायच्छत्सोब्रवीदस्तुमह्यमप्येतस्मिन्भागऽइतियामेवरात्रिꣳ-
समिधन्नाहरताऽइतितस्माद्यꣳरात्रिम्ब्रह्मचारीसमिधन्नाह-
रत्यायुषऽएवतामवदायवसतितस्मात्ब्रह्मचारी समिधमाहरेन्ने-
दायुषोवदायव्वसानीति।। दीर्घसत्रंवाऽएषऽउपैतियोब्रह्मचर्य-
मुपैतिसयामुपयन्त्समिधमादधातिसाप्रायणीयायाꣳ स्नास्यन्त्सो-
दयनीयाथया ऽअन्तरेणसत्र्याएवास्यताब्राह्मणोब्रह्मचर्यमुपयन्।।
चतुर्धाभूतानिप्रविशति अग्निम्पदामृत्युपदाचार्यम्पदात्मन्येवास्य चतुर्थः
पादः परिशिष्यते।। सयदग्नयेसमिधमाहरतियऽएवास्याग्नौपादस्त-
मेवतेनपरिक्रीणातितꣳ संस्कृत्यात्मन्धत्तेसऽएनमाविशति।।
अथयदात्मानंदरिद्रीकृत्येवाह्रीर्भूत्वा भिक्षतेयऽएवास्यमृत्यौपादस्त-
मेवतेनपरिक्रीणातितꣳ संस्कृत्यात्मन्धत्तेसऽएनमाविशति।।
अथयदाचार्यवचसङ्करोतियदाचार्यायकर्मकरोतियऽएवास्याचार्ये-
पादस्तमेवतेनपरिक्रीणातितꣳसंस्कृत्यात्मन्धत्तेसऽएनमाविशति।।
नहवैस्नात्वा भिक्षेतापहवैस्नात्वाभिक्षाञ्जयत्यपज्ञातीनामशना-

यामुपपितृणाँ॒ सुऽएवंविद्वान्यस्याऽएवभूयिष्ठ᳖ंश्लाध्येततांम्भि-
क्षेतेत्याहुस्तल्लोक्यमितिसयद्यन्याम्भिक्षितव्यान्नविन्देदुपिस्वामे-
वाचार्यजायाम्भिक्षेताथोस्वाम्मातरन्नैनᳲं सप्तम्यभिक्षितातीयात्तमेवम्वि-
द्वाᳲं समेवञ्चरन्तᳲं सर्व्वेवेदाऽआविशन्तियथाहवाऽअग्नि सुमिद्धो-
रोचतऽएवँ॒ हवैसस्नात्वारोचतेयऽएवम्विद्वान्ब्रह्मचर्यञ्चरति।। अष्टावष्टौ
कृत्वोब्रह्मवर्चसकामस्याभिषुणुयादित्याहुरष्टाक्षरावैगायत्रीब्रह्मगायत्री
ब्रह्मवर्चसीहैवभवति।। सयः कामयेतब्रह्मवर्च्चसीस्यामिति-
व्वसन्तेसऽआदधीतब्रह्मवैव्वसन्तोब्रह्मवर्च्चसीहैवभवति।।
शतमानम्भवतिशतायुर्वैपुरुषः शतेन्द्रियऽआयुरेवेन्द्रियंवीर्यमात्म-
न्धत्ते।। ब्रह्मवर्चसीभव।। कृतस्योपनयनकर्मणः सांगतासिद्ध्यर्थं-
स्मृत्युक्तान्पंचाशत्संख्यब्राह्मणान्भोजयिष्यइति संकल्प्याचार्यादीन्
गंधवस्त्रादिभिश्चसंपूज्यतेभ्यश्चदक्षिणांदत्वातेषामाशिषो गृहीत्वास्था-
पितमातृकादिदेवतानांविसर्जनं।। इतिसंस्कारभास्करेउपनयनप्रयोगः।।
अथोपनयनादूर्ध्वंयावद्ब्रह्मचर्यंतावन्नित्यंसायंप्रातरग्निपरिचरणविधिः।।
।। सायंकालीनसंध्यांकृत्वाधृतदंडादिर्गृहीतेन्धनाज्यसमिदग्नि-
समीपेगत्वास्वासनेउपविश्याचम्यप्राणानायम्यदेशकालौ-
स्मृत्वाममब्रह्मवर्चससिद्धि द्वाराश्रीअग्निस्वरूपीपरमेश्वरप्रीतये-
सायमग्निपरिसमूहनादिकंकरिष्ये।। पाणिनाग्निपरिसमूह्याग्निमुखं-
कृत्वाग्नेस्तुश्रवइत्यादिपंचभिर्मंत्रैः प्रतिमंत्रंघृताक्तेन्धनप्रक्षेपः।।
जलेनप्रदक्षिणमग्निपर्युक्ष्योत्थायघृताक्तसमिधमेकांगृहीत्वाऽग्नयेसमि-
धमाहार्षमितिमंत्रांतेग्नौजुहुयात्।। अनेनैवद्वितीयांतृतीयांचसमिधमा-
दध्यात्।। पुनरग्नेसुश्रवइत्यादिपंचभिर्मन्त्रैः पञ्चेन्धनंप्रक्षिप्यतूष्णीं-
पाणीप्रतप्यतनूपाअग्नेसीत्यादिसप्तमंत्रैः प्रतिमंत्रमुखविमार्जनं।। ।।
ततोंगानिचमआप्यायतामित्यादियशोबलमित्यंतमंत्रैः प्रतिमंत्र-
मुक्तांगालंभनं।। ततस्त्र्यायुषमितिमंत्रेणोक्तरीत्याभस्मधारणं।।
ततोयथोक्तमभिवादनं।। अनेनसायमग्निपरिचरणेन अग्निस्वरूपी-

परमेश्वरः प्रीयतां।। एवं प्रातः संध्यांकृत्वाचम्य प्राणानायम्यदेश-कालौस्मृत्वाममब्रह्मवर्चससिद्धिद्वाराश्रीअग्निस्वरूपीपरमेश्वरप्रीतये प्रातरग्निपरिसमूहनादिकंकरिष्य इत्यूहेनेन्धनप्रक्षेपाद्यभिवादना-न्तंसर्वंसायंकालीनवदिति।। ।। इतिसंस्कारभास्करेब्रह्मचारिणो-नित्याग्निपरिचरणविधिः।। ।। अथवेदब्रह्मचर्यव्रतमाह।। ।। पारस्करः।। अष्टाचत्वारिंशतंवर्षाणि वेदब्रह्मचर्यंचरेत्।। अष्टाचत्वारिंशतंवर्षाणिवेदब्रह्मचर्यंचरेत्।। चतुर्णामपि वेदानांग्रहणार्थं-एकमेवब्रह्मचर्यंव्रतंकुर्यात्।। अस्मिन्पक्षेचतुर्णामपिवेदानामेक-एवव्रतादेशः।। सर्वाश्चवेदाहुतयोहूंयते ।। द्वादशद्वादशवाप्रतिवेदं।। प्रतिवेदंद्वादशद्वादशवर्षं ब्रह्मचर्यंचरेत्।। एकंवेदंसमाप्यस्नात्वापुन-र्द्वितीयवेदग्रहणार्थंब्रह्मचर्यंचरित्वास्नात्वैवंवेदांतरेपिब्रह्मचर्यंचरेदित्यर्थः।। ।। यावद्ग्रहणंवा।। यद्वायावद्वेदस्यवेदयोर्वेदानांपाठतोर्थतश्च-स्वीकरणंतावत्ब्रह्मचर्यंचरेदति।। ।। [41]आचार्येणाहूतउत्थायप्रति-शृणुयात्।। आचार्येणआकारितोब्रह्मचारी आसनादुत्थायप्रति-वचनंदद्यात्।। आसीनंचेत्तिष्ठन्।। चेद्यद्युपविष्टं ब्रह्मचारिणमा-कारयतितदासतिष्ठन्प्रतिवचनंदद्यात्।। तिष्ठंतंचेदभिक्रामन्।। चेद्यदितितिष्ठंतंब्रह्मचारिणमाह्वयतितदाअभिक्रामन्नाचार्याभिमुखंव्र-जन्प्रतिवचनंकुर्यात्।। अभिक्रामंतंचेदभिधावन्।। चेद्यदिअभिक्रामंतं ब्रह्मचारिणमाकारयत्याचार्यस्तदासोऽभिधावन्आचार्याभिमुखंधा-वन्प्रतिवचनं दद्यात्।। ।। अस्यार्थवादमाह।। ।। सएव।। सएवंवर्त्त-मानोमुत्राद्यवसत्यमुत्राद्यवसतीति।। सब्रह्मचारीएवंपूर्वोक्तब्रह्मचर्य-धर्मेणवर्त्तमानः अमुत्रस्वर्लोके अद्यइहैवस्थितः सचतिष्ठति।। अत्रद्विरुक्तिः प्रशंसार्था। तस्यस्नातस्यकीर्तिर्भवति।। येनैवंब्रह्मचर्या-नुष्ठानं कृतंतस्यस्नातस्य समावृतस्यकीर्त्तिर्यशो भवतीति।। स्नातकलक्षणमाह।। ।। स एव।। त्रयः स्नातकाभवंति।। विद्यास्नातकोव्रतस्नातकोविद्याव्रतस्नातकइति।। त्रिविधा

स्नातकाइत्युक्तंतत्रैकोविद्यास्नातकः।। द्वितीयोव्रतस्नातकः।।
तृतीयोविद्याव्रतस्नातकइति।। समाप्यवेदमसमाप्यव्रतंयः समावर्त्तते-
सविद्यास्नातकः।। वेदंमंत्रब्राह्मणात्मकं व्रतंद्वादशवार्षिकंब्रह्मचर्यव्रतं।।
।। समाप्यव्रतमसमाप्यवेदंयः समावर्त्ततेसव्रतस्नातकः।। स्पष्टोर्थः।।
एवंचव्रतस्नातकस्यविवाहोत्तरकालमध्ययनसमापनं वेदार्थज्ञानंचेति-
मंतव्यं।। उभयंसमाप्ययः समावर्त्ततेसविद्याव्रतस्नातकः।। उभयंवेदं-
पूर्वोक्तब्रह्मचर्यंचसमाप्ययःसमावर्त्ततेस्नातिसविद्याव्रतस्नातकइत्युच्यते।।
लक्षणप्रयोजनंचस्नातकानेकइत्यादिषुज्ञेयम्।। ।। उपनयनाग्नौनष्टे।।
।। कारिकायां। व्रताग्निनाशेव्रतिनात्रीन्कृच्छ्रांश्चव्रतंचरेत्।। प्राग्वदग्निं-
प्रतिष्ठाप्यकटिसूत्रादिकंपुनः।। स्पृशन्मंत्रान्पठेदग्नावाज्येनाहुति
पूर्ववत्।। नगायात्र्युपदेशंचकृत्वाग्निपरिशुश्रुषामिति।। ।।
अथब्रह्मचारिव्रतलोपेप्रायश्चित्तमाह।। बौधायनः।। अत्रशौचाचमन-
संध्यावंदनदर्भभिक्षाग्निकार्यराहित्यशूद्रादिस्पर्शकौपीनकटिसूत्र-
यज्ञोपवीतमेखलादंडाजिनत्यागदिवास्वापच्छत्रधारणपादुकाध्या-
रोहणामालाधरणोद्वर्तनानुलेपनांजनजलक्रीडाद्यूतनृत्यगीतवाद्या-
द्यभिरतिपाखंडादिसंभाषणपर्युषितभोजनादिब्रह्मचारिव्रतलोपजसकल-
दोषपरिहारार्थंब्रह्मचारीकृच्छ्रत्रयंचरेन्महाव्याहृतिहोमंचकुर्यात्।।
तद्यथा। आचम्यप्राणानायम्यदेशकालौस्मृत्वाशौचाचमनादिब्रह्मचारि-
व्रतनियमानांमध्येयः कश्चिन्नियमलोपस्तज्जनितदोषपरिहारार्थंकृच्छ्रत्रय-
प्रायश्चित्तमथवात्प्रत्याम्नागोनिष्क्रयीभूतरजतद्रव्यदानंमहाव्या-
हृतिहोमंचकरिष्यइतिसंकल्प्योक्तप्रायश्चित्तंकृत्वास्थंडिलेपंचभू-
संस्कारपूर्वकंविट्नामानंलौकिकाग्निंप्रतिष्ठाप्यब्रह्मोपवेशनाद्याज्य-
भागांतंकृत्वाप्रथमंव्यस्तसमस्ताभिर्व्याहृतिभिश्चतस्रआज्याहुतीर्हुत्वा-
भूरग्नयेचपृथिव्यैचमहतेचस्वाहाभुवोवायवेचांतरिक्षायमहतेचस्वाहास्व-
रादित्यायचदिवेचमहतेचस्वाहा। भूर्भुवः स्वश्चंद्रमसेनक्षत्रेभ्यश्चदिग्भ्य-
श्चमहतेचस्वाहा।। पाहिनोअग्नएनसेस्वाहा।। पाहिनोविश्ववेदसे-

स्वाहा।। यज्ञंपाहिविभावसोस्वाहा।। सर्वंपाहिशतक्रतोस्वाहा।। पुनरूर्जानिवर्त्तस्वपुनरग्गनऽइषायुषा।। पुनर्न्नः पाह्यंश्हसः स्वाहा।। सहरज्यानिवर्तस्वाग्ने पिन्वस्वधारय्या।। व्विश्वपस्न्याव्विश्वत-स्परिस्वाहा।। पुनर्व्याहृतिभिर्हुत्वास्विष्टकृदादिवरदानांतंशेषंसमापये-दिति।। एतदल्पधर्मलोपेप्रायश्चित्तं।। बहुधर्मलोपेतुप्रायश्चित्तविशेषो-ऋग्विधानेशौनकेनोक्तः।। तंनोधियाजपेन्मंत्रंलक्षंचैवशिवालये।। ब्रह्मचारीस्वधर्मंचन्यूनंचेत्पूर्णमेवतदिति।। महानाम्न्यादिव्रतेषुलुप्तेषु-तारतम्येनत्रीन्षट् द्वादशवाकृच्छ्रान्कृत्वापुनर्व्रतं प्रारभेतेति।। स्मृत्यर्थसारे।। तथासंध्याग्निकर्मलोपेस्नात्वाष्टसहस्त्रंजपः।। भिक्षालोपेष्टशतं।। अभ्यासेद्विगुणं।। पुनः संस्कारश्चेत्युक्तं।। जपश्चायंगायत्र्याः।। त्रुटितानांमेखलादीनांप्रतिपत्तिमाह।। मनुः।। मेखलामजिनंदंडमुपवीतंकमंडलुम्।। अप्सुप्रास्यविनष्टानि-गृहीत्वान्यानिमंत्रवदिति।। ।। इतिसंस्कारभास्करेब्रह्मचारित्र-व्रतलोपेप्रायश्चित्तं।। ।। अथषाढमूकादीनां विशेषउक्तः।। ।। प्रयोगपारिजाते।। ब्राह्मण्यांब्राह्मणाज्जातोब्राह्मणः सइतिश्रुतिः।। तस्माच्चषंढबधिरकुब्जवामनपंगुषु।। जडगद्गद्रोगार्त्तशुष्कांग-विकलांगिषु।। मत्तोन्मत्तेषुमूकेषुशयनस्थेनिरिंद्रिये।। ध्वस्तपुंस्त्वेषु-चैतेषुसस्काराः स्युर्यथोचित।। मत्तोन्मत्तौनसंस्कार्याविति-केचित्प्रचक्षते।। कर्मस्वनधिकाराच्चपातित्यंनास्तिचैतयोः।। तदपत्यंचसंस्कार्यमपरेत्वाहुरन्यथा।। संस्कारमंत्रहोमादीन्करोत्या-चार्यएवतु।। उपनेयांश्चविधिवदाचार्यः स्वसमीपतः।। आनीयाग्नि-समीपेवासावित्रींस्पृश्यवाजपेत्।। कन्यास्वीकरणादन्यत्सर्वं-विप्रेणकारयेत्।। एवमेवद्विजैर्जातौसंस्कार्यौकुंडगोल[42]काविति।। स्मृत्यर्थसारेप्येवं।। आपस्तंबः।। शूद्राणामदुष्टकर्मणामुपनयनं।। इदंचरथकारस्योपनयनपरं।। तस्यचमातामहीद्वारकंशूद्रत्वं।। अदुष्टकर्मणामद्यपानादिरहितानामिति।। ।। इतिसंस्कारभास्करेषंढ-

मूकादविकलांगानामुपनयनम्।। ।। अथपुनरुपनयनं।। ।। तच्चत्रिविधं।। प्रत्यवायनिमित्तकं प्रायश्चित्तभूतंपुनरुपयनमाद्यं।। तच्चजातकर्मादिसहितंतद्रहितंप्रायश्चित्तांतरसहितं केवलंचेत्यनेकविधं।। कृतस्योपनयनस्तोक्तकालाद्यंगवैगुण्येनवैफल्यापत्तावपरं।। वेदांतराध्ययनार्थंविहितंतृतीयं।। तत्रप्रथमं यथा।। अमत्याऔषधांतरावश्यरोगनाशार्थंपैष्ट्याः सुरायाः पानेत्रिमासंकृच्छ्राचरणंपुनरुपनयनंच।। मत्यापैष्ट्यन्यसुरायाऔषधार्थंपाने कृच्छ्रातिकृच्छ्रौपुनरुपनयनंच।। पैष्टीपानेद्वदशाब्दं।। अज्ञानाद्वारुणीगौडीमाध्वीसुरापीता चेत्पुनरुपनयनंतप्तकृच्छ्रंच।। अज्ञानादेतोविण्मूत्राणामशनेसुरासंसृष्टान्नजलादिभक्षणेच पुनः संस्कारस्तप्तकृच्छ्रंच।। ज्ञात्वाविण्मूत्राद्यशनेचांद्रायणपुनः संस्कारौ।। लशुनपलांडुगृंजनविड्वराहग्रामकुक्कुटनरगोमांसभक्षणेद्विजातीनांतत्तत्प्रायश्चित्तातेपुनरुपनयनं।। अविखरोष्ट्रमानुषीक्षीरपानेहस्तिनीवडवाक्षीरपानेचतप्तकृच्छ्रंपुनः संस्कारश्च।। रासभोष्ट्राद्यारोहणेकृच्छ्रः पुनः संस्कारश्च।। इदहेमाद्रिमतमिताक्षरास्मृत्यर्थसारादिमतेरासभोष्ट्रारोहेउपवासत्रयादिमात्रं नतुपुनः संस्कारः कौस्तुभाशयोप्येवं।। वृषभारोहणेअमत्याकृच्छ्रंमत्याकृच्छ्रत्रयादि।। केचिद्वृषारोहेपुनः संस्कारंकुर्वंतितत्रमूलंमृग्यं।। एवमजबस्त महिषारोहेपि।। मांसभक्षकपशोर्विट्भक्षणेपुनरुपनयनमात्रं।। केचित्तुमानुष मलभक्षणेपिपुनः संस्कारमात्रमाहुः।। प्रेतशय्याप्रतिग्राहीपुनः संस्कारमर्हति।। जीवतोमृतवार्तांश्रुत्वांत्यकर्मकरणे तंघृतकुंभेनिमज्योद्धृत्यस्नापयित्वाजातकर्माद्युपनयनांतसंस्कारान्कृत्वात्रिरात्रव्रतांतेपूर्व भार्यातस्यांअन्यभार्ययाविवाहः कार्यः।। आहिताग्निश्चेत्पुनराधानायुष्मदिष्ट्यादि।। तीर्थयात्रांविनाकलिंगांगवंगांध्रसिंधुसौवीरम्लेच्छदेशप्रत्यंतवा सिदेशगमनेपुनः संस्कारः।। चांडालान्नभक्षणेचांद्रायणं।। बुद्धिपूर्वक भक्षणेकृच्छ्राब्दं।। उभयत्रपुनः संस्कारः।। अजिनंमेखलादंडोभैक्षचर्याव्रतानिच।।

निवर्ततेद्विजातीनांपुनः संस्कारकर्मणि।। वपनंमेखलेतिस्मृत्य-
तरेपाठः।। ब्रह्मचारिणोमधुमांसाशनेपुनरुपनयनंप्राजापत्यंत्रिरात्रो-
पवासोवा।। मत्याभक्षणेपराकः।। अभ्यसेद्विगुणंपुनः संस्कारश्च।।
पितृमातृगुरुभ्योभिन्नस्यप्रेतस्यात्यं कर्मकरणेब्रह्मचारिणः पुनरुप-
नयनं।। हस्तमथितदधिभक्षणेबहिर्वेदिपुरोडाशाशनेअभ्यासेकृच्छ्रः
पुनः संस्कारश्च।। यः संन्यासंगृहीत्वाततोनिवृत्त्यगार्हस्थ्यंचिकीर्षति-
सषण्मासंकृच्छ्रान्कृत्वाजातकर्मादिसंस्कारैः संस्कृतः शुद्धो
गार्हस्थ्यंकुर्यात्।। एवमनशनंमरणार्थंसंकल्प्यनिवृत्तोपिकुर्यात्।।
कर्मनाशाजलस्पर्शात्करतोयाविलंघनात्।। गंडकीबाहुतरणात्पुनः
संस्कारमर्हतीति।। अथद्वितीयं पुनरुपनयनं।। ।। प्रदोषेनिश्य-
नध्यायेमंदेकृष्णेगलग्रहे।। अपराह्णेचोपनीतः पुनः संस्कारमर्हति।।
अत्रप्रदोषःप्रदोषदिनंकृष्णपक्षएकादश्यादिरंत्यत्रिकरूपोपराह्णश्च-
दिनतृतीयभागरूपइत्युक्तम्।। अनध्यायाअपिनित्या एवपौर्णिमा-
प्रतिपदादयः पुनरुपनयननिमित्तंनतुनैमित्तिकाअकालवृष्ट्यादि-
निमित्तकत्रिरात्रादयः।। ।। नैमित्तिकेषुप्रातर्गर्जितनिमित्तानध्यायएवपुनः
संस्कारनिमित्तम्।। अत्रविस्तारः कौस्तुभे।। असाभिमर्श पूर्वकंबटोः
समीपमानयनंप्रधानकर्मतस्यविस्मरणेपुनरुपनयनम्।। एवंगायत्र्युप-
देशविस्मरणेपीति।। तृतीय पुनरुपनयननिमित्तप्रकारः।। एकंवेद-
मधीत्यवेदांतराध्ययनचिकीर्षायांप्रति वेदंपुनरुपनयनमित्येके।।
अन्यवेदिनामृग्वेदाध्ययनार्थंपुनरुपनयनमित्यपरे।। अन्येतुएकेनैवोप-
नयनेनवेदत्रयाध्ययनाधिकारः।। अथर्ववेदाध्ययनार्थंद्वितीयमु-
पनयनमित्याहुः।। तेनऋगादिवेदत्रयाध्यायिनोमुंडमांडूक्याद्याथ-
र्वणोपनिषदो विना पुनः संस्कारंपठंतितेचिंत्याः।। युगपदनेकवेदा-
रंभेनोपनयनावृत्त्यपेक्षेतिसकृदुपनीत्यायुगपत्सकलवेदारंभः सिध्य-
तीत्यपरे।। तत्रैकेवदाध्ययनानंतरंयद्वेदाध्ययनचिकीर्षातद्वेदेति-
कर्तव्यताकंपुनरुपनयनम्।। तत्रवपनंब्रह्मौदनंमेधाजननंदीक्षा-

चकृताकृता।। परिदानांताक्रियाभवति।। अनध्यायादिकेद्वितीय
पुनरुपनयननिमित्तेसर्वमविकृतंयथोक्तकाले उपनयनम्।।
अथप्रायश्चित्तार्थे व्रतबंधेविशेषः।। तत्रनिमित्तानंतरमेवकरणउदगयन
पुण्यनक्षत्राद्युक्तकालोनापेक्ष्यते।। अन्यथातुयथोक्तकालापेक्षा।।
तत्रकर्त्तापिता।। तदभावेपितृव्यादिसपिंडः तदभावेन्यः कश्चित्।।
यत्रपुनरुपनयनंप्रायश्चित्तत्वेनोक्तंतत्रपर्षदुपदिष्टविधिनातदेवकार्यम्।।
यत्रतुप्रायश्चित्तांतरसहितंविहितंतत्रोक्तविधिना प्रायश्चित्तसंस्कार्येणकार-
यित्वाचार्येणतस्योपनयनंकार्यं। यत्रचजातकर्मादि संस्कारसहित-
मुपनयनंविहितंतत्रजातादिचौलांतसंस्कारान्कृत्वाकार्यमिति।। ।।
अथयजुः शाखिनांपुनरुपनयनप्रयोगः।। ।। ग्रामात्प्राच्यामुदीच्यांवा-
दिशि गत्वायत्रग्राम्यपशुशब्दोनश्रूयते तादृशदेशमार्जनोपलेपनाभ्यां-
शोधयित्वातत्रोपनयनंकार्यं।। ।। तत्रबौधायनः।। अथोपनीतस्य-
व्रात्यानिभवंतिनान्यस्यो च्छिष्टभुंजीतान्यत्रपितृजेष्ठाभ्यां-
नस्त्रियासहभुंजीतमधुमांसश्राद्धंसूतकान्नानिर्दशाहसंधिनी-
क्षीरंछत्राकिनिर्यासौविलापनंगणान्नगणिकान्नमित्येतेषुपुनः संस्कारः
प्रतिषिद्धदेशगमनमित्येकेषामित्यादि।। तावद्ब्रह्मचारिणाममो-
च्छिष्टभोजनादिपरिगणितदोषाणांमध्येमुकदोषनिरसनार्थंपर्षदुपदिष्ट-
प्रायश्चित्तसहितंपुनरुपनयनंतत्रप्रायश्चित्तमहमाचरिष्ये।। इतिसंकल्प्य-
प्रायश्चित्तंकुर्यात्।। तत आचार्योस्यामुकदोषपरिहारार्थं-
पुनरुपनयनसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंद्वादशसहस्रगायत्री-
जपंस्वयंवान्यद्वाराकृच्छ्रत्रयंचोपनेतृत्वाधिकारार्थमहंकरिष्ये।।
ततोब्रह्मचारीस्थंडिलेग्निस्थापनाद्याज्यभागांतंसर्वंपृकृतवत्कृत्वाघृ-
तात्क्तपालाशींसमिधंजुहुयात्।। तत्रमंत्रः।। ॐ पुनस्त्वा दित्या०
सं तु यजमानस्य कामाः स्वाहा।। इदमग्नयेनमम।। ॐ
पुनर्म्मनःपुनरायुर्म्मऽआगन्पुनः प्राणःपुनरात्मामऽआगन्पुनश्चक्षुःपुनः
श्रोत्रम्मआगन्।। वैश्वानरोऽअदब्धस्तनूपाऽअग्निर्नः पातुदुरितादवद्या-

त्स्वाहा।। इदमग्नयनेमम।। ततश्चरुमभिघार्यजुहुयात्।। ॐ सुप्ततेंअग्नेसुमि० तेनस्वाहा।। इदमग्नयेनमम।। ॐ यत्तेंपवित्रम्- र्चिष्यग्नेवितंतमंतरा।। ब्रह्मतेनंपुनातु मास्वाहा।। इदमग्नयेन०।। ॐ पवमानः सोऽअद्यनंःपवित्रेणविचर्षणिः।। वःपोतासपुनातुमा- स्वाहा।। इदमग्नयेन०।। ॐ उभाभ्यांदेवसवितःपवित्रेणसवेनंच।। माम्पुंनीहिविश्वतः स्वाहा।। इदमग्नयेन०।। ततः स्विष्टकृदादिहोम- शेषंसंमाप्यगोवरंदद्यादिति।। ततः कर्ताआचम्यप्राणानायम्यदेश- कालौस्मृत्वास्यब्रह्मचारिणः पुनरुपनयनं करिष्ये।। अथवास्यपुनः संस्कारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंजातकर्माद्युपनयनान्तानि- कर्माणिकरिष्ये।। तत्रादौनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंतदंगत्वेन च स्वस्तिवाचनादीनिकरिष्ये।। अत्रस्वस्तिवाचनांतेऽग्निः प्रीयतामित्यूहः।। नांदीश्राद्धान्तंकृत्वास्वशाखोक्तप्रयोगानुसारेण- जातादिचौलांतसंस्कारान्कृत्वोपनयनंकार्यं।। केवलमुपनयने- तुनांदीश्राद्धान्तंकृत्वाधिकारार्थंब्राह्मणत्रंयंभोजयित्वावपनादि- कंकृत्वोपनयनंकार्यं।। ब्रह्मचारिणः पुनरुपनयनेमेखलादानादि- ब्रह्मचर्योपदेशांतंनित्यवत्।। ।। अथापरमापरिधानांतकृत्वापा- लाशींसमिधमाधायव्रात्यप्रायश्चित्तंजुहोति।। अथव्याहृतीर्जुहोति।। ।। अथापरोब्राह्मणवचनात्सावित्र्याशतकृत्वोभिमंत्रितंघृतंप्राश्यकृत- प्रायश्चित्तो भवतीत्यादिकमवदत्।। अत्रोक्तपक्षाणांशक्ताशक्तभेदेन- व्यवस्थाबोध्या।। ।। इति ब्रह्मचारिणः पुनरुपनयनप्रयोगः।। ।। अन्यस्यतुयत्रप्रायश्चित्तांतरसहितंपुनरुपनयनंविहितंतत्रप्रागुक्तस्थले- तीर्थेवागत्वा ममामत्याऔषधांतरावश्यरोगनाशार्थंपैष्टीसुरापानजनित- दोषापोहकंपर्षदुपदिष्टंत्रैमासिककृच्छ्रव्रतसहितंपुनरुपनयनं- तत्रामुकप्रत्याम्नायेनत्रैमासिकंकृच्छ्रव्रतमहमाचरिष्ये इतिसंकल्प्य- तत्स्वयंकुर्यात्।। आचार्यस्तुअस्यामुकदोषपरिहारार्थंपुनरूप यनंकरिष्ये।। तत्रचममोपनेतृत्वाधिकाररिसद्ध्यर्थंद्वादशसह-

स्त्रगायत्रीजपंकृच्छ्रत्रयंच करिष्येइतिकृत्वास्वशाखोक्तमुपनयनकुर्यात्।।
यत्रपुनरुपनमात्रंप्रायश्चित्तं तत्रसंस्कार्यस्यनसंकल्पः किंत्वाचार्यस्यैव।।
अत्रोपनयनेअजिनमेखलादंड भैक्ष्यचर्याव्रतादिकंवैकल्पिकम्।। ।।
यत्रजातकर्मादिसंस्कारसहितंपुनरुपनयनंतत्रयथार्थमूहः कार्यः।। ।।
यथा।। अस्यकृतौर्ध्वदैहिकस्यपुनः संस्कारसिद्धिद्वाराश्रीपरमेश्वर-
प्रीत्यर्थंजातकर्मादीन्युपनयनांतानिकर्माणिकरिष्यइतिसंकल्पः।।
एवंनिमित्तांतरेपिसंकल्पऊह्यः।। ततः।। सर्वोद्देशेनगणपति-
पूजनादिनांदीश्राद्धांतंकृत्वायथोक्तसंस्कारैः संस्कुर्यात्।।
अत्रश्मश्रुवापनानंतरंचौलकेशवापनमितिविशेषोमहावयसः।।
यत्रपुनरुपनयनांतेपुनर्विवाहः कृतौर्ध्वदैहिकादेः श्रूयतेतत्रमेखलादि-
धारणपूर्वकंकतिचिद्दिनानिब्रह्मचर्यंकृत्वोचितकालेसमाप्यपूर्व-
भार्ययान्ययावाविवाहंकुर्यात्।। तत्रविवाहसंकल्पंतदंगभूतंसर्वं-
स्वयमेवकुर्यात्।। ।। इतिसंस्कारभास्करेपुनरुपनप्रयोगः।। ।।
अथयमलजातपुत्रयोः संस्कारविचारः।। ।। तत्रतावुत्संस्कार-
क्रमार्थंज्येष्ठकनिष्ठतोच्यते।। ।। मनुः जन्मज्येष्ठेनचाह्वानंसुब्रह्मण्या-
स्वपिस्मृतं।। यमयोश्चैवगर्भेषुजन्मतोज्येष्ठतामतेति।। देवलोपि।।
यस्जातस्ययमयोः पश्यंतिप्रथमंमुखं।। संतानः पितरश्चैवतस्मि-
न्ज्यैष्ठ्यंप्रतिष्ठितमिति।। ।। केचिदाधानक्रमेणज्येष्ठंवर्णयंतः
पश्चाज्जातस्यपूर्वमाधानंभवतीतितस्यैवज्येष्ठतामाहुः।। तन्न।।
आधानप्राथम्येनज्येष्ठतायांमानाभावात्।। अन्यथापत्नीनांपूर्वापरभावेना-
धानेजातेउत्तराहितस्यप्रथमोत्पत्तौज्येष्ठतानस्यात्।। आधानेजन्मशब्दा-
भावाच्चेति।। ।। एकस्मिन्दिवसेयमलजातयोः संस्कारकरणमुक्तं
भट्टकारिकायां। एकस्मिन्वत्सरेचैववासरेमंडपेतथा।। कर्त्तव्यं-
मंगलंस्वस्त्रोर्भ्रात्रोर्यमलजातयोरिति।। गार्ग्योपि।। एकस्मिन्वासरे-
प्राप्तेकुर्याद्यमलजातयोः।। क्षौरं चैवविवाहं चमौंजी बंधनमेवचेति।।
।। यमलयोर्द्वयोः पुत्रयोः कन्ययोर्वाविवाहोपनयादिसंस्काराणां

सहैवानुष्ठानेपिनांदीश्राद्धंसकृदेव।। यमलयोः संस्काराणामेक-
मंडपेएककालेएकेनकर्त्रा सहकरणेदोषोनेत्युक्तं धर्मसिंधौ।। ।।
इतिसंस्कारभास्करेयमलजातयोः संस्कारविचारः।। ।। अथवे-
दव्रतारंभः।। ।। अत्रवेदब्रह्मचर्यंचरेदित्यनेनवेदाध्ययनांगतया-
ब्रह्मचर्याचरणमुक्तं।। वेदाध्ययनारंभस्यकालः।। इतिकर्तव्यता-
चनोक्ता।। केवलं समावर्तनकर्मसूत्रकारेणारब्धंवेदꣳ समाप्यस्नाया-
दिति।। तत्रवेदस्यारंभंविना समाप्तिः कर्तुमशक्येति।। अतउपनयनां-
तरमेववेदारंभस्यसमयइत्यवगम्यते।। इतिकर्त्तव्यताच पुनरेतदेव-
व्रतादेशनविसर्गेष्वित्युपाकर्महोमातिदेशाद्व्रतादेशेनवेदारंभः प्राप्नोति।।
अतश्च।। उपनीयगुरुः शिष्यंमहाव्याहृतिपूर्वकं।। वेदमध्या-
पयेदेनंशौचाचारांश्चशिक्षयेदिति।। गुरोरुपनयनानंतरंवेदाध्यापन-
विधानाच्च।। उपनयनोत्तरकालंपुण्येहनिवेदारंभंकुर्यादिति।। अत्र।।
पारंपर्यागतोयेषांवेदः सपरिबृंहणः।। तच्छाखंकर्मकुर्वीततच्छा-
खाध्ययनंतथा।। अधीत्यशाखामात्मीयामन्यशाखांततः पठेत्।।
स्वशाखांयः परित्यज्यशाखारंडः सउच्यत इतिवसिष्ठवचनाद्ब्रह्म-
चारिणंकुलपरंपरायातंवेदमध्यापयेत्।। तस्यैवाध्येतव्यनियमात्।। ।।
वेदारंभप्रकारमाह।। ।। मनुः।। ब्रह्मारंभेवसानेचपादौग्रा-
ह्यौगुरोस्सदा।। व्यत्यस्तपाणिनाकार्यमुपसंग्रहणंगुरोः।। सव्येनसव्यः
स्पृष्टव्योदक्षिणेनतुदक्षिणः।। ब्राह्मणः प्रणवंकुर्यादादावंतेचसर्वदा।।
प्रांजलिः पर्युपासीतपवित्रैश्चैवपावितः।। प्राणायामैस्त्रिभिः
पूतस्ततओंकार मर्हति।। अध्येष्यमाणश्चगुरुर्नित्यमकालमतन्द्रितः।।
अधीष्वभोइतिब्रूयाद्विरामोस्त्वितिचारभेदिति।। ।। कारिकायां।
प्रत्यङ्मुखायोपविष्टायोपसमीक्षतेगुरुः।। वेदारंभमनुब्रूयाद्यथा-
शास्त्रमतन्द्रितः।। प्रणवंप्राक्प्रयुञ्जीतव्याहृतीस्दनंतरं।। सावित्रीं-
चानुपूर्व्येणततोवेदान्समारभेदिति।। ।। वेदाभ्यासकालंतत्प्रकारं चाह।।
।। दक्षः।। द्वितीयेतुतथाभागेवेदाभ्यासोविधीयते।। वेदस्वीकरणं-

पूर्वंविचारोभ्यसनंजपः।। तद्दानंचैवशिष्येभ्योवेदाभ्यासोहि पंचधेति।। ।। याज्ञवल्क्यः।। हस्तौ सुसंयतौधार्यौजानुनोरुपरिस्थितौ।। हस्तहीनंतुयोधीतेस्वरवर्णविवर्जितम्।। ऋग्यजुःसामभिर्दग्धोवियो-निमभिगच्छतीति।। ।। पराशरः।। ज्ञातव्यः सर्ववेदार्थोवेदानांकर्म-सिद्धये।। पाठमात्रमधीताचपङ्केगौरिवसीदतीति।। ।। वेदानध्ययने।। ।। मनुः।। योनधीत्यद्विजोवेदानन्यत्रकुरुतेश्रमं।। सजीवन्नेवशूद्रत्व-माशुगच्छतिसान्वय इति।। ।। विद्यादानेगुरोः फलमाह।। ।। यमः।। यइमांपृथिवींसर्वांसर्वरत्नोपशोभितां।। दद्याच्छास्त्रं-चशिष्येभ्योतच्चतच्चद्द्वयंसममिति।। ।शिष्यताडनमाह।। ।। सएव।। नर्निंदा ताडनेकुर्यात्पुत्रंशिष्यंचताडयेत्।। अधोभागेशरीरस्य-नोत्तमांगेनवक्षसि।। अतोन्यथा हिप्रहरन्याययुक्तोभवेन्नरः।। न्याययुक्तोदंडयुक्तइत्यर्थः।। ।। अथप्रयोगः।। ।। तत्रायंक्रमः।। वेदाख्येमातृनांदीमुखमथजुहुयाद्वह्निवक्रेंऽतरिक्षंवायुंब्रह्मादिहुत्वानवय-जुषिभवेन्मुख्यतोभूर्भुवाद्याः।। ऋग्वेदेप्राक्पृथिव्याग्नय-इतिचदिवेसूर्यमेवंचसामाथर्वेदिग्भ्यश्चचंद्रमसइतिनिखिलातत्व-संख्याहुतीनां।। तत्रआचार्यअनध्यायादिरहितेज्योतिः शास्त्रोक्त-शुभदिवसेस्वासनेउपविश्याचम्यप्राणानायम्यदेशकालौस्मृत्वाद्यास्य-ब्रह्मचारिणोयजुर्वेदारंभमहंकरिष्ये।। तत्रादौनिर्विघ्नता सिद्ध्यर्थं-गणपतिपूजनंतदंगत्वेनस्वस्तिवाचनंमातृकापूजनंवसोर्द्धारांनांदीश्राद्धं चकरिष्यइतिकृत्वात्रवाचनांतेअपापकः प्रीयतामितिवदेत्।। ततः स्थंडिलेपंचभूसंस्कारपूर्वकंसमुद्भवनामानंलौकिकाग्निस्थापयित्वा ब्रह्मचारिणमाहूयाग्नेः पश्चात्स्वस्योत्तरतउपवेश्यचरुवर्जंसर्वं-प्रकृतिवद्ब्रह्मोपवेशनाद्याज्यभागांतंकृत्वाज्येनैवजुहोति।। ॐ अन्तरिक्षायस्वाहा।। इदमन्तरिक्षायन मम।। ॐ वायवे०।। इदंवायवे०।। ॐ ब्रह्मणे०।। इदंब्रह्मणे०।। ॐ छंदोभ्यः०।। इदंछंदोभ्यो०।। ॐ प्रजापतये०।। इदंप्रजापतये०।। ॐ देवेभ्यः।।

इदंदेवेभ्यो०।। ॐ ऋषिभ्यः।। इदंऋषिभ्यो०।। ॐश्रद्धायै०।। इदंश्रद्धायै०।। ॐ मेधायेस्वाहा।। इदंमेधायै०।। ॐ सदस्पतये० इदं सदस्पतये।। ॐ अनुमतये० इदंअनुमतये०।। ॐ भूः स्वा०।। इदमग्नये०।। ॐ भुवः स्वाहा।। इदं वायवे०।। ॐ स्वः स्वाहा। इदं सूर्याय०।। ॐ त्वन्नोंअग्ने०।। इदमग्नीवरुणाभ्यां०।। ॐ सत्वन्नों अग्ने०।। इदमग्नीवरुणाभ्यां०।। ॐ अयाश्चाग्ने०।। इदमग्नयेअयसे०।। ॐ येतेशतं० इदंवरुणायसवित्रेविष्ण-वेविश्वेभ्योदेवेभ्योमरुद्भ्यः स्वर्केभ्यश्च०।। ॐ उदुत्तमं०।। इदंवरुणायादित्यायादितये०।। ॐ प्रजापतयेस्वा०।। इदंप्रजापतये०।। ॐ अग्नेस्विष्टकृतेस्वाहा।। इदमग्नये स्विष्टकृतेनमम।। ततः संस्रवप्राशनादिदक्षिणादानान्तंकृत्वासदाचारात् विघ्नेशंसरस्वतीं-हरिंलक्ष्मींस्वविद्यांचस्वस्वनाममंत्रैः पूजयित्वापूर्वोक्तरीत्याब्रह्म-चारिणेवेदमध्यापयितुमारभते।। ।। ॐ भूर्भुवः स्वः ॐ तत्सवितुर्व०।। ॐ इषेत्वोर्ज्जेत्वांव्वायवंस्थदेवोवंः सविताप्रार्पयतुश्रेष्ठंतमाय-कर्मणऽआप्प्यायध्वमघ्नयाऽइन्द्रायभागम्प्रजावंतीरनमीवाऽअंयक्ष्मा-मावंस्तेनऽईशतमाघशं ँसोध्रुवाऽअस्मिन्गोपंतौस्यातबह्वीर्य्यंज-मानस्यपशून्पांहि।। ॐ स्वस्तीति ब्रह्मचारी।। ।। यदिऋग्वेदारं-भस्तदाज्यभागान्तेपृथिव्यैस्वाहाअग्नयेस्वाहेतिचहुत्वाब्रह्मणे-स्वाहेत्यादिसमानं।। यदि सामवेदारंभस्तदाज्यभागान्तेदिवे स्वाहासूर्यायस्वाहेतिचहुत्वाब्रह्मणेस्वाहेत्यादिपूर्ववत्।। यद्यथर्ववेदारंभस्तदाज्यभागान्तेदिग्भ्यः स्वाहाचंद्रमसेस्वाहेतिचहुत्वा-ब्रह्मणे स्वाहेत्यादि पूर्ववदिति।। ।। यद्येकदासर्ववेदारंभस्तदै-कतन्त्रेणनांदीश्राद्धान्तंकृत्वाआज्याभागांतेवेदारंभक्रमेणप्रतिवेदं-वेदाहुतिद्वयंहुत्वाब्रह्मणेछंदोभ्यइत्याहुतिद्वयंहुत्वा प्रजापतयइत्याद्याः सप्ताहुतयस्तंत्रेणजुहुयात्।। ततोमहाव्याहृत्यादिसमानं।। ।। अथ ऋग्वेदारंभः।। ॐ भूर्भुवःस्वः ॐ तत्सवितु०।। ॐ अग्निमीळे

पुरोहितंयज्ञस्यदेवमृत्विजं।। होतांरंरत्नधातमं ॐ इति।। अथसामवे-
दारंभः।। ॐ भूर्भुवः स्वः ॐ तत्स० ॐ अग्नआयाहि० ॐ
इति।। अथर्ववेदारंभः।। ॐ भूर्भुवः स्वः ॐ तत्स० ॐ
शन्नोदेवि० ॐ इति।। कृतस्य वेदारंभकर्मणः सांगतासिद्ध्यर्थं-
यथाशक्तिब्राह्मणान्भोजयिष्ये।। ब्राह्मणेभ्योदक्षिणांदत्वा
तेषामाशिषोगृहीत्वायांतुमातृगणाइति मातृगणंविसर्जयेत्।। ।।
इतिसंस्कारभास्करेवेदव्रतचतुष्टयं।। ।। अथकेशांतसंस्कारः।। ।।
तत्कालमाह।। ।। पारस्करः।। ।। षोडशवर्षस्य केशांतइति।। षोडशवर्षाण्य-
तीतानियस्यसषोडशवर्षः।। तस्यपुरुषस्यकेशांताख्यः संस्कारः
स्यात्।। ।। तथाचकारिकायां।। केशांतः षोडशेवर्षे ब्राह्मणस्यविध
ीयते।। राजन्यबंधोर्द्वाविंशेवैश्यस्यह्यधिकेततइति।। ।। अथप्रयोगः।।
।। जन्मतः सप्तदशेवर्षेनोचेद्व्रतविसर्गात्पूर्वंकालापकर्षं कृत्वोदगयनेशुक्ल-
पक्षेचौलोक्ततिथ्यादौगोदानंकुर्यात्।। तत्र पूर्वेद्युराचार्यः कृतनित्यक्रियः
कृतनित्यक्रियंबटुंस्वदक्षिणतउपवेश्याचम्यप्राणानायम्यदेश-
कालौस्मृत्वास्यब्रह्मचारिणः केशांतमहंकरिष्ये।। तत्रादौनिर्विघ्न-
तासिद्ध्यर्थं गणपतिपूजनंतदंगत्वेनस्वस्तिपुण्याहवाचनमविघ्न-
पूजनंमंडपस्थापनंमातृकापूजनंवसोर्द्धारायुष्यजपंनांदी-
श्राद्धंचकरिष्येइतिकृत्वात्रपुण्याहवाचनान्ते प्रजापतिः प्रीयता-
मितिवदेत्।। ततोबहिःशालायांस्थंडिलेपंचभूसंस्कारपूर्वकं सूर्यनामानंलौकि-
काग्निस्थापयित्वाब्रह्मोपवेशनादिचरुवर्जपात्रासादनानंतरमुप-
कल्पनीयानांशीतोदकादीनांमध्येगौरेवात्रवरः।। अन्यत्सर्वंचौलवदुप-
कल्प्य पवित्रच्छेदनादिपर्युक्षणांतेआघारावाज्यभागादिप्रणीता-
विमोकांतंसर्वं चौलवत्कृत्वाउष्णोदकासेकमंत्रेविशेषः।। ॐ
उष्णेनवायुरुदकेनेह्यदितेकेशश्मश्रुवपेति।। उत्तरगोदानांतेत्रिः क्षुरः
परिहरणमंत्रेविशेषः।। ॐयत्क्षुरेणम० प्रमोषीर्मुखमिति।।
मुखसहितंशिरः परिहरति।। अत्रवरस्थानेआचार्यायगोदानं।

संवत्सरंब्रह्मचर्यमवपनंचकेशांते।। केशांतकर्मानंतरंकेशांतकर्मणायः संस्कृतः ससंवत्सरंवपनंवर्जयेत्।। चशब्दःसंवत्सरानुवृत्त्यर्थः।। केशांत कर्मोत्तरंअवपनंचयावज्जीवन्शास्त्रीयवपनव्यतिरेकेणेति- वासुदेवहरिहरगर्गाः।। द्वादशरात्र ㇿ षड्रात्रत्रिरात्रमंततः।। संवत्सरंब्रह्मचर्यमवपनंच।। द्वादशरात्रंवा।। षड्रात्रंवा। त्रिरात्रंवा।। एतेचत्वारोविकल्पाः पूर्वपूर्वशक्त्याबोध्याः।। ।। अत्रस्मृत्यंतरोक्तोव- पनेविधिर्निषेधश्चोच्यते।। गंगायांभास्करक्षेत्रे मातापित्रोर्गुरोर्मृतौ।। आधानेसोमपानेचवपनंसप्तसुस्मृतं।। तथा।। मुंडनंचोपवासश्च सर्वतीर्थेष्वयंविधिः।। वर्जयित्वाकुरुक्षेत्रंविशालंविरजंगयाम्।। तथावपनं चानुभाविनांप्रेतकर्नीयसां।। तथा।। प्रयागेवपनंकुर्याद्ग- यायांपिंडपातनमित्यादिषुनिमित्तेषुवपनं कार्यं।। वृथातुनकार्यं।। तथाचविष्णुः।। प्रयागेतीर्थयात्रायांपितृमातृवियोगतः।। कचानांवपनंकुर्याद्वृथानविकचो भवेत्।। इतिनिषेधेपिनीचकेशोविप्रः स्यादितिनीचकेशत्वविधानात्कर्तनादिनानीचत्वंसंपादनीयं।। मुंडनस्यनिषेधेपिकर्तनंतुविधीयतइतिबृहस्पतिवचनात्।। भारते।। प्राङ्मुखः श्मश्रुकर्माणिकारयीतसमाहितः।। उदङ्मुखो वाथक्लृप्तातथायुर्विंदतेमहदिति।। ।। इतिसंस्कारभास्करे- केशांतसंस्कारः।। ।। अथसमावर्तनम्।।। ।। तत्कालमाह।। ।। पारस्करः।। वेद ㇿ समाप्यस्नायाद्ब्रह्मचर्यंवाष्टाचत्वारि ㇿ शकंद्वादशकेप्येकेगुरुणानुज्ञातइति।। अत्रस्नान शब्देनसमावर्तन- संस्कारः।। वेदंसमाप्यसम्यक्पाठतोर्थतश्चांतंनीत्वास्नायात्।। अथवाब्रह्मचर्यंव्रतंअष्टाचत्वारिंशद्वर्षनिर्वर्त्यंसमाप्य गुरुणानुज्ञातः स्नायात्।। द्वादशवार्षिकेव्रतेसमाप्तेप्येकेस्नानमिच्छन्तीति।। ।। अत्रवेदशब्देनकिमुच्यतेइत्यतआह।। ।। सएव।। विधि- र्विधेयस्तर्कश्चवेदइति।। विधत्तइति विधिः।। अग्निहोत्रंजुहुयादितिवि- धायकंब्राह्मणवाक्यं।। विधीयतेअनेनेतिविधेयोमंत्रः।। इषेत्वादि।।

तर्कशब्देनार्थवादो भिधीयते।। ।। षडंगमेके।। शिक्षादिषडंगैरुपेतमेकेआचार्यावेदमिच्छन्ति।। तमधीत्यस्नायादित्यन्वयः।। नकल्पमात्रे।। कल्पमात्रेग्रंथमात्रेमंत्रेणवाब्राह्मणेनअधीतेनस्नानमिच्छन्ति।। नहिग्रंथमात्राध्ययनेनकर्मानुष्ठानयोग्यताभवति।। तस्मादर्थतोग्रंथतश्चाधिगम्यस्नानमिति।। ।। कामंतुयाज्ञिकस्य।। यज्ञंवेदेतियाज्ञिकः।। तुशब्देनग्रंथमात्राधीतस्यआध्वर्यवादियज्ञविद्याकुशलस्यषडंगमर्थतोनधिगम्यपिकामंइच्छायास्नानंभवति।। ।। याज्ञवल्क्यः।। गुरवेतुवरंदत्वास्नायीत तदनुज्ञया। वेदव्रतानिवापारंनीत्वाह्युभयमेवचेति।। ।। वरस्वरूपमाह।। मनुः ।। स्नास्यंस्तुगुरुणाज्ञप्तः शक्त्यागुर्वर्थमाचरेत्।। क्षेत्रंहिरण्यंगामश्वंछत्रोपानहमंततः।। धान्यंवासांसिशाकं वागुरवेप्रीतिमावहन्निति।। प्रीतिमितिएतेषुमध्येयदेवगुरोः प्रियंतदेवदद्यादित्याशयः।। दानमंतरेणैवगुरोः प्रीतावनुज्ञयैवसमावर्तनंकुर्यादित्यपिसूच्यते।। छत्रोपानहोः सहितयोर्दान।। द्वंदोपादानात्।। वासांसित्रीणि।। गुरुप्रीत्यर्थमेतद्दानंनविद्यानिष्क्रयः।। एकमप्यक्षरंयस्तुगुरुः शिष्येनिवेदयेत्।। पृथिव्यांनास्तितद्द्रव्यंयद्दत्वात्वनृणीभवेदित्युक्तेः।। अथसमावर्तनमुहूर्त्तविचारः।। ।। पारिजातेश्रीधरीये।। वागीशादितिसौम्यपौष्णदिनकृन्मैत्रोत्तरारोहिणीगोविंदेषुशशांकभानुगुरुविच्छुक्रांश[43]वारादिषु।। रिक्तांपर्वतथाष्टमीं प्रतिपदंमेषंचकीटंहरिंहित्वाशुद्धियुतेष्टमेऽह्निविमलेकुर्यात्समावर्तनमिति।। सुरेश्वरः।। भौमभानुजयोर्वारिनक्षत्रेचव्रतोदिते।। तारा चंद्रविशुद्धौचस्यात्समावर्तनक्रियेति।। एवमुपनयनोक्तकालेसमावर्तनमितिबहवोज्योतिर्ग्रंथास्तथापिमार्गशीर्षेविवाहप्रसक्तौदक्षिणायनेपिभवति।। अन्यथा।। अनाश्रमीनतिष्ठेतदिनमेकमपिद्विजइतिनिषेधातिक्रमापत्तेः।। अन्येतुमौंज्युक्तकालोपादानेमूला भावात् रिक्तात्रयपूर्णिमामावास्याष्टमीप्रतिपद्भिन्नतिथिशुषुक्लेंत्यत्रिकभिन्नकृष्णेचगुरुशुक्रास्तादिदिनक्षयभद्राव्यतीपातादिदो-

षशून्येशुभवारेसमावर्तनंकार्यम्।। नात्रप्रदोष सोपपद्मातिथिवर्जनमाव-
श्यकमित्याहुरिति।। ।। अथसमावर्तनप्रयोगः।। ।। तत्रायंक्रमः।।
स्नानेच्छोमातृनांदी सप्तत्रिहुतिसमित्त्वष्टकुंभाभिषेकोमौंजों-
मुक्त्वारवीक्षादधितिलवपनंदंतधावावनेजौ।। लेपोवासांसिसूत्रं-
स्त्रजमथशिरसोवेष्टनंकर्णभूषांकृत्वानेत्रांजनादिरपिचपदत्राणयष्टिप्रवासाः।।
एतच्चब्रह्मचारिणाबौधायनोक्तरीत्या व्रतलोपप्रायश्चित्तं कृत्वा कार्यं
विद्यास्नातस्य तु न व्रतलोपप्रायश्चित्तं।। स्नानाधिकार-
सिद्ध्यर्थमपेक्षितंमतद्वये।। ततोब्रह्मचारी गुरुंअर्थदानेनसंपूज्य-
तेनानुज्ञातोज्योतिः शास्त्रोक्तेशुभकालेआचार्यगृहेसमाव-
र्तनंनामकर्मकुर्यात्।। ब्रह्मचारीकृतनित्यक्रियः कृतप्रातरग्निकार्यश्च।।
तत्राचार्य आचम्यप्राणानायम्यदेशकालौस्मृत्वाअस्यब्रह्मचारिणः
गृहस्थाश्रमांतरप्राप्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थंसमावर्तनाख्यंकर्मकरिष्ये।।
तत्रादौनिर्विघ्नता सिद्ध्यर्थंगणपतिपूजनंतदंगत्वेनस्वस्तिपुण्याह-
वाचनंमातृकापूजनंवसोर्द्धाराआयुष्यमंत्रजपंनांदीश्राद्धंचकरिष्ये-
इतिकृत्वात्रपुण्याहवाचनांतेसुश्रवः प्रीयतामित्यूहः कार्यः।। तत
आचार्य अहंस्नास्येइत्युक्तेस्नाहीतिप्रत्यनुज्ञागुरोः।। ततः
पादोपसंग्रहणंगुरोः।। ततः परिश्रितेस्थंडिलेपंचभूसंस्कारान्कृ-
त्वासूर्यनाम्नोलौकिकाग्नेः स्थापनं।। ततोब्रह्मोपवेशनादि-
चरुवर्जंपात्रासादनं प्रकृतिवत्।। ततउपकल्पनीयानि।।
समिंधनकाष्ठानि।। समिधः।। पर्युक्षणार्थमुदकं।। हरितकुशाः।।
अष्टावुदकुंभाः।। अमौत्रंधौतवस्त्रंवा।। दधितिलावा।। नापितः।।
स्नानार्थमुदकं।। औदुंबरंकनिष्ठिकाग्रवत्स्थूलंद्वादशांगुलदीर्घंदंतकाष्ठं-
ब्राह्मणस्य।। दशांगुलदीर्घंक्षत्रियस्य।। अष्टांगुलदीर्घंवैश्यस्य।।
उद्वर्तनद्रव्यं।। स्नानार्थमुष्णोदकं।। चंदनं अहतेवाससी।।
प्रयोगरत्नमतेयज्ञोपवीते।। पुष्पाणि।। उष्णीषं।। कर्णालंकारौ।।
अंजनं।। दर्पणं।। छत्रं।। उपानहौ।। वैणवदंडः।। पूर्णपात्रं।।

वरोवा।। एतान्युपकल्प्य पवित्रकरणाद्याज्यभागान्ते।। ॐ अंतरिक्षायस्वाहा।। इदमन्तरिक्षायन मम।। ॐ वायवे०।। इदंवायवे०।। ॐ ब्रह्मणे स्वाहा।। इदं ब्रह्मणे०।। ॐ छंदोभ्यः०।। इदं छंदोभ्यो०।। ॐ प्रजापतये०।। इदं प्रजापतये०।। ॐ देवेभ्यः०।। इदं देवेभ्यो०।। ॐ ऋषिभ्यः०।। इदं ऋषिभ्यो०।। ॐ श्रद्धायै०।। इदं श्रद्धायै०।। ॐ मेधायै०।। इदं मेधायै०।। ॐ सदसस्पतये०। इदं सदसस्पतये।। ॐ अनुमतये०।। इदमनुमतये०।। यदिऋग्वेदमधीत्यस्नानंकरोतितदापृथिव्यैस्वाहाइदंपृ-थिव्यै०।। अग्नयेस्वाहाइदमग्नये०।। इत्याहुतिद्वयंहुत्वाब्रह्मणइत्याद्यान-वाहुतीर्जुहोति।। एवंसामवेदेदिवेस्वाहाइदंदिवे०।। सूर्यायस्वाहाइदं सूर्याय० इत्याहुतिद्वयंहुत्वाब्रह्मणइत्याद्यानवाहुतीर्जुहोति।। एवमथर्ववेदे-पिदिग्भ्यः स्वाहा इदं दिग्भ्यो०।। चंद्रमसेस्वाहाइदंचंद्रमसे इत्याहुतिद्वयं हुत्वा ब्रह्मण इत्याद्यानवाहुतीर्जुहोति।। यदिवेदचतुष्टय-मधीत्यस्नानंकरोतितदाआज्यभागानंतरंप्रति वेदंवेदाहुतिद्वयंहुत्वाब्रह्मणे-छंदोभ्यइत्याहुतीः पुनः पुनर्जुहोति।। ततः प्रजापत्यइत्यारभ्यानुमत्यंताः सप्ताहुतीस्तंत्रेणजुहोति।। एवंवेदद्वयत्रयाध्ययनेपियोज्यं।। ॐ भूः स्वाहा।। इदमग्नये०।। ॐ भुवः स्वा०।। इदंवायवे०।। ॐ स्वः स्वा०। इदंसूर्याय०।। ॐ त्वन्नोऽअग्ने०।। इदमग्नीवरुणाभ्यां।। ॐ सत्वन्नोअग्ने० इदमग्नीवरुणाभ्यां०।। ॐ अयाश्चाग्ने०।। इदमग्नये अयसे०।। ॐ येतेशतं०।। इदंवरुणायसवित्रेविष्ण-वेविश्वेभ्योदेवेभ्योमरुद्भ्यः स्वर्केभ्यश्च०।। ॐ उदुत्तमं०।। इदंवरुणायादित्यायादित्यै०।। ॐप्रजापतये०।। इदंप्रजापतये०।। ॐ अग्नयेस्विष्टकृतेस्वाहा।। इदमग्नयेस्विष्टकृतेनमम।। ततः संस्रावप्राशनादिप्रणीताविमकोकांतंहोमशेषंसमाप्यब्रह्मचारी-उपसंग्रहणपूर्वकंगुरुंनमस्कृत्यपरिसमूहनादित्र्यायुषकरणांतंसमि-दाधानंतस्मिन्नेवाग्नौकरोति।। तत्रपूर्वमग्नेः संधुक्षणंपंचभिर्मं-

त्रैरिंधनप्रक्षेपेण।। तद्यथा।। ॐ अग्नेसुश्रवः सुश्रवसंमाकुरु।।
ॐ यथात्वमग्नेसु०।। ॐ एवं माँ सु।। ॐ यथात्वमग्ने दे०।।
ॐ एवमहमनु०।। प्रदक्षिणमग्निमुदकेनपर्युक्ष्योत्थायसमिधमा-
दधति।। ॐ अग्नयेसमिधमहा० सर्ठ्ठस्वाहा।। इत्यनेनमंत्रेणप्रथमां-
तथाद्वितीयांतथैवतृतीयां।। एषातइतिवासमुच्चयोवा।।
उपविश्यपुनरग्नेसुश्रवइत्यादिपंचभिर्मंत्रैरग्नेः संधुक्षणंपर्युक्षणंच-
पूर्ववत्कृत्वातूष्णींपाणीप्रताप्यतनूपाअग्नेसीत्यादिमंत्रैः प्रतिमंत्रं-
मुखमार्जनं।। ॐ तनूपा० न्वंमेपाहि।। ॐ आयुर्दाअ० स्यायुर्मेदेहि।।
ॐ वर्च्चोदा० वर्च्चोमेदेहि।। ॐ अग्नेयन्मे० पूर्ण।। ॐ
मेधांमेदे० धातु।। ॐ मेधांमेदेवी० धातु।। ॐ मेधामश्वि०
स्त्रजौ।। इतिमुखमार्जनं।। अत्रशिष्टाचारतः।। ॐ अंगानिचम-
आप्यायतामितिशिरः प्रभृतिपादांतसर्वांगान्यालभते। ॐ वाक्च०
मुखा लंभनं।। ॐ प्राण० नासिकयोरालंभनं।। ॐ चक्षु०
नेत्रयोरालंभनंयुगपत्।। ॐ श्रोत्रंच० दक्षिणकर्णालंभनं।।
अनेनैवपुनर्वामं।। ॐयशोबलंचमऽआप्यायतामितिमंत्रजपः।। तत
स्त्र्यायुषाणिकरोति।। ।। भस्मना।। ॐ त्र्यायुषञ्जमदग्नेरितिललाटे।।
ॐ कश्यपस्यत्र्या युषमितिग्रीवायां।। ॐ यद्देवेषुत्र्यायुषमिति-
दक्षिणेंसे।। ॐ तन्नो अस्तुत्र्यायुषमितिहृदि।। ततः गोत्रनाम-
पूर्वकंवैश्वानरादीनामभिवादनं।। अमुकसगोत्रः अमुकप्रवरान्वितः
अमुकशर्माअहंभोवैश्वानरत्वामभिवादये।। आयुष्मान्भवसौम्य-
अमुकशर्म्मन्निितिप्रत्यभिवादनं।। एवंभोसूर्यत्वामभिवादये।। आ०
भव०।। भोचंद्रत्वामभिवादये।। आ० भव०।। भो आचार्य
त्वामभिवादये।। आ० भव०।। भो मातापितरौयुवांअभिवादये।।
आ० भव०।। भो अध्यापक त्वामभिवादये।। आ० भव०।।
ततोवृद्धाभिवादनं।। तत आचार्यः पुरुषैः परिश्रितस्योत्तरभागे-
स्थापितानांदक्षिणोत्तरायतानांजलपूर्णानामुदकुंभानांपूर्वभागेआस्तृत-

प्रागग्रेषुकुशेषु ब्रह्मचार्युदङ्मुखः स्थित्वा।। ॐ येप्स्वंतरग्नयः प्रविष्टागोह्यऽउपगोह्योमयूखोमनोहास्खलुविरुजस्तनुदषुरिंद्रियहातान्विजहामियोरोचनस्तमिहगृह्णामि।। इतिमंत्रेणप्रथम कलशादुदकंगृहीत्वातेनोदकेन।। ॐ तेनमाभिषिंचामिश्रियैयशसेब्रह्मवर्चसाय।। इति मंत्रेणात्मानमभिषिंचतिस्नानकर्ता।। पुनः येप्स्वन्तरग्नयइति द्वितीयोदकुंभादुदकंगृहीत्वा।। ॐ येनश्रियमकृणुतांयेनावशमृताँसुरान्।। येनाक्षावभ्यभिषिंचतांयद्वातदश्विनायशइत्यनेनाभिषिंचति।। पुनः येप्स्वन्तर इत्यनेनतृतीयोदकुंभादुदकमादाय।। ॐ आपोहिष्ठामं० इत्यनेनाभिषिंचति।। पुनः येप्स्वंतरइत्यनेनचतुर्थोदकुंभादुदकंमादाय।। ॐ योवंः शिवतं० इत्यनेनाभिषिंचति।। पुनः येप्स्वन्तरइत्यनेनपंचमोदकुंभादुदकंगृहीत्वा।। ॐ तस्मा अरंगमा० इत्यनेनाभिषिंचति।। पुनर्येप्स्वन्तरइत्यनेनषष्टसप्तमाष्टमोदकुंभेभ्यः प्रत्येकमुदकमादायतूष्णींवारत्रयमभिषिंचति।। ततउदुत्तममितिमंत्रेणमेखलांशिरोमार्गेणनिःसार्यभूमौप्रक्षिपति।। तथैवाजिनंतूष्णीमुत्तार्यदंडंचतूष्णीमुदगग्रंभूमौनिधायान्यद्वासस्तूष्णींपरिधायादित्यमुपतिष्ठते स्नानकर्ता।। ॐ उद्यन्भ्राजभृष्णुरिंद्रोमरुद्भिरस्तात्प्रातर्यावभिरस्ताद्दशसनिरसिदशसनिंमाकुर्वाविदन्मागमयोद्यन्भ्राजभृष्णुरिन्द्रोमरुद्भिरस्ताद्दिवायावभिरस्ताच्छतसनिरसिशतसनिंमाकुर्वाविदन्मागमयोद्यन्भ्राजभृष्णुरिन्द्रोमरुद्भिरस्तात्सायंयावभिरस्तात्सहस्रसनिरसिसहस्रसनिंमाकुर्वाविदन्मागमय।। इत्यनेनादित्यमुपस्थायतूष्णींदधिप्राशनंतिलानावा।। जटालोमनखानांनिकृंतनं।। स्नानं।। औदुंबरेणकाष्ठेनदंतान्धावयेत्।। ॐ अन्नाद्यायव्यूहध्वँसोमोराजायमागमत्।। समेमुखंप्रमार्क्षतेयशसाचभगेनच।। इत्यनेनदंतधावनम्।। ततः सुगंधिद्रव्येणोद्वर्तनं।। उष्णोदकेनस्नानमंगप्रोञ्छनंचकृत्वाचंदनाद्यनुलेपनंगृहीत्वा मुखनासिकयोरालंभनं।। ॐ प्राणापानौमेतर्पय।।

चक्षुर्मेतर्पय।। श्रोत्रंमेतर्पयइत्यनेनगंधोपग्रहणं ततः पाण्योरवनेजनं-कृत्वातदुदकमादायापसव्यंकृत्वादक्षिणाभिमुखोभूत्वातदुदकं-दक्षिणस्यांदिशिनिर्षिंचति।। ॐ पितरः शुंधध्वं।। इत्यनेन।। ततः सव्येनोदकालंभः।। ततश्चंदनेनात्मानमनुलिप्यजपेत्।। ॐ सुचक्षा-अहमक्षीभ्याम्भूयासस ꣳ सुवर्चामुखेन।। सुश्रुत्कर्णाभ्यां भूयासम्।। इतिमंत्रजपः।। ततअहतवाससः परिधानं।। अरजकधौतस्य वा परिधास्याइति।। ॐ परिधास्यैयशोधास्यैदीर्घायुत्वायजरदष्टिरस्मि।। शतंचजीवामिशरदः पुरूचीरायस्पोषमभिसंव्ययिष्ये।। इत्यनेनवासः परिधायद्विराचमनंकृत्वायज्ञोपवीतंपूर्ववत्संधार्याचम्योत्तरीयंधा-रयेद्यशसामेति।। ॐयशसामाद्यावापृथिवीयशसेन्द्रायबृहस्पती।। यशोभगश्चमाविदद्यशोमाप्रतिपद्यतां।। इत्यनेनात्मानंछादयीत।। एकंचेत्पूर्वस्योत्तरभागेनोत्तरीयधारणं।। याअहरज्मदग्निरिति-सुमनोमालाग्रहणं।। ॐ याऽअहरज्जमदग्निः श्रद्धायैकामा-येन्द्रियाय।। ताऽअहम्प्रतिगृह्णामियशसाचभगेनच।। इत्यनेनपुष्पमालां संगृह्यशिरसिबध्नीयाद्यद्यशोप्सरसामिति।। ॐ यद्यशोप्सरसामिन्द्र-श्चकारविपुलंपृथु।। तेनसङ्ग्रथिताः सुमनसऽआबध्नामियशोमयि।। इत्यनेन।। ततउष्णीषेणशिरोवेष्टयते युवासुवासाइति।। ॐ युवासुवासाः परिवीतऽआगात्सउश्रेयान्भवतिजायमानः।। तन्धीरासः कवयऽउन्नयन्तिस्वाध्योमनसादेवयन्तः।। इत्यनेन।। ततः सौवर्णंकुं-डलंदक्षिणकर्णे धारयत्यलंकरणमसीति।। ॐ अलंकरणमसि-भूयोलङ्करणम्भूयात्।। इत्यनेन।। पुनर्वामकर्णेच।। वृत्रस्येत्यक्षिणी-अंजेत्प्रथमं दक्षिणंततोवाममनेनैवमंत्रेण।। ॐ वृत्रस्यासिकनीनं कश्चक्षुर्दाअसिचक्षुर्मेदेहि।। इत्यनेन।। ततोरोचिष्णुरसीत्यनेनमंत्रे-णात्मानमादर्शेप्रेक्षते।। ॐ रोचिष्णुरसि।। छत्रंप्रतिगृह्णाति बृहस्पते-रिति।। ॐ बृहस्पतेश्छदिरसिपाप्मनो मामन्तर्द्धेहितेजसोयश-सोमामन्तर्धेहि।। इत्यनेन।। प्रतिष्ठेस्थइत्युपानहौप्रमुंचतेपादयोर्युगपत्।।

ॐ प्रतिष्ठेस्थोविश्वतोमापातम्।। ततोविश्वाभ्यइतिदंडादानं।। ॐ विश्वाभ्योमानाष्ट्राभ्यस्परिपाहिसर्वतः।। अभिषेकादिदंडग्रहणान्तंस्नानकर्ता करोतिनत्वाचार्यः।। ।। दंतप्रक्षालनादीनिनित्यमपिवासश्छत्रोपानहश्चापूर्वाणि चेन्मंत्रः।। दंतप्रक्षालनादीनिनित्यमेवमंत्रवंतिभवंति।। अपिएवार्थे।। वासश्चछत्रोपानहः चकाराद्दंडोपि।। एतानिचेद्यदिनवीनानिध्रयंतेतदैवमंत्रो भवतिनतुसर्वदा।। ।। ब्रह्मचारिदशायांमृतसपिंडानां समावर्तनोत्तरंत्रिरात्रमाशौचंकार्यं।। आदिष्टीनोदकंकुर्यादाव्रतस्यसमापनात्।। समाप्ते तूदकंदत्वात्रिरात्रमशुचिर्भवेदित्युक्तेः।। आदिष्टीब्रह्मचारीतिविज्ञानेश्वरः।। ब्रह्मचर्येयदिकश्चिन्नमृतस्तदात्रिरात्रमध्येविवाहः कार्योन्यथानेतिसिद्ध्यति।। जननेतुसत्यपिनत्रिरात्रं।। तत्रातिक्रांताशौचाभावादुदकंत्वेतिवचनाच्चेतिदिक्।। आचार्यः स्नातस्यनियमान्श्रावयेत्।। ।। स्नातस्ययमान्वक्ष्याम इति।। अधिकारसूत्रमेतत्।। तेषुस्नातोधिक्रियते।। कासमादितरः कामादिच्छत।। इतरः स्नानसंबंधशून्यः शूद्रः सइच्छयानियमेष्वधि कृतोभवति।। ।। नियमानाह।। नृत्यगीतवादित्राणिनकुर्यान्नचगच्छेत्।। एतानिस्वयं नकुर्यात्।। नृत्यादीन्यन्यैः क्रियमाणानिद्रष्टुंश्रोतुंवानव्रजेत्।। कामंतुगीतं।। तुपुनरिच्छया गानंस्वयंकुर्यात्।। अन्यैः क्रियामाणंश्रोतुं गच्छेच्च। कर्मण्यौपयिकत्वाद्गीतस्य।। दृश्यतेह्यश्व मेधेगानं।। ब्राह्मणोन्योगायतिराजन्योन्यइत्यादि।। गायतिवैवगीतेवारमतइतिह्यपरं।। अपरंउरसापतिराजन्योन्यइतिसंभरणकांडे।। तस्मादुहैतद्यः सर्वकृत्स्नोमन्यतेगायतिवैव गीतेवारमतइति।। अपग्रहणाच्चपूर्वंन्यायप्राप्तमभिहितं।। एवंयत्रविहितंतत्रनिषेधा प्रवृत्तिः।। क्षेमेनक्तंग्रामान्तरंनगच्छेत्।। आपदोऽ भावेरात्रौअन्यग्रामंनगच्छेत्।। अक्षेमे तुनक्तमपिगच्छेत्।। नचधावेत्।। चपरंक्षेमेसतिशीघ्रंनगच्छेत्।। उदपानावेक्षणवृक्षारोहणफलप्रपतनसंधिसर्पणविवृतस्नानविषमलंघनंशुक्तवदनसंध्यादित्यप्रेक्षणभैक्षणानिनकुर्यात्।। कूपावलोकनं

आम्रादिवृक्षाणामुपरिगमनंतेषांफलत्रोटनंसंध्यासमये गमनं।।
संधिकुद्वारंतत्रसर्पणंवानग्नस्नानंपर्वतगर्तादेरतिक्रमणंअश्लीलभाषण-
संध्यासु सूर्यावेक्षणंसिद्धान्नस्यभैक्षणंएतान्युदपानावेक्षणादीनिवर्जयेत्।।
वर्षत्यप्रावृतो व्रजेदयंमेवज्रः पाप्मानमपहनदिति।। पर्जन्येवर्षतिअ-
प्रावृतःअनाच्छादितएव व्रजेत्। अयं मेवज्रइतिमंत्रेण।। अप्स्वात्मानं-
नावेक्षेत।। जलेस्वशरीरं न पश्येत्।। अजातलोम्नींविपुँ्षिषंढंच-
नोपहसेत्।। अनुत्पन्नलोम्नींस्त्रियं पुरुषाकृतिंस्त्रियंषंढः प्रसिद्धः
एतानिनाभिगच्छेत्।। अत्रोपहासशब्दोऽभिगमनपरः।। गर्भिणींवि-
जन्येतिब्रूयात्।। गुर्विणींविजन्येतिपर्यायशब्देनवदेत्।। सकुलमितिन-
कुलंब्रूयात्।। भगालमितिकपालंब्रूयात्।। मणिधनुरितीन्द्रधनुर्ब्रूयात्।।
गांधयन्तींपरस्मैनाचक्षीत्।। वत्संपाययन्तींगांअन्यस्मैस्वामिने वा
न कथयेत्।। उर्वरायामनन्तर्हितायांचभूमावुत्सर्पं स्तिष्ठन्नमूत्रपुरीषे-
कुर्यात्।। सस्यवत्यांभूमौतृणैरनंतर्हितायांकेवलायांचमूत्रपुरीषोत्सर्गंन-
कुर्यात्।। किंचऊर्ध्वः सन्नकुर्यात्तथोत्प्लवमानः सन्नकुर्यात्।। स्वयं-
प्रशीर्णेनकाष्ठेनगुदंप्रमृजीत।। स्वयमेवच्छिन्नेनदारुशकलेनगुदंप्रोंछेत्।।
ततःशौचंकुर्यात्।। विकृतंवासोनाच्छादयीत।। नील्यादिनाविकार-
मापादितंवस्त्रंनपरिदधीत।। अत्रनकषायप्रतिषेधः।। कषायरक्तंतु-
प्रशस्यतइतिभाष्यकाराः।। दृढव्रतोवधत्रः स्यात्।। दृढव्रतः भवेत्।।
तथावधात् आत्मानंपरंचरक्षेत् सर्वेषांमित्रमिव।। स्वेषांपरेषांचसुहृदि-
वहितकारीभवेदितिस्नातस्यसमावर्तनप्रभृतियावद् गार्हस्थ्यंधर्मानभिधा-
याधुनासमावर्तनदिनमारभ्यत्रिरात्रंव्रतमाह।। तिस्त्रोरात्रिव्रतंचरेदिति।।
वक्ष्यमाणंव्रतंअहोरात्रत्रयमनुतिष्ठेत्।। अमाꣳस्यामृन्मयपायी।। मांसं-
नाश्नीयात्।। मृत्पात्रेणजलंचनपिबेत्।। स्त्रीशूद्रशवकृष्णशकुनिशुनांचा-
दर्शनमसंभाषणंचतैः।। कृष्णशकुनिः काकः।। श्वाकुक्कुरः।।
एषांस्त्र्यादीनांदर्शनंनकुर्यात्।। एतैः स्त्र्यादिभिः सहभाषणंचन
कुर्यात्।। शवशूद्रसूतकान्नानिचनाद्यात्।। मरणानंतरक्रीत्वाल-

ब्ध्वावाज्ञातिभिर्यद्यतेतच्छवान्नं। अभोज्यान्नस्यनापितादेरन्नंशूद्रान्नं।। प्रसवेसतिदशाहादर्वाक्ज्ञातीनामन्नंतत् सूतकान्नं।। एतानिनभक्षयेत्।। मूत्रपुरीषेष्ठीवनंचातपेनकुर्यात्।। मूत्रपुरीषेमुखाज्ज्ञलादित्यजनंच-घर्म्मेनकुर्यात्।। सूर्याच्चात्मानंनांतर्दधीत।। आदित्यात्स्वं छत्रादिनाअंतर्हितंनकुर्यात्।। तप्तेनोदकार्थान्कुर्वीत।। तप्ते-नोदकेनशौचाचमनादिकाक्रियाः कार्याः।। अवज्योत्यरात्रौभोजनं।। रात्राववज्योत्यदीपादिना प्रकाशंकृत्वाभोजनंकुर्यात्।। सत्य-वदनमेववा।। अथवासत्यभाषणमेव कुर्यात्।। दीक्षितोप्यातपादी-निनकुर्यात्प्रवर्ग्यवांश्चेदिति।। यदिप्रवर्ग्यवान् सोमयागार्थंस्वीकृत-दीक्षितश्चेत्तदाऽधस्तनामांसादियमनियमान् आतपेमूत्रेपुरीषेष्ठी-वनादिभोजनान्तानिचनकुर्यात्।। कृतस्यसमावर्तनाख्यस्यकर्मणः।। सांगतासिद्ध्यर्थंयथाशक्तिब्राह्मणान्भोजयिष्ये।। ततोआचार्यादीन्-गंधवस्त्रादिना संपूज्यतेभ्यश्चदक्षिणांदत्वातेषामाशिषोगृहीत्वायांतुमातृग-णाइतिमातृगणविसर्जनंकुर्यात्।। इतिसंस्कारभास्करेसमावर्तनप्रयोगः।। ।। ।। ।। ।। ।। ।। अथविवाहः।। ।। तत्रतावत्तदुपयोगित-यार्किचित्संक्षेपेणोच्यते।। मनुः।। गुरुणानुमतः स्नात्वासमावृत्तोय-थाविधि।। उद्वहेतद्विजोभार्यांसवर्णां लक्षणान्वितामिति।। याज्ञवल्क्योपि।। अविलुप्तब्रह्मचर्योलक्षण्यांस्त्रियमुद्वहेदिति।। दक्षः।। अनाश्रमी नतिष्ठेत्दिनमेकमपिद्विजः।। आश्रमेणविनातिष्ठन्प्राय-श्चित्तीभवेद्धिसइति।। ।। अनाश्रमिप्रायश्चित्तमुक्तंहारीतेन।। अनाश्रमी संवत्सरंप्राजापत्यकृच्छ्रंचरित्वाश्रममुपेया द्वितीयेऽतिकृच्छ्रंतृतीये-कृच्छ्रातिकृच्छ्रमतऊर्ध्वंचांद्रायणमिति।। कृच्छ्रादिनिर्णयस्तु-मिताक्षरादिग्रंथेभ्योऽवगंतव्यः विस्तरभ्यान्नेहलिखितः।। स्त्रीबाह्यलक्षणान्याह।। ।। मनुः।। अव्यंगांगींसौम्यनाम्नीं-हंसवारणगामिनीम्।। तनुलोमकेशदंतांमृद्वंगीमुद्वहेत्स्त्रियमिति।। ।। आभ्यंतराणित्वष्टौपिंडान्कृत्वेत्याश्वलायनोक्तविधिनावेदितव्यानि।।

यथा।। पूर्वस्यांरात्रौगोष्ठवेदिकाकितवस्थानह्रदेरणक्षेत्र-
चतुष्पथस्मशानेभ्योमृत्तिकांगृहीत्वापिंडाष्टाकंकर्त्तव्यं।। तत्रानुक्रमेण
प्रथमेपिंडेस्पृष्टेधान्यवतीभवति।। द्वितीयेपशुमती।। तृतीयेऽग्नि-
होत्रपरा।। चतुर्थेविवेकिनीचतुरासर्वजनार्जनपराभवति।।
पंचमेरोगिणी।। षष्ठेवंध्या।। सप्तमेव्यभिचारिणी।। अष्टमे-
विधवाभवेदिति।। ।। कन्यागतविशेषांतरमाह।। याज्ञवल्क्यः।।
अनन्यपूर्विकांकांतामसपिंडांयवीयसीम्।। अरोगिणींभातृमतीम-
समानार्षगोत्रजामिति।। अनन्यपूर्विकांदानेनोपभोगेनवा पुरुषांतरापरि-
गृहीतां।। कांतांकमनीयांवोढुर्मनोनयनानंदकारिणीं।। यस्यांमनश्चक्षुषो-
र्निबंधस्तस्यामृद्धिरित्यापस्तंबस्मरणात्। एतच्चन्यूनाधिकांगादि
बाह्यदोषाभावे।। असपिंडाम्।। समानः एकः पिंडोदेहोयस्याः
सासपिंडा नसपिंडा असपिंडाताम्।। सपिंडताचैकशरीरावय-
वान्वयेनभवति।। तथाहि।। पुत्रस्यपितृशरीरावयवान्वयेन-
पित्रासहैकपिंडता।। एवंपितामहादिभिरपिपितृद्वारेण-
तच्छरीरावयवान्वयात्।। एवंमातृशरीरावयवान्वयेनमात्रातथामाता-
महादिभिरपि मातृद्वारेण।। तथामातृस्वसृमातुलादिभिरपिएक-
शरीरावयवान्वयात्।। तथापितृव्यपितृस्वस्त्रादिभिरपि।।
तथापत्यासहपत्न्याएकशरीरारंभकतया एवंभातृभार्याणामपिपरस्पर-
मेकशरीरारंभैः सहैकशरीरारंभकत्वेन।। एवंयत्र यत्रसपिंडशब्दस्तत्र-
तत्रसाक्षात्परंपरयावाएकशरीरावयवान्वयोवेदितव्यः।।
आत्माहिजज्ञेआत्मनइत्यादि श्रुतेः।। गर्भोपनिषद्यपि।।
एतत्षाट्कौशिकं शरीरंत्रीणिमातृतस्त्रीणिपितृतः।।
अस्थिस्नायुमज्जातः पितृतः।। त्वङ्मांसरुधिराणिमातृतइति।। ।।
एवंमुख्यावयववृत्त्यासापिंड्यमुक्तंतदभावेपिसपत्न मातामहकुले-
सापिंड्ययमाह।। ।। सुमंतुः।। पितृपत्न्यः सर्वामातरस्तद्भ्रातरो
मातुलास्तद्भगिन्योमातृष्वसारस्तद्दुहितरश्चभगिन्यस्तदपत्या-

निभागिनेयान्यन्यथासंकरकारिणः स्युरिति।। द्वितीयतच्छब्देन-मातृपरामर्शः।। अत्रयावद्वचनंवाचनिकमितिन्यायात्परि-गणितेष्वेवसापिंड्यंनसप्तमादिपर्यंतमिति।। यवीयसींवयसा प्रमाणतश्चन्यूनां।। अरोगिणीमचिकित्सनीयव्याध्यनुपसृष्टां।। भ्रातृमतींपुत्रिकाकरणशंका निवृत्तये।। अनेनापरिभाषितापिपुत्रिका-भवतीतिगम्यते।। यत्रतु पुत्रिकाकरणाभावनिश्चयस्तत्रतामभ्रातृ-कामप्युद्वहेदितिगदाधरः।। असमानार्षगोत्रजां।। ऋषेरिदमार्षंनामप्रवर-इत्यर्थः।। गोत्रंवंशपरंपराप्रसिद्धम्।। आर्षं चगोत्रंचार्षगोत्रे समानेआर्षगोत्रेयस्यासौसमानार्षगोत्रस्तस्माज्जातासमानार्षगोत्रजा।। न समानार्षगोत्रजा असमानार्षगोत्रजा।। गोत्रप्रवरौचपृथक्-पर्युदासेनिमित्तम्।। तेनासमानार्षजामसमानगोत्रजामित्यर्थः।। तथाचासमानप्रवरैर्विवाहइतिगौतमः।। मनुरपि।। असपिंडाचयामातुर-सगोत्राचयापितुरिति।। ।। केचित्तुमातृगोत्रामप्यपरिणेयमाहुः।। मातुलस्यसुतामूढ्वामातृगोत्रांतथैवच।। समानप्रवरांचैवगत्वा चांद्रायणंचरेदितिप्रायश्चित्तस्मरणात्।। अत्रचासपिंडामित्यने-नपितृष्वसृमातृस्वस्रादिदुहितृनिषेधः।। तथाऽसमानगोत्रामित्यनेना-सपिंडायाअपिभिन्न संतानजायाः समानगोत्रायानिषेधः।। असमानप्रवरामित्यनेनापिअसपिंडायाआसगोत्रायाअपिसमान-प्रवरायानिषेधः।। तथासपिंडामित्येतत्सार्ववर्णिकं।। सर्वत्रसापिंड्य-सद्भावात्।। असमानार्षगोत्रजामित्येतत्त्रैवर्णिकविषयम्।। यद्यपिराजन्य विशांप्रातिस्विकगोत्राभावात्प्रवराभावस्तथापिपुरोहितगोत्र-प्रवरौवेदितव्यौ।। तथाचयजमानस्यार्षेयान्प्रवृणीत इत्युक्त्वापौरोहित्या न्राजविशामित्याश्वलायनः।। सपिंडासगोत्रासमानप्रवरासुभार्या-त्वमेवनोत्पद्यते।। ।। असपिंडामित्यत्रैकशरीरावयवान्वयद्वारेण-साक्षात्पारंपर्येणवासापिंड्यमुक्तंतच्चसर्वस्यसर्वत्रयथाकथंचिद-नादौसंसारेसंभवतीत्यतिप्रसंगइत्यतआह।। ।। याज्ञवल्क्यः।।

पंचमात्सप्तमादूर्ध्वंमातृतः पितृतस्तथेति मातृतोमातृसंतानेपंचमादूर्ध्वंपितृतः पितृसंतानेसप्तमादूर्ध्वंसापिंड्यंनिवर्त्ततइतिशेषः।। ततश्चायंसपिंडशब्दोऽवयवशक्त्यासर्वत्रप्रवर्त्तमानोपिनिर्मथ्यपंकजादिशब्दवन्नियतविषयएव।। तथाचपित्रादयः षट्सपिंडाः पुत्रादयश्चषडात्माचसप्तमः।। संतानभेदेपियतः संतानभेदस्तमादायगणयेद्यावत्सप्तमइतिसर्वत्रयोजनीयं।। तथाचमातरमारभ्यतत्पितृपितामहादिगणनायांपंचमपुरुषवर्त्तिनीमातृतः पंचमीत्युपचर्यते।। एवंपितरमारभ्यतत्पित्रादिगणनायांसप्तमपुरुषसंतानवर्त्तिनीपितृतः सप्तमीति।। तथाचभगिन्योर्भगिनी भ्रात्रोर्भ्रातृपुत्रीपितृव्ययोः।। विवाहेव्यादिभूतत्वाच्छाखाभेदोऽवगण्यते।। यदपिचवसिष्ठेनोक्तं।। पंचमीसप्तमींचैवमातृतः पितृतस्तथेति।। त्रीनतीत्यमातृतः पंचातीत्यपितृत इतिपैठीनसिनातदप्यर्वाग्निषेधार्थम्।। नपुनस्तत्प्राप्त्यर्थमितिसर्वस्मृतीनामविरोधः।। एतच्चसमानजातीये द्रष्टव्यमिति।। ।। अथासमानार्षगोत्रजामित्युक्तं तत्रस्पष्टबोधार्थं स्मृत्यर्थसारस्यश्लोकालिख्यंते।। अथात्रगोत्रप्रवरनिर्णयोवर्ण्यतेजसा।। जमदग्भिरद्वाजविश्वामित्रात्रिगौतमाः।। 1।। वसिष्ठः कश्यपागस्त्यामुनयोगोत्रकारिणः।। एतेषांयान्यपत्यानितानिगोत्राणिमन्वते।। 2।। व्रियमाणतयावापि सक्त्यावानुवर्तनं।। एकत्रदृश्यतेयत्रतद्गोत्रंतस्यकथ्यते।। 3।। समानमुनिभूयस्त्वएकप्रवरवानपि।। समानप्रवरत्वंचद्वेधाबौधायनोब्रवीत्।। 4।। मुनि प्रणीतप्रवरैरूनपंचाशतावयं।। अनंतान्यपि गोत्राणिचांगीकृत्याभिदध्महे।। 5।। जामदग्न्यौवत्सविदावार्ष्टिषेणाः परस्परं।। नान्वियुः प्रवरैक्येनसगोत्रत्वेनचादिमौ।। 6।। यस्कामित्रयुवोवैन्याः शुनकाः प्रवरैक्यतः।। स्वं स्वंहित्वागणंसर्वेविवहेयुः परावरैः।। 7।। उक्ताः सप्तभृगोर्वंशावक्ष्यंतेंगिर सोगणाः।। गौतमाः सप्तचायास्याः शरद्वंतास्तथापरे।। 8।। कौमांडादीर्घतमसस्ततःकारेणुपालयः।। वामदेवाऔशनसागोत्रै-

क्यान्नान्वियुर्मिथः।।9।। केवलांगिरसाश्चैकेविष्णुवृद्धासकण्वजाः।।
हरितारथीतराश्चमुद्गलाः प्रवरैक्यतः।। 10।। स्वस्वंहित्वागणं-
सर्वेविवहेयुः परावरैः।। षोडशांगिरसस्त्रेधाप्रोक्ताः संस्कृतयस्तथा।।
11।। संस्कृतीनांद्विवंश्यत्वाद्वासिष्ठैश्चचतुर्विधैः।। स्ववर्गीयैसगोत्रत्वा-
प्रवरैक्याच्चनान्वियुः।। 12।। चत्वारोत्रयआद्या त्रिवाद्भूतकगविष्ठिराः।।
मुद्गलाश्चेतिगोत्रैक्यात्प्रवरैक्याच्चनान्वियुः।। 13।। त्रयश्चकश्यप-
गणानिध्रुवारेभशंडिलाः।। गोत्रैक्यात्प्रवरैक्याच्चनोद्वहेयुः परस्परं।
14।। वसिष्ठैःकश्यपैर्नित्यं लौगाक्षीणामनन्वयः। अहंवसिष्ठतोक्ति
स्तुप्रयाजाद्यादिगोचरा।। 15।। वसिष्ठाः कुंडिनाश्चैवमुपमन्युपराशराः।।
वसिष्ठाइतिचत्वारोगोत्रैक्यान्नान्वियुर्मिथः।। 16।। कुशिक
रोहितगणारौह्यकाकामकायनाः। कताधनंजयाआजाअघमर्षणपूरणाः।।
17।। इंद्राकौशिकजाश्चैतिविश्वामित्रगणादश।। नोद्वहेयुः-
सगोत्रत्वात्क्वचिच्चप्रवरैक्यतः।।18।। अगस्त्यः सांभवाहाः
सोमवाहाइतित्रयः।। गोत्रैक्यात्वप्रवरैक्याच्चनोद्वहेयुः परस्परं।। 19।।
वर्गाएकोनपंचाशत्प्रसिद्धामुनिभिः स्मृताः।। अप्रसिद्धाः
परेवंश्याअंतर्भूताइहैवते।। 20।। विश्वमित्रात्रिगोत्रेणनोद्वहेयुर्धनंजयाः।।
अत्रैस्तुपुत्रिकापुत्रावामरथ्यादयस्तथा।। 21।। तथैवजातुकर्ण्याश्च-
वसिष्ठैरत्रिभिः सह।। भरद्वाजेनशुंगेनविश्वामित्रस्यशैशिरैः।। 22।।
क्षेत्रेजातोद्विगोत्रर्षिः प्रोच्यतेशौंगशैशिरिः।। विश्वामित्रभरद्वाजैस्त-
ज्जानांतेननान्वयः।। 23।। कपिलानांभरद्वाजैर्विश्वामित्रैश्चनान्वयः।।
गुरोः सगोत्रप्रवरानोद्वाह्याक्षत्रविद्गणैः।। 24।। सगोत्राद्यनभिज्ञैश्चवि-
प्रैराचार्यगोत्रजाः।। दानादिनान्यगोत्राः स्युरज्ञातगुरुगोत्रिणः।। 25।।
समानप्रवरोद्वाहनिषेधः क्षत्रवैश्ययोः।। प्रवरान्मानवेत्यस्मात्प्रवराच्चा-
दन्यगोचरः।। 26।। जामदग्न्यावत्सविदा आर्ष्टिषेणास्तथैवच।।
पंचावत्तिनएवैतेअन्येचतुरवत्तिनः।। 27।। इत्थंसगोत्रसंबंध-
विवाहविषयेस्थिते।। यदिकश्चिज्ज्ञानतस्तांकन्यामूढ्वोपचच्छति।। 28।।

गुरुतल्पव्रताच्छुद्धेद्गर्भस्तज्जोंत्यतांव्रजेत्।। भोगतस्तांपरित्यज्य-
पालयेज्जननीमिवेति।। 29।। यवीयसीमित्युक्तंतत्रविशेषमाह। मनुः।।
त्रिंशद्वर्षोद्वहेत्कन्यां हृद्यांद्वादशवार्षिकीं।। त्र्यष्टवर्षोष्टवर्षां वाध-
र्मेसीदतिसत्वरइति।। अष्टवर्षश्चतुर्विंशतिवर्षः। बृहस्पतिः।। त्रिंशद्वर्षो-
दशाब्दांतुभार्याविंदेतनग्निकामिति।। ।। कुतः कन्यागृहीतव्येत्यपेक्षाया-
माह।। ।। याज्ञवल्क्यः।। दशपूरुषविख्याताच्छ्रोत्रियाणांमहा-
कुलादिति।। पुरुषाएवपूरुषाः दशभिः पुरुषैः मातृतः पंचभिः
पितृतः पंचभिर्विख्यातंयद्ब्राह्मणकुलंतच्छ्रोत्रियाणामधीतवेदानामुप-
लक्षणम्।। श्रुताध्ययनसंपन्नानांमहच्चतत्कुलंचमहाकुलंपुत्रपौत्रपशुदा-
सीग्रामादिसमृद्धंतस्मात्कन्यापरिगृहीतव्येतिनियम्यते।। ।। मनुरपि।।
उत्तमैरुत्तमोनित्यंसंबंधानाचरेत्सदेति।। ।। उत्तमानाह।। सएव।।
विशुद्धाः कर्मभिश्चैवतथाश्रुतिनिदर्शितैः।। अविप्लुतब्रह्मचर्यामहा-
कुलसमन्विताः।। अक्रोधनाः सुप्रसादाः कार्यासंबंधिनः सदेति।।
।। एवंसर्वतः प्राप्तौसत्यामपवादमाह।। ।। याज्ञवल्क्यः।।
स्फीतादपिनसंचारिरोगदोषसमन्वितादिति।। संचारिणोरोगाः
कुष्ठापस्मारप्रभृतयः। शुक्रशोणितद्वारेणानुप्रविशंतोदोषा।। हीनक्रियं-
निष्पुरुषंनिच्छंदोरोमशार्शसं।। क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठि-
कुलानिचेतिमनुनोक्ताः। एतैःसमन्वितात्स्फीतादपि पूर्वोक्तात्महा-
कुलादपिनपरिगृहीतव्येति।। ।। संबंधेनीचानाह।। ।। मनुः ये
स्तेनाः पिशुनाः क्लीबायेनास्तिकवृत्तयः।। विकर्मणाचजीवंतोविकृता-
कृतयस्तथा।। प्रवृद्धवैराः शूरैर्येराजकिल्बिषिणस्तथा।।
ब्रह्मस्वादननिंद्याश्चकदर्याश्चविगर्हिताः।। अप्रजायेषुवंशेषु-
स्त्रीप्रजाप्रसवास्तथा।। पतिघ्नयश्चसुवासिन्यस्तांश्चयत्नेनवर्जयेत्।।
तान्वंशान्।। महांत्यपिसमृद्धानिगोजाविधनधान्यतः।। स्त्रीसंबंधे-
दशैतानिकुलानिपरिवर्जयेदिति।। ।। कुत्सितविवाहादिकरणेदोषमाह।।
।। मनुः।। कुविवाहैः क्रियालोपैर्वेदानध्ययनेनच।। कुलान्यकुलतां-

यांतिब्राह्मणातिक्रमेणच।। शिल्पेनव्यवहारेणशूद्रापत्यैश्चकेवलैः।। गोभिरश्वैश्चयानैश्चकृष्याराजोपसेवया।। अयाज्याजनैश्चैवनास्तिक्ये नचकर्मणा।। कुलान्यकुलतांयाति यानिहीनानिमंत्रतइति।। ।। कन्याविशेषलक्षणान्याह।। ।। नारदः।। पूर्णचंद्रमुखी कन्या-बालसूर्यसमप्रभा।। विशालनेत्रारक्तोष्ठीसाकन्या लभतेसुखं।। अंकुशंकुंडलंचक्रंयस्याः पाणितलेभवेत्।। पुत्रंप्रसूतेसानारीनरें-द्रंलभतेसुतं।। यस्याः पाणितलेरेखाप्राकारंतोरणंतथा।। अपिदास-कुलेजाताराजपत्नीभविष्यति।। यस्याः संकुचिताः केशामुखंचप-रिमंडलं।। नाभिश्चदक्षिणावर्तासानारीप्रियभाग्भवेत्।। दीर्घांगुली-चयानारीदीर्घकेशाचयाभवेत्।। दीर्घमायुरवाप्नोतिधनधान्यविव-र्द्धिनीति।। अन्यान्यपिसामुद्रिकलक्षणानितद्ग्रंथतोवगंतव्यानिविस्तर-भयान्नेहलिखितानि।। ।। कन्यादानेवरनियममाह।। ।। याज्ञवल्क्यः।। एतैरेवगुणैर्युक्तः सवर्णः श्रोत्रियोवरः।। यत्नात्परीक्षितः पुंस्त्वेयुवा-धीमान्जनप्रियइति।। अनन्यपूर्वकत्वयवीयस्त्वभ्रातृमत्वव्यतिरि-क्तैरेतैरेवपूर्वोक्तैर्गुणैर्युक्तोदोषैश्चवर्जितोवरोभवति।। तस्यचायमपरो-विशेषः।। सवर्णउत्कृष्टोवा।। नहीनवर्णः।। क्षोत्रियः स्वयंचश्रुता-ध्ययनसंपन्नः।। यत्नात्प्रयत्नेनपुंस्त्वेपरीक्षितः।। युवानवृद्धः। धीमान्लौकिकवैदिकव्यवहारेषुनिपुणमतिः।। जनप्रियः स्मितमृदु-पूर्वाभिभाषणादिभिरनुरक्तजनइति।। ।। बह्वृचगृह्येपि।। बुद्धिमते-कन्यांप्रयच्छेदिति।। यमः।। कुलंचशीलंचवयश्चरूपंविद्यांचवित्तं-चसनाथतांच।। एतान्गुणान्सप्तपरीक्ष्यदेयाकन्याबुधैः शेषमचिंतनीयमिति।। ।। पुंस्त्वपरीक्षणोपायमाह।। ।। नारदः।। यस्याप्सुप्लवतेवीर्यंह्लादिमूत्रंचफेनिलं।। पुमान्स्याल्लक्षणैरेतैर्विपरीतस्तुषंढ कः।। अपत्यार्थंस्त्रियः सृष्टा स्त्रीक्षेत्रंबीजिनोनराः।। क्षेत्रंबीजवतेदेयंना-बीजीक्षेत्रमर्हतीति।। ।। वरदोषानाह।। ।। कात्यायनः।। उन्मत्तः पतितः कुष्ठीषंढश्चैवसगोत्रजः।। चक्षुःश्रोत्रविहीनश्चतथापस्मारदूषित-

इति।। ।। अथविवाहक्रममाह।। ।। पारस्करः।। त्रिस्रोब्राह्मणस्य-
वर्णानुपूर्वेणद्वेराजन्यस्यैकावैश्यस्यसर्वेषाँ शूद्रामप्येकेमंत्रवर्जमिति।।
ब्राह्मणस्यवर्णक्रमेण ब्राह्मणीक्षत्रियावैश्येतितिस्रोभार्याभवंति।।
क्षत्रियस्य क्षत्रियावैश्याचेतिद्वेभार्ये भवतः।। वैश्यस्यसवर्णाएकाएव।।
अत्रवर्णानुपूर्वग्रहणान्नव्युत्क्रमेण विवाहः।। अत्ररतिपुत्रपुत्रध-
मार्थत्वेनविवाहस्त्रिविधः।। तत्रपुत्रार्थोद्विविधः।। नित्यः काम्यश्च।।
तत्रनित्येप्रजार्थेसवर्णः श्रोत्रियोवरइत्यनेनसवर्णा मुख्यादर्शिता।।
काम्येचवर्णानुपूर्वेणदर्शिता।। रत्यर्थंसर्वेषांब्राह्मणादीनांशूद्रामप्येकभा-
र्यामिच्छंति।। तस्यास्तुमंत्रवर्जंविवाहकर्मभवति।। शूद्रा परिणयनं-
रमणार्थमेव।। नशूद्रायाधर्मकार्येष्वधिकारः।। रामारमणायविंदतेन-
धर्मायेतियास्कोक्तेः।। ।। याज्ञवल्क्यः।। तिस्रोवर्णानुपूर्वेणद्वेतथैका
यथाक्रमं।। ब्राह्मणक्षत्रियविशांभार्यास्वाशूद्रजन्मनइति।। शूद्रस्यस्वैव
भार्याभवति।। अन्यत्सर्वंसुगमम्।। द्विजातीनांशूद्रापरिणयनस्यनिषे-
धमाह।। ।। याज्ञवल्क्यः।। यदुच्यतेद्विजातीनांशूद्राद्दारोपसंग्रहः।।
नैतन्ममतंयस्मात्तत्रात्माजायतेस्वयमिति।। द्विजातीनांशूद्रापरिणयनंय-
दुच्यतेतद्याज्ञवल्क्यमतं न।। यस्मादयंद्विजातिस्तत्रस्वयंजायते
तज्जायाजायाभवतियदस्यांजायतेपुनरितिश्रुतेः।। अत्रचतत्रायंजायते।।
स्वयमितिहेतुंवदतानैत्यिकपुत्रोत्पादनाय काम्यपुत्रोत्पादनायवा
प्रवृत्तस्यशूद्रापरिणयनप्रतिषेधंकुर्वता नैत्यिकपुत्रोत्पादनानुकूल्ये-
काम्येच पुत्रोत्पादनेब्राह्मणस्य क्षत्रियावैश्येक्षत्रियस्यवैश्याभ्यनुज्ञाता-
भवतीति।। अथविवाहानाह।। याज्ञवल्क्यः।। ब्राह्मोविवाहआहूय-
दीयतेशक्त्यलंकृता।। तज्जः पुनात्युभयतः पुरुषानेकविंशतिम्।।
यज्ञस्थऋत्विजेदैवआदायार्षस्तुगोद्वयं।। चतुर्दशः प्रथमजः पुनात्यु-
त्तरजस्तुषट्।। इत्युक्त्वाचरतांधर्मंसहयादीयतेर्थिने।। सकायः
पावयेतज्जः षट्षड्वंश्यान्सहात्मना।। आसुरोद्रविणादानाद्गांधर्वः
समयान्मिथः।। राक्षसोयुद्धहरणात्पैशाचः कन्यकाच्छलादिति।।

उक्तलक्षणवरमाहूयतस्मैयथाशक्त्यलंकृताकन्या उदकपूर्वकंदीयते सब्राह्माभिधानोविवाहस्तस्यांजातः पुत्रउभयतःपित्रादीन्दशपुत्रादींश्च- दशआत्मानंचैकविंशंपुनातिसद्वृत्तश्चेत्।। यज्ञानुष्ठानेविततेऋत्विजे यथाशक्तयलंकृतादीयते सदैवः।। वराद्गोमिथुनमादायकन्यादीयतेस आर्षः।। प्रथमजः दैवविवाहजश्चतुर्दशपुनाति।। सप्तावरान्सप्तपरान्।। उत्तरजः आर्षविवाहजः षट्पुनाति।। त्रीन्पूर्वान्त्रीन्परान्।। सहधर्म- चरतामितिपारिभाष्यार्थिनेकन्या दीयतेसप्राजापत्यः।। तज्जः षट्पूर्वाषडपरानात्मनासहेत्येवंत्रयोदशपुनाति।। द्रविणादानादासुरः।। परस्परानुरागेण गांधर्वः।। युद्धेनापहरणाद्राक्षसः।। छलेनस्वापाद्य- वस्थासुहरणात्पैशाचइति।। अत्र व्यवस्थामाह।। मनुः।। चतुरोब्राह्मणस्याद्यान्प्रशस्तान्कवयोविदुः।। राक्षसंक्षत्रियस्यैवमा- सुरंवैश्यशूद्रयोरिति।। ।। अत्रानुकल्पमाह।। सएव।। षडानुपूर्व्या- द्विप्रस्यक्षत्रस्य चतुरोवरान्।। विट्शुद्रयोस्तुतानेवविंद्याद्धर्मान- राक्षसानिति।। अस्यार्थः।। ब्राह्मणस्य ब्राह्माद्यागांधर्वांताः षडेवनेतरौ।। एवंचक्षत्रियादेर्ब्राह्माद्यनुज्ञा।। आसुरादयश्चत्वारःक्षत्रियस्यधर्माः।। वैश्यशूद्रयोरपिराक्षसवर्जमेतएव।। एवंचराक्षसंक्षत्रियस्यैव।। ब्राह्मणस्यषट्नेतरौ।। क्षत्रियस्यसर्वे।। ।। आसुरविवाहनिंदामाह।। कश्यपः।। क्रीताद्रव्येण्यानारीनसापत्नीविधीयते।। नसादैवेनसा- पित्र्येदासींतांकवयोविदुरिति।। ।। कन्याविक्रयिणोर्निंदामाह।। ।। यमः।। कन्याविक्रयिणोमूर्खारहः किल्बिषकारिणः।। पतंतिनरकेघोरेदहंत्यासप्तमंकुलमिति।। एवंचात्मार्थधनग्रहणे।। कन्यार्थे तुनदोषः।। ।। यथाहमनुः।। यासामाददतेशुल्कंज्ञातयो- नसविक्रयः।। अर्हणंतत्कुमारीणामानृशंस्यंतुकेवलम्।। आनृ- शंस्यंसामायिकं।। । अथदातृक्रममाह।। ।। याज्ञवल्क्यः।। पितापितामहोभ्रातासकुल्योजननीतथा।। कन्याप्रदपूर्वनाशेप्रकृतिस्थः परः परः।। अप्रयच्छन्समाप्नोतिभ्रूणहत्यामृतावृताविति।। अस्यार्थः।।

एतेषांपित्रादीनांपूर्वस्यपूर्वस्याभावेपरः परः कन्याप्रदः प्रकृतिस्थश्चेत्।।
यद्युन्मादादिदोषवान्नभवति।। अतोयस्याधिकारः असावप्रयच्छन्भ्रूण-
हत्यामृतावृतौप्राप्नोति।। एतच्चोक्तलक्षणवरसंभवे वेदिव्यम्।। ।।
कन्यादानफलमाह।। ।। मनुः।। नाग्निहोत्रादिभिस्तत्स्याद्रक्ष-
तोब्राह्मणस्यवा।। यत्कन्यांविधिवद्दत्वाफलमाप्नोतिमानवइति।। ।।
वयोविशेषेणफलमाह।। ।। मरीचिः।। गौरींददन्नाकपृष्ठंवैकुंठंरोहिणीं-
ददत्।। कन्यांददद्ब्रह्मलोकंरौरवंतुरजस्वलामिति।। ।। गौर्यादिस्वरूप-
माह।। ।। यमः।। अष्टवर्षाभवेद्गौरीनववर्षातुरोहिणी।। दशवर्षाभ-
वेत्कन्याअतऊर्ध्वंरजस्वलेति।। ऊर्ध्वंरजस्वलेति।। ऊर्ध्वंद्वादशेवर्षे-
इत्यर्थः।। द्वादशेवृषलीभवेदिति संवर्तोक्तेः।। वृषलीरजस्वला।।
तत्रदोषमाह।। ।। यमः।। प्राप्तेद्वादशमे वर्षेयः कन्यांनप्रयच्छति।।
मासिमासिरजस्तस्याः पितापिबतिशोणितमिति।। अत्रद्वादशवर्षग्रहणं-
प्रायिकं।। कस्याश्चित्तत्रापितद्दर्शनाभावात्।। अतोरजोदर्शनात्पूर्वंविवाहं-
कुर्यादित्युक्तंभवति।। अतश्चत्रिंशद्वर्षोद्वहेत्कन्यांहृद्यांद्वादशवार्षि-
कीमित्यादिमनूक्तः संगच्छते।। ।। ऋतुमतीकन्या ग्रहणेदोषमाह।।
।। यमः।। यस्तांसमुद्वहेत्कन्यांब्राह्मणामदमोहितः।। असंवाह्योह्य-
पाङ्क्तेयः सविप्रोवृषलीपतिरिति।। ।। यत्काममरणात्तिष्ठेद्गृहे-
कन्यर्तुमत्यपि।। नत्वेवैनांप्रयच्छतगुणहीनायकर्हिचिदितिमनुवचनं-
तदपिशब्दात्कामशब्दाच्चनस्वार्थपरं।। किंतु गुणवतेदानप्रशंसार्थं।।
अग्रेस्वयमेवबाहुल्येनदोषाभिधानात्।।।। विवाहात्प्राग्यदि
ऋतुदर्शनंपिताचनददातितदाकन्यावर्षत्रयंप्रतीक्ष्यस्वयमेववरयेत्।। ।।
तदाहबौधायनः।। त्रीणिवर्षाण्यृतुमतीकांक्षेतपितृशासनं।।
ततश्चतुर्थेवर्षेतुविंदेत्तुसदृशंपतिमिति।। यदृतुत्रयमुपास्यैवकन्याकुर्या-
त्स्वयंवरमितिविष्णुवचनंतद्गुणवद्वरविषयं।। इयंप्रतीक्षादातृसद्भावे।।
यदातु कोपिदातानास्तितदाराजादद्यात्।। ।। तदाह।। नारदः।।
यदातुकश्चिन्नैवस्यात्कन्याराजानमाव्रजेदिति।। यदाराजापिनददातितदा-

स्वयंवरंकुर्यात्।। तदाह।। याज्ञवल्क्यः।। गम्यंत्वभावेदातॄणांकन्या-कुर्यात्स्वयंवरमिति।। अस्यार्थः।। यदापुनर्दातॄणामभावस्तदाकन्यैवगम्यंगमनार्हमुक्तलक्षणंस्वयमेववरयेत्।। ।। अथदत्तापहारेदंडमाह।। ।। सएव।। सकृत्प्रदीयतेकन्याहरंस्तांचौरदंडभागिति।। दत्तावाग्दत्तां।। ।। नारदोऽपि।। दत्वान्यायेनयः कन्यांवरायनददातितां।। अदुष्टश्चेद्वरोराज्ञा सदंड्यस्तत्रचोरवदिति।। अत्रादुष्टश्चेदित्यनेनदुष्टायनदेयेतिगम्यते।। उक्तंचगौतमेन।। प्रतिश्रुत्याप्यधर्मसंयुक्तायनदद्यादिति।। याज्ञवल्क्योपि।। दत्तामपिहरेत्पूर्वाच्छ्रेयांश्चेद्वरआव्रजेदिति।। अस्यार्थः।। यदिपूर्वस्माद्वराच्छ्रेयान्विद्याभिजनाद्यतिशययुक्तोवर-आगच्छति।। पूर्वस्य चपातकयोगोदुर्वृत्तत्वं वातदादत्तामपिहरेत्।। एतच्चसप्तमपदात्प्राक्द्रष्टव्यं।। नोदकेननवाचावाकन्यायाः पतिरुच्यते।। पाणिग्रहणसंस्कारात्पतिः स्यात्सप्तमे-पदइतियमोक्तेः।। ।। वाग्दानोत्तरंकन्यादोषोपलंभेगृहीताया अपित्यागमाह।। ।। मनुः।। विधिवत्प्रतिगृह्यापित्यजेत्कन्यांविगर्हिता-मिति।। विगर्हितांदुष्टां।। कन्यादुष्टदोषानाह।। ।। नारदः।। दीर्घकुत्सितरोगार्ताव्यं गासंस्पृष्टमैथुना।। धृत्यान्याहितभावावाकन्या-दुष्टाप्रकीर्तितेति।। अन्यस्मिन्पुरुषांतरेआहितः कृताभावामानसाभिला-षोययासातथोक्ता।। ।। अदुष्टात्यागेदोषामाह।। याज्ञवल्क्यः।। अदुष्टांचत्यजन्दंड्योदूषयंस्तुमृषाशतमिति।। अस्यार्थः।। विवाहात्प्रागेवद्वेषादिनाऽसद्भिः कन्यादोषैर्दीर्घरोगादिभिर्दूषयतिसपणानां शतंदंड्यः।। ।। कन्यादोषमनाख्याददत्पित्रादिरपिदंड्य इत्याह।। सएव।। अनाख्यायददद्दोषंदंड्यउत्तमसाहसमिति।। ।। उत्तमसाहस-स्वरूपंतुतेनैवोक्तं।। साशीतिपणसाहस्रोदंडउत्तमसाहसइति।। ।। अथाधिवेदननिमित्तिन्याह।। ।। याज्ञवल्क्यः।। सुरापीव्याधिता-धूर्तावंध्यार्थघ्न्यप्रियंवदा।। स्त्रीप्रसूश्चाधिवेत्तव्यापुरुषद्वेषिणी तथेति।। धूर्ताविसंवादिनी।। अधिवेदनंभार्यांतरपरिग्रहः।। ।। अधिवेदनकाल-

माह।। ।। मनुः।। वंध्याष्टमेधिवेद्याब्देदशमेतुमृतप्रजा।। एकादशेस्त्री-जननीसद्यस्त्वप्रियवादिनीइति।। ।। अथप्रत्युद्वाहादिनिर्णयः।। ।। तत्रनारदः।। प्रत्युद्वाहोनैवकार्योनैकस्मिन्दुहितृद्वयं।। नचैकजन्ययोः पुंसोरेकजन्येतुकन्यकेइति।। स्वकन्यायस्यपुत्रायदत्तातत्कन्यकायाः स्वपुत्रेणपरिणयनंप्रत्युद्वाहः।। ।। अत्रोत्तरार्द्धगतनिषेधापवादः।। ।। पारिजातेस्मृत्यंतरे।। एकोदरीकरतलग्रहणं यदिस्यादेकोदरस्थ-वरयोःकुल नाशनंच।। एकाब्दकेतुविधवाभवतीहकन्या नद्यंतरेतु शुभदंपृथुशैलरोधइति।। विवाहस्त्वेकजातानामेकविस्मन्नुदयेकुले।। नाशंकरोत्येकवर्षेस्योदेकाविधवातयोरिति।। उदयोलग्नमिति।। पारिजातेगर्गः।। भ्रातोर्युगेस्वसृयुगेभ्रातृस्वसृयुगेतथा।। नजातुमंग-लंकुर्यादेकस्मिन्मंडपेऽहनि।। पुत्रीपरिणयादूर्ध्वंयावद्दिनचतुष्टयं।। पुत्र्यंतरस्यकुर्वीत नोद्वाहमितिसूरयइतिवचनद्वयंभिन्नपितृमातृकविषयमिति-पारिजाते।। ज्योतिर्निबंधेचैवं।। सामान्यप्रवृत्तमपि।। एकोदरप्रसूता-नामेकस्मिन्वत्सरे यदि।। विवाहोनैवकुर्वीतकुर्वंतिमुनयोन्यथेतिसारा-वलीवचनेनसमानोदरप्रसूतविषयनिषेधस्यप्राप्त्वात्तद्भिन्नविषयंभवतीति तदाशयः।। उद्वाह्यपुत्रींनपिताविदध्यात्पुत्र्यंतरस्योद्वहनंहिजातु।। यावच्चतुर्थीदिनमत्रसर्वंसमाप्यचान्योद्वहनं विदध्यादितिकपर्दिवचोप्ये-वंभिन्नोदरविषयं।। अत्रेतिचतुर्थीदिन इत्यर्थः।। यत्तुज्योतिर्निबंधे-मेधातिथिः।। पृथङ्मातृजयोः कार्यो विवाहश्चैकवासरे।। एकस्मिन्मंडपेकार्यः पृथग्वेदिकयोस्तथा।। पुष्पंपट्टिकयोः कार्यंदर्शनंन शिरस्थयोः।। भगिनीभ्यामुभाभ्यांचयावत्सप्तपदी-भवेदितितत्कर्तृकभेदाभिप्रायं।। कार्यइतिकर्मप्रत्ययेद्वाभ्यांत्रिभि-रित्यन्वयसंभवात्।। उदाहृतगर्गवाक्ययोः कपर्दिवाक्येचैवंकर्तारंप्रति-निषेधोज्ञाप्यते।। कुर्यात्कुर्वंति नपिताविदध्यादितिशब्दै-स्तथैवप्रतीतः।। अतश्चद्वाभ्यांकर्तृभ्यांएकस्मिन्नपिलग्नेएक-स्मिन्नपिगृहेभिन्नोदरयोः कार्यः।। भिन्नकर्तृकत्वेनैवमंडपप्रतिष्ठादिभेदः

प्रतिपत्तौएकः।। कर्तातुदिनचतुष्टयेनपूर्वविवाहंसमाप्योत्तरंकुर्वात्।। अतिसंकटेत्वेकस्मिन्नपिदिनेमंडपदेवभावप्रतिष्ठाद्यभेदेपिगृहभेदेननचेतिव्य–वस्थाबोध्या।। वक्ष्यमाणवसिष्ठवाक्योत्तरार्द्धस्यभिन्नोदरसाधारणत्वात्।। मदनरत्नेनारदः।। मातृयज्ञक्रियापूर्वंज्येष्ठंकृत्वा तुमंगलं।। ऋतुत्रयं–पुनर्यावत्न कुर्याल्लघुमंगलम्।। बहिर्मंडपेविहितंज्येष्ठमंगलं।। तद्भिन्नं लघुमंगलमिति सिंधुः।। एकमातजयोरेकवत्सरेपुरुषस्त्रियोः।। नसमानक्रियांकुर्यात्मातृभेदे विधीयतेइति।। ऋतुत्रयस्यमध्येचेदन्याब्दस्यप्रवेशनं।। तदाह्येकोदरस्यापि विवाहस्तुप्रशस्यते।। अत्रत्यतुशब्देनविवाहभिन्नमेकोदरविषयंमंगलद्वयमब्द–भेदेनभवतीतिज्ञाप्यते। तत्रैवमिहिरस्तु।। पुत्रोपनयनादूर्ध्वंषण्मासाभ्यंतरेतथा।। पुत्र्युद्वाहान्नकुर्वीतविवाहव्रतबंधनम्।। यमयोस्तु।। एकस्मिन्वत्सरेचैववासरे मंडपेतथा।। कर्तव्यंमंगलंस्वस्त्रोर्भ्रात्रोर्यम–लजातयोरिति।। तथामदनरत्नेवसिष्ठः।। द्विशोभनंत्वेकगृहेपिनेष्टं–शुभंतुपश्चान्नवभिर्दिनैस्तु।। आवश्यकंशोभनमुल्मुकोवाद्वारेथवाचार्य–विभेदतोवेति।। एकोदरप्रसूतानांनाग्निकार्यत्रयं भवेत्।। भिन्नोदर–प्रसूतानांनेतिशातातपोब्रवीदिति।। शातातपग्रहणेभिन्नोदर–विषयाग्नित्रयनिषेधस्तानित्याज्ञाप्यते।। गृह्यपरिशिष्टे।। अविरुद्ध–संबंधामुपयच्छेतेत्युपक्रम्यविरुद्धसंबंधोयथाभार्यास्व–सादुहितापितृव्यपत्नीस्वसा चेतिइत्थमूह्यं।। अथपरिवेत्तादिनिर्णयः।। दाराग्निहोत्रसंयोगंकुरुतेयोग्रजे स्थिते।। सकनिष्ठः परिवेत्ताज्येष्ठः परिवित्तिः।। एवंज्येष्ठायामनूढायांकनिष्ठकन्योद्वाहेज्येष्ठकन्यादिधिषुः कनिष्ठाग्रेदिधिषूः अत्रप्रायश्चित्तं।। अज्ञानतः पित्रादिदत्तोद्वाहेभ्रात्रोः परिवेतृपरिवित्तिसंज्ञयोः कृच्छ्रद्वयं कन्यायाः कृच्छ्रं–याजकस्यचांद्रायणं।। ज्ञानतः पित्राद्यदत्तोद्वाहेसर्वेषांवत्सरं–कृच्छ्राचरणंकामतः पित्रादिदत्तोद्वाहेत्रैमासिकं।। अज्ञानेनादत्तोद्वाहे चांद्रायणादिदिधिष्वाधिपतेरतिकृच्छ्रौ।। अत्रापवादः।। सापत्नेदत्तके

वाज्येष्ठेकनिष्ठस्यदाराग्निहोत्रग्रहणेदोषोन।। सोदरेपिक्लीबेमूकबधिरवा-
मन भग्नपादत्वादिदोषयुतेदेशांतरस्थेवेश्यासक्तेपतितेमहारोगिण्यति-
वृद्धेकृषिसक्ते धनवृद्धिराजसेवादिव्यापारासक्तेचौर्यासक्ते
उन्मत्तेविवाहाग्निहोत्रेच्छा निवृत्तेचज्येष्ठेकनिष्ठस्यदाराग्निहोत्र-
ग्रहणेदोषोन।। देशांतरगतंज्येष्ठमष्टोद्वादशवर्षाणिकनिष्ठः प्रतीक्षेत।।
एवंकन्यायाः अपिज्येष्ठायाभिन्नमातृजत्वेकनिष्ठाविवाहेदोषोन।।
एवंमूकत्वादिदोषयुतायांज्येष्ठायामूह्यमिति।। अथमंडनमुंडननिर्णयः।।
।। पुरुषत्रयात्मककुलेमंगलकार्योत्तरंषण्मासाभ्यंतरेमुंडन-
युक्तंकर्मनकार्यम्।। अत्रसर्वत्रपुरुषत्रयगणनाप्रकारः प्रतिकूलनिर्णये-
स्पष्टीकरिष्यते।। मुंडनकर्मतुचौलंनागसंस्कारादिकमाधानादि-
कमभ्युदयार्थमैच्छिकसर्वप्रायश्चित्तादिकंक्षौराप्रापकतीर्थयात्रादिकं-
चोह्यं।। व्रतबंधस्तुकात्यायनमतेमंगलरूपत्वाद्विवाहादुत्तरंकार्यः।।
अन्येषांमतेमंडनरूपत्वान्नकार्यः।। पित्रोरंत्यक्रियादिप्राप्तमुंडन-
माकस्मिकप्राप्तप्रायश्चित्तमंडनमासन्नमरणेनसर्वप्रायश्चित्तीयमुंडनंच-
कर्तव्यमेव।। नित्यत्वाद्दर्शपूर्णमासचातुर्मास्यादिमुंडनेपिनदोषः।।
नचमुंडनं चौलमित्युक्तंव्रतोद्वाहादौतुमंगलमितिवचसामंडनमुंडनयोः
परिगणनाधानादीनांनदोषइतिवाच्यंवाक्यस्योदाहरणार्थत्वात्।।
अन्यथाव्रतोद्वाहान्नचौलकमित्येववक्तव्येमंडनान्नतुमुंडनमितिसामा-
न्येनवचनरचनानर्थक्यापातात्।। तस्माद्गर्भाधानादिलघुमंगलादु-
द्वाहादिज्येष्ठमंगलाच्चाधानादिमुंडनमपिवर्ज्यमितिभाति।। एवंसतिकुले-
बहुकर्मापरोधःस्यादितिचेत्।। विवाहव्रतचूडोत्तरमंगलेषुपिंड-
दानादौमासाद्यल्पकालप्रतिबंधवत्।। पित्राद्यन्यमरणेल्पकालप्रतिकूल
निर्णयवच्चलघुमंगलोत्तरंमासाद्यल्पकालमुंडननिषेधकल्पनंयुक्तिबलादा-
श्रयणीयमिति।। अथप्रतिकूलनिर्णयः।। विवाहनिश्चयोत्तरंवरस्य-
कन्याया वासगोत्रत्रिपुरुषात्मककुलेकस्यचिन्मरणेप्रतिकूलदोषः।।
विवाहनिश्चयश्चवैदि कलौकिकोवाग्राह्यः।। तत्रवैदिकोवाग्दानाख्य-

विधिनाकृतोमुख्यः।। लौकिकोलग्नतिथिनिश्चयादि वरवध्वोः शुल्कभाषाबंधपूगीफलदानादिश्च।। सगोत्रत्रिपुरुषेत्युक्त्यामातामहकुलादिव्यावृत्तिः।। तथाचवरस्तत्पूर्वपत्नी वरमातापितरौवरपितामहपितामह्यावनूढापितृश्वसाचेति पूर्वत्रिपुरुषी।। वरस्तस्यभ्रातापत्नीपुत्रानूढकन्यासहितः वरस्यानूढाभगिनीवरस्यस्नुषापुत्रौअनूढा कन्याचपौत्रस्तद्भार्याचानूढापौत्रीचेतिपरत्रिपुरुषी।। पितृव्यतत्पत्न्योपितृव्यपुत्रस्तत्पत्न्यावनूढापितृव्यकन्याचेतिसंतानभेदेत्रिपुरुषीचेतिसगोत्रत्रिपुरुषीपुरुष परिगणना।। एतेषामन्यतममरणेप्रतिकूलमितिपर्यवसितोर्थः।। अत्रभ्रातापुत्र पौत्रादिश्चानुपनीतोपित्रिवर्षाधिकवयोग्राह्यः।। एवमनूढभगिन्यादेरपित्रिवर्षाधिकत्वंयुक्तंभाति।। एवंवधू कुलेप्यूह्यं।। एवमेवमंडनमुंडनादावपित्रिपुरुषगणनोह्या।। अत्रविशेषः।। पितामातापितामहः पितामहीपितृव्यः पूर्वपत्नीपूर्वस्त्रियाः पुत्रोभ्रातानूढाभगिनीचैतेषांमरणेविशेषतः प्रतिकूलदोषान्नैवकर्तव्योविवाहः।। एतदन्यत्रिपुरुषसपिंडमरणेशांत्यादिनादोषंपरिहृत्यविवाहः कार्यः।। संकटेतुपित्रादिमरणेपिकालप्रतीक्षाशांतिभ्यांदोषंनिर्हृत्यविवाहः कार्यः।। तत्रव्यवस्थानिश्चयोत्तरंमातापित्रोर्द्वयोरपिमरणेकालप्रतीक्षाशांतिभ्यामपिदोषशांत्यभावान्नकार्योविवाहः।। मातापित्रोरेकैकमरणेतुशांत्यादिनविवाहः।। तत्र।। पितुरब्दमिहाशौचंतदर्धमातुरेवच।। मासत्रयंतुभार्यायास्तदर्धंभातृपुत्रयोः।। अन्येषांतुसपिंडानामा शौचंमाससंमितं। तदंतेशांतिकंकृत्वाततोलग्नंविधीयते।। प्रतिकूलेनकर्तव्यं लग्नंयावदृतुत्रयं।। प्रतिकूलेसपिंडस्यमासमेकंविवर्जयेदित्यादिवाक्याश्रयेणव्यवस्थोच्यते।। अत्राशौचशब्देनप्रतिकूलकृतंविवाहानधिकरमात्रंकालप्रतीक्षार्थमुच्यते।। अतः पितृमरणेवर्षोत्तरंविनायकशांतिंकृत्वासंकटेविवाहः कार्यः।। अतिसंकटेषण्मासोत्तरंविनायकशांतिंश्रीपूजनादिशांतिंचकृत्वा विवाहः।। ततोप्यतिसंकटेमासोत्तरं-

शांतिद्वयांतेविवाहइतिसंकटतारतम्येनपक्षत्रयं। मातुर्मरणेषण्मासांते-विनायकशांत्याविवाहः।। अतिसंकटेमासांतेशांति द्वयंकृत्वोद्वाहः।। यत्तु।। प्रमीतौपितरौयस्यदेहस्तस्याशुचिर्भवेत्।। नदैवंनापि वापित्र्यंयावत्पूर्णोनवत्सरइति।। पित्रोर्मृतौवर्षपर्यंतंसर्वशुभकर्म-निषेधवचनंतत्प्राग्वाङ्निश्चयात्पित्रोर्मृतौसंकटाभावेवाज्ञेयं।। भार्यामरणे-मासत्रयांतेमासांतेवा श्रीपूजनादिशांतिः।। भ्रातृमरणेर्द्धमासांते-वाविनायकशांतिः।। पुत्रमृतौसार्धमासंमासंवाप्रतीक्ष्यश्रीपूजना-दिशांतिः।। पितृव्यमरणेमासांते विनायका शांतिः।। पितामह्याअनूढ-भगिन्याश्चमरणेमासांतेश्रीपूजनादिशांतिः।। एतदन्यत्त्रिपुरुषसपिंड-मरणेमासांतेश्रीपूजनादिशांतिः।। ततोविवाहः।। गुणवत्तमातुर्मृतौ-षण्मासेनमनः खेदानपगमेवर्षप्रतीक्षा।। एवंगुणवत्तरभार्यायाः षण्मासपर्यंतंप्रतीक्षा।। ज्योतिष्प्रकाशेतु।। अतिसंकटवशेनमात्रादि-मरणेमासाधिकप्रतीक्षायाअसंभवेमासमध्येपिदशाहोत्तरंकंचित्कालं-प्रतीक्ष्योक्तव्यवस्थयाविनायकशांतिं श्रीपूजनादिशांतिंचकृत्वागां-दत्वापुनर्वाग्दानादिचरेदित्युक्तं।। सर्वोप्ययमपवादः संकटेषुतारतम्ये नबुधैर्योज्यः।। अल्पसंकटविषयेमहासंकटविषयकविधिकथनेवक्तुः कर्तुश्चदोषएव।। दुर्भिक्ष राष्ट्रभंगादिभयेपित्रोर्मरणशंकायांच नप्रतिकूलंदीर्घरोगिदूरदेशस्थविरक्तानांकन्यायाः प्रौढत्वेचप्रतिकूल-दोषोनेत्यपवादइति।। विवाहेआशौचप्राप्तौ।। याज्ञवल्क्यः।। दानेविवाहेयज्ञेचसंग्रामेदेशविप्लवे।। आपद्यपिचकष्टायांसद्यः शौचं-विधीयते।। केषामित्यपेक्षितेब्रह्मपुराणेउक्तं।। दातुः प्रतिग्रहीतुश्चकन्या-दानेचनोभवेत्।। विवाहयिष्णोः कन्याया लाजाहोमादिकर्मणीति।। व्रतयज्ञविवाहेषुश्राद्धेहोमार्चनेजपे।। आरब्धेसूतकंनस्यादनारब्धे-तुसूतकमितिविष्णुवचनाच्च।। ।। प्रारंभस्तेनैवोक्तः।। प्रारंभोवरणं-यज्ञेसंकल्पोव्रतसत्रयोः।। नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रियेति।। वरणमितिमधुपर्कपरं।। गृहीतमधुपर्कस्ययजमानाच्चऋत्विजः।।

पश्चादशौचेपतितेनभवेदितिनिश्चयइतिब्राह्मोक्तेः।। मधुपर्कात्पूर्वंतु-भवत्येवाशौचमितिशुद्धिविवेकः।। रामांडारभाष्येप्येव।। नांदीमुखाव-धिश्चस्मृत्यंतरे।। एकविंशत्यहर्यज्ञेविवाहेदशवासराः।। त्रिषट्चौलोप-नयनेनांदीश्राद्धविधियतेइति।। ।। आरंभाभावेपिलग्नांतरा-भावेगद्यविष्णुः।। तदैवप्रतिष्ठाविवाहयोःपूर्वं संभृतयोरपीति।। ।। अत्रप्रायश्चित्तमाह।। ।। मदनपारिजातेविष्णुः।। अनारब्ध-विशुद्ध्यर्थंकूष्मांडैर्जुहुयाद्घृतं।। गांदद्यात्पंचगव्याशीततः शुद्ध्यतिसूतकीति।। संग्रहेपि।। संकटेसमनुप्राप्तेसूतकेसमुपस्थिते।। कूष्मांडीभिर्घृतंहुत्वागांचदद्यात्पयस्विनीं।। ।। चूडोपनयनोद्वाह-प्रतिष्ठादिकमाचरेत्।। यदैवसूतकप्राप्तिस्तदैवाभ्युदयक्रिया।। ।। अन्नादिषुविशेषः षट्त्रिंशन्मते।। विवाहोत्सवयज्ञेषु अंतरामृतसूतके।। परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः। परैरसगोत्रैः।। भुंजानेषुतुविप्रेषुत्वंतरामृतसूतके।। अन्यगेहोदकाचांताः सर्वेतेशुचयः स्मृताः।। एतदाशौचात्पूर्वमपृथक्कृतान्नविषयम्।। तत्रशेषमन्नंत्याज्य-मित्यर्थः।। ।। पृथक्कृतेषुतुबृहस्पतिराह।। विवाहोत्सवयज्ञेषुत्वं तरामृतसूतके।। पूर्वसंकल्पितान्नेषुनदोषः परिकीर्तित इति।। ।। विवाहे-वधूवरजननीरजोदोषेनिर्णयः।। माधवीये।। प्रारंभात्प्राग्विवाहस्यमातायदि-रजस्वला।। निवृत्तिस्तस्यकर्तव्यासहत्वेश्रुतिचोदनात्। प्रारंभान्नांदी-श्राद्धात्।। नादीमुखंविवाहादावित्यादिनातस्यैवप्रारंभोक्तेः।। मेधा-तिथिः।। चौलेचव्रतबंधेचविवाहेयज्ञकर्मणि।। भार्या रजस्वलायस्य प्रायस्त- स्यनशोभनं।। वधूवरान्यतमयोर्जननीचेद्रजस्वला।। तस्याः शुद्धेः परंकार्यं मांगल्येमनूरब्रवीत्।। वृद्धमनुः।। विवाहव्रतचूडासुमाता यदिरजस्वला।। तदा नतत्प्रकर्तव्यमायुः क्षयकरंयतः।। नांदीश्राद्धोत्तरंरजोदोषेतुकपर्दिकारिकासु।। सूतिकोदक्ययोः शुद्धैगांदद्याद्धोमपूर्विकां।। प्राप्तेकर्मणिशुद्धिः स्यादितरस्मिन्न-शुद्ध्यति।। अलाभे सुमुहूर्तस्यरजोदोषेचसंगते।। श्रियंसपूज्य-

तत्कुर्यात्पाणिग्रहणमंगलं।। हैमींमाषमितांपद्मांश्रीसूक्तविधिनार्चयेत्।।
प्रत्यृचंपायसंहुत्वाअभिषेकंसमाचरेदिति।। ।। ऋतुमती कन्यायाः
प्रायश्चित्तमाह।। ।। आश्वलायनः।। कन्यामृतुमतींशुद्धांकृत्वा
निष्कृतिमात्मनः।। शुद्धिंचकारयित्वातामुद्वहेदानृशंस्यधीः।।
पिताऋतून्स्वपुत्र्यास्तु गणयेदादितः सुधीः।। दानावधि-
गृहेयत्नात्पालयेच्चरजोवतीम्।। दद्यात्तदृतुसंख्यागाः शक्तः
कन्यापितायदि।। दातव्यैकापिनिः स्वेनदानेतस्यायथाविधि।।
दद्याद्वाब्राह्मणेष्वन्नमतिनिः स्वः सदक्षिणम्।। तस्यातीत-
र्तुसंख्येषुवराय प्रतिपादयेत्।। उपोष्यत्रिदिनंकन्यांरात्रौपीत्वांगवांपयः।।
अदृष्टरजसेदद्यात्कन्यायैरत्नभूषणम्।। तामुद्वहन्वरश्चापिकूष्मांडै-
र्जुहुयाद्द्विजइति।। विवाहकाले कन्याऋतुमतीचेत्तत्रप्रायश्चित्तमाह।।
।। मदनपारिजातेयज्ञपार्श्वः।। विवाहे विततेयज्ञेहोमकालउपस्थिते।।
कन्यामृतुमतींदंष्ट्वाकथंकुर्वंतियाज्ञिकाः।। स्नापयित्वातुतां कन्यामर्च-
यित्वायथाविधि। युंजानामाहुतिंहुत्वाततस्तंत्रंप्रवर्तयेदिति।। युंजानः
प्रथमं इत्यनेनमंत्रेणाहुतिंहुत्वेत्यर्थः।। ।। बौधायनसूत्रेतु।। अथयदि-
कन्योपसाद्यमानाचोह्यमानावारजस्वलास्यात्तामनुमंत्रयेत्पुमांसौमित्रा-
वरुणौपुमांसावश्विनावुभौ।। पुमानिंद्रश्च सूर्यश्चपुमांसचदधात्वियमिति।।
अथद्वादशरात्रमलंकृत्य प्राशयेत्पचगव्यमथशुद्धांकृत्वा विवहेदिति।।
।। कन्याविवाहकालमाह।। ।। यमः।। सप्तसंवत्सादूर्ध्वंविवाहः
सार्ववर्णिकः।। कन्यायाः शस्यतेराजन्नन्यथाधर्मगर्हितइति।। ।।
ज्योतिर्निबंधे।। षडब्दमध्येनोद्वाह्याकन्यावर्षद्वयंयतः।। सोमोभुंक्तेत-
तस्तद्वद्गंधर्वश्चतथानलइति।। ।। राजमार्तंडे।। अयुग्मेदुर्भगा-
नारीयुग्मेतुविधवाभवेत्।। तस्माद्गर्भान्वितेयुग्मेविवाहसापतिव्रता।।
मासत्रयादूर्ध्वमयुग्मवर्षे युग्मे पिमासत्रय समे वयावत्।।
विवाहशुद्धिंप्रवंदतिसंतोवात्स्यादयः स्त्रीजनिजन्मासादिति।। ।।
अयननियममाह।। ।। पारस्करः।। उदगयनइति।। ।। मासानाह।।

।। मदनरत्नेनारदः।। माघफाल्गुनवैशाखज्येष्ठमासाः शुभप्रदाः।।
मध्यमः कार्तिकोमार्गशीर्षोवैनिंदिताः परेइति।। वसिष्ठतु।।
पौषेपिकुर्यान्मकरस्थितेर्के चैत्रे भवेन्मेषगतोयदास्यात्।।
प्रशस्तमाषाढकृतोंविवाहंवदंतिगर्गा मिथुनस्थितेर्कइति।। चंडेश्वरः।।
मार्गेमासितथाज्येष्ठेक्षौरंपरिणयंव्रतम्।। ज्येष्ठपुत्रदुहित्रोस्तु-
यत्नेनपरिवर्जयेत्।। कृत्तिकास्थंरविंत्यक्त्वाज्येष्ठपुत्रस्यकारयेत्।।
उत्सवादिषुकार्येषुदिनानिदशवर्जयेदिति।। रत्नकोशेपि।।
जन्मर्क्षेजन्मदिवसेजन्ममासे शुभंत्यजेत्।। ज्येष्ठेमास्याद्य-
गर्भस्यशुभंवर्ज्यं स्त्रियाअपीति।। ।। पराशरस्तु।। अज्येष्ठा-
कन्यकायत्रज्येष्ठपुत्रोवरोयदि।। व्यत्ययोवातयोस्तत्रज्येष्ठोमासः
शुभप्रदइति।। ।। वराहमिहिरोपि।। ज्येष्ठस्यज्येष्ठकन्याया-
विवाहोनप्रशस्यते।। तयोरन्यतरेज्येष्ठेज्येष्ठमासः प्रशस्यते।। द्वौज्येष्ठौ
मध्यमौप्रोक्तावेकंज्येष्ठंशुभावहम्।। ज्येष्ठत्रयंनकुर्वीतविवाहेसर्व
संमतमिति।। ।। यत्तुसार्वकालमेकेविवाहमिति वदंतितदासुराद्यध-
र्म्यविवाहविषयंवेदितव्यं।। धर्मेषुविवाहेषुकालपरीक्षणंनाधर्मेष्वि-
तिगृह्यपरिशिष्टोक्तेः। ।। आश्वलायनसूत्रवृत्तिभाष्यकर्त्तारौतुप्रत्यासन्नर्तु-
कालायाविवाहविषयमित्यूचतुः।। ।। विवाहेपक्षमाह।। ।।
पारस्करः।। आपूर्यमाणपक्षइति।। आपूर्यमाणपक्षेशुक्लपक्षे।। ।।
यद्यप्यत्रसूत्रकारेणशुक्लपक्षः स्विकृतस्तथापिकृष्णत्रयोदशीपर्यंतः
कृष्णपक्षोपिग्राह्यः।। तथाचबृहस्पतिः।। शुक्लपक्षः शुभः प्रोक्तः
कृष्णश्चांत्यत्रिकंविनेति।। ।। अथतिथयः। भारद्वाजः।। प्रतिपद्दुः
खजननीद्वितीयाप्रीतिवर्द्धनी।। सौभाग्यदातृतीयास्याचतुर्थीचार्थनाशिनी।।
पंचम्यासुखवित्तानिषष्ठीविघ्नप्रदायिनी।। विद्याशीलसुखाप्तिः
स्यात्सप्त म्यामफलाष्टमी।। नवमीशोकफलदाआनंदोदशमीदिने।।
सुखदैकादशीज्ञेया सफलाद्वादशीस्मृता।। मानपुत्रौत्रयोदश्यांचतुर्द-
शीतुदोषदा।। फलंबहुविधंपंचदश्यांचैवविशेषतइति।। पंचदशी-

पूर्णमासी।। ।। विवाहमध्येश्राद्धदिनदर्शपातेनिर्णयः।। ज्योति-
र्निबंधे।। विवाहमारभ्यचतुर्थीमध्येश्राद्धंदिनंदर्शदिनंयदिस्यात्।।
वैधव्यमाप्नोतितदाशुकन्याजीवेत्पतिश्चेदनपत्यतास्यादिति।।
अत्रश्राद्धदिनंतद्युक्तदिनं।। विवाहमध्ये श्राद्धस्यैवनिषेधः।।
नतुतद्रहिततिथिमात्रस्य।। वृत्तविवाहेपरतस्तुकुर्याच्छ्राद्धंस्व-
धाभिर्नतुदूषयेतेतिशास्त्रांतरोक्तेः दर्शदिनमितिस्वरूपेणतिथि-
निषेधः।। तथासत्येवपृथग्ग्रहणस्यसार्थकत्वं।। ।। अत्रवाराश्चोक्ताः।।
।। धर्मसिंधौ।। सोमबुधगुरुशुक्रवाराः शुभाः।। अन्येमध्यमाइति।।
।। अथनक्षत्राण्याह।। ।। पारस्करः त्रिषुत्रिषूत्तरादिषु-
स्वातौमृगशिरसिरोहिण्यांवेति।। अस्यार्थः।। उत्तराआदिर्येषां
तान्युत्तरादीनितेषुत्रिषु।। उत्तराफल्गुन्यांहस्तेचित्रायांच।।
एवंउत्तराषाढायांश्रवणधनिष्ठायांच।। एवंउत्तराप्रौष्ठपदी-
रेवत्यामश्विन्यांच।। स्वातौमृगशिरसिरोहिण्यांवा।। एतेषा-
मन्यतमेवानक्षत्रेविवाहः कार्यइति।। ।। बृहस्पतिः।।
सौम्यपैतृकहस्ताश्चमूलमित्राश्विवायवः।। त्रीण्युत्तराणिपौष्ण्यं-
चरोहिणीच शुभप्रदाः।। अन्याश्चसर्वावर्ज्याः स्युस्ताराः पाणिग्रहे-
सदेति।। ।। विहितेष्वपि ग्रहविशेषाक्रमणेननक्षत्रेषुनिषिद्धं-
तदपवादंचपारिजाते बृहस्पतिवसिष्ठावूचतुः।। वत्सरेणतदर्धेनत-
स्याप्यर्द्धेनयांतिये।। मंदजीवकुजैर्दग्धाराशयः पूर्वजंगुणमिति।।
राहुकेतुविमुक्तंयद्ग्रहचक्रनिपीडितम्।। वत्सरार्द्धेनशुध्येत-
ग्रहयुद्धयुतंचभमिति।। यस्मिन्भेस्तमयंयांतिग्रहास्तद्भंत्रिमासतः।।
शुद्धत्वमुपयातीतिवज्रिन्पद्मासनोदितमितिच।। चंद्रशुक्रसमायोगा-
दुडूनिशुभतामियुः।। ग्रहयुक्तेतुनक्षत्रेतदैवयदिचंद्रमाः।। तयोर्मध्ये-
व्रजन्पीडांदोषान्सर्वान्व्यपोहतीति।। ।। गुर्वर्कादीनांबलमाह।। ।।
मदनरत्नेगर्गः।। स्त्रीणांगुरु बलंश्रेष्ठंपुरुषाणांरवेर्बलं।। तयोश्चंद्रबलं-
श्रेष्ठमितिगर्गेणभाषितं।। जन्मत्रिदशमारिस्थः पूजयाशुभदोगुरुः।।

विवाहेथचतुर्थाष्टद्वादशस्थोमृतिप्रदइति।। ।। देवलः।। ।। नष्टात्मजा-धनवतीविधवाकुशीलापुत्रान्विताहतधवाशुभगाविपुत्रा।। स्वामिप्रिया-विगतपुत्रधवाधनाढ्यावंध्याभवेत्सुरगुरौक्रमशोभिजन्मेति।। ।। बृहस्पतिः।। झषचापकुलीरस्थोजीवोप्यशुभगोचरः।। अतिशोभनतां-दद्याद्विवाहोपनयादिष्विति।। ।। लल्लः।। ।। द्वादशदशमचतुर्थे जन्मनिषष्ठाष्टमेतृतीयेच।। प्राप्तेपाणिग्रहपोजीवेवैधव्यमाप्नोतीति।। ।। गर्गः।।।। सर्वत्रापिशुभंदद्याद्द्वादशाब्दात्परंगुरुः।। पंचषष्ठाब्दयोरेव-शुभगोचरतामता।। सप्तमात्पंचवर्षेषुस्वोच्चस्वर्क्षगतोयदि।। अशुभोपिशुभंदद्याच्छुभदर्क्षेषुकिंपुनः।। रजस्वलायाः कन्यायागुरु-शुद्धिंनचिंतयेत्।। अष्टमेपिप्रकर्तव्योविवाहस्त्रिगुणार्चनात्।। अर्कगुर्वोर्बलंगौर्यारोहिण्यर्कबलास्मृता।। कन्या चंद्रबलाप्रोक्ता-वृषलीलग्नतोबलेति।। ।। पुरुषघातचंद्रः।। रत्नमालायां।। एकपंचनवयुग्मषट्दशत्रीणिसप्तचतुरष्टलाभगः।। द्वादशाजवृष-भादिराशितोघातचंद्रइतिकीर्तितोबुधैरिति।। ।। स्त्रीघातचंद्रमाह।। ।। नारदः।। भूबाणनंदहस्ताश्वरसदिग्वह्निशैलजाः।। वेदावसुशिवादित्या घातचंद्रोयथाक्रममिति।। ।। कर्मविशेषेणघातचंद्रापवादः।। ।। ज्योतिर्निबंधे।। विवाहचौलव्रतबंधयज्ञेपट्टाभिषेकेचतथैवराज्ञाम्।। सीमंत यात्रासुतथैवजातेनोचिंतनीयः खलुघातचंद्रइति।। ।। विवाहम-ध्येअकाल वृष्ट्यादिदोषमाह।। ।। नारदः।। अकालजाभवेयुश्चेद्वि-द्युन्नीहारवृष्टयः।। प्रत्यर्कपरिवेषेन्द्रचापाभ्रध्वनयोयदि।। दोषायमंगले-नूनंनदोषायैवकालजा इति।। शार्ङ्गधरः।। निर्घातेक्षितिचलने-ग्रहयुद्धेराहुदर्शनेचैव।। आपंचदिनात्कन्यापरिणीतानाशमुपयाति।। उल्कापातेंद्रचापप्रबलघनरजोधूपनिर्घातविद्युद्वृष्टिप्रत्यर्कदोषादिषु-सकलबुधैस्त्याज्यमेवैकरात्रम्।। दुःस्वप्नेदुर्निमित्तेह्यशुभफल-दृशोदुर्मनोभ्रांतबुद्धौचौलेमौंजीनिबंधेपरिणयनविधौसर्वदात्याज्यमेवेति।। ।। अस्यापवादमाह।। ।। श्रीपतिः।। अथदिवसत्रयमध्येमृदुपानीयं

यदाभवति।। उत्पातदोषशमनंतदैवशंप्राहुराचार्याइति।। संबंधतत्त्वे।। भूकंपादेर्नदोषोस्तिवृद्धिश्राद्धेकृतेसतीति।। ।। क्षयपक्षे।। ।। चंडेश्वरः।। त्रयोदशदिनेपक्षेविवाहादिनकारयेत्।। गर्गादिमुनयः प्राहुः कृतेमृत्युस्तदाभवेत्।। मृत्युर्विवाहेदंपत्योः।। आदिपदोपात्तत्वा च्चौलदौशिशोः।। ।। ज्योतिर्निबंधे।। उपनयनंपरिणयनंवेशमारं-भादिपुण्यकर्माणि।। यात्रांद्विःक्षयपक्षेकुर्यान्नजिजीविषुः पुरुषइति।। ।। अथलग्नेग्रहबलं।। ।। धर्मसिंधौ।। त्रिषष्ठाष्टस्वर्कस्त्रिजल-धनगोब्जः क्षितिसुतस्त्रिषष्ठस्थोज्ञेज्यौव्ययनिधनवर्ज्यौ 12/8 भृगु सुतः।। द्वितीयाब्धीष्वंकाभ्रतनुषु 2/4/5/9/10/1 रिपु 6 त्र्यष्टसुशनिस्तमः केतुश्चायेभवतिसुखहेतुश्चसकल इति।। अथलग्नवर्ज्यग्रहाः।। ।। तत्रैव।। रविर्लग्नेचंद्रस्तनुरिपु मृतिस्थः 8 क्षितिसुतोष्टलग्नाभ्रे 8/1/10 ज्ञेज्यौनिधनउशनास्त्र्यष्टरिपु 6 षु।। शनिः शेषौ लग्नेतनुपतिरथार्यष्टमगृहेविवाहेस्युः सर्वेमदनसदने 7 नैवशुभदाः।। शेषौराहुकेतू।। अन्येद्वादशगंचंद्रंदृक्केशनवमांशपौ।। षष्ठाष्टगौबधंचाभ्रे 10 वर्ज्यानाहुर्मनीषिणः।। मेषान्नक्रात्तु-लात्कर्कात्त्रिर्गण्यानवमांशकाः।। शस्तावृषनृयुक्कर्ककन्यातूल-धनुर्झषाइति।। अथैकविंशतिमहादोषाः।। ।। ज्योतिषे।। दुःपंचांग्यष्टमोसृक्सविधुखलतनुः षण्मृतींदुः सितोरौसंक्रांति गंडदोषः सखलभदिनजौचक्रचक्रार्धपातौ।। रंध्रंलग्नंकुवर्गोस्तगखल-उदयास्ताशुचिःक्रुरवेधः कर्तर्येकार्गलांघ्रिग्रहणभकुलवौदुः क्षणोत्पातभेचेति।। ।। दशदोषाः।। ।। व्यवहारोच्चये।। वेधश्च-लत्ताचतथैवपातः खर्जुरवेधोदशयोगचक्रम्।। युतिश्च जामित्र-मुपग्रहश्चबाणाख्यवज्रेचदशैवदोषाइति।। एषांस्वरूपाणिषड्वर्ग-शुद्धादिविचारश्चज्योतिर्ग्रंथेभ्योवगंतव्यः।। विस्तरभयान्नेहलिखितः।। दिवाविवाहः प्रशस्तः।। रात्रावपि कन्यादानंहेमाद्र्यादिमतेप्रशस्तं।। तथाचात्रिः।। मुख्योविवाहः पूर्वाह्णेमध्याह्नेचोत्तमोत्तमः।। निशायांम६

यमः प्रोक्तस्त्वपराह्णेतुगर्हितइति।। संकटेगोधूलमप्युक्तं।। गोधूलंपद-
जादिकेशुभकरंपंचांगशुद्धौरवेरर्धास्तात्परपूर्वतोर्धघटिकंतत्रेंदु-
मष्टारिगं।। सोग्रागंकुजमष्टमंगुरुयमाहः पातमर्कक्रमंजह्याद्विप्रमुखेति-
संकटइदंसद्यौवनाढ्येक्वचिदिति।। अथमंडपनिर्माणाद्यंगजातमंगिनो
विवाहादेरुक्तनक्षत्रादौकार्यं।। कंडनदलनयवारकमंडपमृद्वेदिवर्णकाद्य-
खिलं।। तत्संबंधिगतागतमृक्षेवैवाहिकेकुर्यादित्युक्तेः।। विशेषांतरं-
कृष्णभट्टीये।। नवत्रिषष्ठोनववारकः शुभोनवर्णकेनैवविवाहमंडपेइति।।
नववार कोंऽकुरार्पणमितितत्रैवव्याख्यातमिति।। ।। मंडपादिरचना-
माह।। ।। वसिष्ठः।। षोडशारत्निकंकुर्याच्चतुर्द्वारोपशोभितम्।।
मंडपंतोरणैर्युक्तं तत्रवेदिंप्रकल्पयेत्।। अष्टहस्तंतुरचयेन्मंडपं
वाद्विषट्करमिति।। ।। अन्यत्रतु।। मंगलेषुचसर्वेषुमंडपोगृहमानतः।।
कार्यः षोडशहस्तोवान्यूनहस्तोदशावधिः।। स्तंभैश्चतुर्भिरेवात्रवेदी-
मध्येप्रतिष्ठितेति।। वेदीरचनामाह।। ।। नारदः।। हस्तोच्छ्रितां-
चतुर्हस्तैश्चतुरस्रासमंततः।। स्तंभेश्चतुर्भिःसुश्लक्ष्णांवामभागेतुसद्मनि।।
समांचैवचतुर्दिक्षुसोपानैरतिशोभितां।। प्रागुदक्प्रवणारंभांस्तंभैर्हं-
सशुकादिभिः।। विचित्रेणांकितैः कुंभैर्विहितैस्तोरणांकुरः।।
भृंगारपुष्पनिकरैर्वर्णकैः समलंकृतां।। विप्राशीर्वचनैः पुण्यैः
स्त्रीभिर्दीपैर्मनोरमां।। वादित्रगीतनृत्यार्हदयानंदिनींशुभां।। एवंवि-
धामारुरुक्षेन्मिथुनंसाग्निवेदिकामिति।। गृहमानतइतिमहतिगृहेमहान्-
मंडपः।। न्यूनेन्यूनइत्यदशावधिरितिन्यूनतायांदशसंख्यावधिरित्यर्थः।।
अतोवसिष्ठोक्तोष्टहस्तपक्षोऽत्यं तापद्विषयः।। साग्निवेदिकामिति-
दंपत्योरारोहणात्पूर्वंहोमोपयोगिनामग्न्यादीनामुकल्पनंकार्यमित्याशयः।।
।। अथकन्यावैधव्यहरंविष्णुप्रतिमादानं।। ।। मार्कंडेयपुराणे।।
ब्राह्मणंसाधुमामन्त्र्यसंपूज्यविविधार्हणैः।। तस्मैदद्याद्वि-
धानेनविष्णोमूर्तिंचतुर्भुजाम्।। शुद्धवर्णसुवर्णेनवित्तशक्त्याथवापुनः।।
निर्मितां रुचिरांशंखगदाचक्राब्जसंयुतां।। दधानांवाससीपीतेकुमुदोत्पल-


मालिनीम्।। सदक्षिणांचतांदद्यान्मंत्रमेनमुदीरयेदित्यादि।। अथप्रयोगः।।
।। कन्यास्नानाचमनेकृत्वादेशकालौसंकीर्त्यवैधव्यहरंमहाविष्णुप्रतिमा-
दानंकरिष्ये।। तत्रादौनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजांकरिष्येइति-
संकल्प्यगणेशपूजनंकृत्वाचार्यं वृत्वायथाशक्तितंसंपूज्यतद्धस्तेन-
कृताग्न्युत्तारणप्राणप्रतिष्ठांसुवर्णमयींविष्णुप्रतिमाताम्रादिपात्रे-
संस्थाप्यषोडशोपचारैः पूजयेत्।। तत्रवस्त्रार्पणसमयेपीतेवास-
सीकुंडलाद्यलंकारान्कुमुदोत्पलमालांसमर्पयेत्।। पूजांतेदेवंप्रणम्य-
प्रतिमादानमंत्रान्पठित्वाचार्यायप्रतिमांदद्यात्।। दानमंत्रायथा।।
यन्मयाप्राचजनुषिघ्नंत्यापतिसमागमम्।। विषोपविषशस्त्राद्यैर्हतोवाति-
विरक्तया।। प्राप्यमानंमहाघोरंयशः सौख्यधनापहम्।। वैधव्याद्य-
तिदुःखौघनाशायशुभलब्धये। बहुसौभाग्यलब्ध्यैचमहाविष्णोरिमांतनुं।।
सौवर्णींनिर्मितांशक्त्यातुभ्यंसंप्रददेद्विज।। इमांसोपस्करांविष्णु-
प्रतिमांममवैधव्यनाशार्थं तुभ्यमहंसंप्रददेनममेतिदत्वा।। दानसांगता-
सिद्ध्यर्थंयथाशक्तिसुवर्णदक्षिणांदत्वाऽनघाद्याहमस्मीतितिर्वदेत्।।
एवमस्त्वितिब्राह्मणोत्रिः।। ततोयथाशक्तिब्राह्मणान्भोजयित्वा-
विप्राशिषो गृहीत्वाविवाहयोग्याभवेदिति।। ।। इतिवैधव्यहर-
विष्णुप्रतिमादानविधिः।। अथापरिहार्येकन्यायावैधव्ययोगे-
विशेषउच्यते।। मार्कंडेयपुराणे।। बालवैधव्ययोगेतुकुंभेद्रु-
प्रतिमादिभिः।। कृत्वालग्नंततः पश्चात्कन्योद्वाह्येतिचापरेति।। ।।
अत्रपुनर्भूदोषाभावउक्तोविधानखंडे।। स्वर्णांबुपिप्पलानांच
प्रतिमाविष्णुरूपिणी।। तयासहविवाहेतुपुनर्भूत्वंनजायतइति।।।।
सूर्यारुणसंवादे।। विवाहात्पूर्वकालेचचंद्रताराबलान्विते।। विवाहोक्त-
चतांकन्यां कुंभेनसहचोद्वहेत्।। सूत्रेणवेष्टयेत्पश्चाद्दशतंतुविधानतः।।
कुंकुमालंकृतंदेहंतयोरेकांतमंदिरे।। ततः कुंभंचनिःसार्य-
प्रभज्यसलिलाशये।। ततोभिषेचनंकुर्यात्पंचपल्लववारिभिरिति।।
आसमंताच्चंदनपुष्पादिभिरलंकृतंकुंभंकन्यादेहंचवेष्टयेदित्यर्थः।। ।।

अथप्रयोगः।। ।। तत्रविवाह- कर्तापित्रादिःदेशकालौसंकीर्त्यकन्या-वैधव्यहरंकुंभविवाहंकरिष्यइति संकल्प्यतत्रादौनिर्विघ्नतासिद्ध्यर्थं-गणपतिपूजनंतदंगत्वेनस्वस्तिपुण्याहवाचनंमातृकापूजनमाभ्युद-यिकश्राद्धंचकरिष्यइति कृत्वाचार्यंचवृत्वाकृततंडुलाष्टदले-महीद्यौरित्यादिनाकुंभस्थापनंतेतत्रप्रतिमायांवरुणलिंगमंत्रेणवरुणंसंपूज्य तत्रस्थापितविष्णुप्रतिमायांविष्णोरावाहनादिषोडशोपचारैः पूजां-विधाय प्रार्थयेत्।। वरुणांगस्वरूपायजीवनानांसमाश्रय।। पतिंजीवयकन्याश्चिरंपुत्र सुखंकुरु।। देहिविष्णोवरंदेव कन्यां पालयदुःखतइति।। ततोविष्णुरूपिणेकुंभायेमांकन्यांश्रीरूपिणीं-समर्पयामीतिसमर्प्यपरित्वेत्यनुवाकेनाधस्तादुपरिष्टाच्चकुंभंकन्यां-चपरिवेष्ट्यततः कुंभंनिः सार्यसलिलाशयेप्रभज्याचार्यः पंचपल्लवैः शुद्धोदकेनपंचेन्द्राद्याभिषेकमंत्रैः कन्यामभिषेचयेत्।। ततः कन्या शुद्धवाससीपरिधायवैवाह्यवस्त्रादिकंसर्वोपस्करामाचार्यायदत्त्वाय-थाशक्तिब्राह्मणभोजनं संकल्प्यतेषामाशिषोगृहीत्वाकर्मेश्व-रार्पणंकुर्यात्।। ।। इतिकुंभविवाहः।। अथमृतभार्यात्वपरिहारोपायः।। ।। तत्रवरस्यजन्मकालीनग्रहसूचित मृतभार्यात्वपरिहारार्थंकस्य-चिद्ब्राह्मणस्यविवाहंकुर्यादितिमहार्णवः।। विशेषांतरंतुतत-एवज्ञेयमिति।। ।। इतिमृतभार्यात्वपरिहारोपायः।। ।। अथविनाय-कशांतिः।। ।। तत्रयाज्ञवल्क्यः।। एवंविनायकंपूज्यग्रहांश्चैव-विधानतः।। कर्मणांफलमाप्नोतिश्रियंचाप्नोत्यनुत्तमामिति।। ।। विनायकशांतिकालमाह।। ।। बृहत्पराशरः।। चतुर्थ्यांशुक्लपक्षेतु-श्रवणेचोत्तरेतथा।। पुण्यार्थं सर्वसिद्ध्यर्थंकुर्याच्छांतिंविनायकीमिति।। ।। नक्षत्रांतराणिविष्णुधर्मोत्तरे।। इमाशांतिप्रकृत्य।। हस्तपुष्याश्वयुक्-सौम्यवैष्णवान्यतमेशुभे।। नक्षत्रेसुमुहूर्ते चमैत्रेवाब्रह्मदैवतइति।। भविष्ये।। शुक्लपक्षेचतुर्थ्यांचवारेणधिषणस्यच।। तिष्येचवीरनक्षत्रे-तस्यैवपुनतोनृपेति।। धिषणस्यगुरोर्वारइत्यर्थः।। । एतद्वचनमुदाहृत्या-

पराकः।। तच्छ्रीकामस्यविनायकस्नपनविषयं।। उपस्पृष्टविषयंतु।।
स्नपनंतस्यकर्तव्यंपुण्येह्निविधिपूर्वकमितियाज्ञवल्क्यवचनाद्य-
स्मिन्कस्मिंश्चित्पुण्याहेकर्तव्यं।। उपस्पृष्टस्यविलंबायोगात्।। अत्रा-
धिकारिणः।। लैंगे।। ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चसिद्धिकामुकैः।।
कर्म निर्विघ्नसिद्ध्यर्थंसुपूज्यस्त्वंगजाननेति।। यजमानस्तुशूद्रश्चेद्द्वि-
जैस्तांनियोजयेदितिमहार्णवाच्चशूद्रस्याप्यधिकारइति।। ।।
विनायकशांतिविधिमाह।। ।। याज्ञवल्क्यः।। गौरसर्षपकल्केन
साज्येनोत्सादितस्यच।। सर्वौषधैः सर्वगंधैर्विलिप्ताशिरसस्तथा।।
भद्रासनोपविष्टस्यस्वस्तिवाच्याद्विजाः शुभाः।। अश्वस्थानाद्-
गजस्थानाद्वल्मीकात्संगमाद्र्दात्।। मृत्तिकांरोचनां गंधान्गुग्गुलं-
चाप्सुनिःक्षिपेत्।। याआहृताह्येकवर्णैश्चतुर्भिःकलशैर्ह्रदात्।।
चर्मण्यानडुहेरक्तेस्थाप्यंभद्रासनंततः।। सहस्राक्षंशतधारमृषिभिः
पावनंकृतं।। तेनत्वामभिषिंचामि पावमान्यः पुनंतुते।। भगंतेवरुणो
राजाभगंसूर्योबृहस्पतिः।। भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुः।। यत्तेके-
शेषुदौर्भाग्यंसीमंतेयच्चमूर्द्धनि।। ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुसर्वदा।।
स्नातस्य सार्षपंतैलंस्रुवेणौदुंबरेणतु।। जुहुयान्मूर्द्धनिकुशान्सव्येनप-
रिगृह्यतु।। मितश्चसंमितश्चैवतथाशालकटंकटौ।। कूष्मांडोराजपुत्र-
श्चेत्यंतेस्वाहासमन्वितैः।। नामभिर्बलिमंत्रैश्चनमस्कारसमन्वितैः।।
दद्याच्चतुष्पथेशूर्पेकुशानास्तीर्यसर्वतः।। कृताकृतांस्तंडुलांश्च-
पललौदनमेवच।। मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेवतु।।
पुष्पंचित्रसुगंधंचसुरांचत्रिविधमपि।। मूलकंपूरिका पूपांस्तथैवोंडेरकाः
स्रजः।। दध्यन्नंपायसंचैवगुडपिष्टंसमोदकम्।। एतान्सर्वान्स-
माहृत्यभूमौकृत्वाततः शिरः।। विनायकस्यजननीमुपतिष्ठेत्ततोंबिकां।
दूर्वासर्षपपुष्पाणांदत्वार्घंपूर्णमंजलिम्।। रूपंदेहियशोदेहि
भगंभवतिदेहिमे।। पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे।। ततः शुक्लां-
बरधरः शुक्लमाल्यानुलेपनः।। ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मंगुरोरपीति।।

।।विनायकशांति संभारसंग्रहश्लोकाः।। महार्णवे।। अथोच्यंतेऽत्रसंभाराः रोचनापंचमृत्तिकाः।। अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्र्दात्।। चंदनागरुकस्तूरीकर्पूराद्याः सुगंधयः।। गौरसर्षपकल्कस्तुगव्याज्येन विमिश्रितः।। गुग्गुलश्चापिसंशुद्धः सर्वौषधिगणस्तथा।। चत्वारः कलशाएक वर्णाश्चस्फुटितावृणाः।। ह्रदोदकयुतावापिनिम्नगासंगमोदकाः।। सग्रीवपुच्छमारक्तंचर्मचानडुहंतथा।। श्रीपर्णिकाष्ठपीठंच सहकारस्यपल्लवाः।। अश्वत्थ पल्लवाः स्युश्चसुगंधिसुमनांस्यपि।। स्रजः शोभनगंधाश्चविचित्रकुसुमानिच।। कलशावेष्टनार्थंतुनववस्त्रचतुष्टयं।। पीठस्याच्छादनार्थंतुशुभ्रवस्त्रमथापरम्।। गणेशाम्बिकयोरर्थेवस्त्रयुग्मंसुशोभनम्।। आचार्यदक्षिणार्थंतुमहार्हवसनद्वयम्।। पंचवर्णानिपिष्टानिस्वस्तिकस्यविनिर्मितैः।। तैलंचसार्षपंतद्वदुदुंबरविनिर्मितः।। स्रुवः कुशाश्चरुस्थालीपाकार्थंतंदुलाःशुभाः।। किंचिद्भ्रंतिक्रियाक्लृप्तास्तंदुलाश्चापरेतथा।। तिलपिष्टेनसंयुक्तओदनः शूर्पमेवच।। पक्वाश्चमत्स्याश्चापक्वामांसंपक्वमपक्वकम्।। गौडीपैष्टीचमाध्वीचेत्येवंवैत्रिविधासुरा।। मत्स्यादिकसुरांतंचनिषिद्धंयच्चयस्तत्।। नग्राह्यंतुविशेषंणद्विजैस्त्याज्यासुरासदा।। यजमानस्तुशूद्रश्चेद्द्विजैस्तानियोजयेत्।। प्रत्यक्षमूलकं वास्यादुक्तभक्षस्तथाकृतः।। अपूपापूरिकाश्चैवोंडेरकस्त्रजः।। दध्यन्नंपायसंचैवपिष्टंचगुडमिश्रितम्।। लड्डुकाश्चतथा दूर्वाःसर्षपागौर संज्ञिताः।। गणेशप्रतिमाचैवगौर्याश्चप्रतिमातथा।। एवंसंभृतसंभारः शान्तिकुर्याच्छुभेदिनेइति।। ।। अथविनायकशांतौवेद्यादिरचनाप्रकारमाह।। बलभद्रः।। वेदिंपङ्क्तिपदायतांसमभुजांमित्वोत्तरापूर्वयोर्वेद्योः षोडशकांगुलांतरमितेपीठंद्विहस्तायतं।। खेटानांरचयेत्करार्द्धमितमुन्नत्याचकुंडेशतस्त्यक्त्वा त्रिंशदथांगुलानिभवदिश्यादर्शमध्योन्नतं।। भद्रंतद्वदथांगुलादिधृतिचंद्रर्तुक्रमादंतरंहित्वाचोत्तरतः कलांशविवरंकुंडात्तथेंद्वक्षिभिः।। चंद्रर्त्वंशयुतैरथापरदिशःसप्तेंदुभिःशैलभूवेदांशैरपितत्सुराद्रियुगायुग्मानायतंविस्तृतं।।

हेरंबांबगृहंग्रहाद्गुणयमैश्चंद्रर्तुयुक्तांशकैर्याम्येहस्तमितंतथाश्चियमलैःष-ट्पंचषड्भिर्युतैः।। वेद्याश्चांतरमत्रचेन्द्रदिशितोविंशांगुलैरश्वषट्चंद्रांश्वरसाश्वि भिः क्षितियमाक्ष्यंशैश्वकुंडांतरे।। कुंडंपश्चिमयाम्यवेदिपरिधेर्विंशद्भिरेव-र्तुसप्ताब्ध्यंशैश्चनखर्तुसायकरसैश्चांशांतरेवस्थितं।। नागाश्व्यंगुलम ध्यसूत्रमथवातद्वत्स्मृतंस्थंडिलंसाध्यं विघ्नहरप्रशांतिकरणेशांत्यैग्रहाणाम-पीति।। ।। अथप्रयोगः।। ।। यथोक्तकालेपवित्रपाणिरधिकारीआचम्य



प्राणानायम्यदेशकालौसंकीर्त्यास्यममामुकशर्मणः सुतस्योपनयननिश्चयोत्त-रंवाविहनिश्चयोत्तरंअथवाऽमुकनामसुतायाः विवाहनिश्चयोत्तरंकस्य-चित्सपिंडस्य मृतिजनितप्रतिकूलदोषपरिहारपूर्वककर्मफलसिद्धिद्वारा-श्रीपरमेश्वरप्रीत्यर्थंसग्रहमखांविनायकशांतिंकरिष्ये।। यद्वास्य-कुमारस्योपनयनकर्मणोनिर्विघ्नतासिद्धिकामोविनायकशांतिं करिष्ये।। तत्रादौनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनं तदंगत्वेनमातृका-स्थापनमाभ्युदयिकश्राद्धंचकरिष्यइतिकृत्वाऽचार्यंवृणुयात्। आचार्यत्वंयथास्वर्गेतिसंप्रार्थयेत्।। एवंचतुर्णांऋत्विजांवरणंकुर्यात्।। पराशरमतेष्टौ।। तत्र चत्वारः स्वस्तिवाचकाः।। अस्ययागस्येतिसर्वे-षांप्रार्थना।। तेषांगंधवस्त्रादिभिः पूजनं।। ततोवामहस्ते-गौरसर्षपान्गृहीत्वारक्षोघ्नमंत्रैर्यदत्रसंस्थितमिति चतान्विकीर्यय-थाविधिगायत्र्यादिभिर्मंत्रैः पंचगव्यंसंसाध्यापोहिष्ठेत्यादिमंत्रैः कर्मभूमिंसंप्रोक्ष्यभूमिपूजनं कृत्वाऽचार्येणसुलिप्तेस्थंडिलेपंचव-

र्णैर्भद्रासनार्थमेकं स्वस्तिकं कृत्वातस्यपूर्वादिचतुर्दिक्षुचतुरः स्वस्तिकान्ऋत्विग्भिः कारयित्वामध्यस्वस्तिकोपरिरक्तमानडुहंचर्मो-त्तरलोमंप्राचीनग्रीवंसंस्थाप्यतस्योपरिश्रीपर्णीपीठंसंस्थाप्यश्वेतव-स्त्रेणाच्छादयेत्।। ततश्चत्वारोऋत्विजश्चतुर्दिक्षुस्वस्तिकेषुचतुरः कलशान्महीद्यौरित्यादिकलशस्थापनविधिनासंस्थापयेयुः।। केचिदत्रैशान्येपंचमोरुद्रकलशः स्थापयेदित्याहुः।। तत्पक्षेऋत्विजः पंचेति।। अत्रस्थापनीयकलशेषुनिक्षेपे विशेषः।। कलशान्नदी-संगमोदकेनह्रदोदकेनवापूर्यतेषु स्योनापृथिवीतिमंत्रेणपंचमृदः प्रक्षिप्यगंधद्वारामितिगंधनिक्षेपेचंदनागरुकेशरकस्तूरी कर्पूरगोरोचनगुग्गु-लंक्षिपेदिति।। ततोकलशस्यमुखेविष्णुरित्यादिदेवदानवइत्यंतेनकल-शान्प्रार्थयित्वाचतुर्दिक्षुचत्वारऋत्विजस्तत्वायामीतिकुंभेषु वरुणमा-वाह्यषोडशोपचारैर्वरुणंसंपूज्यस्वशाखोक्तशांतिकमंत्रान्पठेयुः।। केचित्त्वत्र इंद्रसूक्तंचहैरंबंपूर्व कुंभेजपेद्विजः।। पौरुषंचश्रियः सूक्तंदक्षिणे कलशेजपेत्।। नवभिः पावमानीभिर्वारुणंपश्चिमेजपेत्।। रुद्रसूक्तंजपेत्सांग मुत्तरेकलशेद्विजइतिवाचनिकसूक्तानांजपमाहुः।। ततआचार्योवेद्याग्नेयकोणेगणेशांबिकापीठेरक्तवस्त्रमास्तीर्यतदुपरिविर-चितरक्ततंडुलाष्टदलेमहीद्यौरित्यादिकलशस्थापनविधिनापूर्णपात्रांतं-कृत्वातदुपरिपलपरिमितांतदर्धांतदर्धांवासौवर्णमयींविनायक-मूर्तिमंबिकामूर्तिंचकृताग्न्युत्तारणप्रतिष्ठांकलशोपरिनिधायगणेशमूर्तौ। ॐ तत्पुरुषायविद्महेवक्रतुंडायधीमहि।। तन्नोदन्ती प्रचोदया-दित्यनेनगणेशमावाह्य।। ॐसुभगायैविद्महेकाममालिन्यैधीमहि।। तन्नोगौरीप्रचोदयादित्यनेनांबिकामूर्त्तौअंबिकामावाहयेत्।। ।। अत्रशांतिमयूखे गणानान्त्वाअंबेअम्बिकेतिमन्त्रावुक्तौ।। ।। अत्रापरार्केहेमाद्रिमतेप्रतिमयोरुत्तरतोनमोंतैर्नाममंत्रैरन्यादेवताआ-वाहयेदित्युक्तं।। तद्यथा।। ॐ व्योमकेशाय०।। ॐ पार्वत्यै०।। ॐ भीमजायै०।। ॐ कृष्णस्यपित्रे०।। ॐ अर्काय०।। ॐ

आराय०।। ॐ सिताय०।। ॐ धिषणाय०।। ॐ क्लेदपुत्राय०।। ॐ कोणाय०।। ॐ लक्ष्मवते०।। ॐ विधुंतुदाय०।। ॐ केतवे०।। ॐ बाहुलेयाय०।। ॐ नंदकस्यधारिणे०।। एवमावाह्यावाहनमंत्रेणकांडानुसमयेनपदार्थानुसमयेनवाषोडशोपचारैः संपूज्यवेद्यानैर्ऋत्यकोणेकुंडेस्थंडिलेवास्वगृह्योक्तविधिना-वरदनामाग्निप्रतिष्ठाप्यवेद्याईशानकोणेग्रहपीठेपूर्वोक्तवर्त्मनादित्यादि-ग्रहाणांस्थापनंपूजनं चकृत्वाग्निसमीपमागत्यान्वादध्यात्।। तद्यथा।। अत्राचार्यःदेशकालौस्मृत्वास्मिन्सग्रहमखगणेशशांत्याख्ये कर्मणिदेवतापरिग्रहार्थमन्वाधानंकरिष्ये।। तत्रतावत्पूर्वेणब्रह्मणो-गमनमित्यादिवैकल्पिकपदार्थावधारणंकरिष्ये।। ततोदेवताभिध्यानं।। तत्रचक्षुषीआज्येनेत्यंतेआदित्यादिनवग्रहानर्कादिसमिदादिद्रव्यैः प्रत्येकमष्टाष्टसंख्याकाभिरधिदेवताप्रत्यधिदेवताश्चतैरेवद्रव्यैः चतुश्चतुः संख्याकाभिर्विनायकादिदिक्पालान्तास्तैरेवद्रव्यैः प्रत्येकंद्वाभ्यांद्वाभ्यामा-हुतिभ्यां।। पुनरत्रप्रधानं।। मितंसंमितंशालंकटंकटंकूष्मांडंराजपुत्रं व्योमकेशंपार्वतीं भीमजांवसुदेवंअर्कं आरंसितंधिषणंक्लेदपुत्रंकोणं लक्ष्मवंतंविधुंतुदंकेतुंबाहुलेयंनंदकस्य धारिणंएताः प्रधानदेवताएकै-कयाचर्वा हुत्याशेषेणस्विष्टकृतं।। अग्निवायुंसूर्यमग्नीवरुणावग्नी-वरुणावग्निवरुणंसवितारंविष्णुंविश्वान्देवान्मरुतः स्वर्क्कान्वरुणमा-दित्यमदितिंप्रजापतिमेता अंगप्रधानार्थदेवताआज्येनैकैकयाहुत्यायक्ष्ये।। दक्षिणतोब्रह्मासनादिपात्रासादनेविशेषः।। चरुस्थालिद्वयं।। श्रपणावसरेचरुद्वयस्यश्रपणं।। अन्यत्सर्वंप्रकृतिवत्कृत्वाचरोरुद्वा-सनान्तेगव्याज्यलोलीकृतेनसिद्धार्थपिष्टेनोद्वर्तितांगस्यसर्वौषधैः सर्वगं-धैश्चविलिप्तशिरसोयजमानस्यमंगलवेदघोषेणवस्त्राच्छा-दनादिनोक्तपीठात्मकभद्रासनोपर्योचार्येणोपवेशनंकार्यं।। उपवेश-नोत्तरमुद्वर्तनमितिमदनरत्नेउक्तंतन्मिताक्षरामहार्णवादिमहानिबंधविरो-धादुपेक्ष्यम्।। भद्रासनोपविष्टोयजमानऋत्विग्भिः स्वस्तिवाचनंकुर्यात्।।

स्वस्तिवाचनान्ते शिष्टाचाराज्जीवत्पत्तिपुत्रादिभिः सुवेषाभिः स्त्रीभि-र्नीराजितस्ताभ्यः सकंचुकानिवस्त्राणिदद्यात्।। ततआचार्योयजमान-दक्षिणतउदङ्मुखस्तिष्ठन्नृत्विग्दत्तपूर्वादिकुंभत्रयेणक्रमेणैकैकमंत्रे-णस्नापयेत्।। तस्मिन्किंचिज्जलमवशेषयेत्।। सहस्राक्षंशतधारमृषिभिः पावनंकृतं।। तेनत्वामभिषिंचामिपावमान्यः पुनंतुते।। भगंतेवरुणो राजाभगंसूर्योबृहस्पतिः।। भगमिंद्रश्चभगंसप्तर्षयोददुः।। यत्तेकेशेषु-दौर्भाग्यंसीमंतेयच्चमूर्धनि।। ललाटेकर्णयो रक्ष्णोरापस्तद्घ्नंतुसर्वदा।। उत्तरकलशेमंत्रत्रयसमुच्चयइति हेमाद्रिमिताक्षरामहार्णवकृन्मतम्।। प्रतिकलशंमंत्रत्रयावृत्तिरित्यपरार्कः।। ततश्चतुर्भिर्मिलितैः कलशैर्ऋत्विग्धृतैर्बृहत्पराशरोक्तैर्मंत्रैरभिषेकंकारयेत्।। मंत्रान्स्वयं-पठेदाचार्यः।। एतद्वैपावनंस्नानंसहस्राक्षमृषिस्मृतम्।। तेनत्वाशत धारेणपावमान्यः पुनंत्विमाः।। शक्रादिदशदिक्पालाब्रह्मेशाः केशवादयः।। आपस्तेघ्नंतुदौर्भाग्यंशांतिंददतुसर्वदा।। ॐ सुमित्रियानऽआपऽओषधयः संतुदुर्मित्रियास्तस्मैसंतुयोस्माद्द्वे-ष्टियंचवयंद्विष्मः।। समुद्रांगिरयोन द्योमुनयश्चपतिव्रताः।। दौर्भाग्यंघ्नंतुतेसर्वेशांतिंयच्छंतुसर्वदा।। पादगुल्फोरु जंघास्यनितं-बोदरनाभिषु।। स्तनोरोबाहुहस्ताग्रग्रीवाअंसांगसंधिषु।। नासाललाट-कर्णभ्रकेशांतेषुचयत्स्थितम्।। तदोपोघ्नंतुदौभार्ग्यशांतिंयच्छंतुसर्व-देति।। ।। ततआचार्यउपविश्यसव्यपाणिगृहीतकुशत्रयांतर्हितेयजमान-मूर्धनिऔदुंबरेणस्रुवेणसार्षपतैलंजुहुयात्।। ॐ मिताय स्वाहा। इदंमितायनमम।। ॐ संमितायस्वा० इदंसंमिताय०।। ॐ शालायस्वा० इदंशालाय०।। ॐ कटंकटायस्वा० इदंकटंकटाय० ॐ कूष्मांडाय० इदंकूष्मांडाय०।। ॐ राजपुत्रायस्वाहा। इदंराजपुत्रायनमम।। ।। केचिदत्रयजमानस्यवामकर्णेवावर्धनिकल-शेसंस्रवपातः कार्यइत्याहुः।। अत्रमलापकर्षणाययजमानेच्छयास्नानं।। ततः शुक्लमाल्यांबरधरोयजमानः पश्चादग्नेरुपविशति।। ततआचार्य-

आज्योत्पवनादिपर्युक्षणांतेस्त्रुवेणाज्यमादायाधारावाज्यभागौ-हुत्वासमिदादिद्रव्यैर्ग्रहहोमंकृत्वाप्रधानचरुणाजुहुयात्।। ॐ मितायस्वाहा।। इदंमितायनमम।। ॐ संमिताय०।। इदंसंमिताय०।। ॐ शालाय०।। इदंशालाय०।। ॐकटंकटाय०।। इदंकटंकटाय०।। ॐ कूष्मांडाय०।। इदंकूष्मांडाय०।। ॐ राजपुत्राय०।। इदं राजपुत्राय०।। ततस्तेनैवचरुणा।। ॐ व्योमकेशाय०।। इदंव्योमकेशाय०।। ॐ पार्वत्यै० इदंपार्वत्यै०।। ॐ भीमजायै०।। इदंभीमजायै०।। ॐ कृष्णस्यपित्रे०।। इदंकृष्णस्यपित्रे०।। ॐ अर्काय०।। इदंअर्काय०।। ॐ आराय०।। इदंआराय०।। ॐसिताय०।। इदंसिताय०।। ॐधिषणाय०।। इदंधिषणाय०।। ॐ क्लेदपुत्राय०।। इदंक्लेदपुत्राय०।। ॐ कोणाय०।। इदंकोणायइ०।। ॐलक्ष्मवते०।। इदंलक्ष्मवते०।। ॐ विधुंतुदाय०।। इदंविधुंतुदाय०।। ॐ केतवे०।। इदकेतवे०।। ॐ बाहुलेयाय०।। इदंबाहुलेयाय०।। ॐनंदकस्यधारिणे०।। इदंनंदकस्यधारिणे०।। केचिदत्रप्रधानहोमोत्तरंग्रहहोमः कार्यइत्याहुः।। ततो-गणेशांबिकादिस्थापितदेवतानां पंचोपचारैः पूजनं।। ततः स्विष्टकृदादिनवाहुत्यंतेगाणपत्यचरुशेषेणाभिषेकवेद्याः परितः इन्द्रादिलोकपालेभ्योबलिंदद्यात्।। ततो यजमानः सुस्नातः शुक्लानुलेपनमाल्याम्बरधरोगणेशाम्बिकापीठसमीपेउपविश्याचम्य-पूर्वोक्त देशेकालेचममशास्त्रोक्तफलावाप्तयेश्रीगणेशांबिकयोः षोडशोपचारैः पूजनंकरिष्ये इतिसंकल्प्यावाहितमंत्रेणगणेशा-म्बिकयोरासनादिस्तुत्यंतंसंपूज्य नमस्कुर्यात्।। नमस्तेब्रह्मरूपाय-विष्णुरूपायतेनमः।। नमस्तेरुद्ररूपायशिवरूपायतेनमः।। नमोस्तुवेद-रूपाययज्ञरूपायतेनमः।। नमोस्तुगजरूपायगजानांपतयेनमः।। स्वाहा-रूपनमस्तेतुस्वधा रूपनमोनमः।। मेरुमंदररूपायकैलासवासिनेनमः।। विरूपायसुरूपायनमस्तेब्रह्मचारिणे।। भक्तस्तुतायदेवाय नमस्तुभ्यं-

विनायकेतिनत्वाम्बिकांनमेत्।। विनायकस्यजननीमम्बिकांभैरव-प्रियां।। हिमालयसुतांदेवींनमामिवरदायिकामितिनत्वावैणवशूर्प-द्वयेउपहारान्प्रक्षिपेत्।। तत्रसकृदवहतास्तंडुलास्तिलपिष्टमिश्रौदनः पक्वमत्स्याः अपक्वाः माषविकारास्तदाकारावापक्वमपक्वंचमांसंता-दृशमाषविकारौवाचित्रंसुगंधिपुष्पंचंदनादिसुगंधिद्रव्यंत्रिविधा-सुरागुडमधुपिष्टमिश्राणिससैंधवानि पात्रत्रयस्थितानिक्षीराणिवामूलकं पूरिकाः अपूपाः औंडेरकस्त्रजः दध्योदनः पायसंगुडमिश्रितंतंडुला-दिपिष्टंलड्डुकाः इतिक्षिप्त्वा गणेशगायत्रीं पठित्वाइदंशूर्पस्थंकृता-कृताद्युपहारजातंनैवेद्यंश्रीभगवतेगणेशायसमर्पयामीतिबलिमुत्सृजेत्।। ततोम्बिकागायत्रींपठित्वाइदंशूर्पस्थंकृताकृताद्युपहारजातं नैवेद्यंभग-वत्येश्रीमदम्बिकायैसमर्पयामीतिबलिमुत्सृजेत्।। इतिबलिंदत्वा।। ततोरक्तकुसुमरक्तचंदनदूर्वासर्षपसहितवारिणांजलिमापूर्यगणेश-गायत्रींपठित्वा श्रीमद्विनायकायेदमर्घंसमर्पयामीति-समर्प्यपूर्ववदर्घ्यंगृहीत्वाम्बिकागायत्रींपठित्वाश्रीमदंबिकायैइदमर्घं-समर्पयामीत्यर्घंदत्वाविनायकाम्बिकांचोपतिष्ठेत्।। रूपंदेहियशोदे-हिभगंभगवन्देहिमे।। पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे।। इतिविनायकं।। रूपंदेहियशोदेहिभगंभवति देहिमे।। पुत्रान्दे-हिधनंदेहिसर्वान्कामांश्चदेहिमे।। इत्यंबिकां।। बृहत्पाराशरेणोपस्थाने-मंत्रातरमुक्तं।। सौभाग्यमंबिकेदेहिभगंरूपंयशोपिच।। स्त्रियंपुत्रांश्च-कामांश्चतथाशौर्यंचदेहिमे।। गणेशमातस्त्वंबालेयत्किंचिन्मद-भीप्सितम्।। एकनाम्नैवतद्देहिदेहिगौरिवरान्ममेति।। ततः सूर्योप-स्थानं।। नमस्तेसर्वलोकेशशतरश्मेतवोदयात्।। यातुमेदेवदौर्भाग्यं-सौभाग्यंचास्तुमेसदेति।। तच्चक्षुरितिनमस्कारः।। ।। ततआस्तीर्ण-कुशेशूर्पेसर्वप्रकारमुपहारशेषंनिधायतच्छूर्पंगृहीत्वाचतुष्पथेगत्वा-गोमयोपलिप्तायांचत्वरभूमौदर्भाक्षतानास्तीर्य तदधिष्ठातृदेवतापूजनं कुर्यात्।। तद्यथा।। ममसकुटुंबस्यआगामिकविघ्नकदम्बप्रध्वंसनार्थं

विनायकशांतिकर्मणोंगतयाविहितंचत्वराधिष्ठातृदेवतापूजनंबलिदानंच करिष्येइतिसंकल्प्य।। ॐ आदित्येभ्योनमः।। वसुभ्यो०।। मरुद्भयो०।। अश्विभ्यां०।। रुद्रेभ्यो०।। सुपर्णेभ्यो०।। पन्नगेभ्यो०।। ग्रहेभ्यो०।। असुरेभ्यो०।। यातुधानेभ्यो०।। पिशाचेभ्यो०।। मातृगणेभ्यो०।। गणेभ्यो०।। शाकिनीभ्यो०।। यक्षेभ्यो०।। वैतालेभ्यो०।। योगिन्यै०।। पूतनायै०।। शिवायै०।। जृंभकेभ्यो०।। सिद्धेभ्यो०।। गंधर्वेभ्यो०।। मालाधरेभ्यो०।। विद्याधरेभ्यो०।। नागेभ्यो०।। दिक्पालेभ्यो०।। लोकपालेभ्यो०।। विघ्नविनायकेभ्यो०।। ब्रह्मादिदेवेभ्यो०।। ऋषिभ्यो०।। भूतेभ्यो०।। दिग्भ्योनमइतिगंधपुष्पधूपदीपनैवेद्यफलतांबूलहिरण्यनारि-केलार्घनमस्कारस्तुत्यंतोपाचारैरावाहितदेवताः संपूज्ययजमानः समुत्थायसोपहारंशूर्पंशिरोलग्नंकृत्वाप्राङ्मुखः सन्स्मार्तमंत्रान्पठेत्।। बलिंगृह्णंत्विमेदेवाआदित्यावसवस्तथा।। मरुतश्चाश्विनौरुद्राः सुपर्णाः पन्नगा ग्रहाः।। दक्षिणाभिमुखः सन्।। असुरायातुधानाश्चपिशाचा-मातरोगणाः।। शाकिन्योयक्षवैतालायोगिन्यःपूतनाः शिवाः।। पश्चिमाभिमुखः सन्।। जृंभकाः सिद्धगंधर्वामालाविद्याधरानगाः।। दिक्पालालोकपालाश्चयेचविघ्नविनायकाः।। उत्तराभिमुखः सन्।। जगतां शांतिकर्तारोब्रह्माद्याश्चमहर्षयः।। माविघ्नंमाचमेपापंमासंतु-परिपंथिनः।। सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहाइतिमंत्रांते शूर्पंनिद-ध्यात्।। इदंकृताकृताद्युपहारजातंशूर्पस्थंबलिं चत्वराधिष्ठातृदेवता-भ्योनमइतिबलिमुत्सृजेत्।। अनेनबलिदानेनैतादेवताः प्रीयंतां।। पश्चाद् गीतवादित्रशांतिपाठादिभिः सहगृहंगत्वापादौप्रक्षाल्याचम्यस्वासने-उपविश्य कृतस्यसग्रहमखविनायकशांत्याख्यस्यकर्मणः समृद्ध्यर्थं-पूर्णाहुतिहोमंवसोर्धरापातंचकरिष्ये।। इतिसंकल्प्यपूर्वोक्तवर्त्मना-पूर्णाहुतिंवसोर्धारांचकृत्वासंस्रवप्राशनादिहोमशेषसमापनांते-आचार्यंसंपूज्यसदक्षिणवस्त्रयुग्मंतस्मै दत्वान्येभ्योऋत्विग्भ्योयथा-

शक्तिदक्षिणांदद्यात्।। ततोवर्धनिकलशोदकेनरुद्रकलशोदकेनच-
सकुटुंबंयजमानमभिषिंचेत्।। अभिषेकांतेयजमानेनमुखावलोक-
नंकृत्वातत्पात्रमभिषेकवस्त्रंचाचार्यायदद्यात्।। ततो गणेशाम्बिकयोः
पंचोपचारैः पूजनंकृत्वाविसृज्याचार्यायगणेशांबिकयोः प्रतिमांदत्वा-
ग्रहान्विसृज्यगणेशाम्बिकापीठजातंग्रहपीठजातमुपस्करद्रव्यं-
चाचार्यायप्रतिपाद्यविभूतिंधृत्वाग्निंविसृज्ययथाशक्तिब्राह्मणभोजनं-
संकल्प्यतेभ्योभूयसींदत्वातेषामाशिषोगृहीत्वाकर्मेश्वरार्पणंकुर्यात्।।
इतिसंस्कारभास्करेविनायकशान्ति प्रयोगः।। ।। अथकूष्मांडी
होमप्रयोगः।। ।। कृतनित्यक्रियः पवित्रपाणिर्यजमानः पत्न्यासहशुभा-
सनेउपविश्याचम्य प्राणानायम्यदेशकालौस्मृत्वास्य संस्कार्यस्य-
सन्निहितमुहूर्तांतरालाभाद्यतिसंकटवशेनाशौचमध्येऽमुकसंस्कारकर्म'
करणाधिकारसिद्ध्यर्थंप्रायश्चित्तीभूतंकूष्मांडीहोमंगोदानंपंचगव्य-
प्राशनंच करिष्ये।। तत्रादौनिर्विघ्नतासिध्यर्थंगणपतिपूजनं-
करिष्येइतिसंकल्प्ययथा लाभोपचारैर्गणपतिंसंपूज्याचार्यंवृत्वा-
स्वस्तिवाचनार्थंचतुरोऋत्विजांश्चवृत्वातान्गंधादिभिः संपूज्य-
पुण्याहंवाचयेत्।। अत्रवाचनान्तेआदित्यः प्रीयतामित्यूहः कार्यः।।
ततोहोमार्थंआचार्येणस्थंडिलंकृत्वातत्रपंचभूसंस्कारपूर्वकं-
विट्नामानमग्निंसंस्थाप्यान्वादद्यात्।। तत्रप्रजापतिमिन्द्रमग्निंसोमं।।
अत्रप्रधानं। अग्निंवायुंसूर्यंकूष्मांडसंज्ञिकमन्त्रैः।। अग्निंवायुं-
सूर्यमग्नीवरुणावग्नीवरुणावग्निंवरुणंसवितारंविष्णुंविश्वान्देवान्मरुतः
स्वर्कान्वरुणमादित्यमदितिंप्रजापतिमग्निंस्विष्टकृतमेताअंग-
प्रधानदेवताआज्येनैकैकयाहुत्याअस्मिन्कर्मण्यहंयक्ष्ये।।
अत्रब्रह्मासनादिचरुवर्जसर्वंप्रकृतित्वसमिदाधानान्तं कृत्वास्रुवेणाज्य-
मादायप्रजापतिंमनसाध्यायन्।। ॐ प्रजापतये स्वाहा।।
इदंप्रजापतयेनमम।। ॐ इन्द्राय०।। इदमिन्द्राय०।। ॐ अग्नये०।।
इदमग्नये०।। ॐ सोमाय०।। इदंसोमाय०।। ॐ अग्नये०।।

इदमग्नये०।। ॐ सोमाय०।। इदंसोमाय०।। ॐयेद्देवादेव
हेडनंदेवासश्चकृमाव्वयम्।। अग्निर्म्मातस्मादेनसोव्विश्वान्मुन्चत्वꣳ
हसस्वा०।। इदमग्नयेन०। ॐ यदिदिवायदिनक्तमेनाꣳसिच-
कृमाव्वयम्।। वायुर्मातस्मादेनसो व्विश्वान्मुंचत्वꣳ हसःस्वा०।।
इदंवायवे०।। ॐ यदिजाग्रद्यदिस्वप्नऽएनाꣳसिचकृमाव्वयम्।।
सूर्य्योमातस्मादेनसोव्विश्वान्मुंचत्वꣳ हसः स्वा०।। इदंसूर्या०।।
ॐ भूः स्वा०।। इदमग्नये०।। ॐ भुवः०।। इदंवायवे०।। ॐ
स्वः०।। इदंसूर्याय०।। ॐ त्वन्नोऽअ०स्वा०।। इदमग्नीवरुणाभ्यां०।।
ॐ सत्वन्नो० स्वा०।। इदमग्नीवरुणाभ्यां०।। ॐ अयाश्चाग्ने०।।
इदमग्नेयअयसे०।। ॐ येतेशतम्वरु०।। इदंवरुणायसवित्रेविष्ण-
वेविश्वेभ्योदेवेभ्योमरुद्भ्यः स्वर्केभ्यश्च०।। ॐउदुत्तमं०।।
इदंवरुणायादित्यायादितये०।। ॐ प्रजापतये० इदंप्रजापतये०।।
ॐ अग्नयेस्विष्टकृते०।। इदमग्नयेस्विष्टकृते०।। ततः संस्रवप्राश-
नादिहोशेषंसमापयेत्।। ततोगोदान।। तत्रगामुपस्करद्रव्यंपूजा-
द्रव्यंचसंपाद्यप्रतिगृहितृब्राह्मणंवृत्वावस्त्रालंकारादिभिस्तं
संपूज्ययथाविभवंगोपूजनंकृत्वागांदद्यात्।। तत्रदेशकालौ
स्मृत्वागवामङ्गेषुतिष्ठन्तिभुवनाचितुर्दश। यस्मात्तस्माच्छिवंमेस्यादि-
हत्रचपरत्रचेतिपठित्वाइमांयथाशक्त्यलंकृतांपयस्विनींगामाशौच-
दोषनिरसनपूर्वकप्राप्तकर्मकरणाधिकारार्थममुकगोत्रायामुकशर्मणे-
ब्राह्मणायतुभ्यमहंसंप्रददे।। गोदानप्रतिष्ठासिध्यर्थमिमांथाशक्ति-
दक्षिणांतुभ्यमहंसंप्रददे।। प्रतिगृहीताकोदादितिमन्त्रं पठित्वारुद्राय
गांप्रतिगृह्णामीतिवदेत्।। गोरभावेतन्निष्क्रयीभूतंनिष्कंतदर्धंतदर्द्धं
वासुवर्णमूल्यभूतरजतद्रव्यंतुभ्यमहंसंप्रददेइतिदद्यात्।। ।।
अथपंचगव्य प्राशनं।। ।। तत्रपालाशादिपात्रेताम्रायागोरेकपलमित-
स्यगोमूत्रस्यगायत्र्या ग्रहणं।। गंधद्वारामितिश्वेतायागोः द्विपलमित-
स्यगोमयस्यग्रहणं।। आप्यायस्वेतिकृष्णायागोः सप्तपलमितस्यक्षीर-

स्यग्रहणं।। दधिक्राव्णेतिरक्तायागोस्त्रिपलस्यदध्नोग्रहणं।। तेजोसीतिकपिलायागोरेकपलस्यआज्यस्यग्रहणं।। देवस्यत्वेत्यादि-गृह्णामीत्यन्तेनमंत्रेणैकपलमितस्यकुशोदकस्यग्रहणं।। अत्रोक्तवर्णाभावेसर्वं कापिलंवागव्यमात्रंग्राह्यं।। ततः प्रणवेनहस्तेनालोड्यतेनैवज्ञियकाष्ठेननिर्मं-थनमभिमंत्रणंचकुर्यात्।। ततोवितस्तिपरिमितस्थंडिलांतरेपंचभूसंस्कार-पूर्वकमग्निसंस्थाप्याग्निपयुक्ष्यसप्तकुशपत्रैः पंचगव्यंजुहुयात्।। ।। ॐ इरावतीधेनुमती हिभूतꣳ सूयवसिनीमनवेदशस्या।। व्वयंस्कक-म्नारोदसीविष्णवेतेदाधर्थ पृथिवीमभितोमयूखैःस्वाहा।। इदंविष्णवेनमम।। ॐ इदंविष्णवे०।। ॐ मानस्तोकेतनये मानऽआयुषिमानोगोषुमानोऽअश्श्वेषुः रीरिषः।। मानो-व्वीरान्नुद्रभामिनोव्वधीर्हविष्म्मन्तः सदमित्वाहवामहेस्वा०।। इदंरुद्राय०।। ॐ ब्रह्मयज्ञा० स्वा० इदंब्राह्मणे० स्वा० इदंब्रह्मणे०।। ॐ अग्नये स्वा०।। इदमग्नये०।। ॐसोमाय स्वा०।। इदंसोमाय०।। ॐ तत्सवितु० स्वा०।। इदं सवित्रे०।। ॐ स्वाहा।। इदंपरमात्मने०।। ॐ भूर्भुवः स्वः स्वा०।। इदंप्रजापतये०।। ॐ अग्नयेस्विष्टकृतेस्वा०।। इदमग्नयेस्विष्टकृते०।। इतिदशाहुती-र्हुत्वाहुतशेषंप्रणवेनपिबेदिति।। कृतस्यकूष्मांडीहोमसांगतासिध्यर्थंयथाशक्तिब्राह्मणान्भोजयिष्ये।। ततोग्निविसृज्याचार्या-दिभ्योऋत्विग्भ्योदक्षिणादक्षिणांदत्वातेषामाशिषोगृहीत्वा-कर्मेश्वरार्पणंकुयात्।। ।। इतिकूष्मांडीहोमप्रयोगः।। ।। अथ-श्रीशांतिप्रयोगः।। ।। कृतनित्यक्रियः कर्ताशुभासनेउपविश्या-चम्यदेशकालौस्मृत्वास्यसंस्कार्यस्यामुकसंस्कारमध्येऽ-स्मत्पत्न्यारजोत्पन्नसकलदोषनिबर्हणसकलारिष्टाशान्त्यर्थं-श्रीशान्तिकरिष्ये।। तत्रादौनिर्विघ्नतासिध्यर्थंगणपतिपूजनंकरिष्य-इतिकृत्वाचार्यं चतुरोऋत्विजांश्चगंधादिभिर्वृत्वास्वस्तिवाचयेत्।। अत्रस्वस्तिवाचनान्ते प्रजापतिः प्रीयतामित्यूहः कार्यः।। ततः स्थंडिले

पंचभूसंस्कारपूर्वकंवरदनामानग्निंसंस्थाप्यततपुरतः पीठेपट्टादौवा–
शुक्लतंदुलैरष्टदलंविरच्यतत्रमहीद्यौरित्यादिकलशस्थापन–
विधिनावस्त्रयुग्मवेष्टितंकलशंसंस्थाप्यतदुपरि माषमिताहैमींकृताग्न्युत्ता–
रणप्राणप्रतिष्ठांश्रीमूर्तिंसंस्थाप्यश्रीसूक्तविधिनार्चयेत्।। ।। तद्यथा।।
।। ॐ हिरण्यवर्णांहरिणींसुवर्णरजतस्त्रजां।। चंद्रांहिरण्मयींलक्ष्मींजातवेदो–
ममावह।। ॐश्रीयैनमः आवाहनंसमर्पयामि।। ॐ तांमआवह–
जातवेदोलक्ष्मीमनपगामिनीं।। यस्यांहिरण्यं विंदेयंगामश्वंपुरुषानहं।।
श्रीयै० आसन०।। ॐ अश्वपूर्णांरथमध्यांहस्तिनादप्रमोदिनीं।।
श्रियंदेवीमुपह्वयेश्रीर्मादेवीर्जुषतां।। श्रीयै० पाद्यं०।। ॐ कांसो–
स्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतीं।। पद्मेस्थितांपद्मवर्णां–
तामिहोपह्वयेश्रियं।। श्रीयै० अर्घ्यं०।। चंद्रांप्रभासांयशसाज्वलंतीं–
श्रियंलोकेदेवजुष्टामुदारां।। तांपद्मनेमींशरणमहंप्रपद्येअलक्ष्मीर्मे–
नश्यतांत्वांवृणोमि।। श्रीयै० आचमनं०।। ततः पयः पृथिव्यामित्यादि–
पंचामृतस्नपनमंत्रैः पंचामृतैः स्नपयेत्।। ॐ आदित्यवर्णेतपसो–
धिजातोवनस्पतिस्तववृक्षोथबिल्वः।। तस्यफलानितपसानुदंतुमायां–
तरायाश्चबाह्याअलक्ष्मीः।। श्रीयै० स्नानं०।। स्नानांतेआचमनं।।
ॐ उपैतुमांदेवसखः कीर्तिश्चमणिनासह।। प्रादुर्भूतोसुराष्ट्रेस्मिन्–
कीर्तिंवृद्धिंददातुमे।। श्रीयै० वस्त्रं०।। वस्त्रांतेआचमनं।। ॐ
क्षुत्पिपासामलाज्येष्ठाअलक्ष्मीर्नाशयाम्यहं।। अभूतिमसमृद्धिं–
चसर्वांनिर्णुदमेगृहात्।। श्रीयै० अलंकारान्स०।। ॐ गंधद्वारांदुरा–
धर्षांनित्यपुष्टांकरीषिणीं।। ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं।। श्रीयै०
गंध०।। ॐ मनसः काममाकूतिंवाचः सत्यमशीमहि।। पशूनां
रूपमन्यस्यमयिश्रीश्रयतांयशः।। श्रीयै०षुष्पं०।। अहिरिवभोगैरिति–
सौभाग्यद्रव्यं।। ॐ कर्दमेनप्रजाभूतामयिसंभ्रमकर्दम।। श्रियंवासय
मे कुलेमातरंपद्ममालिनीं।। श्रीयै० धूपं०।। ॐ आपः स्त्रजंतुस्निग्धा–
निचिक्लीतवसमेगृहे।। नीचदेवींमातरंश्रियंवासयमेकुले।। श्रीयै०

दीपं०।। ॐ आ॒र्द्रांपु॒ष्करि॑णीं पु॒ष्टीं सु॒वर्णां॑हेम॒मालि॑नीं।। सू॒र्यांहिर॑मयींल॒क्ष्मीं। जा॒तवे॑दोम॒मावह।। श्रीयै० नैवेद्यं०।। नैवेद्यान्ते-आचमनं०।। याः फलिरितिफलं०।। हिरण्यगर्भे हिरण्यं०।। ॐ आ॒द्रांय॒ःकरि॑णींय॒ष्टींपि॒ंगलांप॑द्म॒मालि॑नीं।। चं॒द्रा-हिर॑ण्मयींल॒क्ष्मींजा॒तवे॑दोम॒मावह।। श्रीयै० नमस्कारान्स०।। ॐ तांम॒आवहजातवेदोलक्ष्मीर्मलंपगा॒मिनीं।। यस्यां॒हिर॑ण्यं॒प्रभू॑तिं॒-गावोंदा॒स्योश्वान्वि॒देयंपुरु॑षा॒नहं।। श्रीयै० प्रदक्षिणां०।। ॐ श्रियेजातः श्रि॒यआनिरि॑याय॒श्रियं॒वयोंजरि॒तृभ्योंदधाति।। श्रियं॒वसा॑नाअमृ॒त॒त्व-मा॑य॒न्भवंतिस॒त्यास॑मिधामि॒तद्रौ।। श्रीयै० नीराजनं०।। श्रीश्चतेति-पुष्पांजलिं।। अनयापूजयाभगवतीश्रीः प्रीयतांनमम।। ततोब्रह्मासनादि-पात्रासादनांतेपायसचरुंश्रपयित्वाग्निपर्युक्षणांतंकृत्वास्रुवेणाज्य-मादाय।। ॐ प्रजापतयेस्वा०।। ॐ इन्द्रायस्वा०।। इदमिन्द्राय०।। ॐ अग्नये०।। इदमग्नये०।। ॐ सोमाय०।। इदंसोमाय०।। ततोपायसचरुमभिघार्यपंचदशऋचात्मकश्रीसूक्तेनप्रत्यृचंपाय-संजुहुयात्।। ततोग्नयेस्विष्टकृतेस्वाहेतिहुत्वाज्येनभूराद्यानवाहु-तयोहोतव्याः।। ततः संस्त्रवप्राशनादि होमशेषसमापनांतेपूर्वोक्त-प्रकारेणगांवातन्निष्क्रयभूतं द्रव्यंदद्यात्।। ततोश्रीमूर्तिमुद्वास्यतत्क-लशोदकेनस्वस्तिवाचनकलशोदकेनचपंचेन्द्राद्यभिषेकमंत्रैर्यजमान-मभिषिंचेत्।। ततोयजमानः आचार्यं संपूज्यतस्मैश्रीप्रतिमांयथाशक्ति-दक्षिणांचदत्वाऋत्विजान्संपूज्यतेभ्यश्चयथा शक्तिदक्षिणांदत्वातैरा-शिषोगृहीत्वाब्राह्मणभोजनंसकल्प्याग्निविसृज्यकर्मेश्वरार्पणंकुर्यादिति।। ।। इतिश्रीशांतिप्रयोगः।। ।। विवाहहोमकालेयदिकन्याऋतुमतिचेत्तत्र-प्रायश्चित्तहोमप्रयोगः।। ।। सुस्नाताकन्यायथोक्तासनेउपविश्यदेशकालौ स्मृत्वाममवैवाहिकहोममध्येप्राप्तऋतूत्पन्नैनोनिबर्हणपूर्वक प्राप्तकर्मकरणयोग्यतासिध्यर्थंजुंजानाख्यंहवनंगोदानंपयः पानं-चकरिष्ये।। तत्रनिर्विघ्नतासिध्यर्थंयथालाभोपचारैर्गणपतिपूजनं-

करिष्यइतिकृत्वाहोमार्थं स्थंडिलंकृत्वातत्रपंचभूसंस्कारपूर्वक-
विट्नामानमग्निंसंस्थाप्यब्रह्मासनाद्याघारावाज्यभागांतेजुंजानः
प्रथममित्यनेनमंत्रावृत्त्याज्येनाष्टोत्तरशताहुतिं जुहुयात्। ॐ युञ्जानः
प्रथमंमनस्तत्त्वायसविताधियः।। अग्निर्ज्योतिर्निचाय्यपृथिव्याऽ-
अध्याभरत्स्वाहा।। इदंसवित्रेनमम।। ततोभूराद्यास्विष्टकृदंताहुतयः।।
ततः संस्रवप्राशनादिहोमशेषंसमाप्यपूर्वोक्तविविधिनागामथवात-
न्निष्क्रयंवादद्यात्।। तत्रेत्थंसंकल्पः।। इमांयथाशक्तयलंकृतांप-
यस्विनींगांअथवागोनिष्क्रयीभूतंनिष्कंतदर्धंतदर्धंरजतद्रव्यंवा-
ऋतुजनितदोषनिबर्हणपूर्वकप्राप्तकर्माधिकारार्थममुकगोत्रायामुक-
शर्मणेब्राह्मणायतुभ्यमहंसंप्रददे।। गोदानसांगतासिध्यर्थमिमांदक्षिणां
तुभ्यमहंसप्रददे।। ततोपयः पानंकृत्वाग्निंविसृज्यआचार्यायक्षिणां-
दत्वाशिषो गृह्णीयात्।। इतऊर्ध्वंरजोनिवृत्तयंतपयः पानमिति।।
इतिजुंजानहोमप्रयोगः।। ।। अथबृहस्पतिशांतिमाह।। ।। शौनकः।।
कन्यकोद्वाहकालेतुआनुकूल्यंनविद्यते।। ब्राह्मणस्योपनयनेगुरोर्वि-
धिरुदाहृतः।। सुवर्णेनगुरुंकृत्वापीतवस्त्रेण वेष्टयेत्।। ईशान्यांधवलं-
कुंभंधान्योपरिनिधायच।। दमनं मधुपुष्पंचपलाशंचैवसर्षपान्।।
मांसीगुडूच्यपामार्गविडंगीशंखिनीवचा।। सहदेवीहरिक्रांता सर्वोषधि-
शतावरी।। कुंभेनिक्षिपेदितिशेषः।। कृत्वाज्यभागपर्यंतंस्वशाखोक्त
विधानतः।। ग्रहोक्तमंडलेभ्यर्च्यपीतपुष्पाक्षतादिभिः।। देवपूजोत्तरे-
कालेततः कुंभानुमंत्रणम्।। अश्वत्थसमिधश्चाज्यंपायसंसर्पिषायुतं।।
यवव्रीहितिलाः साज्यामंत्रेणैवबृहस्पतेः।। अष्टोत्तरशतंसर्वंहोम-
शेषंसमापयेत्।। पुत्रदारसमेत स्यअभिषेकंसमाचरेत्।। कुंभाभि-
मंत्रणोक्तैश्चसमुद्रज्येष्ठमंत्रतः।। प्रतिमाकुंभ वस्त्रंचआचार्यायनिवेदयेत्।।
ब्राह्मणान्भोजयेत्पश्चाच्छुभदः स्यान्नसंशयइति।। अथप्रयोगः।। ।।
उपनयात्पूर्वंविवाहाद्वाचंद्रतारानुकूल्येशुभदिवसेप्रातः कृतनित्यक्रियः
सपत्नीकोयजमानः शुभासनेउपविश्याचम्यप्राणानायम्यदेशकालौ-

स्मृत्वाममास्यकुमारस्योपनयने अस्याः कन्यायाः विवाहेवाबृहस्प-
त्यानुकूल्यसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंबृहस्पतिशांतिंकरिष्ये।। तत्रादौ
निर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंतदंगत्वेनस्वस्तिपुण्याहवाचनं-
मातृकापूजनंवसोर्द्धारायुष्यजपंनादीश्राद्धमाचार्यादिऋत्विग्वरणंचकरिष्ये।।
अत्रस्वस्तिवाचनान्ते प्रजापति प्रीयतामित्यूहः।। यजमानवृताचार्यः
गौरसर्षपान्गृहीत्वारक्षोघ्नमन्त्रैर्यदत्रसंस्थितममितिचभूतान्युत्सार्य-
पंचगव्येनभूमिंसंप्रोक्ष्यतत्रहोमार्थंस्थंडिलं विरच्यतदीशान्यांबृहस्पति-
स्थापनार्थंपीततंदुलाष्टदलंविरचयेत्।। ततस्तत्रमही द्यौरित्यादिकलश-
स्थापनविधिना कलशेपंचपल्लवनिक्षेपणांतेगायत्र्यादिमन्त्रैः
पंचगव्यंदेवस्यत्वेतिकुशोदकमथवापूर्वसाधितंपंचगव्यंनिक्षिप्युवासुवासा
इतिपीतवस्त्रेणसंवेष्ट्यपरिवाजपतिरितिपंचरत्नाप्रनिक्षिप्ययाओष-
धीरितिसर्वौषधीः यूथिकामधुपुष्पंपलाशंसर्षपान्जटामांसींगडूचीं-
अपामार्गंविडंगंशंखिनीं वचांसहदेवींविष्णुक्रांतांशतावरींचकुंभेनिक्षिप्य-
ततश्चंदनादिनाकुंभमभ्यर्च्य पूर्णादर्वीतियथाविभवंसौवर्णादिपूर्णपात्रं-
निधायतत्रहरिताक्षतनिर्मितदीर्घचतुरस्रपीठेकर्षतदर्धादिपरिमित-
हेम्नायथाशक्तिनिर्मितांकृताग्न्युत्तारणप्राणप्रतिष्ठा बृहस्पति
प्रतिमांस्थापयित्वास्थंडिलेपंचभूसंस्कारपूर्वकंवरदनामाग्निंसंस्थाप्यान्वा-
दध्यात्।। तत्र प्रजापतिमिन्द्रमग्निंसोममेताआज्येनैकैकयाहुत्या।।
अत्रप्रधानं।। बृहस्पतिमष्टोत्तरशतसंख्याभिरश्वत्थसमिद्भिस्तावतिभिराज्या-
हुतीभिस्तावतीभिः सर्पिर्मिश्रपायसाहुतिभिस्तावतीभिः साज्ययवव्रीहि
तिलाहुतिभिश्चशेषेणस्विष्टकृतमग्निंवायुंसूर्यमग्नीवरुणावग्नीवरुणा
वग्निवरुणंसवितारंविष्णुंविश्वान्देवान्मरुतः स्वर्कान्वरुणमादित्यमदितिं-
प्रजापतिमेताअंगप्रधानार्थदेवताआज्येनैकैकयाहुत्यास्मिन्बृहस्पति-
शान्त्याख्ये कर्मण्यहंयक्ष्ये।। ततोदक्षिणतोब्रह्मासनादिपात्रासादनंयथार्थवत्।।
तत्रविशेषः।। चरुश्रपणार्थंक्षीरं।। अष्टोत्तरशताश्वत्थसमिधः।। मिश्रीकृत
यवव्रीहितिलाश्च।। अन्यत्सर्वंप्रकृतिवदासाद्यपवित्रेकृत्वासादितपात्राणि

हवनीयद्रव्यंचसंप्रोक्ष्यपायसचरुमधिश्रित्यकुंभोपरिस्थापितप्रतिमाया-
मावाहनादिषोडशोपचारैर्बृहस्पतिंपूजयेत्।। तत्रविशेषः।। पीतवस्त्रा-
युग्मंपीतंयज्ञोपवीतंपीतंचंदनंपीताक्षतान्।। चंपकादिपीतपुष्पं।।
बिल्वमज्जाधूपः।। घृतदीपः।। दध्योदनंनैवेद्यं।। दक्षिणायांपुष्परागो-
माणिक्यंयथा शक्तिहेमंवा।। पूजांतेऽब्लिगकैर्मंत्रैः पुनन्तुमेतिनवभिश्च-
कुंभानुमंत्रणा।। ततआज्यभागान्तंकृत्वाबृहस्पतिमन्त्रेणदधिमध्व-
क्ताअष्टोत्तरशतमश्वत्थसिधोजुहुयात्तावतीराज्याहुतीः सर्पिर्मिश्रपाय-
साहुतीः साज्ययवव्रीहितिलाहुतीश्च।। ततः स्विष्टकृदादिप्रणीता-
विमोकान्तंकुर्यात्।। ततोयजमानः पूर्वोक्तैर्गंधादिभिः फल-
ताबूलांतैर्बृहस्पतिंसंपूज्यनमस्कुर्यात्।। ततस्ताम्रपात्रेशुद्धोदकं
प्रक्षिप्यतत्रपीतानिगंधाक्षतपुष्पाणिफलंचप्रक्षिप्याघ्र्यंदद्यात्।। तत्रमंत्रः।।
गंभीरदृढरूपांगदेवेज्यसुमतेप्रभो।। नमस्तेवाक्पतेशांतगृहाणाघ्र्यंबृहस्पत
इति।। ततोयजमानोबृहस्पतयेकृतकर्मार्पणंकुर्यात्।। भक्त्यायत्तेसुराचार्य
होमपूजादियत्कृतम्।। तत्त्वंगृहाणशांत्यर्थंबृहस्पतेनमोनमइति।। ततः
प्रार्थयेत्।। जीवोबृहस्पतिः सूरिराचार्योगुरुरंगिराः।। वाचस्पतिर्देवमंत्री
शुभंकुर्यात्सदाममेति।। ततोविसर्जनंकृत्वाचार्यंप्रणम्यसर्वोपचारसं-
युक्तांसदक्षिणामिमांप्रतिमांतुभ्यमहंसप्रददइतिप्रतिमांदद्यात्।।
अभिषेकोत्तरंवाप्रतिमादानं।। कुंभोदकेनाचार्यः पुत्रदारसमेतंयजमानम-
भिषिंचेत्।। तत्रमंत्राः।। ॐ आपो हि०।। योवंःशि०।। तस्माऽअरङ्ग०।।
अपोऽअस्मा०।। इदमापु०।। इमम्मे०।। तत्वांयामि०।। त्वन्नोऽअग्ने०
सत्वन्नोऽअग्ने०।। उदुत्तमंवरुण०।। पुनन्तुमा०।। पवित्रेण०।। यत्तेपवित्रं०।।
पवमानः।। उभाभ्यान्दे०।। व्वैश्वदेवी०। द्यौः शान्तिर०।। इत्यभिषेकः।।
ततआचार्यादिऋत्विजान्संपूज्यतेभ्योयथाशक्तिदक्षिणांदत्वातैराशिषो-
गृहीत्वाब्राह्मणभोजनंसंकल्प्याग्निविसृज्यकर्मेश्वरार्पणंकुर्यादिति।। ।।
इतिबृहस्पति शांतिप्रयोगः।। ।। यथोक्तचंद्रताराद्यभावेदानानि।। ।।
धर्मसिंधौ।। चंद्रेचशंखं लवणंचतारेतिथौविरुद्धेष्वथतंडुलांश्च।।

धान्यंचन्दद्यात्करणेचवारेयोगेविरुद्धेकनकंचदेयमिति।। अथवा-
ग्दानप्रयोगः।। ।।ज्योतिःशास्त्रोक्तविवाहनक्षत्रुयतसुदिनेसुमुहूर्ते प्रशस्तवेषो-
वरस्यपित्रादिर्गंधादिपूजोपकरणंयुग्मवस्त्रभूषणानिचगृहीत्वाप्रशस्तवेषैर्बां-
धवसुहृद्भिर्द्विचतुरादियुग्मब्राह्मणैः प्रशस्तवेषाभिस्तावतीभिः पुरंध्रीभिर्मंगल
गीततूर्यैश्चसशुभशकुनदर्शनपूर्वकंकन्यागृहंगत्वातत्रासनेप्रत्यङ्मुखउपविशेत्।।
ततः कश्चिद्वृद्धः कन्यापित्रादीन्प्रतिब्रूयात्।। अस्यपुत्रोवरोस्तितदर्थंभव-
त्कन्यां याचितुंसुहृद्भिः सहायमागतः।। भवद्भिः स्वीयैः सहविचार्य-
कन्यापूजनार्थमनुज्ञैतेभ्योदेयेति।। ततः कन्यापिता मान्यजनाज्ञां-
गृहीत्वाऽनुज्ञांदद्यात्।। ततः कन्यायाः पुरोहितादिर्देवींवाचमित्या-
नयनपूर्वकंचतुरस्त्रपीठेशुद्धवस्त्रावृतेतांप्राङ्मुखीमुपवेशयेत्।। कन्योत्त-
रतस्तत्पित्रादिरुपविशेत्।। वरपितातुकन्यादक्षिणतउदङ्मुखउपविशेत्।
उभावाचम्यलक्ष्मीनारायणादिदेवान्प्रणम्यासुमुखश्चेत्यादिदेश-
कालकीर्तनांतेवरपिताकन्यानिरीक्षणपूर्वकतत्पूजनमहंकरिष्ये।।
तत्रादौनिर्विघ्नतासिद्ध्यर्थंकलशेवरुणपूजनपूर्वकगणपतिपूजनं
करिष्येइतिसंकल्प्य।। कन्यापिताकरिष्यमाणकन्यादानाङ्गवाग्दानं-
करिष्ये।। तत्रादौनिर्विघ्नता सिद्ध्यर्थंकलशेवरुणपूजनपूर्वकगणपति-
पूजनंकरिष्येइति संकल्प्य।। उभौवरुणपूजनपूर्वकगणपतिपूजनं-
कुरुतः।। ततोवरपित्रादिः कन्यायाअंजलिंसकुंकुमचंदनेनानुलिप्य-
मान्येभ्योदर्शयेत्।। सर्वेमहालक्ष्मीरितिब्रूयुः।। ततोवरपिताचंदन-
कुंकुमाक्षतपुष्पमालादिभिः कन्यांपूजयित्वा युवासुवासाइतिवस्त्राणि-
अलङ्करणमसीतिभूषणानितस्यैदत्वाकन्याहस्तद्वयांजला वश्वत्थेवेतितां-
बूलदलंहिरण्यगर्भेतिहिरण्यंयाः फलिनीरितिफलार्पणंकुर्यात्।। ततः
स्वपक्षीयसुवासिन्यासुभगाभवेत्युच्चारणपूर्वकंकन्योपर्यक्षतप्रक्षेपणं
कार्यमिति।। ततः कन्यापितावरपितरंप्राङ्मुखमुपविश्यस्वयंउदङ्मुख
उपविशेत्।। ततोवरपितरंगधादिभिः पूजयेत्।। तथावरपिताकन्यापितरं
पूजयेत्।। आचारादुभौ परस्परमालिंगनंकुरुतः। ततः कन्यापितेत्थंकन्या-

यावाग्दानंकुर्यात्।। हरिद्राखंडयुतदृढपंचपूगिफलानिगंधाक्षतकुंकुमालंकृता-
न्यादाय। अमुकप्रवरान्वितः अमुकगोत्रोत्पन्नः अमुकशर्माअहं।।
अमुकप्रवरान्वितायामुकगोत्रोत्यपन्नायामुकशर्मणः प्रपौत्राय।
अमु०पौत्राय।। अमु० पुत्राय।। अमु० अमुकशर्मणेश्रीधररूपिणे-
कन्यार्थिने।। अमुकप्रवरान्विताममुकगोत्रोत्पन्नाममुकशर्मणः प्रपौत्रीं।।
अमु० पौत्रीं।। अमु० ममपुत्रीं।। अमुकनाम्नीमिमांश्रीरूपिणीं-
वरार्थिनींकन्यांज्योतिर्विदादिष्टेसुमुहूर्तेदास्येइत्यु क्त्वा।।
देवाश्चमुनयोविप्राः साक्षिणः सर्वदेवताः।। मदीयासाक्षरीवाचा-
निश्चयोयंमहाजनाः।। अव्यंगेऽपतितेऽक्लीबेदशदोषविवर्जिते।।
इमांकन्यांप्रदास्यामिदेवाग्निगुरुसन्निधौ।। युष्मद्वराययोग्यायमण्ड-
पायतनेमम।। अत्रपूगप्रदानेन लग्नेकन्याभविष्यति।। वाचा
दत्तामयाकन्यावरार्थेस्वीकृतात्वया।। कन्यावलोकनविधौनिश्चित-
स्त्वंसुखीभवेत्यन्तमुच्चार्यवरपितुर्वस्त्रप्रांतेबध्वाग्रंथिंचंदनलिप्तंकुर्यात्।।
एवंवरस्यपित्रादिःपंचपूगीफलानि पूर्ववादाय।। अमुकप्रवरान्वितामुक-
गोत्रोत्पन्नामुकवरविषयेभवंतोनिश्चिताभवंत्वित्युक्त्वा।। अस्म-
द्वराययोग्यायमंडपायतनेतव।। अत्रपूगप्रदानेनलग्नेवरोभविष्यति।। वाचा
दत्तात्वयाकन्यापुत्रार्थेस्वीकृतामया।। वरावलोकनविधौनिश्चितस्त्वं-
सुखीभवेत्यं तमुच्चार्यकन्यापित्रादेर्वस्त्रप्रांतेपूर्ववत्बध्नीयात्।।
ततोब्राह्मणाः कन्याशिरस्यक्षतप्रक्षेपणपूर्वकाशीर्मंत्रान्पठेयुः।।
पितामहकर्तृकेवाग्दाने ममपौत्रीमितिपाठः।। भ्रात्रादिकर्तृकेतु
ममेतिनैवपाठः।। एवंवरविषयेपिपौत्रार्थंभ्रात्रर्थंशिष्यार्थमिति-
यथार्थमूहः कार्यः।। ।। इति वाग्दानप्रयोगः।। ततः कन्यापिता-
पात्रस्थसिततंडुलपुंजेइन्द्रन्दैवीरितिमंत्रेणशचीमावाह्यानेनमंत्रेण
वानामंत्रेणासनादिपुष्पांजल्यन्तैरुपचारैः पूजयित्वाततप्रार्थनंकुमार्या
कार्यं।। देवेन्द्राणिनमस्तुभ्यंदेवेन्द्रप्रियभामिनि।। विवाहं भाग्य-
मारोग्यंपुत्रलाभंचदेहिमेइति।। ततः पुरंधीभिर्नीराजनादिमांगलिकं-

कार्यं।। विप्राश्चगंधतांबूलादि पूजिताआशीर्मंत्रान्पठेयुः।। ॐ श्रीश्चंते०।। दक्षिणतउहैकऽउपदधतितदेताः पुण्यालक्ष्मीर्दक्षिणतोर्द-ध्महऽइतितस्माद्यस्यदक्षिणतोलक्ष्मभवतितंपुण्यलक्ष्मीकइत्या-चक्षतऽउत्तरतस्त्रियान्उत्तरतऽआग्तनाहिस्त्रीतत्तत्कृतमेवपुरस्तात्त्वेवैनाउ-पदध्यादत्राहैवशिरस्तदेवहनूतज्जिह्वाथैताः पुण्यालक्ष्मीर्मुखतोधत्ते-तस्माद्यस्यमुखेलक्ष्मभवतितंपुण्यलक्ष्मीकइत्याचाक्षते।। कुलायिनीघृतवतीपुरन्धिःस्योनेसीदसदनेपृथिव्याः।। अभित्वारुद्रा-वसवोगृणन्त्विमाब्रह्मपीपिहिसौभगायाश्विनाध्वर्यूसादयतामिहत्वा।। कुलायिनीघृतवतीपुरंधिरितिकुलायमिववैद्वितीयाचितिः स्योनेसीद-सदनेपृथिव्याऽइतिपृथिवीवैप्रथमाचितिस्तस्यैशिवेस्योनेसीदसदनऽ-इत्येतदभित्वारुद्राव्वसवोगृणंत्वित्येतास्त्वादेवताऽअभिगृणंत्वि-त्येतदिमाब्रह्मपीपिहिसौभागायेतीमाब्रह्मरवसौभगायेतदश्विनाध्वर्यू-रादयतामिहत्वेत्यश्विनौह्यध्वर्यूऽउपाधत्तां।। इत्याशीर्वादमंत्राः।।

।। इतिवाग्दानप्रयोगः।। ।। अथकन्यागृहेपित्रोर्भोजननिषेधः। ।।

मदनरत्नेभविष्ये।। अप्रजायांतुकन्यायांनभुंजीतकदाचन।। दौहित्रस्य मुखंदृष्ट्वाकमर्थमनुशोचतीति।। अपरार्केआदित्यपुराणे।। विष्णुं-जामातरंमत्वातस्य कोपंनकारयेत्।। अप्रजायांतुकन्यायांनाश्नी-यात्तस्यवैगृहे।। ब्रह्मदेयांनवैकन्यादत्वाश्नीयात्कदाचन।। अथभुञ्जीत-मोहाच्चेत्पूयाशेनरकेवसेदिति।। अथतैलहरिद्रारोपणं।। तच्चविवा-हात्पूर्वंत्र्यंगांकवर्जितान्यतमविवाहनक्षत्रादियुतशुभदिवसेसुमुहूर्त्ते-वधूवरयोस्तैलहरिद्रारोपणंगणेशपूजनपूर्वकंयथाचारंकार्यं।। ।।

इतितैलहरिद्रारोपणं।। ।। अथविवाह पूर्वदिनकृत्यं।। ।।

तत्रस्वेस्वेगृहेपूर्वाह्णेकन्यापितावरपिताचपत्न्यासंस्कार्येण चसहकृताऽ-भ्यंगस्नानोऽधृताहतवासोधृतमांगलिकवेषः शुभासनेप्राङ्मुख-उपविश्यस्वदक्षिणतः पत्नींतद्दक्षिणेसंस्कार्यंचोपवेश्याचम्य-प्राणानायम्येष्टदेवतागुर्वादीन्नत्वासुमुखश्चेत्यादिपठित्वादेशकालौ-

संकीर्त्यममास्यपुत्रस्य दैवपित्र्यऋणापाकरणहेतुधर्मप्रजोत्पादन सिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंश्वोविवाहाख्यंसंस्कारकर्मकरिष्ये।। कन्यापितातुदेशकालसंकीर्तनांते।। कन्यायाः जातकर्मादिसंस्कार-लोपश्चेत्तदाममास्याः कन्यायाजातकर्मनामकर्मनिष्क्रमणान्नप्राशनचौल-संस्काराणांबुद्धिपूर्वकलोपजन्यप्रत्यवायपरिहारार्थंप्रति संस्कारमर्ध-कृच्छ्रंचूडायाः कृच्छ्रंतत्प्रत्याम्नायगोनिष्क्रयीभूतयथाशक्तिरजत-द्रव्यदानमहमाचरिष्ये।। तेनास्याः कन्यायाजातकर्मादिचौलां-तसंस्कारसिद्धिरस्तु।। गर्भाधानसीमंतयोर्लोपेतयोरप्यूहः कार्यः।। इतिकृत्वा।। ।। पुनर्देशकालौसंकीर्त्यममास्याः कन्यायाः भर्त्रासहधर्म-प्रजोत्पादनगृह्यपरिग्रहधर्माचरणेष्वधिकारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थं श्वोविवाहाख्यसंस्कारकर्मकरिष्ये।। ततउभावप्यद्यनिर्विघ्नतासिध्यर्थं-गणपतिपूजनंतदंगत्वेनस्वस्ति पुण्याहवाचनमविघ्नपूजनंमंडपस्थापनं-मातृकापूजनंवसोर्द्धाराकरणायुष्यमंत्रजपंनान्दीश्राद्धंचाहंकरिष्ये।। अत्रवाचनांतेप्रजापतिः प्रीयतामित्यूहः।। इतिकृत्वोभावपिकरिष्यमाण-विवाहाख्यकर्मणिग्रहानुकूल्यसिद्धिद्वाराश्रीपरेश्वर प्रीत्यर्थंग्रहयज्ञं-करिष्येइतिसंकल्प्यग्रहयज्ञकरणान्तमुभयोः समानं।। गणपति-पूजनादिग्रहज्ञांतंकर्मविवाहात्पूर्वदिनेकरणाशक्तौविवाहदिनेवाकार्य-मिति।। इतिविवाहपूर्वदिनकृत्यं।। ।। घटीयंत्रप्रकारस्तत्स्थापनमाह।। नारदः।। षंडगुमितोत्सेधंद्वादशांगुलमायतं।। कुर्यात्पातालवत्ताम्र-पात्रंतद्दशभिः पलैः।। ताम्रपात्रेजलैः पूर्णेमृत्पात्रेवाथवाशुभे।। मंडला-र्धोदयंवीक्ष्यरवेस्तत्रविनक्षिपेदिति।। श्रीमद्भागवते।। द्वादशार्द्धपलो-न्मानंचतुर्भिश्चतुरंगुलैः।। स्वर्णमाषैः कृतच्छिद्रंयावत्प्रस्थजलप्लुत-मिति।। अस्यार्थः।। अशीतिगुंजात्मकः कर्षः।। अस्यैवसुवर्णसंज्ञा।। कर्षचतुष्टयंपलं।। तथाचषट्पलताम्रविरचितंपात्रंविंशतिगुंजोन्मित-सुवर्णनिर्मितचतुरंगुलदीर्घशलाकयामूलेकृतछिद्रंकुर्यात्।। तेनछिद्रेण-यावत्प्रस्थपरिमितंजलंप्रविशतितेनचप्रस्थजलपूरणेनतत्पात्रं

जलेमग्नंभवतितत्पात्रंघटीकालप्रमाणं।। केचित् षष्टिसंख्याकगुरु-वर्णोच्चारे पलसंज्ञः कालः।। षष्टिपलकालोनाडिकेत्याहुः।। एवंप्रमाणीकृतंघटीयंत्रंसूर्यमंडलस्यार्धोदयेऽर्धास्तेवागणेशपूजन-पूर्वकंजलपूर्णेताम्रपात्रेमृत्पात्रेवास्थापयेत्।। तत्रमंत्रः।। मुख्यंत्वम-सियंत्राणांब्रह्मणानिर्मितंपुरा।। भवभावायदं पत्योः कालसाधनकारणं।। ।। उपनयनेतुभवभावायबटवेतिपाठः।। एवं स्थापिताघटीआग्नेय-याम्यनैर्ऋतवायव्यदिग्गतानशुभा।। मध्यस्थितान्यदिग्गताच शुभा।। एवमाग्नेयादिपंचदिक्षुपूर्णानशुभेति।। अथगौरीहरपूजाविधिः।। संग्रहे।। लग्नाहेमातृकाः पूज्याः पूज्यागौरीहरान्विता।। पीठेवातदला-भेतुसहस्रतंडुलान्वितं।। पंकजंकारयित्वातुतत्रगौरीहरौयजेत्।। कलशैः कलशैः कार्यापिधानोत्तरश्रेणिका।। दिशांचतुर्षुकोणेषु-स्थापयेत्तंडुलोपरि।। प्रतिमांपलहेम्नातुकुर्याद्गौरीहरौयतः।। यतः यस्यांप्रतिमाया उभौमीलितावित्याशयः।। पलद्वयेनरौप्येणकुर्यान्नं-दिनमग्रतः।। अशक्तस्तुतदर्धेनपादेनशक्तितोथवा।। अलाभेकुंकुमाद्यै-स्तुलेखयित्वाप्रपूजयेत्।। ध्यात्वामंत्रेणदेवौद्वौभक्त्यासंपूजयेत्सुधी-रिति।। ध्यानमंत्रस्तत्रैव।। सिंहासनस्थांदेवेशींसर्वालंकारसंयुताम्।। पीतांबरधरंदेवंरुद्रंचंद्रार्धशेखरं।। करेणाधः सुधापूर्णंकलशंदक्षिणेनतु।। वरदंचाभयंवामेनाश्लिष्यचतनुप्रियाम्।। एवंध्यात्वापूज्यगौरींपुण्य-भाजस्तथास्त्रियः।। कन्यांसमुद्वहेत्पश्चादिति।। पूजामंत्रस्तत्रैव।। गौरीहरमहेशानसर्वमंगलदायक।। पूजांगृहाणदेवेशसर्वदामंगलं-कुर्विति।। कन्यादेहप्रमाणेनसप्तविंशतितंतुभिः।। वर्तिकांदीपये-त्पश्चाद्व्रतसंपत्तिहेतवे।। भोजनीयाब्राह्मणश्चासुवासिन्यः सुपूजिताः।। दशाष्टपंच युग्मंवाहिरण्येनाथतोषयेदिति।। तथा।। व्रतांतेमंडपे-स्थाप्यमंचकंसोपधानकं।। चतुष्कोणेषुमंचस्यथाप्याभांडा-प्रभाततइति।। अतोलग्नदिनेकन्यापितोक्तगौरीहरमूर्तिकात्यायनी-महालक्ष्मीशचीप्रतिमाभिः सहाग्न्युत्तारणेनसंस्कृत्य।। कोणचतुष्टय-

स्थापितकलशश्रेणीनाम्मध्येउपलाद्युक्तदृषदिसूत्रितायांपीठे-
वस्त्रेवातंडुलैः पंकजंकारयित्वातत्रगौरीहरौउक्तध्यानपूर्वकमुक्त-
मंत्रेणपूजयित्वाप्रतिमात्रयेदेवतात्रयंयथाविभवंसंपूज्यकन्यासह
प्रणमय्यदीपंप्रज्वालयित्वाब्राह्मणसुवासिनीश्चभोजयेद्दक्षिणां-
चदद्यादिति।। इतिगौरीहरपूजाविधिः।। अथसीमंतिकापूजनं।।
तत्रकन्यापित्रादिर्गंधाक्षतकुसुमवस्त्रोपवीतपूगनारिकेलपयोदधि-
शर्करादीनिपूजोपकरणानिगृहीत्वास्वजनबंधुवर्गैब्राह्मणैः परंध्री-
भिर्मंगलगीततूर्यैश्चसहशुभशकुनदर्शनपूर्वकंवरगृहं गत्वातत्रशुभासने-
प्राङ्मुखंवरमुपवेश्यान्यस्मिञ्छुभासनेपत्न्यासहस्वयमुदङ्मुख-
उपविश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यकरिष्यमाणकन्याविवाहां-
गत्वेनवरस्यसीमांतपूजनंकरिष्ये।। तत्रादौनिर्विघ्नतासिद्ध्यर्थंकलशे-
वरुणपूजनपूर्वकं गणपतिपूजनंकरिष्येइतिसंकल्प्यकलशेतत्त्वायामीति-
मंत्रेणवरुणंसंपूज्यकलशस्यमुखेविष्णुरित्यादिकलशमभिमंत्र्य-
तत्रब्रह्मांडोदरतीर्थानीतितीर्थान्यावाह्यत्वत्तोयेति संप्रार्थ्यतत्कलशो-
दकेनपूजासंभारान्संप्रोक्ष्यपूर्वोक्तवर्त्मनागणपतिंपूजयित्वावरपूजनं
कुर्यात्।। विरोजोदोहोसीतिपत्नीप्रक्षिप्तजलेनवरस्यपादप्रक्षालनं।।
ॐ विराजोदोहोसि विराजोदोहमशीयमयिपाद्यायैविराजोदोह इति।।
गंधसमर्पणं।। ॐसुचक्षाअ० भूयासमिति।। अक्षतसमर्पणं।। ॐ
अनाधृष्टा० रश्वाधृष्टा० रश्वासीति।। परिधास्याइत्यधरीयवस्त्र-
परिधानं।। ॐ परिधास्यैय० व्ययिष्येइति।। यशसामेत्युत्तरीयं।।
ॐयशसा० पद्यतामिति।। युवासुवासाइत्युष्णीषं।। ॐ युवासुवा०
देवयन्तइति।। याअहरदिति पुष्पमालाग्रहणं।। ॐ याअहर०
भगेनचेति।। यद्यसोप्सरसामितिपुष्पमाला धारणं।। ॐ यद्यशो०
यशोमयीति।। वसोः पवित्रमितितैलारोपणं।। ॐ वसोः प०
तैलारोपणंमस्तकेकर्तव्यं।। यज्ञोपवीतमितियज्ञोपवीतदानं।। ॐ
यज्ञोप० नह्यामीति।। वरहस्तद्वयांजलावश्वत्थेवेतितांबूलदलनिक्षेपणं।।

ॐ अश्वत्थे० पुरुषमिति।। हिरण्यर्भेतिहिरण्यं।। ॐ हिरण्य० विधेम।। ऋतवस्थेतिश्रीफलदानं।। ॐ ऋतवस्थ० यमाणाः।। ऋतवस्त्थेत्यृतवोह्येताऽऋतावृधऽइतिसत्यवृधऽइत्येतदृतुष्टास्त्थऽ-ऋतावृधऽत्यहोरात्राणि वाऽइष्टकाऽऋतुषुवाऽअहोरात्राणितिष्ठंति-घृतश्चुतोन्मधुश्चुतइतितदेनाघृतश्चुतश्चमधुश्चुतश्चकुरुते।। विराजो-नामेत्येतद्वैदेवाऽएताऽइष्टकानामभिरुपाह्वयतयथायथैनाऽएतदा-चक्षतेताऽएनानभ्युपावर्तंताथलोकंपृणाऽएवपराच्यस्तस्थुरहितनाम्न्यो निमेमिहत्यस्ताविराजोनामाकुर्वतताऽएनानभ्युपावर्तंततस्माद्दशदशेष्टकाऽ उपधायलोकंप्रेणयाभिमंत्रयतेतदेनाविराजः कुरुतेदशाक्षराहिविराट्-कामदुघाऽअक्षीयमाणाऽइतितदेनाः कामदुघाऽअक्षीयमाणाः कुरुते।। ततः सुमुहूर्तमस्त्वितिविप्रवचनपूर्वकवरहस्तेसन्मुखंश्रीफलं-निधाययथाचारंदध्यादिप्राशयेत्।। ततः कन्यामातादीपके-नवनीराजनंकुर्यात्।। अनेनयथाशक्तिवरसीमंतिकार्चनेनश्रीभगवान्-वासुदेवः प्रीतयाम्।। ब्राह्मणान्गंधादिभिः संपूज्यतेभ्योदक्षिणांदत्वा तेषामाशिषोगृहीत्वागणपतिंविसर्जयेत्। ।। इतिसीमंतिकार्चनं।। ।।

अथकन्या पूजनं।। ।। तत्रवरपिताकुंकुमाक्षतफलवस्त्रादीन्-गृहीत्वाकन्यागृहंगत्वातत्रशुभासने उपविश्यपूर्वोक्तविधिनागणेशं पूजयित्वाफलतांबूलवस्त्रादिभिर्यथाचारंकन्यांपूजयेत्।। ब्राह्मणाश्चपूर्व-वदाशिषोदद्युः।। पूर्वंवाग्दानमकृतंचेदत्रकर्तव्यं।। ।। इतिकन्यापूजनं।।

अथवरस्यवधूगृहगमनं।। ।। तत्रवरःकृतनित्यक्रियोविधिवत्कृत-स्वस्तिवाचनो ब्राह्मणैःसहसात्विकाहारंभुक्त्वापारिभाषिकोक्त-महतंवस्त्रयुगुलंधृत्वालंकृतः स्वेष्टदेवतांपित्रादींश्चनत्वातैरनुमोदितो-यथाविभवमश्वादियानमारुह्यधृतसितछत्रचामरः स्वर्चितैर्ज्ञातिबांधवैः स्वस्तिनइत्यादिसुमंगलसूक्तपठनपरैः ब्राह्मणैः पुरंध्रीभिर्वारिपूर्ण-कलशदर्पणकन्यापुष्पाक्षतदीपमालाध्वजलाजैर्मंगलतूर्यघोषैश्चसहव-धूगृहंगत्वातद्वारदेशेप्राङ्मुखस्थितो नीराजनवारि पूर्णकुंभयुतैः

पुरंध्रीजनैः प्रत्युद्यातोनीराजितोन्तर्गृहंमंडपंवाप्रविश्यतत्रसो-
त्तरच्छदेहरितदर्भास्तीर्णचतुष्पादपीठेप्राङ्मुखमुपविशेत्।। ।।
इतिवरस्यवधूगृहगमनं।। ।। अथमधुपर्कः।। ।। तत्रअर्घ्यानाह।।
।। पारस्करः।। आचार्यऋत्विक्वैवाह्यो राजाप्रियस्नातकइति।।
उपनयनपूर्वकंकृत्स्नवेदाध्यापयिताआचार्यः।। उपनीयतुयः शिष्यं-
वेदमध्यापयेद्विजः।। सांगंचसरहस्यंचतमाचार्यंप्रचक्षतइति-
स्मृत्युक्तेः।। योदक्षिणा परिक्रीतः कर्माणिकरोति सऋत्विक्।।
वृताः कुर्वन्तियेयज्ञमृत्विजोयाजकाश्चतेइत्युक्तेः।। वैवाह्यः
विवाहार्थमागतोवरः जामातापरपर्यायः।। राजाराज्याभिषेकादि-
गुणयुक्तोदंडपूर्वकप्रजापालनकर्ताक्षत्रियः।। प्रियोयइष्टः उत्कृष्टः
उत्कृष्टजातिस्समान जातिर्वा।। स्नातकः ब्रह्मचर्यात्समावृतः।।
तस्यचार्हणंतावदाचार्यकर्तृकं।। तंप्रतीतंस्वधर्मेणब्रह्मादायहरंपितुः।।
स्रग्विणंतल्पमासीनमर्चयत्प्रथमंगवेतिमनूक्तेः।। पूर्वसूत्रेषट्ग्रहणंप्रिय-
स्नातकयोः पृथक्त्वज्ञापनार्थं।। प्रतिसंवत्सरानर्हयेयुः।। प्रति-
संवत्सरंगृहेआचार्यादीनर्घेणार्चयेयुः।। नसंवत्सरादर्वाक्।। प्रति-
संवत्सरानर्हयेयुरित्यविशेषेणोक्तत्वादृत्विजोपिसंवत्सरांतेऽर्हयितव्या-
इतिप्राप्तेआह।। ।। यक्ष्माणास्त्वृत्विजइति।। ।। ऋत्विजस्तुयक्ष-
माणायागकालएवपूजनीयाः।। नततोन्यत्रनापिप्रतिसंवत्सरनियमः।।
अर्हणप्रकारमाह।। ।। आसनमाहार्याहसाधुभवानास्तामर्चयिष्योमो-
भवंतमित्याहरंतिविष्टरंपद्यंपादार्थमुदकमर्घमाचमनीयंमधुपर्कं दधि-
मधुघृतमपिहितँ्कांस्येकाँ्स्येनेति।। अर्घायासनंपीठाद्यासन-
माहरेतिप्रैषपूर्वकमनुचरद्वाराआनाय्यसाधुभवानित्यर्घयिताअर्घ्यं-
प्रतिवदति।। अर्घ्यंप्रत्यध्येषणमेतत्।। अत्रबहुवचनादर्घायितुः पुरुषाः
विष्टरादीन्याहरन्ति।। तत्रविष्टरस्तु पारिभाषिकोक्तोग्राह्यः।। [44]पद्यं।।
।। पादयोरधस्तान्निधानार्थमन्यद्विष्टरं।। पादार्थमुदकं।। पादप्रक्षाल-
नार्थंपात्रस्थमुष्णजलं।। अर्घंगंधपुष्पाक्षतकुशतिलशुभ्रसर्षपदधि-

दूर्वान्वितंसुवर्णादिपात्रस्थमुदकं।। आचमनीयं।। आचमनार्थं शुद्धपात्रसंगृहीतमुदकं।। मधुपर्कं।। पारिभाषिकोक्तपरिमितंदधि-मधुघृतंएकस्मिन्कांस्यपात्रेकृत्वातमपरेणकांस्यपात्रेणापिहितंमधु-पर्कशब्देनोच्यते।। एवंविष्टरादीन्यर्हणद्रव्यान्याहृत्यवरशाखयामधु-पर्कार्हणंकुर्यात्।। वरस्ययाभवेच्छाखातच्छाखागृह्यचोदितः।। मधुपर्कः प्रदातव्योह्यन्यशाखेपिदातरीतिगृह्यपरिशिष्टोक्तेः।। अत्रवरदातृशब्दोऋत्विगाद्युपलक्षणं।। अर्च्यशाखयामधुपर्कइति।। अर्च्यस्ययच्छाखीयंकर्मतच्छाखीयोमधुपर्कइतियाज्ञिकाः।। जयन्तंस्तु-वरणवत्सर्वत्रयजमानशाखयैवमधुपर्कइत्याह।। तत्तुनाद्रियंतेवृद्धाः। परिगतसंवत्सराअर्घ्याभवंतीत्युक्तंतदपवादमाह।। ।। यद्यप्य-सकृत्संवत्सरस्यसोमेनयजेतकृतार्घ्याएवैनंयाजयेयुर्नाकृतार्घ्या-इतिश्रुतेः।। यद्यपिसंवत्सरस्यमध्ये असकृत् पुनः पुनः सोमेन-यजेततथाप्येनं यजमानंकृतार्घ्याएवऋत्विजोयाजयेयुः। नाकृतार्घ्याः कुतः श्रुतेः।। एतत्सूत्रादेवंज्ञायते सोमयागार्थमेववृताऋत्विजो-र्घ्यानेतरयागार्थमिति।। यक्ष्माणास्त्ववृत्त्विजइत्यनेनैवयागार्थत्वा-त्सोमेनयक्ष्यमाणा एवार्घ्याइतिनियमार्थंपृथगारंभइति।। ।। अथमधु-पर्कादिविवाहकर्म प्रयोगः।। तत्रायंक्रमः।। साधूक्तिर्विष्टरंपाद्यम-परमुदकार्घ्यमधुप्राशनंत्रीनाचामेद्वाङ्मलेपः सुमनसमुपवीतानिवस्त्राणि-भूषाः।। कालंस्मृत्वाग्निसंस्थापयतिअथवरोवस्त्रमेनां प्रदद्यात्सन्मुख्यं-पाणिपीडाजिगमिषतियदैषीतिवह्निस्मरीत्या। आघारौभूर्भुवाद्याष्टय-जतिचऋताषाडितिद्वादशौताश्चित्ताद्याविश्वसंख्याकृतिपरिमित-योभ्यात्तसंज्ञाग्निपंच।। वध्वाचोत्थायलाजायजतिदशमितस्यात्प्रजानां-पतेसौदीचींक्रामेत्पदानिस्थितवतउदकेनोक्तरेणाभिषिंचेत्।। सूर्येक्षा-त्वह्निचास्तेध्रुवमसिहृदयालंभसौभाग्यदानंचर्मण्याथोनिवेश्यंत्विहज-पतिवरः स्विष्टमेताद्विसप्तइति।। ।। कन्यापिताप्रत्यङ्मुखउदङ्मुखो-वोपविश्याचम्यप्राणानायम्यसुमुखश्चेत्यादिपठित्वादेशकालकीर्तनान्ते-

कन्यार्थिनंगृहागतंस्नातकवरंमधुपर्केणार्हयिष्ये।। ।। द्वितीयविवाहार्थ-मागमनेतुस्नातकमितिपदस्य नोहः।। ततो वरस्यवैकल्पिकावधारणं।। यन्मधुनइतिमधुपर्कप्राशन।। शेषस्यप्रागसंचरेनिनयनमिति।। तत अर्घयिताउँ॰साधुभवानास्तामर्चयिष्यामो भवन्तमित्यर्घ्यंप्रतिवदति।। उँ॰ अर्चयेत्यर्घ्यस्यप्रतिवचनं।। अर्घयितुर्विष्टरादानं।। अर्घ-यितुर्व्यतिरिक्तोन्यअर्घ्यंविष्टीरादीनित्रिः संबोधयति।। विष्टरोविष्टरो-विष्टरः प्रतिगृह्यतामिति।। ततोर्घ्योऽर्घयितुः सकाशाद्वि-ष्टरम्प्रतिगृह्णामीतिवाक्यपठनेनादायतमुदगग्रमासनेनिधायवर्ष्मो-सीत्युपवीशति।। उँ॰ वर्ष्मो स्मिसमानानामुद्यतामिवसूर्य्यः।। इमंतमभितिष्ठामियोमाकश्चाभिदासतीति।। ततः पाद्योदकादानमर्घयितुः।। पाद्यंपाद्यंपाद्यंप्रतिगृह्तामिति।। ततोर्घ्योऽर्घयितुः सकाशात्पद्यंप्रति-गृह्णामीतिवाक्यपठनेनप्रतिगृह्यविराजोदोहोसीतिदक्षिणं पादंप्रक्षालयति।। उँ॰ विराजोदोहोसिविराजोदोहमशीयमयिपाद्यायै विराजोदोहइति।। ततोवाममनेनैवमंत्रेणप्रक्षालयति।। ।। राजन्यवैश्ययोस्तु पूर्वं वामपादप्रक्षालनं।। ततोर्घयितुर्द्वितीयविष्टरादानं।। विष्टरोविष्टरोविष्टरः प्रतिगृह्यतामिति।। ततोर्घ्योर्घयितुः सकाशात्प्रतिगृह्णामीतिद्वितीयंविष्टरं प्रतिगृह्योदगग्रंभूमौमनिधायवर्ष्मोस्मीत्यनेनतस्योपरिपादौनिदधाति।। उँ॰ वर्ष्मोस्मि०।। ततोर्घयितुरर्घादानं।। अर्घोर्घोर्घः प्रतिगृह्यतामिति।। ततोर्घ्यआप स्थयुष्माभिरित्यर्घंप्रतिगृह्णाति।। उँ॰ आपस्थयुष्माभिः सर्वान्कामानवाप्नवानीति।। ततोर्घंशिरसाभिवंद्यप्रागुदग्वानि-नयन्नभिमंत्रयेसमुद्रंवइति।। उँ॰ समुद्रंवःप्रहिणोमिस्वांयो-निमभिगच्छत।। अरिष्टास्माकंवीरामापरासेचिमत्पयइति।। ततोर्घयितुराचमनीयादानं।। आचमनीयमाचमनीयमाचमनीयं प्रतिगृह्यतामिति।। ततोर्घ्योर्घयितुः प्रतिगृह्णामीत्याचमनीयंप्रति-गृह्यामगन्यशसेतिसकृदाचामति।। उँ॰ आमागन्यशसासँ सजव्व-र्च्चसातम्माकुरुप्रियम्प्रजानामधिपतिम्पशूनामरिष्टंतनूनामिति।।

ततोद्विस्तूर्ष्णीं।। ततोर्घयितुर्मधुपर्कादानं।। मधुर्कोमधुपर्कोमधुपर्कः प्रतिगृह्यतामिति।। ततोर्घ्योर्घयितुर्हस्तस्थितंमधुपर्कंमित्रस्यत्वेत्यनेन-ईक्षते।। ॐ मित्रस्यत्वाचक्षुषाप्रतीक्षइति।। ततोमधुपर्कं देवस्यंत्वा० प्रतिगृह्णामीत्यन्तेनप्रतिगृह्यसव्येपाणौकृत्वापिधानमपाकृत्यदक्षिण-स्यानामिकयांत्रिः प्रदिक्षिणंतमालोडयतिनमः श्यावाश्यायेति।। ॐ नमः श्यावाश्यायान्नशनेयत्तऽआविद्धंतत्तेनिष्कृन्तामीत्यन्तेनालोड्य-मधुपर्कैकदेशमनामिकांगुष्ठेनप्रागुष्ठेनप्रागुदग्वाबहिर्निक्षिपतिएवंमंत्रा-वृत्यात्रिरालोडनंत्रिर्निरुक्षणमनामिकसांगुष्ठेनभवति।। ततोर्घ्योम-धुपर्कैकदेशेत्रिः प्राशनाति यन्मधुनोमधव्यमिति।। ॐ यन्मधुनोम-धव्यम्परम् ँ रूपमन्नाद्यम्।। ते नाहम्मधुनोमधव्येनपरमेणरूपेणा-न्नाद्येनपरमोमधव्योन्नादोसानीति।। पुनरनेनैवमंत्रेणवारद्वयंउच्छिष्ट-मेवप्राश्नाति।। मधुमतीभिर्वाप्रत्यृचंप्राशनं।। ततोर्घ्योमधुपर्कशेषं-पुत्रायशिष्यायवाउत्तरतउपविष्टायददाति।। अथवास्वयमेवसर्वं प्राश्नाति।। प्रागसंचरेवानिनयनं।। एतेषांपक्षाणामत्रप्रागवधारित-पक्षस्याश्रयणं। ततोर्घ्यआचम्यप्राणान्संमृशति।। तत्रैवं।। ॐ वाङ्मआस्येस्त्वितिमुखंकराग्रेणालभते।। ॐ नसोर्मेप्राणोस्त्विति तर्जन्यंगुष्ठाभ्यांनासिकाछिद्रद्वयंयुगपदालभते।। ॐ अक्ष्णोर्मेचक्षुर-स्त्वित्यनामिकांगुष्ठाभ्यामक्षिद्वयं युगपत्।। ॐ कर्णयोर्मेश्रोत्र-मस्त्वितिमध्यमांगुष्ठाभ्यांदक्षिणकर्णमभिमृश्य वाममनेनैवमंत्रेणा-लभेत्।। ॐ बाह्वोर्मेबलमस्त्वितिकराग्रेणदक्षिणबाहुमालभ्य-वामबाहुमनेनैवमंत्रेणंालभेत्।। ॐ ऊर्वोर्मेऽओजोस्त्विति-ऊरुद्वयम्युगपद्धस्तद्वयाग्रेण।। ॐ अरिष्टानिर्मेंगानितनूस्तन्वामे-सहसन्त्वितिशिरः प्रभृतिपादान्तानिसर्वांगानांगहस्तद्वयेनालंभनं-युगपत्।। ततोगामानीयार्चयिता शा[45]समादायगौर्गौर्गौः आलभ्यता-मित्यर्घ्यंप्रतिवदति।। ततोर्घ्यः प्रत्याह।। ॐ मातारुद्राणान्दुहिता-वसूना ँ स्वसादित्यानाममृतस्यनाभिः।। प्रनुवोचंचिकितुषे जनाय-

मागामनागामदितिंवधिष्ट।। ममचामुकशर्मणोयजमानस्यपाप्मानँ-हनोमीतियद्यालभेतब्रूयात्।। यद्युत्सिसृक्षेत्ममचामुष्यचपाप्माहत ॐ उत्सृजत तृणान्यत्त्विवितिब्रूयात्।। अत्राप्यमुष्यस्थानेअर्घयितुर्नाम-ग्रहणं।। अत्रोंकारमुपाशुशेषमुच्चैः।। ।। एवंगवालंभनस्य-सर्वत्रविकल्पेप्राप्तेक्वचिन्नियममाह।। ।। नत्वेवामाँ सोर्घस्या-दधियज्ञमधिविवाहंकुरुतेवंब्रूयादिति।। यज्ञविवाहयोर-मांसोर्घोनभवति।। यज्ञमधिकृत्यविवाहमधिकृत्यकुरुतेत्येवंप्रयोगः।। अतश्चालंभनियमोयज्ञविवाहयोरिति।। एवं चयद्यपि-सूत्रकारेणयज्ञविवाहयोर्गवालंभोनियमेनउक्तस्तथापिसकलौन-भवति।। यज्ञाधानंगवालंभंसंन्यासंपलपैतृकं।। देवराच्चसुतोत्पतिः कलौपंचविवर्जयेदितिपराशरस्मृतेः।। अतश्चगवालंभस्यकलौ-निषिद्धत्वादुत्सर्गस्ययज्ञविवाहयोरप्राप्तत्वाद्गौरित्युच्चारणादि-यज्ञविवाहयोः कलौ न प्रवर्तते।। यज्ञविवाहयोरन्यत्रतूत्सर्गएवपक्षः कलौ। कलौगोपशोर्निषेधस्तत्स्थानेनअजालंभः कार्यइतिजयंतेन-उक्तंतथाप्यस्वर्ग्यंलोकविद्विष्टंधर्म्यमप्याचरेन्नत्विवितियाज्ञवल्क्य-स्मृत्यनुमितश्रुतिवाक्येनचलोकविद्विष्टस्यापिनिषिद्धत्वात्सनकार्य-इतिकेचित्।। यज्ञविवाहयोर्गोरुत्सर्गः कार्यत्याह।। आपस्तंबः।। ऋष्युद्दिष्टंकलौ नैवपापंगोहत्ययासमं। अतोविवाहेयज्ञेचगामानीय-समुत्सृजेदिति।। गोरालंभनिषेधात्स्यात्सर्वत्रोत्सर्जनंकलाविति-कारिकोक्तेश्च।। ।। अत्रोत्सर्गप्रयोगः।। तत्रअर्च्यसन्निधौभूमावुदगग्रान्-कुशानास्तीर्याघर्यितागोनिष्क्रयद्रव्यंगृहीत्वागौर्गौरित्याह।। तत्द्रव्यमर्घ्योगृहीत्वाप्रत्याह।। ॐ मातारुद्राणांदुहितावसूनाँ-स्वसादित्यानाममृतस्यनाभिः।। प्रनुवोचंचिकितुषे जनायमागामनागा-मदितिंवधिष्ट।। ममचामुकशर्मणोयजमानस्यपाप्माहतः।। ॐ उत्सृजततृणान्यत्त्विवति।। ॐ कारमुपांशुउत्सृजतेत्याद्युच्चैर्ब्रूयात्।। ततोर्घ्यआस्तृतकुशोपरिद्रव्यमुत्सृजेत्।। ।। अथात्रशिष्टाचाराद्-

गंधमाल्यवस्त्रयुगोपवीतयुगाभरणादिभिस्तत्तल्लिंगैः सुचक्षाइत्यादिभि-र्मंत्रैर्वरंयथाविभवंपूजयेत्।। ततोब्राह्मणेभ्योयथाशक्तिदक्षिणांदत्वा-कृतकर्मसंपूर्णतांवाचयित्वातेशामाशिषोगृह्णीयात्।। ततोर्चयितानेनवर-मधुपर्कार्चनकृतेनश्रीवासुदेवः प्रीयतांनमम।। ।। इतिमधुपर्कः।।
ततः कन्यासुस्नातापरिहिताहतवस्त्रागृहान्तः सौभायादिकामनया पूजितगौरीहरंध्यायमानातत्रैवतिष्ठेत्।। ततोवरोबहिः शालायांविवाहवेद्यामु पविश्याचम्यप्राणानायम्यदेशकालौस्मृ-त्वाधर्मार्थकामप्रजासंपत्तिसिध्यर्थंदाराप्रतिग्रहणंतदंगतया-विहितमग्निप्रतिष्ठापनंचाहंकरिष्ये।। इतिसंकल्प्य तस्यां-सुवर्णवर्णमृन्निर्मितेअरत्निमितस्थंडिलेपंचभूसंस्कारान्कृत्वा-योजकनाम्नो लौकिकाग्नेः स्थापनंकुर्यात्।। अत्रनिर्मं-थ्याग्नेर्वास्थापनं।। ततो वरौवैकल्पिकावधारणंकुर्यात्।। गौरीपरिणयनं।। कुमार्यावासः परिधानादिगृहमध्ये।। अग्नेः पश्चात्तेजन्यानिधानं।। अग्नेरुत्तरतः कुंभघृक्।। तेजन्या-दक्षिणपादेनपरिवर्तनं।। पूर्वेणब्रह्मणोगमनं।। उत्तरतः पात्रासादनं।। द्वेपवित्रे।। ताम्रमयीआज्यस्थाली।। पालाश्यः समिधः।। प्रांचावाघारौ।। समिद्धतमेआज्यभागौ।। वरोदक्षिणा।। राष्ट्रभृद्धोमः।। जयाहोमः।। अभ्यातानहोमः।। सुगन्नुपन्थामित्याहुत्यंतेपरंमृत्यो-इत्येकाहुतिः।। वध्वा आनडुहचर्मोपवेशनंप्राच्यां।। त्रिरात्रमधः शयानाद्युभयोः एतान्वैकल्पिकपदार्थानहंकरिष्ये।। ततअग्नेः पश्चात्तृणपुलकंस्थापयेत्।। ततोवरः गृहंगत्वा स्वासनेउपविशेत्।। अत्राचारात्पूर्वपश्चिमयोः हस्तांतरालविहायपृथक्पृथक्प्रस्थ-मितैस्तंडुलैर्द्वौराशीकृत्वा तयोरुपरिकुंकुमादिनास्वस्तिकांकितं-चतुष्पादपीठंस्थापयेत्।। ततोवरः पूर्वराशौस्थापितपीठे प्रत्यङ्मुखउपविशेत्।। ततोवारस्त्रीभिर्नृत्यमंगलतूर्यघोषे-क्रियमाणेकुंकुमादिकृतस्वस्तिकांकितमुदग्दशमंतः पटमविध

रसुदृढपुरुषैर्धृते दैवज्ञब्राह्मणैश्चमंगलपद्ये पठ्यमाने मातुलादिः सालंकृतां कन्यामानीय पश्चिमराशौ स्थापितपीठे प्राङ्मुखींतामवस्थापयेत्।। अत्र वैदिकाश्चस्वस्तिनइन्द्रेत्यादिमंगलसूक्तानिपठेयुः।। पुरन्ध्र्यश्चमंगलगायनंकुर्युः।। ततो वधूः पुष्पग्रथितवरणमालांवरकंठेसमर्प्यतावुभौमनसेष्टदेवतांध्ययायन्तौ समाहितौपरस्परंकरालंभनंकुरुतः।। ततोदैवज्ञैस्तेवलग्नमितिपठित्वांतेसुमुहूर्तमस्त्वित्युक्तेवैदिकैश्च ॐ प्रतिष्ठेत्युच्चैरुच्चार्यमाणेधृतांतः पटमुदगपसार्यप्राङ्मुखंवरंप्रत्यङमुखींकन्यामुपवेशयित्वाचार्यादिब्राह्मणाः प्रतिष्ठा मंत्रब्राह्मणंपठेयुः।। ॐ मनोजूतिर्जुषता० मनोजूतिर्जुषता माज्यस्येतिमनसावाऽइदसर्वमाप्नोतिबृहस्पतिर्यज्ञमिमन्तनो त्वरिष्टंयज्ञ ँ समिमन्दधात्वितियद्विवूँ तत्सन्दधातिविश्वेदेवासऽइहमादयतामिति सर्वंवैविश्वेदेवाः सर्वेणैवैतत्सन्दधातिसयदिकामयेतब्रूयात्प्रतिष्ठेति।। एषवै प्रभूर्नामयज्ञोयत्रैतेनयज्ञेनयजन्तेसर्वमेवप्रभूतंभवति।। एषवै विभूर्नामयज्ञोयत्रैतेनयज्ञेनयजन्तेसर्वमेवविऽभूतंभवति।। एषवैव्यष्टिर्नामयज्ञोयत्रैतेनयज्ञेन यजन्तेसर्वमेव व्यष्टम्भवति।। एषवैव्विधृतिर्नामयज्ञोयत्रैतेनयज्ञेनयजन्तेसर्वमेवविधृतम्भवति।। एषवैव्यावृत्तिर्नामयज्ञोयत्रैतेनयज्ञेनयजन्मेसर्वमेवव्यावृत्तम्भवति।। एषवाऽऊर्ज्जस्वान्नामयज्ञोयत्रैतेनयज्ञेनयजन्ते सर्वमेवोर्ज्जस्वद्भवति।। एषवैपयस्वान्नामयज्ञोयत्रैतेनयज्ञेनयजन्तेसर्वमेवपयस्वद्भवति।। एषवैब्रह्मवर्चसीनामयज्ञोयत्रैतेनयज्ञेनयजन्तेऽआब्रह्मन्ब्रह्मणोब्रह्मवर्चसीजायते।। एषवाअतिव्याधीना तिव्याधीनामयज्ञोयत्रैतेनयज्ञेनयजन्तऽआराजन्योतिव्याधीजायते।। एषवैदीर्घोनामयज्ञोयत्रैतेनयज्ञेनयजन्तऽआदीर्घारण्यज्जायते।। एषवैक्लृप्तिर्नामयज्ञोयत्रैतेनयज्ञेन यजन्ते सर्वमेवक्लृप्तंभवति।। एषवैप्रतिष्ठानामयज्ञोयत्रैतेनयज्ञेनयजन्तेसर्वमेवप्रतिष्ठितम्भवति।। सुप्रतिष्ठितमस्तु।। उभयोर्वधूवरयोरविच्छिन्ना

प्रीतिरस्त्वितपठित्वाक्षतानुभयोः शिरसिप्रक्षिपेयुः।। ।। ततोवरः [46]एनांवधूंवासः परिधापयतिजराङ्गच्छेति।। कुमारीस्वयंपरिधत्ते[47]।। मंत्रपाठस्तुवरस्यैव।। ॐ जराङ्गच्छपरिधत्स्ववासोभवाकृष्टीनाम-भिशस्तिपावा।। शतञ्चजीवः शदः सुवर्च्चारयिंचपुत्राननुसंव्ययस्वा-युष्मतीदंपरिधत्स्ववासइति।। अथोत्तरीयं याऽअकृन्तमिति।। ॐ याऽअकृन्तन्नवयंयाऽअतन्वत।। याश्चदेवीस्तन्तूनभितो ततन्थ।। तास्त्वादेवीर्जरसेसंव्ययस्वायुष्मतीदम्परिधात्स्ववासइति।। मंत्रपाठोवरस्यैव।। ततः कन्यापितापरस्परंसमंजेथामित्यध्येषणेन एनौवधूवरौसमंजयतिसमंजन्त्विति।।[48] ॐ समंजन्तुविश्वेदेवाः समापोहृदयानिनौ।। सम्मातरिश्वासन्धातासमुदेष्ट्रीदधतुनाविति।। अत्राचाराद्वरोवधूकंठेमांगल्यसूत्रंबध्नीयात्।। मांगल्यतंतु नानेनममजीवनहेतुना।। कंठेबध्नामिसुभगेत्वंजीवशरदांतशत।। ॐ यदाबध्नन्दाक्षायणाहिरण्यँशतानींकायसुमनस्यामानाः।। तन्मऽ-आबध्नामिशतशारदायायुष्मान्जरदष्टिर्यथासमिति।। मंत्रपाठोवरस्यैव।। ततः परित्वागिर्व्वणोगिरइत्यारभ्यजुषाणोअप्तुरा ज्यस्य-व्वेतुस्वाहेत्यन्तेनवरवध्वोश्चतुर्विंशतितंतुभिर्द्विगुणीकृतसूत्रेणय-थाचारमाचार्योवेष्टयेत्।। वेष्टनप्रकारंचवधूदक्षिणांसमारभ्यो-भयोरंसेपंचवारं।। कटिप्रदेशेसप्तवारमित्ययंदेशाचारइतिदपर्णकारः।। ।। वेष्टनमंत्राः।। ।। ॐ परित्वागिर्व्वणोगिरऽइमाभवंतुव्विश्वतः।। वृद्धायुमनुवृद्धयोजुष्टाभवंतुजुष्टयः।। इन्द्रस्यस्यूरसींद्रस्यध्रुवोसि।। ऐंद्रमसिव्वैश्वदेवमसि।। व्विभूरसिप्रवाहणोवह्निरसिहव्यवाहनः।। श्वात्रोसिप्रचेतास्तुथोसिव्विश्ववेदाऽउशिगसि।। उशिगसिकविरङ्घारि-रसिबम्भारि रबस्यूरसिदुवस्वान्छुन्ध्यूरसिमार्ज्जालीयःसम्राड-सिकृशानुः परिषद्योसिपवमानोनभोसिप्रतक्वामृष्टोसिहव्यसूदनऽ-ऋतधामासिस्वर्ज्योतिः समुद्रोसि।। समुद्रोसिव्विश्वव्वयचाऽअजोस्येक पादहिरसिबुध्न्योव्वागस्येंद्रमसिसदोस्यृतस्यद्वारौमामा-

संतांप्तमद्वपतेप्प्रमातिरस्वस्तिमेस्मिन्पथिदेवया नैभूयान्मित्रस्यमा।।
मित्रस्यंमाचक्षुंषेक्षत्ध्वमग्नंयः सगराः सगरास्थसगरेणनाम्नारौ
द्रेणानीकेन पातमांग्नयः पिपृतमांग्नयोगोपायतंमानमोवस्तुमामांहिँ
सिष्ट।। ज्योतिरसि विश्वरूपम्विश्वैषान्देवानांसमित्।। त्वँ सोमत-
नूकृद्भ्योद्वेषोभ्योन्यकृतेभ्यऽउरुयंतासिव्वरूथँ स्वाहांजुषाँ णोअप्तु-
राज्यंस्यव्वेतुस्वाहेति।। ।। अथकन्यादानं।। ।। तत्रदातावरदक्षिणतः।।
स्वदक्षितः।। पत्नीसहितउदङ्मुखोपविश्यबद्धशिखः शुचिरा-
चम्यकुशपाणिः प्राणानायम्यदेशकालौसंकीर्त्यअस्याः कन्याया-
अनेनवरेणधर्मप्रजयाउभयोर्वंशवृध्यर्थंतथाचममसमस्तपितृणां-
निरतिशयानंदब्रह्म लोकावात्प्यादिकन्यादान कल्पोक्तफला-
वाप्तयेअनेनवरेणास्यांकन्यायामुत्पादयिष्यमाणसंतत्यादशपूर्वा-
न्दशापरान्मांचैकविंशतिपुरुषानुद्धर्तुकामः श्रीलक्ष्मीनारायण-
प्रीतयेचब्राह्मविवाहविधिनाकन्यादानमहंकरिष्ये।। [49]ततोवरहस्तेशि
वाआपः सन्त्वित्यादिवचनप्रतिवचनेनसुप्रोक्षितादिकंकृत्वा-
वरस्यगोत्रोच्चारः कार्यः।। यथा।। अनुकगोत्रस्यामुकप्रवर-
स्यामुकशर्मणः प्रपौत्राय।। अमुकगोत्रस्या मुकप्रवरस्यामुकशर्मणः
पौत्राय।। अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्राय।।
अमुक[50]शर्मणेश्रीधररूपिणेवराय।। कन्यापक्षे।। अमुकगोत्रस्या-
मुकप्रवरस्यामुकशर्मणः प्रपौत्रीं।। अमुकगोत्रस्यामुकप्रवरस्यामुक-
शर्मणः पौत्रीं।। अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रीम-
मुकीनाम्नीं श्रीरूपिणींकन्यां।। एवंपुनर्वार[51]द्वयं।। ततोकुशाक्षतयुत-
जलेनकन्यादानसंकल्पः सपत्नीकः करोति।। कन्यापिताकुशजला-
क्षतपाणिः।।[52] तत्रदानवाक्यम्।। ममसमस्तेत्यादि प्रीतयेइत्यंतंपूर्व-
वदुच्चार्यामुकगोत्रायामुकप्रवरान्वितायामुकवेदाध्यायिने
अमुकशर्मणेश्रीधररूपिणेवरायामुकगोत्रोत्पन्नाममुकप्रवरान्विता-
ममुकीनाम्नीं श्रीरूपिणीमिमांकन्यांयथाशक्त्यलंकृतामुपकल्पितो-

पस्कारसहितांप्रजापतिदैवत्यां पुराणोक्तशतगुणीकृत्यज्योतिष्टोमातिरात्र-
फलप्राप्तिकामः कन्यादानकल्पोक्त फलप्राप्तिकामः कन्यादान-
कल्पोक्तफलप्राप्तिकामोवाप्रजोत्पादनार्थंभार्यत्वेनतुभ्यमहंसंप्रददे।।
[53]इत्युक्त्वासकुशाक्षतजलंकन्यादक्षिणहस्तंवरदक्षिणहस्तेदद्यात्।। वरः
ॐस्वस्तीत्युक्त्वाद्यौस्त्वेतिप्रतिग्रहंकरोति।। ॐद्यौस्त्वाददातुपृथि
वीत्वाप्रतिगृह्णातु।। ततो दाता।। गौरीकन्यामिमांविप्रयथाशक्ति-
विभूषितां।। गोत्रायशर्मणेतुभ्यंदत्ताविप्रसमाश्रया।। कन्येममाग्रतोभूयाः
कन्ये ये देवि पार्श्वयोः। कन्ये मे पृष्ठतोभूयास्त्वद्दानान्मो-
क्षमाप्नुयां।। ममवंशकुलेजातापालितावत्सराष्टकं।। तुभ्यंविप्रमया-
दत्तापुत्र पौत्रविवर्द्धनी।। त्रैलोक्य नाथोदेवेशः सर्वभूतदया-
निधिः।। दानेनानेनमेप्रीतअतः शांतिंप्रयच्छमे।। यस्त्वयाधर्म-
चरितव्यःसोनयासहधर्मेचार्थेचकामेचत्वयेयंनातिचरितव्या।।
नातिचरामीतिवरः।। ततोदाताकृतस्यकन्यादानप्रतिष्ठासिध्यर्थ-
मिमांदक्षिणांतुभ्यमहंसंप्रददे।। इतिसंजलंयथाशक्तिसुवर्णंदक्षिणा
त्वेनवरहस्तेदत्वानममेतिवदेत्।। ॐ स्वस्तीतिवरः।। ततोदाता
जलभाजनभोजनभाजनगोमहिष्यश्वगजदासीदासंभूशय्यावाहना-
लंकारादियथाविभवंसंकल्पपूर्वकंवरायदद्यात्।। ।। तत्रतावद्गोदान-
मंत्रः।। ।। यज्ञसाधनभूताया विश्वस्याघप्रणाशिनी।। विश्वरूप-
धरोदेवः प्रीयतामनयागवेति।। ।। अथभूमेः।। सर्वसस्याश्रया-
भूमिर्वराहेणसमुद्धृता।। अनंतसस्यफलदाअतः शांतिंप्रयच्छमे।। ।।
अथदास्याः।। इयंदासीमयातुभ्यंश्रीवत्सप्रतिपादिता।। सदाकर्मकरी-
भोग्यायथेष्टंभद्रमश्नुते।। ।। अथशय्यायाः।। अशून्यंशयनंनित्य-
मनूनांश्रियमुन्नतिम्।। सौभाग्यंदेहिमेनित्यंशय्यादानेनकेशव।। ।।
अथांगुलीयकस्य।। हिरण्यगर्भसंभूतंसौवर्णंचांगुलीयकम्।।
सर्वप्रदंप्रयच्छामिप्रीणातुकमलापतिः।। ।। अथकुंडलयोः।।
क्षीरोदमथनेपूर्वमुद्धृतंकुंडलद्वयं।। श्रियासहसमुद्भूतंददेश्रीः

प्रीयतामिति।। ।। अथाश्ववस्य।। महार्णवसमुत्पन्नउच्चैः श्रवसपुत्रक।। मयात्वंविप्रमुख्यायदत्तः शांतिंप्रयच्छमे।। अथ गजस्य।। सुप्रतीकगजेंद्रत्वंसरस्वत्याभिषेचित।। इंद्रस्यवाहनं-शश्वत्सर्वदेवैश्चपूजित।। दानेनानेनदत्तेनममशांतिंप्रयच्छमे।। ।। अथगृहस्य।। इदंगृहं गृहाणत्वंसर्वोपस्करसंयुतं।। तवविप्रप्रसादेनममास्त्वभिमतंफलम्। ।। अथमहिष्याः।। इंद्रादिलोकपालानांयाराज्यमहिषीशुभा।। महिषासुरस्यज ननीसास्तुमेसर्वकामदा।। ।। अथताम्रपात्रस्य।। परापवादपैशून्यादभक्ष-स्यचभक्षणात्।। उत्पन्नापापंदानेनताम्रपात्रस्यनश्यतु।। अथकांस्य-पात्रस्य।। यानिपापानिकाम्यानिकामोत्थानिकृतानिच।। कांस्य-पात्रप्रदानेनतानिनश्यंतुमेसदा।। ।। अथरौप्यपात्रस्य।। अगम्या-गमनंचैवपरदाराभिमर्शनं।। रौप्यपात्र प्रदानेनतानिनश्यंतुमेसदा।। ।। अथस्वर्णपात्रस्य।। जन्मजन्मसहस्रेषुयत्कृतंपातकंमया।। स्वर्णपात्रप्रदानेनाशांतिस्तस्यास्तुमेसदा।। ।। अथकरकस्य।। पूरितं-पूगपूगेननागवल्लीदलान्वितं।। पूर्णेनचूर्णपात्रेणकर्पूरटिपकेनच।। सपूग खंडनंदिव्यंगंधर्वाप्सरसांप्रियं।। करकत्वंनिरातंकंत्वंप्रसादा-त्कुरुष्वमाम्।। अथवलयस्य।। कांचनंहस्तवलयंरूपकांति-सुखप्रदम्।। विभूषणप्रदास्यामिविभूषयतुमांसदा।। ।। अथपुस्तकस्य।। सर्वविद्याश्रयज्ञानकारणं ललिताक्षरं।। पुस्तकंसंप्रयच्छामिप्रीताभवतुभारती।। ।। अथवृषस्य।। धर्म स्त्वंवृषरूपेणजगदानंदकारण।। अष्टमूर्तेरधिष्ठानमतः शांतिंप्रयच्छमे।। ।। ततोवरः कोदादितिकामस्तुतिंपठेत्।। ।। ॐ कोदात्कस्मा-ऽअदात्कामो दात्कामायादात्।। कामोदाताकामः प्रतिगृहीताकामैतत्ते।। अथयदन्यदद्दुदातिकामेनैवतद्ददातीदंम्मेप्यपुत्रासदितितत्प्रत्येति-कोदात्कस्माऽअदात्कामोदात्कामायादात्।। कामोदाताकाम प्रतिगृही-ताकामैतत्ते।। एवंकामस्तुतिस्त्रिवारं पठति।। दिवाविवाहाश्चे-

दत्रवैदिकाः।। सयः कामयेतेतिब्राह्मणपाठेनवधूवराभ्यांकांचन-वर्षणरूपमाशीर्वादंप्रयच्छन्ति।। ।। ॐसयः काम येतमहत्प्रा-प्नुयामित्युदगयनऽआपूर्यमाणपक्षेपुण्याहेद्वादशाहमुपसद्वतीभूत्वौदुंबरेकँ सेचमसेवासर्वौषधम्फलानीतिसम्भृत्यपरिसमुह्यपरिलिप्याग्निमुप-समाधायावृताज्यँ सँस्कृत्यपुँसानक्षत्रेणमन्थँ सन्नीयजुहोति।। यावन्तोदेवास्त्वयिजातवेदः।। तिर्यञ्चोघ्नन्तिपुरुषस्यकामान्।। तेभ्योहं भागधेयञ्जुहोमितेमातृप्ताः कामौस्तर्पयन्तुस्वाहा।। या तिरश्चीनिपद्यसेऽहँविधरणीऽइति।। तान्त्वाघृतस्यधारयायजेसँ-राधनमहस्वाहा।। प्रजापतेनत्वदेतान्यन्यऽइतितृतीयाञ्जुहोति।। ज्येष्ठाय-स्वाहाश्रेष्ठायस्वाहेति।। अग्नौहुत्वामन्थेसँ स्रवमवनयतिप्राणाय स्वाहाव्वसिष्ठायैस्वाहेत्यग्नौहुत्वामन्थेसँ स्रवमवनयतिव्वास्वाहाप्रतिष्ठायै स्वाहेत्यग्नौहुत्वा मन्थेसँ स्रवमवनयतिचक्षुषेस्वाहासम्पदेस्वाहेत्यग्नौ-हुत्वामन्थेसँ स्रवमवनयतिश्रोत्रायस्वाहायतनायस्वाहेत्यग्नौहुत्वा-मन्थेसँ स्रवमवनयतिमनसेस्वाहा प्रजात्यैस्वाहेत्येग्नौहुत्वामन्थेसँ स्रवमवनयतिरेतसेस्वाहेत्यग्नौहुत्वा मन्थेसँ स्रवमवमनयति।। भूतायस्वाहेति।। अग्नौहुत्वामन्थेसँ स्रवमवनयतिभविष्यते स्वाहेत्यग्नौहुत्वामन्थेसँ स्रवमवनयतिव्विश्वायस्वाहेत्यग्नौहुत्वा मन्थेस स्रवमवनयतिसर्व्वायस्वाहेत्यग्नौहुत्वामन्थेसँ स्रवमवनयति।। पृथिव्यैस्वाहेति।। अग्नौहुत्वामन्थेसँ स्रवमवनयत्यन्तरिक्षाय-स्वाहेत्यग्नौहुत्वामन्थेसँ स्रवमवनयतिदिवेस्वाहेत्यग्नौहुत्वामन्थेसँ स्रवमवनयतिदिग्भ्यः स्वाहेत्यग्नौहुत्वामन्थेसँ स्रवमवनयति-ब्रह्मणेस्वाहेत्यग्नौहुत्वामन्थेसँ स्रवमवनयतिक्षत्रायस्वाहेत्य-स्वाहेत्यग्नौहुत्वामन्थेसँ स्रवमवनयति।। भूः स्वाहेति।। अग्नौ हुत्वामन्थेसँ स्रवमवनयतिभुवः स्वाहेत्यग्नौहुत्वामन्थेसँ स्रवमवनयतिस्वः स्वाहेत्यग्नौ हुत्वामन्थेसँ स्रवमवनयतिभूर्भुवः स्वाहेत्यग्नौ हुत्वामन्थेस्वः स्रवमवनयति। अग्नये स्वाहेति।। अग्नौहुत्वा-

मन्थेसँ् स्रवमवनयः तिसोमायस्वाहेत्याग्नौहुत्वा मन्थेसँ् स्रवमवनयति तेजसेस्वाहेत्यग्नौहुत्वामन्थेसँ् स्रवमवनयति-श्रियैस्वाहेत्यग्नौहुतवामन्थेसँ् स्रवमवनयतिलक्ष्म्यैस्वाहेत्याग्नौ-हुत्वामन्थेसँ् स्रवमवनयतिसवित्रेस्वाहेत्यग्नौहुत्वामंथेसँ्स्रवमव नयतिसरस्वत्यैस्वाहेत्यग्नौहुत्वामन्थेसँ् स्रवमवनयतिव्विश्वे-भ्योदेवेभ्यः स्वाहेत्यग्नौहुत्वामन्थेसँ् स्रवमवनयतिप्रजापतये स्वाहेत्यग्नौहुत्वामन्थेसँ् स्रवमवनयति।। अथैनमभिमृशति।। भ्रमसिज्वलदसिपूर्णमसिप्रस्तब्धमस्येकसभमसिहिङ्कृतमसि-हिङ्क्रियमाणमस्युद्गीथमस्युद्गीयमानमसिश्रावितमसि-प्रत्याश्रावितमस्यार्द्रेसन्दीप्तमसिव्विभूरसिप्रभूरसिज्योतिरस्यन्नमसि-निधनमसिसँवर्गोसीति।। अथैनमुद्यच्छति।। आमोस्यामँ् हितेमयि।। स हिराजेशानोधिपतिः समाराजेशानोधिपतिङ्करोत्विति।। अथैन-माचामति।। तत्सवितुर्व्वरेण्यंमधुव्वा ताऽऋतायतेमधुक्षरंतिसिंधवः।। माध्वीर्नः संत्वोषधीः भूः स्वाहा।। भर्गोदेवस्य धीमहि।। मधु-नक्तमुतोषसोमधुमत्पार्थिवँ् रजः।। मधुद्यौरस्तुनः पिताभुवः स्वाहा।। धियोयोनः प्रचोदयात्।। मधुमान्नोव्वनस्पतिर्मधुमाँ अस्तुसूर्यः।। माध्वीगावोभवन्तुनः स्वाहेतिसर्व्वाञ्चसावित्रीमन्वाहसर्वाश्चमधुम-मतीः सर्वाश्चव्याहृतीरहमेवेदँ् सर्व्वम्भूयासम्भूर्भूवः स्वः स्वाहेत्यंततऽआचम्यप्रक्षाल्यपाणी जघनेनाग्निम्प्राक्शिराःसँविशाति।। प्रातरादित्यमुपतिष्ठते।। दिशामेकपुण्डरीकमस्यहमनुष्याणामेक-पुंडरीकंभूयासमितियथेतमेत्यजघनेनाग्निमासीनाव्वँ् शज्जपति।। तँ्हैतमुद्दालकऽआरुणिर्व्वाजसनेयाययाज्ञवल्क्यायान्तेवासि नऽउक्त्वोवाचापियऽएनशुष्केस्थाणौनिर्षिचेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति।। एतमुहैवव्वाजसनेयोयाज्ञवल्क्योमधुकायपैङ्ग्या-यान्तेवासिनऽउक्त्वो वाचापियएन शुष्केस्थाणौ-निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति।। एतमुहैवमधुकः

पैङ्ग्यश्चूडायभागवित्तयेनतेवासिनऽउक्वोचापियएना ँ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति।। एतमुहैवचूडा-भागवित्तिःजानकयऽआयस्थूणायान्ते वासिनऽउक्त्वोवाचापियएन ँ शुष्के स्थाणौनिषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति।। एतमुहैवजाजकिराय स्थूलण।। सत्यकामायजाबालायान्तेवासिन-ऽउक्त्वोवाचापिय एनः शुष्केस्थाणौनिषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति।। एतमुहैवसत्यकामो जाबालोन्तेवासिभ्य-उक्तोवाचापियएन ँ शुष्केस्थाणौनिषिञ्चेज्जायेरञ्छाखाःप्ररोहेयुः पलाशानीतितमेतन्नापुत्रायचानंतेवासिनेवाब्रूयात्।। चतुरौदुम्बरो भवत्यौदुम्बरश्चमसऽऔदुम्बरः स्रुवऽऔदुम्बरऽइध्मऔदुम्ब-र्याऽउपमन्थिन्यौ।। दशग्राम्याणिधान्यानिभवन्ति।। व्रीहियवास्ति-लमाषाऽअणुप्रियङ्गवो गोधूमाश्चमसूराश्चखल्वाश्चखल-कुलाश्चतान्त्सार्धं पिष्टद्दध्नामधुनघृतेनोपसिञ्चत्याज्यस्यजुहोति।। सर्वेषाँवाऽएषव्वेदाना ँ रसोयत्सामसर्व्वेषामेवैमनमेतद्वेदाना ँ र-सेनाभिषिञ्चति।। ।। उक्ताशीर्भवतु।। ततोब्राह्मणान् गंधादिभिः संपूज्यतेभ्योदक्षिणांदत्वाकन्यादानांगत्वेलयथाशक्तिब्राह्मणभोजनं-संकल्प्य।। अनेनकन्यादानकर्मणाश्रीलक्ष्मीनारायणः प्रीयतांनमम।। ।। अत्राचारात्कंकणबंधनमाम्रसिंचनंचकार्यं।। तदित्थंवधूवरयोः परित्वेत्यनुवाकवेष्टितं कण्ठदेशस्थंसूत्रमधोनिष्कास्यकुंकुमाक्त-मूर्णायुतंचकृत्वातेनहरिद्राखंडंबध्वातद्वधूवामहस्तप्रकोष्ठेयदा-बध्नन्निति मंत्रेणवरोबध्नीयात्।। उभयोः कटिदेशस्थंसूत्रमु-परिनिष्कास्यपूर्वत्कृत्वातेनैवमंत्रेणवर दक्षिणहस्तप्रकोष्ठेवधूर्बध्नी-यात्।। ततः कंकणप्रार्थना।। आवृतान्नोशचीदेवीकंकणस्था शचीसदा।। शचींद्रयोरिवप्रीतिरावयोरस्तुसर्वदेति।। त्रीणीतइति-मंत्रपठेद्वरः।। ॐ त्रीणिंतऽआहुर्द्दिविबन्धनानित्रीण्यप्सूत्रीण्यंतः-ऽसंमुद्रेउतेवंमेव्वरुणच्छन्त्स्यर्व्वन्न्यत्राहऽआहुःऽपरमञ्जनित्रम्।

।। ततोवध्वायथाचारमाम्रसेचनंकार्यं।। तत्रमंत्रौ।। देवेंद्राणिनमस्तुभ्यं-देवेंद्रप्रियभामिनि।। विवाह भाग्यमारोग्यंपुत्रलाभंचदेहिमे।। धान्यंदेहि धनंदेहिपशून्देहींद्रभामिनि।। यशोदेहिसुखंदेहिसर्वकार्यकरीभव।। इत्याम्रसेचनं।। ।। ततोवरः पित्राप्र[54]त्तामादायगृहीत्वा-निष्क्रामतियदैषीति।। ॐयदैषिमनसादूरंदिशोनुपवमानोवा।। हिरण्यपर्णोवैकर्णः सत्वामन्मनसांकरोतु।। असावित्यत्रसंबुध्यंतं-अमुकिदेवीतिवधूनामवरोगृह्णीयात्।। निष्क्रमणप्रभृत्येकः पुरुषउदकुंभं स्कंधेकृत्वादक्षिणतोग्नेर्वाग्यतः स्थितोभवत्युत्तर-तोवाअभिषेकपर्यंतं।। अथैनौवधूवरावग्निसमिपंगतौकन्यापिता-प्रेषयतिपरस्परंसमीक्षेथामितिप्रैष्येण। ततस्तोसमीक्षणंकुरुत-अघोरचक्षुरिति।। मंत्रपाठोवरस्य।। ॐ अघोरचक्षुरपतिघ्न्येधिशिवा-पशुभ्यः सुमनाः सुवर्चाः।। वीरसूर्देवकामास्यो नाशन्नोभव द्विपदेशं चतुष्पदे।। सोमः प्रथमो विविदेगंधर्वोविविदऽउत्तरः।। तृतीयोग्निष्टे-पतिस्तुरीयस्तेमनुष्यजाः।। सोमोददद्गन्धर्वायगन्धर्वोददद्ग्नये।। रयिञ्चपुत्रांश्चादादग्निर्मह्यमथोऽइमां।। सानः पूषाशिवतमामेरयसानऽ-ऊरूऽउशतीविहर।। यस्यामुशंतः प्रहरामशेफंयस्यामुकामाबहवो-निविष्टौ।। इतिमंत्रान्तेवेदीसमीपेपरस्परमुभयोरालोकनं।। ततोवधू-वरौप्रदक्षिणमग्निपर्याणीयैके[55]पश्चादग्नेस्ते[56]जनींकटंवादक्षिणपादेन [57]प्रवृत्त्योपविशतः।। ततोदक्षिणतोब्रह्मासनादिचरुवर्जंपात्रासादनं।। ततोपकल्पनीयानि।। शूर्पेशमीपलाशमिश्रालाजाः।। अश्मा। लोहितमानडुहंचर्म।। [58]कुमार्याभ्राता।। दृढपुरुष[59]:।। आचार्यायवर-द्रव्यमित्युपकल्प्यप्रोक्षणकालेप्रोक्षयेत्।। ततः दक्षिणंजान्वा-च्यब्रह्मान्वारब्ध्स्त्रुवेणाज्यमादायमनसा।। ॐ प्रजापतयेस्वाहा।। इदंप्रजापतयेनमम।। ॐइन्द्राय०।। इदमिन्द्राय।। ॐ अग्नये०।। इदमग्नये०।। ॐ सोमाय०।। इदंसोमाय।। ।। ततोभूराद्याः सर्वप्रायश्चित्ताहुतयः।। ॐ भू०।। इदमग्नये०।। ॐ भुवः०।।

इदंवायवे०।। ॐ स्वः०।। इदंसूर्याय०।। ॐ त्वन्नोअग्नेव०।। इदमग्नीवरुणाभ्यां०।। ॐ सत्वन्नोअग्नेवं०।। इदमग्नीवरुणाभ्यां०।। ॐ अयाश्चाग्ने०।। इदमग्नयेअयसे०।। ॐयेते शतम्व०।। इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यः स्वर्केभ्यश्च०।। ॐ उदुत्तमं० इदंवरुणायादित्यायादितये०।। ।। अथराष्ट्रभृद्धोमः।। ॐ ऋताषाडृतधामाग्निर्गन्धर्वः सनऽइदम्ब्रह्मक्षत्रम्पातुस्मैस्वाहावाट्।। इदमृतासाहेऋतधाम्नेऽग्नयेगंधर्वायनमम।। ॐऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोप्सरसोमुदोनामताभ्यः स्वाहा।। इदमोषधीभ्योप्सरोभ्योमुद्भ्यो नमम।। ॐ सꣳहितोव्विश्वसामासूर्योगन्धर्वः सनइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहावाट्।। इदं सꣳहितायविश्वसाम्नेसूर्यायगंधवर्वाय नमम ॐ सꣳहितो विश्वसामासूर्योगन्धर्वस्तस्यमरीचयोप्सरसऽआयुवोनाम ताभ्यः स्वाहा।। इदंमरीचिभ्योप्सरोभ्यआयुभ्योनमम।। ॐ सुषुम्णः सूर्य्यरश्मिश्चन्द्रमागन्धर्वः सनइदंम्ब्रह्मक्षम्पातुतस्मैस्वाहावाट्।। इदंसुषुम्णायसूर्यरश्मयेचन्द्रमसेगन्धर्वायनमम।। ॐसुषुम्णः सूर्य्यरश्मिश्चन्द्रमागन्धर्वस्यनक्षत्राण्यप्प्सरसोभेकुरयोनामताभ्यः स्वाहा।। इदंनक्षत्रेभ्योप्सरोभ्योभेकुरिभ्योनमम।। ॐइषिरोव्विश्वव्यचाव्वातोगन्धर्वःसनऽइदंब्रह्मक्षत्रम्पातुतस्मैस्वाहाव्वाट्।। इदमिषिरायविश्वव्यचसेवातायगन्धर्वायनमम।। ॐ इषिरोव्विश्वव्यचाव्वातोगन्धर्वस्तस्यापोप्सरसऽऊर्ज्जोनामताभ्यःस्वाहा।। इदमद्भ्योप्सरोभ्यऽऊर्ग्भ्योनमम।। ॐभुज्युः सुपर्णोयज्ञोगन्धर्वः सनइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहाव्वाट्।। इदंभुज्यवेसुपर्णाय यज्ञायगन्धर्वायनमम।। ॐ भुज्युः सुपर्णोयज्ञोगन्धर्वस्तस्यदक्षिणाऽप्सरसस्तावानामताभ्य स्वाहा।। इदंदक्षिणाभ्योप्सरोभ्यस्तावभ्योनमम।। ॐ प्रजापतिर्व्विश्वकर्मामनो गन्धर्वः सनइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहाव्वाट्।। इदंप्रजापतयेविश्वकर्मणेमनसेगन्धर्वायनमम।।

ॐ प्रजापतिर्व्विश्वकर्मामनोगन्धर्वस्तस्यऋक्सामान्यप्स रसऽएष्टयो-नामताभ्यः स्वाहा।। इदमृक्सामेभ्योप्सरोभ्यऽएष्टिभ्योनमम।। ।। अथजयाहोमः।। ॐ [60]चित्तंचस्वाहा।। इदंचित्तायनमम।। ॐ चित्तिश्च०।। इदंचित्यै०।। ॐ आकूतंच०।। इदमाकूताय०।। ॐ आकूतिश्च०।। इदमाकूत्यै०।। ॐविज्ञातंच०।। इदंविज्ञाताय०।। ॐ विज्ञातिश्च०।। इदंविज्ञात्यै०।। ॐमनश्च०।। इदंमनसे०।। ॐशक्करीश्च०।। इदंशक्करीभ्यो०।। ॐ दर्शश्च०।। इदंदर्शाय०।। ॐ पौर्णमासंच०।। इदंपौर्णमासाय०।। ॐ बृहच्च०।। इदंबृहते०।। ॐ रथंतरंच०।। इदंरथंतराय०।। ॐप्रजापतिर्जयानिन्द्रायवृष्णे प्रायच्छदुग्रः पृतनाजयेषु।। तस्मैव्विशः समनमन्तः सर्वाः सऽउग्रः सऽइहव्योबभूवस्वाहा।। इदम्प्रजापतयेजयानिन्द्राय०।। ।। अथाभ्यातानहोमः।। ॐ [61]अग्निर्भूतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्याम्पुरोधायामस्मिन्कर्मण्यस्यान्देवहूत्या ँ स्वाहा।। इदमग्नयेभूतानामधिपतयेनमम।। ॐ इन्द्रोज्येष्ठानाम-धिपतिः समावत्वस्मिन्ब्रह्म०।। इदमिन्द्रायज्येष्ठानामधितपये०।।[60] यमः पृथिव्याऽअधिपतिः समावत्वस्मिन्ब्रह्म०।। इदंयमायपृथिव्या-अधिपतये०।। ॐवायुरन्तरिक्षस्याधिपतिः समावत्वस्मिन्ब्रह्म० इदंवायवेन्तरिक्षस्याधिपतये०।। ॐ सूर्योदिवोधिपतिः समावत्वस्मिन्ब्रह्म०।। इदं सूर्यायदिवोधितये०।। ॐ चन्द्रमा-नक्षत्राणामधिपतिः समावत्वस्मिन्ब्रह्म० ।। इदंचन्द्रमसेनक्षत्रामधि-पतये०।। ॐ बृहस्पतिर्ब्रह्मणोधिपतिः समावत्वस्मिन्ब्रह्म०।। इदंबृहस्पतयेब्रह्मणोधिपतये०।। ॐ मित्रः सत्यानामधिपतिः समावत्वस्मिन्ब्रह्म०।। इदंमित्रायसत्यानामधिपतये०।। ॐ वरुणोपामधिपतिः समावत्वस्मिन्ब्रह्म०।। इदंवरुणायापामधिपतये०।। समुद्रः स्रोत्यानामधिपतिः समावत्वस्तिन्ब्रह्म०।। इदं समुद्रायस्रोत्या-नामधिपतये।। ॐ अन्नँ साम्राज्यानामधिपतिः समावत्वस्मिन्ब्रह्म०।।

इदमन्नायसाम्राज्यानामधिपतये०।। ॐ सोमऽओषधीनामाधिपतिः समावत्वस्मिन्ब्रह्म०।। इदंसोमायौषधीनामधिपतये०।। ॐ सविताप्रसवानामधिपतिः समावत्वस्मिन्ब्रह्म०।। इदंसवित्रेप्रसवानामधिपतये०।। ॐ रुद्रः पशूनामधिपतिः समावत्वस्मिन्ब्रह्म०।। इदंरुद्रायपशूनामधिपतये०।। उदकस्पर्शनं।। ॐ त्वष्टारूपाणामधिपतिः समावत्वस्मिन्ब्रह्म०।। इदंत्वष्ट्रेरूपाणामधिपतये०।। ॐ विष्णुः पर्वतानामधिपतिः समावत्वस्मिन्ब्रह्म०।। इदंविष्णवे पर्वतानामधिपतये०।। ॐ मरुतोगणानामधिपतयः स्तेमावन्त्यवस्मिन्ब्रह्म० इदंमरुद्भ्योगणानामधिपतिभ्यो०।। ॐ पितरः पितामहाः परेवरेततास्तततामहाः।। इहमावत्वस्मिन्ब्रह्म०।। इदंपितृभ्यः पितामहेभ्यः परेभ्योवरेभ्यस्ततेभ्यस्तततामहेभ्यश्च०। उदकोपस्पर्श।। ।। इत्यभ्यातानहोमः।। [63]अथाग्निरित्यादिपंचकं।। ॐ अग्निरैतुप्रथमोदेवताना ँ् सोस्यैप्रजां मुंचतुमृत्युपाशात्।। तदय ँ् राजावरुणोनमन्यतांयथेय ँ् स्त्रीपौत्रमघन्नरोदात्स्वा०।। इदमग्नये०।। ॐ इमानग्निस्त्रयतांगार्हपत्यः प्रजामस्यैनयतुदीर्घमायुः।। अशून्योपस्था जीवतामस्तुमातापौत्रमानंदमभिविबुध्यतामिय ँ् स्वा०।। इदमग्नये०।। ॐ स्वस्तिनोऽअग्नेदिवापृथिव्याव्विश्वानिधेह्ययथायजत्र।। यदस्यांमयिदिविजातं प्रशस्तंतदस्मासुद्रविणन्धेहिचित्र ँ् स्वा०।। इदमग्नये०।। ॐ सुगन्नुपंथांप्रदिशन्नएहिज्योतिष्मध्येह्यजरन्नऽआयुः।। अपैतुमत्युरमृतंमआगाहैवस्वतोनोऽअभयंकृणोतुस्वा०।। इदंवैरवरवताय०।। वध्वग्न्योरंतरालेतूष्णींवस्त्रपटं कृत्वा।। ॐ परंमृत्योऽअनुपरेहिपंथांयस्तेऽअन्यइतरोदेवयानात्।। चक्षुष्मतेशृण्वतेतेब्रवीमिमानः प्रजा ँ् रीरिषोमोतवीरान्स्वाहा।। इदंमृत्यवे०।। उदकोपस्पर्शः।। [64]एकेप्राशनांते।। ।। अथलाजाहोमः।। कुमार्याभ्राताशमीपलाशमिश्रानासादितशूर्पस्थान्लाजानंजलिनांजलावावतितान्जुहोतिस ँ् हेतन[65]तिष्ठत्यग्नौवधूरर्यमणमित्यादि-

त्रिभिर्मंत्रैस्त्रिवारं।। ॐ अर्यमणंदेवं कन्याऽअग्निमयक्षत।। सनोऽअर्यमादेवः प्रेतोमुंचंतुमापतेःस्वा०।। [66]इदमर्यमणे० अनेननमंत्रेणप्रथमां।। ॐ इयन्नार्जुपब्रूतेलाजानावपंतिका।। आयुष्मानस्तुमेपतिरेधन्तांज्ञातयोममस्वा०।। इदमग्नये०।। अनेनमंत्रेण द्वितीयां।। ॐ इमान्लाजानावपाम्यग्नौसमृद्धिकरणंतव।। ममतुभ्यसंवननंतदग्निरनुमन्यतामियँ स्वा०।। अनेनमंत्रेणतृतीयां।। मंत्रत्रयंकन्यैवपठति।। [67]अथास्यैदक्षिणँ हस्तंवरोगृह्णातिसांगुष्ठं-गृह्णामितेत्यादिचतुर्भिर्मन्त्रैः।। ॐ गृभ्णामिते सौभगत्वायहस्तं-मयापत्याजरदष्टिर्यथासः।। भगोऽअर्यमासवितापुरंधिर्म-ह्यंत्वादुर्गार्हपत्यायदेवाः।। अमोहमस्मिसात्वँ सात्वमस्यमोअहं।। समाहमस्मिऽऋक्त्वं द्यौरहंपृथिवीत्वं। तावेवविवहावहैसहरेतो-दधावहै।। प्रजांप्रजनयावहैपुत्रान्विद्यावहैबहून्।। तेसंतुजरदष्टयः संप्रियौश्रोचिष्णूसुमनस्यमानौ।। पश्येमशरदः शतञ्जीवेमशरदः शतँ शृणुयामशरदःशतम्।। इतिमंत्रपाठोवरस्य।। [68]अथैनामश्मानमा-रोहयतिदक्षिणपादेनोत्तरस्थापितमारोहेममश्मानमिति।। ॐ आरोहेममश्मानमश्मेवत्वस्थिराभव।। अभितिष्ठपृतन्यतोवबाध-स्वपृतनायतः।। इतिमंत्रपाठोवरस्य।। अथाश्मन्यारूढायांकुमार्यां-वरोगाथांगायति।। ॐ सरस्वतिप्रेदमवसुभगेव्वाजिनीवति।। यान्त्वाव्विशवस्यभूतस्यप्रजायामस्याग्रतः।। यस्यांभूतँ समभव-द्यस्याम्विश्वमिदंजगत्।। तामद्यगाथांगास्यामियास्त्रीणामुत्तमयशः।। इत्यंतं।। अथव[69] धूमग्रतःकृत्वोभौवधूवरावग्नेः प्रदक्षिणंक्रामतस्तुभ्य-मग्नेपर्यवहन्नितिवरपठितमंत्रेण।। ॐ तुभ्यमग्नेपर्यवहन्निति-वरपठिमंत्रेण।। ॐ तुभ्यमग्नेपर्यवहन्त्सूर्यांवहतुनासह।। पुनः पतिभ्योजायांदाग्नेप्रजयासह।। तत एवंलाजावपनादि परिक्रमणान्तं-पुनर्वारद्वयंकर्मकुर्यात्।। ततस्तृतीयपरिक्रमणानंतरंशूर्पकोणप्रदेशेन-कुमार्याभ्राताकुमार्यंजलौसर्वांलाजानावपति।। ततस्तिष्ठतिसासर्वांल्ला-

जाज्जुहोतिमंत्रंकन्यैपठति।। ॐ भगायस्वा०।। इदंभगाय०।। अत्रसमाचारात्तूष्णींचतुर्थपरिक्रमणंकुरुतः।। नेतरथावृत्तिः।। प्राग्वदुपविश्य वरोब्रह्मान्वारब्धः।। ॐ प्रजापतयेस्वा०।। इदंप्रजापतये०।। ।। अथवरएनांवधूमग्नेरुत्तरतउदङ्मुखींएकमिष-इत्येतैः सप्तमंत्रैः सप्तपदानिप्रक्रमणं कारयति।। मंत्रपाठोवरस्य।। अत्रायंशिष्टाचारः।। वेदीमारभ्योत्तरहस्तांतराले धान्यसप्ताचला-न्कृत्वावरः देशकालौसंकीर्त्यममगृहीतकन्यापतित्वसिद्धये सप्ताचलपूजनंकरिष्ये।। ॐ प्रतिपदसिप्रतिपदेत्वानुपदस्यनुप-देत्वासंपदसिसंपदेत्वातेजोसितेजसेत्वा।। इतिगंधाद्युपचारैः संपूज्यवरः सप्तपदानिप्रक्रमस्वेतिप्रैषंकुर्यात्।। ॐ एकमिषेविष्णु-स्त्वानयत्वितिवरोक्तेवधूर्दक्षिणैकपदमुदक्धान्याचलेदद्यात्।। एवंसर्वत्र।। ॐ द्वेऽऊर्ज्जेविष्णुस्त्वानयत्वितिद्वितीयं।। ॐ त्रीणिरायस्पोषायविष्णुस्त्वानयत्वितितृतीयं।। ॐचत्वारिमायोभवाय-विष्णुस्त्वानयत्वितिचतुर्थं।। ॐ पंचपशुभ्योविष्णुस्त्वानयत्वि-तिपंचमं।। ॐ षड्तुभ्योविष्णुस्त्वानयत्वितिषष्ठं।। ॐ सखेसप्तपदाभव सामामनुव्रताभवविष्णुस्त्वानयत्वितिसप्तमं।। केचिदत्रप्रतिपदंवधूः प्रतिज्ञावचनंपठेदित्याहुः।। तद्यथा।। त्वत्तोमेखिलसौभाग्यंपुण्यैस्त्वंविविधःकृतैः।। देवैः संपादितोमह्यं-वधूराद्येपदेऽब्रवीत्।। कुटुम्बंपालयिष्यामिह्यावृद्धबालकादिकं।। यथालब्धेनसंतुष्टा ब्रूतेकन्याद्वितीयके।। मिष्टान्नव्यञ्जनादीनि-कालेसम्पादयेतव।। आज्ञासम्पादिनीनित्यंतृतीयेसाब्रवीद्वरम्।। शुचिः शृङ्गारभूषाहंवाङ्मनःकायकर्मभिः।। क्रीडिष्यामित्वयासार्द्धंतुरीये-सावदेद्वरं।। दुःखेधीरासुखेहृष्टासुखदुःखविभागिनी।। नाहंपरत-रंगच्छेपंचमेसाब्रवीद्वरम्।। सुखेनसर्वकर्माणिकरिष्यामिगृहेतव।। सेवांश्वशुरयोश्चापि बन्धूनांसत्कृतिंतथा।। यत्रत्वं वा अहं तत्र नाहं वञ्चेप्रियं क्वचित्।। नाहंप्रियेणवञ्च्याहिकन्याषष्ठेपदेऽब्रवीत्।।

होमयज्ञादिकार्येषुभवामिचसहायकृत्।। धर्मार्थकामकार्येषुमनो वृत्तानुसारिणी।। सर्वेत्रसाक्षिणस्त्वंमेपतिर्भूतोसिसांप्रतम्।। देहोम-यार्पितस्तुभ्यंसप्तमेसाब्रवीद्वरमिति।। अथनिष्क्रमणमारभ्य कश्चित्पुरुषस्कंधधृतोदकुंभाद्धस्तेनजलमादायएनांवधूशिरसिवर-एवआपः शिवाइत्यनेनमंत्रेणाभिषिंचति।। आपोहिष्ठेतित्रिभिर्मंत्रैश्च।। ॐ आपः शिवाः शिवतमाः शांताः शांततमास्तास्ते-कृण्वन्तेकृण्वन्तुभेषजम्।। आपोहिष्ठा० योवं शिव०।। तस्माऽअरंङ्ग०।। ततोदिवाविवाहश्चेद्वरः सूर्यमुदीक्षस्वेतिवधूंप्रेरयति।। साचतच्चक्षुरित्यादिशरदः शतमित्यंतस्वपठितमंत्रेणसूर्यमुदीक्षते।। ॐ तच्चक्षुर्देवहितं०।। तत्तोवरोवध्वादक्षिणस्कंधोपरिहस्तं नीत्वाममव्रतेतिस्वपठितमंत्रेणतस्याहृदयमालभते।। ॐ ममव्रतेतेहृदयं-दधामिममचित्तंतेअस्तु।। ममवाचमेकमनाजुषस्वप्रजापति-ष्ट्वानियुनक्तुमह्यं।। ततोवरोवधूमभिमंत्रयतेसुमंगलीरितिस्वपठितमंत्रेण।। ॐसुमंगलीरियंवधूरिमा ँ समेतपश्यत।। सौभाग्यमस्यैदत्वा-याथास्त्वंविपरेतन।। अत्राचाराच्चतस्त्रस्त्रियो मंगलंकुर्वंति।। तथाचकारिकायां।। पतिपुत्रान्विताभव्याश्चतस्त्रः सुभगाअपि।। सौभाग्यमस्यैद्युस्तामंगलाचारपूर्वकमिति।। अत्रचवध्वाः सीमंतेवरः सिंदूरंददाति।। ततोवधूंवरस्यवामभागेउपवेशयति।। ॐ व्वाममद्यसवितर्व्वाममुश्वोदिवेदिवेव्वाममस्मभ्यं ँ सावीः।। व्वामस्यहिक्षयस्यदेवभूरेरयाधियाव्वामभाजस्याम।। ततस्तांदृढपुरुषोन्मथ्याग्नेः प्राग्वोदग्वानुगुप्तआगारेप्राग्ग्री वमुत्तरलोमास्तीर्णेरोहितेआनडुहचर्मण्युपवेशयतीहगावइति।। ॐइहगावो निषीदंत्विहाश्वाऽइहपूरुषाः।। इहोसहस्रदक्षिणो-यज्ञऽइहपूषानिषीदतु।। इतिमंत्रपाठोदृढपुरुषस्य।[70] ततआगत्यपूर्ववद्य-थसास्थानमुपविश्वब्रह्मान्वारब्धोवरः स्विष्टकृतंजुहोति।। ॐ अग्नयेस्विष्टकृतेस्वा०।। इदमग्नयेस्विष्टकृते०।। ततःसंस्रवप्राशनं।।

पवित्राभ्यांमार्जन।। पवित्रप्रतिपत्तिः।। पूर्णपात्रदानं।। अस्य होमस्यसांगतासिध्यर्थंब्रह्मन्निदंपूर्णपात्रंतुभ्यमहंसंप्रददे।। ॐ स्वस्तीत्युक्त्वाद्यौस्त्वाददात्वितिपठेत्।। ततः स्वकीयाचार्यायगांददा–तिब्राह्मणश्चेद्वरः।। क्षत्रियश्चेदाचार्याय ग्रामंददाति।। वैश्यश्चेदाचार्या–याश्वंददाति। [71]अत्राग्रांमवचनंचकुर्युर्विवाहश्मशानयो रित्यनेनयथा–कुलाचारंतिलककरणादिकुर्यात्।। ततोस्तमितेध्रुवंदर्शयतिदिवा–विवाहश्चेद्रात्रौचेत्तदावरदानानंतरंध्रुवमसीति।। तत्रवरोवधूंप्रेषयति–ध्रुवमीक्षस्वेति।। साचस्वपठितमंत्रेण पश्यति।। ॐ ध्रुवमसिध्रु–वंत्वापश्यामिध्रुवैधिपोष्येमयिमह्यंत्वादात्।। बृहस्पतिर्मयापत्या–प्रजावतीसंजीवशरदः शतमिति।। सायदिध्रुवंनपश्येत्तदापश्यानीत्ये–वब्रूयात्।। ।। ततोविवाहदिनमारभ्यदंपत्योर्नियमाः।। त्रिरात्रम–क्षारालवणाशिनौस्यातां। त्रिरात्रमधः शयीयातां।। संवत्सरंनमिथुन–मुपेयातां द्वादशरात्रँ षड्रात्रंत्रिरात्रमंततः।। ।। कृतस्यविवाहाख्यस्य–कर्मणः सांगतासिध्यर्थंशतसंख्याकान्ब्राह्मणान्भोजयिष्ये।। ततो–गंधादिभिः ब्राह्मणान्संपूज्यतेषामाशिषोगृह्णीयात्।। ।। अथाशीर्वादमंत्राः।। ।। ॐ व्विवस्वन्नादित्यैषतेसोमपीथस्तस्मि–न्मत्स्व।। श्रदस्मैनरोव्वचसेदधातनुयदाशीर्दादम्पतीव्वाममश्नुतः।। पुमान्पुत्रोजायतेव्विंदतेव्वस्वधाव्विश्वाहारपएधतेगृहे।। अग्नेप्प्रेहिं प्प्रथमोदेवयताञ्चक्षुर्देवानामुतमर्त्यानाम्।। इयक्षमाणाभृगुभिः–सजोषाःस्वर्य्यन्तु यजमानाःस्वस्ति।। व्विश्वानिदेवसवितर्दुरितानि–परासुव।। यद्भद्रंतन्नऽआसुव।। ॐयद्वैवैतद्वाजप्रसवीयंजुहोति।। एताहदेवताः सुताऽएतेनसवेनयेनैतत्सोत्सोष्यमाणोभवतिताऽ–एवैतत्प्रीणातिताऽअस्माऽइष्टाः प्रीताऽएतँ सवमनुमन्यन्तेताभिरनुमतः सूयतेयस्मैवैराजानोराज्यमनुमन्यन्तेसराजाभवति।। अथातोराष्ट्र–भृतोजुहोति।। राजातोवैराष्ट्रभृतस्तेहिराष्ट्राणिबिभ्रत्येताहदेवताः सुताऽएतेनसवेनयेनैतत्सोष्यमाणोभवतिताऽएवैतत्प्रणातिताऽअस्माऽइष्टा–

प्रीताऽएतः सचमनुमन्यन्तताभिरनुमतसूयतेयस्मैवैराजानोराज्यमनु-
मन्यन्तेस राजाभवति।। अथरथशीर्षेजुहोति।। एषवैससवऽएत-
द्वैतत्सूयतेयस्मैतमेतादेवताः सवमनुमन्यन्तेयाभिरनुमतः सूयतेयस्मैवै-
राजानोराज्यमनुमन्यन्तेसराजाभवति।। तत्वैदेवस्वामेव।। एतानिहवी
ँ षिनिर्वपेदेताहदेवताःसुताऽएतेनसवेनयेनैतत्सोष्यमाणोभवतिताऽ-
एवैतत्प्रीणातिताऽअस्माऽइष्टाः प्रीताऽएत ँ सवमनुमन्येतेताभिरनुमतः
सूयतेस्मैवैराजनोराज्यमनुमन्यन्तेसराजायभवति।। अथराजानमभिषु-
त्याग्नौजुहोति।। एषवैससवऽएतद्वैतत्सूयतेयमस्मैतमेतादेवतासवमनु-
मन्यन्तेयाभिरनुमतः सूयतेयस्मैवैराजानो राज्यमनुमन्यन्तेसराजाभवति।।
शतमानंभवति।। शतायुर्वै पुरुषः शतेन्द्रियऽआयुरेवेन्द्रियँवीर्यमात्म-
न्धत्ते।। उक्ताशीरस्तु।। उभयोर्वंशाभिवृद्धिरस्तु।। कृतंकर्मेश्वरार्पण-
कुर्यात्।। इतिसंस्कारभास्करेविवाह होमप्रमोगः समाप्तः।। ।।
अथ शिष्टाचारप्राप्तमैरिणीदानम्।। ।। तच्चविवाहाच्चतुर्थदिनरात्रौ-
तत्रभद्रादिसत्वेदिनएववावधूपितृभ्यामुपोषिताभ्यामुपोषितायैव-
वरमात्रेकार्यं।। वरमातूरजोदोषेतस्याः शुद्धिप्रतीक्षाकरणासंभवेमन-
सापात्रमुद्दिश्येतिरीत्यातांमनसौद्दिश्यैरिणीदानं।। ।। अथऐरिणी-
स्वरूपं।। वंशपात्रमिहैकंचशूर्पैः षोडशभिर्युतं।। सवस्त्रफलतांबूलदं-
पत्योर्वंशवर्द्धनं।। ऐरिण्याख्यंवंशपात्रंपक्वान्नैः परिपूरितं।।
करकैरुद्रसंख्याकैः सुवर्णपरिपूरितैः एतावदैरिणीरूपंकर्तव्यंकिल-
सूरिभिरिति।। ।। एवमुक्तरूपामैरिणींसंपाद्य।। सभार्यः कन्यापिता-
मंडपमध्येप्राङ्मुखउपविश्वस्वाग्रे ऐरिण्याख्यंवंशपात्रंस्था-
पयित्वातदग्रेवस्त्रास्तृतपीठादौवधूवरौपश्चिमाभिमुखावुपवेशयेत्।।
भर्तृसहितांवरमातरंपीठादावुदङ्मुखीमुपवेशयेत्।। ततआचम्यप्राणा-
नायम्यदेशकालौस्मृत्वामयाचतुर्भिरहोभिर्निष्पादितविवाहस्यसंपूर्णफल-
प्राप्तयेवरस्यतत्पितृमात्रादीनांतत्पक्षीयाणांचयथाविभवंवस्त्रादिभिः
पूजनमहंकरिष्यइतिसंकल्प्यवरस्यतत्पितृमातृभ्रात्रादिभ्यः क्रमेण-

यथाविभवंपट्टदुकूलवस्त्रादिदत्वा पुनस्तिथ्यादिसंकीर्त्य-
ममोमामहेश्वरप्रीतिद्वाराकन्यादानस्यसंपूर्ण फलावाप्त्यर्थवंशाभि-
वृद्ध्यर्थंचऐरिणीपूजनंवरमात्रेऐरिणीदानंचकरिष्ये।। तत्रनिर्विघ्नता-
सिध्यर्थंगणपतिपूजनंकरिष्ये।। इतिकृत्वा।। ऐरिणित्वमुमादेवी-
तवेशोगिरिजापतिः।। अतस्त्वांपूजयिष्यामिऐरिणींसर्वकाम-
दामितिमंत्रेणश्रीश्चतेतिमंत्रेणवाऐरिणीस्वरूपिणावुमामहेश्व-
रौषोडशोपचारैरभ्यर्च्यप्रार्थयेत्।। ऐरिणीत्वमुमादेवीवंश-
पात्रस्वरूपिणी।। कन्यादानस्यसंपूर्णफलंदेहिशिवप्रिये।।
यावच्चद्रश्चसूर्येश्चयावत्तिष्ठतिमेदिनी।। तावद्धिवंशवृद्धित्वंदेहिमे
शंकरप्रिये।। इतिसंप्रार्थ्य।। अनयापूजयाउमामहेश्वरौप्रियेतां।।
ततोवरमातृहस्तेशिवाआपः संत्वित्यादिकृत्वाऐरिणींप्रदद्यात्।।
तत्रमंत्रः।। वंशोवंशकरः श्रेष्ठोवंशसमुद्भवः।। अनेन वंशदानेनश्री-
शोऋद्धिंकरोतुमे।। वंशपात्रमिदं पुण्यवंशजातिसमुद्भवं।। वंशानामुत्तमं
दानमतः शांतिंप्रयच्छमे।। वंशपात्राणिसर्वाणिमयासंपादितानिवै।।
उमाकांतायदास्या मिममगोत्राभिवृद्धये।। वंशवृद्धिकरंदानंसौभाग्या-
दिसमन्वितं।। वस्त्रोणाच्छादितंपूगफलहेमसन्वितं।।
नानापक्वान्नसंयुक्तंदंपत्योर्वंशवर्द्धनं।। सदक्षिणंसदीपंचशूर्पैः-
षोडशभिर्वृतं।। सर्वपापक्षयकरंनानाद्रव्यैस्तुपूरितं।।
वरमात्रेप्रयच्छामिकन्यादानस्यसिद्धये।। दानानामुत्तमंदानमतः
शांतिंप्रयच्छमे।। इदमैरिणीवंशपात्रंयथाशक्तिदक्षिणासहितंव-
रमात्रेतुभ्यमहंसंप्रददे।। अनेनऐरिण्याख्यवंशापात्रदानेनोमामहेश्व-
रौप्रियेतांनमम।। ततः प्रार्थयेत्।। यच्छक्त्याविहितंस्व-
गृह्यकथितैर्मंत्रैश्चपौराणिकैर्दानंवस्त्रजलान्नचंदनदलाद्यंवा-
चतुर्भिर्दिनैः।। दंपत्योर्ममवंशवृद्धिमनघां दद्याद्द्यादुमाशंकरोन्यूनं-
तत्कृपयाखिलं सफलतांयातुद्विजानांनतिः। ततोवधूगोत्रजास्तत्-
ऐरिणीवंशपात्रंगृहीत्वावरगोत्रजादीनांशिरसिधारयेयुः।। ॐ

घृतवतीभुवनानामभिश्रियोर्वीपृथ्वीमधुदुघेसुपेशसा।। द्यावा पृथिवीव्वरुणस्यधर्मणाविष्कंभितेऽअजरेभूरिरेतसा।। इति मंत्रेणत्रि-वारं।। ।। ततः कन्यानिवेदनं।। ।। अष्टवर्षाइयंकन्यापुत्रवत्पालि-तामया।। इदानींतवपुत्राय दत्तास्नेहेनपाल्यतां।। अनेनवरपितुरु-त्संगेदद्यात्।। ततउत्थाप्य।। अस्मदादि सुहृद्वंधून्त्यक्त्वा याति-भवद्गृहं।। अतिस्नेहेनमातेवकन्यांमेपरिपालय।। अनेनवरमातुरु-त्संगद्यात्।। तत उत्थाप्य।। इयंकन्यामयादत्तातवविप्रसहायिनी।। स्वदेशेपरदेशेवाविधिवत्परिपालय।। इतिमंत्रेणवरहस्तेकन्यांनिवेद-येत्।। ।। इत्यैरिणीदानम्।। ।। अथवधूप्रवेशनिर्णयः।। ।। वधू-प्रवेशः प्रथमेतृतीयेशुभप्रदःपंचमकेथवाह्नि।। द्वितीयकेचाथचतुर्थ-केवाषष्ठेवियोगामयदुःखदः स्यादिति।। विवाहात्षोडशदिनांतः समदिनेषुपंचमसप्तमनवमदिनेषुचरात्रौस्थिरलग्नेनूतनभिन्नगृहेवधू-प्रवेशः शुभः।। प्रथमदिनेपिक्वचित्।। षष्ठदिनेनिषेधस्तुप्रयोग-रत्नोक्तोनिर्मूलः।। षोडशदिनमध्येपूर्वोक्तदिनेषु प्रवेशोक्त-नक्षत्रतिथिवारगोचरस्थचंद्रबलाद्यभावेपिगुरुशुक्रास्तादावपिनदोष इतिसिंधुः।। लल्लोपि।। स्वभवन पुरप्रवेशेदेशानांविप्लवेतथोद्वाहे।। नववध्वागृहगमनेप्रतिशुक्रविचारणानास्तीति।। हेमसमन्वितं।। नानापक्वान्नसंयुक्तं दंपत्योर्वंशवर्द्धनं।। सदक्षिणंसदीपंचशूर्पैः षोडशभिर्वृतं।। सर्वपापक्षयकरंनानाद्रव्यैस्तुपूरितं।। वरमात्रे-प्रयच्छामिकन्यादानस्यसिद्धये।। दानानामुत्तमंदानमतः शांतिंप्रयच्छमे।। इदमैरिणीवंशपात्रंयथाशक्तिदक्षिणासहितंवरमात्रेतुभ्यमहंसंप्रददे।। अनेनऐरिण्याख्यवंशपात्रदानेनोमामहेश्वरौप्रियेतांनमम।। ततः प्रार्थयेत्।। यच्छक्त्याविहितंस्वगृह्यकथितैर्मंत्रैश्चपौराणिकैर्दानंवस्त्रजलान्न-चंदनदलाद्यंवाचतुर्भिर्दिनैः।। दंपत्योर्ममवंशवृद्धिमनघांदद्यादु-माशंकरोन्यूनंतत्कृपयाखिलं सफलतांयातुद्विजानांनतिः।। ततो-वधूगोत्रजास्तत् ऐरिणीवंशपात्रंगृहीत्वावरगोत्रजादीनांशिरसिधारयेयुः।।

ॐ घृतवतीभुवनानामभिश्रियोर्वीपृथ्वीमधुदुघेसुपेशसा।। द्यावा पृथिवीव्वरुणस्यधर्मणा विष्कंभितेऽअजरेभूरिरेतसा।। इतिमंत्रेणत्रि-वारं।। ।। ततः कन्यानिवेदनं।। ।। अष्टवर्षाइयंकन्यापुत्रवत्पालिता-मया। इदानींतवपुत्रायदत्तास्नेहेनपाल्यतां।। अनेनवरपितुरुत्संगेदद्यात्। ततउत्थाप्य।। अस्मदादिसुहृद्बंधून्त्यक्त्वा यातिभवद्गृहं।। अतिस्नेहेनमातेवकन्यांमेपरिपालय।। अनेनवरमातुरुत्संगे दद्यात्।। तत उत्थाप्य।। इयंकन्यामयादत्तातवविप्रसहायिनी।। स्वदेशेपरदेशे वाविधिवत्परिपालय।। इतिमंत्रेणवरहस्तेकन्यांनिवेदयेत्।। ।। इत्यैरिणी दानम्।। ।। अथवधूप्रवेशनिर्णयः।। ।। वधूप्रवेशः प्रथमेतृतीयेशुभप्रदः पंचमकेथवाह्नि।। द्वितीयकेचाथचतुर्थ-केवाषष्ठेवियोगामयदुःखदःस्यादिति।। विवाहात्षोडशदिनांतः समदिनेषुपंचमसप्तमनवमदिनेषुचरात्रौस्थिरलग्नेनूतनभिन्नगृहेवधू-प्रवेशः शुभः।। प्रथमदिनेपिक्कचित्।। षष्ठदिनेनिषेधस्तुप्रयोगरत्नोक्तो-निर्मूलः।। षोडशदिनमध्येपूर्वोक्तदिनेषुप्रवेशोक्तनक्षत्रतिथि-वारगोचरस्थचंद्रबलाद्य भावेपिगुरुशुक्रास्तादावपिनदोषइतिसिंधुः।। लल्लोपि।। स्वभवन पुरप्रवेशेदेशानांविप्लवेतथोद्वाहे।। नववध्या-गृहगमनेप्रतिशुक्रविचारणानास्तीति।।

मांडव्यः।। नित्ययानेगृहेजीर्णेप्राशनान्तेषुसप्तसु।। वधूप्रवे-शमांगल्येन मौढ्यंगुरुशुक्रयोरिति।। ।। गर्गः।। व्यतिपातेक्षयति-थौग्रहणेवैधृतौतथा।। अमासंक्रातिविष्ट्यादौ प्राप्तकालेपिनाचरेदिति।। ।। तत्रवरः जायापितृगृहात्ज्योतिर्विदादिष्टशुभकालेवधूं गृहीत्वाशुभ-यानोपविश्यमंगलतूर्यघोषैरानोभद्राइत्यादिसुमंगलसूक्तपठनपरै-राचार्यादिब्राह्मणैर्मंगलगीतपठनपरैः पुरंध्रिभिश्चसहस्वगृहमाग-त्यशुभपीठादावासनेप्राङ्मुखमुपविश्यस्व दक्षिणतः वधूमुपवेशयेत्।। देशकालौसंकीर्त्यममास्याः नवोढाभार्यायाः प्रथमगृहप्रवेशंकरिष्ये।। तत्रादौनिर्विघ्नतासिध्यर्थंगणपतिपूजनंतदंगत्वेन स्वस्ति-

पुण्याहवाचनंचकिरष्ये।। गणानात्वेतिमंत्रेणगपतिंषोडशोपचारै-
रभ्यर्च्यस्वस्तिवाचयित्वाअन्यद्यथाकुलाचारप्रयुक्तंकर्मकृत्वाब्राह्मणान्-
गंधवस्त्रादिभिश्चसंपूज्यतेषामाशिषोगृहीत्वागृहं प्रविशेत्।। ।। इति-
वधूप्रवेशः।। ।। अथचतुर्थीकर्म।। ।। तत्रपारस्करः।। चतुर्थ्यामपर-
रात्रेभ्यन्तरतोग्निमुपसमाधायदक्षिणतोब्रह्माणमुपवेश्योत्तरतउदपात्रं-
प्रतिष्ठाप्यस्थालीपाकँ श्रपयित्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोतीत्यादि।।
विवाहाद्याचतुर्थीतिथिस्तस्यामपररात्रेअंतिमप्रहरेअभ्यंतरतः गृहमध्ये
अग्निमुपसमाधायपंचभूसंस्कारपूर्वकं वैवाहिकाग्निस्थापयित्वा-
अग्नेर्दक्षिणतोब्रह्मासनमास्तीर्यतत्र ब्रह्माणमुपवेश्यअग्नेरुत्तरतः
प्रणीतास्थलंत्यक्त्वाउदकयुक्तंपात्रंस्थापयित्वा स्थालीपाकंचरुं-
श्रपयित्वाआज्यभागाविष्ट्वाज्याहुतीर्जुहोत्यग्नेः प्रायश्चित्तइत्येतैः
पंचभिर्मत्रैः पंचेति।। ।। अथप्रयोगः।। ।। विवाहदिवसाच्च-
तुर्थ्यामपररात्रे भार्ययासहमंगलंस्नात्वाहतवाससीपरिधायधृत-
मंगलतिलकः शुभासने उभावुपविशतः।। तत्रदक्षिणतोवधूः।।
ततआचम्यप्राणानायम्यदेशकालौ स्मृत्वाविवाहांगभूतं-
चतुर्थीकर्मकरिष्ये।। तत्रादौनिर्विघ्नतासिध्यर्थं गणपतिपूजनं
करिष्यइतिकृत्वा।। तत्रगृहमध्येस्थंडिलेपंचभूसंस्कारपूर्वकंवै-
वाहिकाग्नेः स्थापनंकुर्यात्।। ततोग्नेर्दक्षिणतः ब्रह्मासनेब्रह्माणमुपवेश्य
अग्नेरुत्तरतः कलशस्थापनविधिनाउदपात्रंस्थापयेत्।। ततउद-
पात्राग्न्योर्मध्येप्रणीताप्रणयनं।। ततः परिस्तरणाद्याज्यभागांतंपूर्ववत्।।
तत आज्येन।। ॐ अग्नयेप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसि-
ब्राह्मणस्त्वानाथकामऽउपधावामियास्यैपतिघ्नीतनूस्तामस्यै-
नाशयस्वा०।।[62]इदमग्नये०।। ॐ वायोप्रायश्चित्तेत्वंदेवानांप्रायश्चित्ति-
रसिब्राह्मणस्त्वानाथकामऽउपधावामियास्यैप्रजाघ्नी तनूस्तामस्यै-
नाशयस्वा०।। इदंवायवे०।। ॐसूर्यप्रायश्चित्तेत्वंदेवानां प्रायश्चि-
त्तिरसिब्राह्मणस्त्वानाथकामऽउपधावामियास्यैपशुघ्नीतनूस्तामस्यै

नाशयस्वा० ।। इदंसूर्याय० ।। ॐ चंद्रप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसि ब्राह्मणस्त्वानाथकामऽउपधावामियास्यैगृहघ्नीतनूस्तामस्यैनाशयस्वा० ।। इदंचन्द्रमसे० ।। ॐगंधर्वप्रायश्चित्तेत्वंदेवनानां-प्रायश्चित्तिरसिब्राह्मणस्त्वानाथकाऽउपधावामियास्यैय-शोघ्नीतनूस्तामस्यैनाशयस्वा० इदंगंधर्वाय० ।। ततः स्थालीपाकेन ।। ॐप्रजापतयेस्वाहा ।। इदंप्रजापतये० ।। ॐअग्नयेस्विष्ट-कृतेस्वा० ।। इदमग्नयेस्विष्टकृते० ।। ततआज्येनभूराद्यानवाहुतयः ।। ततः संस्रवप्राशनं ।। पवित्राभ्यांमार्जन ।। पवित्रप्रतिपत्तिः ।। ब्रह्मणेपूर्णपात्रदान ।। प्रणीताविमोकः ।। ततउदपात्रजलेनवरोवधू मूर्द्धन्यभिषिंचतियातेपतिघ्नीरिति ।। ॐयातेपतिघ्नीप्रजाघ्नीपशुघ्नीनिंदितातनूजारघ्नींततएनांकरोमिसाजीर्यत्वेमयासहासौ ।। असौ-स्थानेनामग्रहणंकरोति वरः अमुकीदेवीति ।। ततोवरःप्राणैस्त-इतिचरुशेषंवधूंप्राशयतिसकृत् ।। ॐ प्राणैस्तेप्राणान्सन्दध-म्यस्थिभिरभिरस्थीनिमाँसैर्माँसानित्वचात्वचात्वचमिति ।। अत्र-वधूः शुद्ध्यर्थमाचामेत् ।। अत्रसमाचाराद्वरोपिकन्याहस्तेन-भोजनंकरोति ।। ततोयथाशक्तिब्राह्मणभोजनंसंकल्प्यब्राह्मणेभ्यो-भूयसींदक्षिणांदत्वातेषामाशिषोगृहीत्वाकर्मेश्वरार्पणंकुर्यादिति ।। अत्र स्त्रियासहभोजनेपिनदोषइत्याह ।। ।। हेमाद्रौप्रायश्चित्तकांडेगालवः ।। एकयानसमारोहएकपात्रेचभोजनं ।। विवाहेपथियात्रायां- कृत्वा-विप्रोनदोषभाक् ।। अन्यथादोषमाप्नोतिपश्चाच्चांद्रायणंचरेदिति ।। मिताक्षरायामप्येवं ।। ।। इतिसंस्कारभास्करेचतुर्थीकर्मप्रयोगः ।।।।

अथदेवकोत्थापनम् ।। तत्रकालः ।। समेचदिवसेकुर्यद्दिवकोत्था-पनंबुधः ।। षष्ठंचविषमंनेष्टंमुक्त्वापंचमसप्तमौ ।। समेषुषष्ठंविषमेषु-पंचमसप्तमातिरिक्तं निषिद्धमित्यर्थः ।। अत्रदिवसगणनास्थापन-दिनात्कार्या ।। उक्तकालेस्व स्वमंडपेयथोक्तरीत्यापत्न्यासहितः स्वासनेउपविश्यवधूवरौचोपवेश्याचम्यप्राणानायम्यदेश-

कालौस्मृत्वाविवाहांगत्वेनस्थापितदेवतानांषोडशोपचारैः पूजनंविसर्जनंमंडपोद्वासनंतदंगत्वेनपुण्याहवाचनंचकरिष्ये।। तत्रादौ– निर्विघ्नतासिध्यर्थंगणपतिपूजनंकरिष्ये।। इति संकल्प्यगणेश– मभ्यर्च्यस्वस्ति वाचयेत्।। अत्रमंडपोद्वासनकर्मणः पुण्याहंभवन्त– इतिवाक्यप्रयोगः।। एवंकल्याणं ऋद्धिस्वस्तिश्रियमिति।। ततः षोडशोपचारैर्मंडपदेवताः पूजयेत्।। तत ॐउत्तिष्ठब्रह्मण– स्पतेदेवयन्तस्त्वेमहे।। उपप्रयन्तुमरुतः सुदानवऽइन्द्रप्राशूर्भवासचा।। उस्रावेतन्धूर्षाहौयुज्येथामनुश्रूऽअवीरहणौ ब्रह्मचोदनौ।। स्वस्तियजमानस्यगृहान्गच्छतम्।। यान्तु मातृगणाः सर्वे– पूजामादायभूतलात्।। ऋद्धिचविपुलांदत्वापुनरागमनायच।। आवा– हितदेवताः स्वस्थानेगच्छतेतिविसृज्याचार्योनंदिन्यादिमंडपमातृ– णांपर्णान्युन्मुक्तसूत्राणिकृत्वाशूर्पेनिदध्यात्।। ततः सपत्नीकोयजमानः वधूवरश्चतच्छूर्पंगृहीत्वातस्मिन्नाचार्येणजलसेकेकृतेसतिशूर्पेणगृहाभ्यंतर– मारभ्यमंडपांतंगमनागमनेनवसोः पवित्रंद्यौः शान्तिरितिमंत्राभ्यांजल– धारांपातयेत्।। ततस्तन्मातृपल्लवैः सपत्नीकंसापत्यंयजमानंदेवस्यत्वे त्याद्यभिषेकमंत्रैरभिषिंचेत्।। ततः कर्ताशिरसिबद्धांजलिरस्मद्गोत्रेषट्– सुषट्सुमासेषुशोभनानिभवन्त्वितिप्रार्थयेत्।। तेपितथास्त्वितिब्रूयुः।। एवंत्रिरुक्त्वातानिवृक्षपर्णादीनिगृहोपरिशुचौदेशेप्रक्षिप्यांगणवितानमी– शानकोणाद्विमुच्ययथाशक्तिब्राह्मणभोजनंसंकल्प्य यथा विभवमाचार्यंसंपूज्य तस्मैदक्षिणांदत्वान्येभ्योब्राह्मणेभ्योयथाशक्ति– भूयसींदत्वातेषामाशिषोगृहीत्वा कर्मेश्वरार्पणंकुर्यात्।। ।। इति– संस्कारभास्करेदेवकोत्थापनम्।। ।। अथद्विरागमः।। ।।

तत्रतावत्सन्मुखशुक्रविचारः।। ।। ज्योतिःप्रकाशे। वामेशुक्रेनवोढायाः सुखंहानिश्चदक्षिणे।। धनंधान्यंचपृष्ठस्थेसर्वनाशः पुरःस्थिते।। नावोढायास्तुवैधव्यंयदुक्तंसन्मुखेभृगौ।। तदेवंविबुधैर्ज्ञेयंकेवलं तद्विरागमे।। ।। पूर्वतोभ्युदितेशुक्रे प्रयायाद्दक्षिणापरे।। पश्चादभ्युदिते–

चैवयायात्पूर्वापरेदिशौ।। ।। तथाभाद्रपदमासमारभ्यपूर्वादिमुख्यदिक्षु-
प्रतिदिशंमासत्रयंकपाटंज्ञेयं।। चैत्रमारभ्यपूर्वाद्यष्टदिक्षुमुख्य-
दिशिमासद्वयंविदिक्ष्वेकंमासंक्रमेणाकंटकंजानीयात्।।
इदंद्वयंग्रामांतरेणववधूगमनेवर्ज्यमिति।। ।। तत्रमाघफाल्गुनवैशाखाः
शुक्लपक्षश्चशुभाः।। अश्विनीरोहिणी पुनर्वसुपुष्योत्तरात्रयानुराध
ाज्येष्ठाहस्तस्वातीचित्राश्रवणशततारकानक्षत्रेषुचंद्रबुध
ाशुक्रवारेषुगुरुशुक्रास्तादिरहितेस्थिरलग्नादिशुभकालेद्वितीयवधूप्रवेशः
शुभः।। द्विरागमनेऽधिमासविष्णुशयनमासौसमवत्सराः
प्रतिशुक्रादिदोषाश्चवर्ज्याः।। द्विरागमोपि यदिविवाहमारभ्यषोडशदिनमध
येक्रियतेतदाप्रतिशुक्रादिदोषोस्तादिदोषश्चनास्ति।। द्विरागमः
षोडशवासरांतेएकादशाहेसमवासरेषु।। नचात्रऋक्षंन-
तिथिर्नयोगोनवारशुद्ध्यादि विचारणीयं।। केवलांगिरसकेवलभृगु-
भरद्वाजवसिष्ठकश्यपात्रिवत्सगोत्राणांप्रतिशुक्रदोषोन।। रेवत्यश्विनी-
भरणीकृत्तिकाद्यचरणेषुचंद्रेसतिशुक्रस्यांधत्वात्प्रतिशुक्रदोषोन।।
दुर्भिक्षेदेशविप्लवेविवाहेतीर्थगमनेएकनगरग्रामयोश्चप्रतिशुक्रदोषोन।।।।
इतिसंस्कारभास्करेद्विरागमः।। ।। प्रथमाब्देवधूनिवासविचारः।।
।। ज्योतिर्निबंधे।। उद्वाहात्प्रथमेशुचौयदिवसेद्भर्तुर्गृहे कन्यकाहन्या-
त्तज्जननींक्षयेनिजतनुंज्येष्ठेपतिज्येष्ठकं।। पौषेचश्वशुरंपतिंचम-
लिनेचैत्रेस्वपित्रालयेतिष्ठंतीपितरंनिहंतिनभयंतेषामभावेभवेदिति।। ।।
अन्यत्रापि।। विवाहात्प्रथमेपौषेआषाढेचाधिमासके।। नसा-
भर्तृगृहेतिष्ठेच्चैत्रे पितृगृहेतथेति।। ।। इतिप्रथमाब्देवधूनिवासविचारः।।
।। अथपुनर्विवाहः।। दुष्टलग्नेयथोक्तग्रहताराद्यभावेऽन्यत्रापिदुष्ट-
योगाद्यशुभकालेकूष्मांडीघृतहोमादि यथोक्तविधिंविनासूत-
कादौचविवाहेजातेतयोरेवदंपत्योः सुमुहूर्तेपुनर्विवाहः कर्तव्यः।।
श्रीधरीयेनृसिंहोपि।। पुनर्विवाहंवक्ष्यामिदंपत्योः शुभवृद्धिदं।।
लग्नेन्दुलग्नयोर्दोषग्रहतारादिसंभवे।। विवाहे चापिदंपत्योराशौचादि

समुद्भवे।। अन्येष्वशुभकालेषुदुष्टयोगादिसंभवे।। तस्यदोषस्य शांत्यर्थंपुनर्वैवाह्यमिष्यते।। अयनंचोत्तरंश्रेष्ठंशुक्लपक्षोविशेषतः।। आषाढमार्गशीर्षौद्वौवर्ज्यौशेषाः शुभावहाः।। विवाहोक्त- र्क्षतिथ्यंशराशिवारादिवर्गजाः।। करणान्योगसंज्ञानिग्रहगोचरयोगकाः।। तस्मिन्विवाह समयेशुभदाश्चतथैवहि।। पूर्वाह्णेपूर्वरात्रेचविवाहः शुभदोभवेदिति।। ।। इतिपुनर्विवाहविचारः।। ।। स्त्रीनिधने- द्वितीयादिविवाहकालः।। धर्मसिंधौ।। प्रमदामृतिवासरादितः पुनरुद्वाहविधिर्वरस्यच।। विषमेपरिवत्सरेशुभोयुगलेचापि- मृतिप्रदोभवेत्।। संकटेमहारुद्राभिषेकंमृत्युंजयमंत्रजपं कृत्वाविवाहः कार्यइतिभाति।। ।। अथतृतीयमानुषीविवाहनिषेधमाह।। ।। कश्यपः।। तृतीयांमानुषींनैवचतुर्थींयः समुद्वहेत्।। पुत्रपौत्रादिसंपन्नः कुटुंबीसाग्निकोवरः।। उद्वहेद्रतिसिद्धर्थंतृतीयानकदाचन।। मोहादज्ञानतोवापियदिगच्छेत्तुमानुषीं।। नश्यत्ये वनसंदेहोगर्गस्य- वचनंयथेति।। ।। अन्यत्रापि।। तृतीयामानुषीकन्यानो- द्वाह्याम्रियतेहिसा।। विधवावाभवेत्तस्मात्तृतीयेर्कंसमुद्वहेदिति।। एवंचतृतीयमानुषीविवाहस्यनिषिद्धत्वात्तस्मिन्कर्तव्येसत्यर्क- विवाहविधिस्तमाह।। ।। वसिष्ठः।। चतुर्थ्याश्चविवाहार्थंतृतीये र्कंसमुद्वहेत्।। आदित्यदिवसेवापिहस्तर्क्षेवाशनैश्चरे।। शुभेदिनेवा पूर्वाह्णेकुर्यादर्कविवाहकमिति।। अथदेशादि।। ।। ब्रह्मपुराणे।। ग्रामात्प्राच्यामुदीच्यांवासुपुष्पफलसंयुतं।। परीक्ष्ययत्नतो- धस्तात्स्थंडिलादियथाविधिति।। रचयेदितिशेषः।। ।। व्यासः।। स्नात्वालंकृतवासांसिरत्नगंधविभूषितः।। सुपुष्पफलशाखै- कमर्कगुल्मंसमाश्रयेत्।। सलक्षणेसुकुंभेचअर्कंसंस्थाप्य यत्नतः।। अर्ककन्याप्रदानार्थमाचार्यकल्पयेत्पुरा।। उभौगोत्रविभिन्नंतंशांतं दांतंदयान्वितं।। आचार्येणस्वयंभाव्यदत्तांसूर्येणकन्यकां।। अर्क- सन्निधिमागत्यतत्रस्वस्त्यादिवाचयेत्।। नांदीश्राद्धं-

हिरण्येनअष्टवर्गान्प्रपूजयेत्।। पूजयेन्मधुपर्केणवरंविप्रस्यहस्ततः।। यज्ञोपवीतंवस्त्रंचहस्तकर्णादिभूषणं।। उष्णीषगंध-माल्यादिवरायास्मै प्रदापयेत्।। स्वशाखोक्तप्रकारेणमधु-पर्कंसमाचरेदिति।। विप्रस्यहस्ततआचार्यहस्तेनेत्यर्थः।। ।। ब्रह्मपुराणे।। यथाविधीत्यस्यानंतरं।। कृत्वार्कंपुरतस्तिष्ठ-न्प्रार्थयेत्तुकिद्वजोत्तमः।। त्रिलोकवासिन्सप्ताश्वछाययासहितोरवे।। तृतीयोद्वाहजंदोषंनिवारयसुखंकुरु।। तत्राध्यारोप्य-देवेशंछाययासहितंरविं।। वस्त्रैर्माल्यैस्तथागंधैस्तन्मंत्रेणप्रपूजयेत्।। तन्मंत्रेणाकृष्णेनेत्यादिना।। चतुर्थेदिवसेतीतेपूर्ववत्तां प्रपूजयेत्।। विसृज्यहोममग्निचउद्वहेन्मानुषींपरामिति।। ।। अन्यत्रापि।। श्वेतवस्त्रेण संवेष्ट्यत थाकार्पासतंतुभिः।। गंधपुष्पैः समभ्यर्च्याब्लिगैरभिषिच्यतं।। गुडौदनंतुनैवेद्यं तांबूलंचसमर्पयेत्।। व्यासः।। अर्कप्रदक्षिणं-कुर्वन्जपेन्मंत्रमिमंबुधः।। ममप्रीतिकरायेयंमयासृष्टापुरातनी।। अर्कजाब्रह्मणासृष्टाअस्माकंपरिरक्षतु।। पुनः प्रदक्षिणांकृत्वा-मंत्रेणानेनमंत्रवित्।। नमस्तेमंगलेदेविनमः सवितुरात्मजे।। त्राहिमांकृपयादेविपत्नीत्वंमेइहा गता।। अर्कत्वंब्रह्मणासृष्टः सर्वप्राणि-हितायच।। वृक्षाणामादिभूतस्त्वंदेवानांप्रीतिवर्द्धनः।। तृतीयोद्वाहजंपा-पंमृत्युंचाशुविनाशय।। ततश्चकन्यावरणंत्रिपुरुषंकुलमुच्चरेत्।। आदित्यः सविताचार्कःपुत्रीपौत्रीप्रपौत्रिका।। गोत्रंकाश्यप-इत्युक्तंलोकेलौकिकमाचरेत्।। वरः काश्यपगोत्रश्चेत्तदाचार्यः स्वपूर्वजान्।। उच्चरेन्ममपुत्रीतिस्वगोत्रैः सहतद्विधिः।। मुहूर्तेर्कंनिरीक्षेतस्वस्तिसूक्तमुदीरयेत्।। आशिषश्चततः कुर्यादाचार्यप्रमुखैर्द्विजैः।। अथाचार्यंसमाहूयविधिनातन्मुखाच्चतां।। प्रतिगृह्यततोहोमंगृह्योक्तविधिनाचरेत्।। अर्की दानमंत्रस्तु।। अर्ककन्यामिमांविप्रयथाशक्तिविभूषितां।। गोत्रायशर्मणेतुभ्यं-दत्तांविप्रसमाश्रय।। अजल्यक्षतकर्माणिकृत्वाकंकणपूर्वकं।।

यावत्पंचावृतंसूत्रंअर्कवृक्षे प्रवेष्टयेत्।। पंचीकृतंपुनः सूत्रंस्कंधे-
बध्नातिमंत्रतः।। स्वशाखोक्तेनमंत्रेण गायत्र्यावाथवेष्टयेत्।।
बृहत्सामेतिमंत्रेणसूत्ररक्षांप्रकल्पयेत्।। अर्कस्यपुरतः
पश्चाद्दक्षिणोत्तरयोस्तथा।। अग्नेय्यादिक्रमेणैवविदिक्षुअपिचैवहि।।
अष्टौकुंभान्प्रतिष्ठाप्यक्रमेणैवयथाविधि।। प्रस्रवप्रति कुंभंचत्रिभिः
सूत्रेणवेष्टयेत्।। हरिद्रागंधसंयुक्तान्पूरयेच्छीतलैर्जलैः।।
पंचपल्लवसंयुक्तान्फलरत्नसमन्वितान्।। सर्वौषधिसमा-
युक्तान्पूर्णपात्रसमन्वितान्।। प्रतिकुंभंमहाविष्णुं संपूज्यपरमेश्वरं।।
पाद्यार्घादिनिवेद्यान्तंकुर्यान्नाम्नैव मंत्रवित्।। कुंभोदकैर्वरं
अर्कंवारुणैरभिषिंचयेत्।। अत्रशौनकः।। तृतीयेस्त्रीविवा-
हेतुसंप्राप्तपुरुषस्यतु।। अर्कविवाहंवक्ष्यामिशौनकोहंविधानतः।
अर्कसन्निधिमागत्यतत्रस्वस्त्यादिवाचयेत्।। नांदीश्राद्धंप्रकुर्वीतआ
चार्यंवरयेत्ततः।। अर्कमभ्यर्च्यसौर्याचगंधपुष्पाक्षतादिभिः।।
सौर्यासूर्यदेवत्या आकृष्णेनेतिऋचा।। स्वयंचालंकृतस्त-
द्वद्वस्त्रमाल्यादिभिः शुभैः।। अर्कस्योत्तरदेशेतुस्थंडिलंकारयेत्ततः।।
उल्लेखनादिकंकृत्वाअग्निसंस्थापयेत्ततः।। ब्रह्मासनादिकं-
कृत्वासमन्वारब्धएतया।। एतयाअर्ककन्यया।। संस्कृत्याज्यंस्रुवेणैव-
आघारांतमतः परं।। आज्याहुतिंचजहुयात्सं गोभिरनएकया।।
यस्मैत्वाकामकामश्चएतयाचततः परं।। व्यस्ताभिश्चसमस्ता-
भिस्ततश्चस्विष्टकृद्भवेत्।। परिषेचनपर्यंतमयाश्चेत्यादिकंक्रमादिति।।
प्रार्थनामंत्रादिविशेषमाह।। व्यासः।। पुनः प्रदक्षिणंकृत्वामंत्र-
मेतमुदीरयेत्।। मयाकृतमिदंकर्मस्थावरेषुजरायुणा।। अर्कापत्यानिनो-
देहितत्सर्वंक्षंतुमर्हसि।। ।। इत्युक्त्वाशांतिसूक्तानिज-
प्त्वातंविसृजेत्पुनः।। गोयुग्मंदक्षिणांदद्यादाचार्या यचभक्तितः।।
इतरेभ्योपिविप्रेभ्योदक्षिणांचापिशक्तितः।। तत्सर्वंगुरवेदद्यादंते
ब्राह्मणभोजनं।। एवमर्कंसमभ्यर्च्यविधिनामानुषींपुरा।।

उद्वहेदन्यथानैवपुत्र पौत्राभिवृद्धिमान्।। एवमेतद्विजश्रेष्ठविधिना-सम्यगुद्वहेत्।। धनधान्यसमृद्धिचइच्छाभीष्टवरव्रजेदिति।। ।। अथप्रयोगः।। ।। तत्रक्रियमाण विवाहात्प्राक्चतुर्दिवसाधिकव्यवहितेआदित्यवारादावुक्तकाले वान्यत्रशुभदिनेकर्ता-स्नात्वालंकृतवासाः रक्तगंधादिभूषितोयथोक्तदेशेयथोक्तार्कसमीपेगत्वातदधः स्थंडिलंविरच्यार्कस्य समंतात्पूर्वाद्यष्ट-दिक्षुतंदुलाष्टदलानिकृत्वास्वयमर्कपश्चिमतः शुभासनेउप-विश्याचम्यप्राणानायम्य देशेकालौस्मृत्वाममतृतीयमानुषी-विवाहजन्यदोषपरिहारार्थंतृतीयमर्कविवाहं करिष्ये। तत्रादौनिर्विघ्नता-सिद्धर्थंगणपतिपूजनंतदंगत्वेनस्वस्तिपुण्याहवाचनंमातृका-पूजनंहिरण्येननांदीश्राद्धमाचार्यवरणंचकरिष्ये।। इतिकृत्वा।। अत्राचार्यद्वयं।। कर्मार्थंस्वकुलाचार्यमपरमर्ककन्यादानार्थं।। ततोर्कवृक्षस्याग्रेकृततंदुलाष्टदलेवरोमहीद्यौरित्यादिकल-शस्थापनक्रमेणकलशंसंस्थाप्यतदुपरिकृताग्न्युत्तारणप्रतिष्ठां-सुवर्णमयीं छायासहितार्कप्रतिमांप्रतिष्ठाप्याकृष्णेनेति षोडशोपचारैः पूजयेत्।। ततोवरोर्कपुरतस्तिष्ठन्सूर्यंप्रार्थयेत्।। त्रिलोकवा-सिन्सप्ताश्वछाययासहितोरवे।। तृतीयोद्वाहजंदोषंनिवारयसुखंकुरु।। इतिसंप्रार्थ्यार्कवृक्षेछाययासहितंरविमध्यारोप्यतमाकृष्णेनेतिमंत्रेणषोड-शोपचारैः पूजयेत्।। तत्रापोहिष्ठेत्यादिभिरभिषिच्यवस्त्रदानकालेश्वेत-वस्त्रेण कार्पासतंतुभिश्चार्कंसंवेष्ट्यगुडौदनंनिवेद्यतांबूलहिरण्यं-चसमर्प्यप्रदक्षिणांकुर्यात्।। तत्रमंत्रः।। मम प्रीतिकरायेयं-मयास्पृष्टापुरातनी।। अर्कजाब्रह्मणासृष्टाह्यस्माकंपरिरक्षतु।। इतिमंत्रेणार्कंप्रदक्षिणीकृत्य।। पुनः।। नमस्तेमंगलेदेविनमः सवितुरात्मजे।। त्राहिमांकृपयादेवि पत्नीत्वंमेइहागता।। अर्कत्वंब्रह्मणा सृष्टःसर्वप्राणिहितायच।। वृक्षाणामादिभूतस्त्वंदेवानांप्रीतिवर्धन।। तृतीयो द्वाहजंपापंमृत्युंचाशुविनाशयेति।। ततः कन्यादानाचार्यः

देशकालौसंकीर्त्यार्कविवाहार्थमागतंवरंमधुपर्केणपूजयिष्ये।। इतिसंकल्प्यस्वशाखोक्तप्रकारेण वरंमधुपर्केणपूजयेत्।। ततोवरः स्थंडिलेपंचभूसंस्कारपूर्वकंलौकिकाग्निस्थापयेत्।। ततोर्कवरांतरालेअंतःपटंधृत्वाचार्यादिब्राह्मणैर्मंगलपद्यानिपठित्वा ॐ प्रतिष्ठेत्युक्त्वोत्तरतरंतः पटमपसार्याचार्यादयः स्वस्तिनइतिमंगलसूक्तं पठेयुः।। ततोजरांगच्छेतिवासोपरिधाप्य।। याऽअकृंतन्वयमित्युत्तरीयं।। समंजंत्वित्यर्कंनिरीक्ष्य।। यदाबन्धन्निति मंत्रेण मांगल्यतंतुंबध्नीयात्।। ततोवपरित्वेत्यनुवाकेनार्कवरयोः सूत्रमावेष्ट्यदानाचार्यउदङ्मुखोप-विश्यदेशकालौसंकीर्त्यश्रीपरमेश्वरप्रीतयेअर्ककन्यादानंकरिष्ये।। ततोवरगोत्रोच्चारः।। अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्राय।। अमु० मुकप्रव०मु० शर्मणः पौत्राय।। अमु० मुकप्रव० मु०शर्मणः पुत्राय। अमु०मुकप्रव०मु०शर्मणेवराय।। अथकन्यादाता।। [93]काश्यपावत्सारनैध्रुवेतित्रिप्रवरस्यादित्यस्यप्रपौत्रीं।। काश्य० काश्य० त्रिप्रवर० सवितुः पौत्रीं।। काश्य० काश्य० त्रिप्रवरस्यार्कस्यपुत्रीं।। काश्यपगोत्रामर्ककन्याममुकगोत्रायवरायतुभ्यमहंसंप्रददे।। इत्युक्त्वावरदक्षिण हस्तेसकुशंजलंक्षिपेत्।। अर्ककन्या-मिमांविप्रयथाशक्तिविभूषितां।। गोत्रायशर्मणेतुभ्यंदत्तां-विप्रसमाश्रयेतिमंत्रंपठेत्।। ततोवरस्त्वर्कोपरिसाक्षतगंधपुष्पोदक-पूर्णांजलित्रयंवक्ष्यमाणमंत्रत्रयेणक्षिपेत्।। ॐ यज्ञोमेकामः समृध्यताम्।। ॐ धर्मोमेकामः समृध्यताम्।। ॐयशोमेकामः समृध्यताम्।। ततोर्कवरयोः परित्वेत्यनुवाकेनपूर्ववेष्टितंसूत्रंनिष्कास्य-तत्सूत्रंपुनः पंचगुणं कृत्वातत्रहरिद्राखंडंबध्वातत्कं-कणमर्कस्यदक्षिणस्कंधेबृहत्सामेतिमंत्रेणबध्नीयात्।। ॐ बृहत्सामनक्षत्रमृद्वृद्धवृष्ट्यत्रिष्टुभौजः शुभितमुग्रवीरं।। इंद्रस्तोमेन-पंचदशेनमध्यमिदंवातेनसागरेणरक्ष। ततोर्कदिग्विदिक्षुकृततं-दुलाष्टदलेमहीद्यौरित्यादिकलशस्थापनक्रमेणाष्टौकुंभान्संस्थाप्य-

सूत्रेणावेष्ट्यगंधप्रक्षेपयणेऽष्टगंधक्षिप्त्वातेषुनाममंत्रेणमहाविष्णुमा-वाह्यतेनैवमंत्रेणषोडशोपचारैःसंपूजयेत्।। ततोर्कस्योत्तर-दिग्भागेऽर्कपत्न्यान्वारब्धोवरः देशकालौ स्मृत्वाऽस्याः सम्यग्भार्यत्वसिद्ध्यर्थंपाणिग्रहहोमंकरिष्ये।। तत्रवैकल्पिक-पदार्थावधारणपूर्वकंदेवतापरिग्रहार्थमन्वाधानंकरिष्ये।। तत्रपूर्वेण-ब्रह्मणोगमनं।। उत्तरतः पात्रासादनं।। द्वेपवित्रे।। ताम्रमयीआज्य स्थाली।। पालाश्यः समिधः।। प्रांचावाघारौ।। समिद्धतमे-आज्यभागौ।। पूर्णपात्रं।। एतान्वैकल्पिकपदार्थानहंकरिष्ये।। ।। अथदेवताभिध्यानं।। तत्रप्रजापतिं।। इन्द्रं।। अग्निं।। सोमं।। एताआज्येनैकैकयाहुत्या।। अत्रप्रधानं।। बृहस्पतिं अग्निमग्निंवायुंसूर्यंप्रजापतिं।। एताआज्येनैकैकयाहुत्या।। शेषेणस्विष्टकृतं।। अग्निवायुंसूर्यं।। अग्निवरुणौ।। अग्निवरुणौ।। अग्निवरुणं।। सवितारं।। विष्णुं।। विश्वान्देवान्मरुतः स्वर्कान्वरुणामादित्यमदितिं।। प्रजापतिं।। एताअंगप्रधानार्थ-देवताआज्येनैकैकयाहुत्याअस्मिन्कर्मण्यहंयक्ष्ये।। ततोदक्षिणतो-ब्रह्मासनादिचरुवर्ज्यसर्वं प्रकृतिवत्कृत्वामनसा।। ॐ प्रजापतये-स्वाहा।। इदंप्रजापतयेनमम।। ॐ इन्द्राय०।। इदमिन्द्राय०।। ॐ अग्ने०।। इदमग्ने०।। ॐसोमाय०।। इदंसोमाय०।। ततआज्येन।। ॐ संगोभिरांगिरसोनक्षमाणोभगऽइवेदर्यमणं निनाय।। जनेमित्रोनदंपतीअनक्तिबृहस्पतेवाजयाशूंरिवाजौस्वा०।। इदंबृहस्पतये०।। ॐ यस्मैत्वाकामकामायवहंसम्राडञ्जामहे।। तामस्मभ्यं कामंदत्वायथेदंघृतंपिबस्वा०।। इदमग्नये०।। ततोव्यस्तसमस्तव्याहृतिभिर्जुहुयादाज्येन।। ॐ भू०।। इदमग्नये०।। ॐ भुवः।। इदंवायवे०।। ॐ स्वः०।। इदंसूर्याय० ॐ भूर्भूवः स्व०।। इदंप्रजापतये०।। ततः स्विष्टकृदादि प्रणीता-विमोकांतंहोमशेषंसमाप्यार्कंप्रदक्षिणीकृत्यप्रार्थयेत्।। मयाकृतमिदं

कर्मस्थावरेषुजरायुणा।। अर्कापत्यानिनोदेहि तत्सर्वंक्षंतुमर्हसीति।।
ततः- शान्तिसूक्तानिपठित्वाऽर्कस्थसूर्यंविसृज्याचार्यंसंपूज्यतस्मैगो
युग्मंदत्वेतरेभ्योपिविप्रेभ्योयथाशक्तिदक्षिणांदत्वाकुंभेषुमहाविष्णुसंपूज्य
स्थापितदेवता अग्निचविसृज्यप्रतिमादिसर्वंपूजोपकरण-
माचार्यायदत्वाऽष्टौ ब्राह्मणभोजनंसंकल्प्ययस्य स्मृत्वेतिनत्वाकर्म-
संपूर्णतांवाचयित्वाविप्राशिषो गृह्णीयादिति।। ।। अन्यत्रतु।। ।।
शांतिसूक्तानिपठित्वार्कस्थसूर्यंविसृज्यगोयुग्ममाचार्याय-
दत्वाऽन्येभ्योयथाशक्तिभूयसीं चदत्वाविष्णुप्रतिमामाचार्यायदद्यात्।।
ततआचार्येणस्थापितकलशोदकेनार्कवरयोरभिषेकः कार्यः।।
ततोयजमानेनधारितवस्त्राणित्यक्त्वानूतनान्यानिधारयेत्।।
त्यक्तवस्त्राणिगुरवे दत्वाब्राह्मणान्भोजयेत्।। ततः पंचमेह्निपुनरर्के-
सूर्यंपूर्ववत्संपूज्यहोममग्निचविसृज्य पुण्याहंवाचयित्वामानुषीं-
विधिनोद्वहेदिति।। ।। इतिश्रीमदृषिभट्ट विरचितेसंस्कार
भास्करेअर्कविवाहप्रयोगः।। ।। ग्रंथाननेकानालोक्ययथा
मतिमयाकृतः।। याज्ञिकानांहितार्थायश्रीरामचरणार्पितः।। 1।।
भूनेत्ररसभू १६२१ शाकेप्रमाथिनिशुभेमधौ।। ऋषिसंज्ञेनरचितः
सर्वसंस्कारभास्करः।। 1।।

---

1. परशुरामः ।। कलशस्थापनं कार्य कमलेष्टदलेमलइति।।
2. अभावेपंचरत्नानां हेमं सर्वत्रयोजयेदितिनिर्णयसिंधौव्रतरत्नेचोक्तत्वात्।।
3. स्पृशन्त्वनामिकाग्रेण क्वचिदालोकयन्नपि। अनुमंत्रणं सर्वत्रसदैवमभिमंत्रयेदिति-कात्यायनोक्तरीत्याकार्यम्।
4. अत्रकलशधारणं आचार्यकर्तृकं धारयित्वेत्युक्तत्वात्। आचार्य उदकुंभंतं धारयेत्तदनंतरमितिपरशुरामकारिकोक्तेश्च।
5. बहि. पूर्वस्यामुदकसेकः।।
6. पात्रेउदकसेकः।।
7. तदुक्तब्रह्माण्डपुराणे स तथाक्षय्योदकस्थानेदद्यात्क्षीरयवोदकमिति।
8. अमुकस्थानेयथायथमूहः कार्यः।
9. अत्रदेयमुक्तं परशुरामकारिकायां।। भाजनं भाजनाधारं छत्रोपानकमंडलं। आसनंवसनं

मुद्राकर्णभूषोपवपीतकं। एतद्दशविधं देयं पदं वरणसिद्धये। पदाभावे त्रयं देयं पात्रवस्त्रागुलीयकं। तदभावेपितांबूलंदत्वाकिंचित्प्रकल्पयेदिति।

10. दुर्ब्राह्मणलक्षणंतुयाज्ञवल्क्येनोक्तं - यस्यवेदश्चवेदी च विच्छिद्यंतेत्रिपूरुषं। सवैदुर्ब्राह्मणोज्ञेयः सर्वकर्मसुनिंदित इति।।

11. एतच्चनिर्मूलत्वाद्यजमानप्रतारणमेवेतिकाशिदीक्षितानंतदेवादयः। ऋत्विक्कर्तृत्वेकर्मणां फलस्ययजमान निष्ठत्वात्। केचित्तुपुत्रकृतवैतवैतरणीदानजन्यश्रेयोदानवन्मा-घस्नानादिजन्यपुण्यदानवच्चश्रेयोदानमविरुद्धमित्याहुः। इदमपिवस्तुतश्चिंत्यमेवेतिरुद्र-कल्पद्रुमे।।

12. सिंहीतिवृहती कंटरिकारिंगणिकापर्यायाः।

13. वीरतरः शरइतिजयरामः। अश्वत्थशंकुरितिगदाधरः।

14. सूत्रकर्तनसाधनभूतलोहकीलकं तच्चसूत्रपूर्णं - तक्कुरपरपर्यायः।।

15. त्रैवर्णिकौ वीणागायिनौराजवर्णनसंबंधिगानं कुरुतः। अथवानलादिसंबंधिगानं कुरुतः।

16. ललाटांतरमारभ्यकेशान्द्विधाकरोतीत्यर्थः।

17. प्राक् चूडाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः। कुमारस्तुसविज्ञेयो यावन्मौंजीनिबंधनमितिकारिकायां।

18. त्रिवारमुपांशुपठतीतिहरिहरः। दर्पणकारोप्येवमेव।

19. अत्रसूतिकाग्नेर्ग्रहणमावसथ्याग्निनिवृत्यर्थमितिभर्तृयज्ञः। अत्रचावपनोपदेशाद्धोमेतिकर्त-व्यताभवति। अत्राग्नेर्देवतात्वंजयरामाचार्यावदंति।।

20. अत्रकेचित्तुद्वयक्षरं प्रतिष्ठाकामश्चतुरक्षरं ब्रह्मवर्चसकामइति।।

21. द्वादिशंइतिक्वचित्पाठः।

22. हंतकारं मनुष्या इतिश्रुतेः।

23. कारिकायां।। कृतप्राशनमुत्संगाद्धात्रीबालं समुत्सृजेत्। कार्यं तस्य परिज्ञानं जीविकाया अनंतरं।। देवताग्रेथविन्यस्यशिल्पभांडानिसर्वशः। शस्त्राणि चैव वस्त्राणि ततः पश्येतु लक्षणं। प्रथमं यत्स्पृशेद्बालः स्वयंभांडादिकंतदा।। जीविकातस्या - बालस्यतेनैवतुभविष्यतीति।

24. आंसिचनसमये कुमारेण अन्वारंभः कार्यइति भर्तृयज्ञः।

25. कारिकायां।। उंदनं केशमूलेतु केशमध्ये विनीयनं। छेदनं चैव केशाग्रे एष एव क्रमोभवेदिति।

26. शलल्याक्लिन्नान्केशान्विनीयपृथक्कृत्येत्यर्थः।

27. तं क्षुरं कुशतरूणांतर्हितेषुकेशेषुसंलगयतिस्थापयति। अत्रप्रपूर्वो वपतिः संल्लगतेच्छेदनार्थत्वेतु- उत्तरसूत्रविहितंछेदनमनर्थकं स्यात्।।

28. त्रिवारंक्षुरंभ्रामयतीत्र्थः।

29. पल्वले अल्पसरसिवायत्रकुत्रचिदुदकसमीपे।।

30. वरमभिलषितद्रव्यं। तदभावे चतुः कार्षापणोवर इति मूल्याध्यायोक्तद्रथदानमितिवृद्धाः।

31. ब्रह्मचारीप्राङ्मुखस्तिष्ठन् ब्रह्मचर्यमागामितिब्रूयादितिगदाधरादयोभाष्यकाए:।

उदङ्मुखइतिरेणुदीक्षिताः।

32. अत्रवाक्यभेदात्प्रतिवाक्यं पाण्योः प्रतपनं मुखमार्जनं चेतिगदाधरः। ललाटादिचिबुकांतं स्पृशेदिति हरिहरः।

33. कारिकायां।। पद्माकारौकरौकृत्वापादोपग्रहणं गुरोः। उत्तानाभ्यां तुपाणि-भ्यामितिपैठीनसेर्वच इति। याज्ञवल्क्यस्तु। दक्षिणंपदमालभ्यपाणिनादक्षिणेन च। सव्येन - सव्यं स्पृष्टव्यमभिवादनकर्मणि। व्यवस्थपाणिनाकार्यमाग्नि सूर्यं गुरुं तथा। अत्र उपसंग्रहणं यथेतिक्वचित्पाठः। उभाभ्यामपिहस्ताभ्यां कारयेच्छ्रोत्रसदृशाविति।।

34. मनुः। भोः शब्दं कीर्तयेदं ते स्वस्यनाम्नोभिवादन इति।।

35. मनुः। आयुष्मान्भवसौम्येति वाच्यः प्रत्यभिवादने इति।।

36. ब्रह्मपुराणे आचार्यश्चततो नित्यं अभिवाद्वो विजानतेति। मनुरपि। लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा। आददीतयतोज्ञानं तंपूर्वमभिवादयेदिति।।

37. याज्ञवल्क्यः। ततोभिवादयेद्वृद्धानसावहमितिब्रुवन्निति। ततः अग्निकार्यादनंतरमित्यर्थः।।

38. अत्र विशेषः मनुस्मृतौ।। प्रतिगृह्योप्सितं दण्डमुपस्थायचभास्करं। प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि इति।

39. एकेआचार्यामातरं स्वजननीं प्रथमंभिक्षेतेत्याहुः। अयं च प्रथमो धर्मइति कर्कः।

40. याज्ञवल्क्यः।। मधुमांसांजनोच्छिष्टशुल्कस्त्रीप्राणिहिंसनं। भास्करालोकना-श्लीलपरिवादादि वर्जयेत्। शुल्कं परुषंवचः पर्युषितान्नं च। मनुः। अभ्यंगमंजनंचाक्ष्णोरुपानच्छत्रधारणं। वर्णयेदिति प्रकृतं। पारिजाते कौर्मे। नादर्शं चैववीक्षेत् नाच्चरेदंतधावनं गुरुच्छिष्टं भेषजार्थं प्रयुंजीत न कामतः। एतन्निषिद्धमध्वादिविषयं। अन्यस्य गुरुच्छिष्टस्य सर्वक्षप्राप्तेः। वसिष्ठः। सचेद्व्याधीयीत कामंगुरोरुच्छिष्टशेषमौषधार्थं सर्वंप्राश्नीयादिति। ज्येष्ठभ्रातुरित्यपि ज्ञेयं तथापस्तंबः।। पितुर्ज्येष्ठस्यच भ्रातुरुच्छिष्टंभोज्यमिति।। स्मृत्यंतरे। गुरुवद्गोपुत्रः स्यादन्यत्रोच्छिष्टभोजनात्। प्रचेताः। तांबूलाभ्यंजनं चैव कांस्य पात्रे च भोजनं। यतिश्चब्रह्मचारीच विधवा च विवर्जयेत्। यमः। मेखलामजिनं दंडमुपवीतं च नित्यशः। कोपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेदिति।।

41. याज्ञवल्क्यः।। उपनीयदद्वेदमाचार्यः सउदाहतइति।।

42. कुंडगोलकयोः संस्कार्यत्ववचनंयुगान्यतरविषयं। तस्य क्षेत्रजपुत्रविषयत्वात्। कलौदत्तौरसातिरिक्तपुत्राणां निषेधादितिधर्मसिन्धौ।

43. तदीयांशहोरासु।

44. भर्तृयज्ञेनतुपादप्रक्षालनार्थमुदकं पद्मशब्देनामिहितम्।।

45. खड्गं

46. अत्रकन्यापितावस्त्रद्वयंवरायप्रयच्छतितयोर्मध्ये एकं वरः कुमारीं परिधापयतीति प्रयोगरत्नाकरः।।

47. अत्राचार्यकर्तृकं परिधानं भर्तृयज्ञमते।। अत्राप्याचारादहतं वासो ग्राह्यं।।

48. समंजनं नामसन्मुखीकरणमितिगदाधरादयः। परस्परं गात्रश्लेषइति भर्तृयज्ञः। परस्परानुलेपनमितिकेचित्।। अत्रोभयोर्मंत्रपाठ इति भर्तृयज्ञः।।

49. अत्रलक्ष्मीनारायणप्रीतयेवधूवरयोः षोडशोपचारैः पूजाकार्येत्युक्तं प्रयोगरत्ने।।

50. क्षत्रियादिवरपक्षेवर्मादिविशेषपदमुंच्चारणम्।।

51. अत्रेवत्रिवारमुच्चारणं कार्यमितिवासुदेवहरिहरौ। सकृदिति गंगाधरः।।

52. अत्र कन्या पिता कन्यादक्षिणहस्तं वरदक्षिणकरेक्षिपति ततस्तदुपरिस्वदक्षिण-स्थभार्याजलधारां करोति।

53. वरहस्तेसकुशाक्षतजलंक्षिपन्प्रजापतिः प्रीयतामितिमनसास्मरेदिति गदाधरः। नममेततिवाच्यमितिप्रयोगरत्ने। नेत्यपरे।

54. पित्रादत्तां कन्यां आदायवरः प्रतिग्रहविधिनाप्रतिगृह्यवस्त्रांतेगृहीत्वायदिषिमन-सादूरमित्यनेनमंत्रणनिष्क्रामंतिगृहमध्याद्बहिः शालायां स्थापितमग्निं प्रतिगच्छतीति गदाधरः। पित्राजनकेन प्रत्तां संकल्प्यदत्तां आदाय प्रतिग्रहविधिनाहस्तेधृत्वा-निष्क्रामतीतिहरिहरः। अत्र पित्रेत्युपलक्षणं।। पितापितामहोभ्रातासकुल्योजननी तथा। कन्याप्रदः पूर्वनाशे प्रकृतिस्थः पर पर इति याज्ञवल्क्येनान्येषामपिकन्यादानेधि-कारस्मरणात्।।

55. एके आचार्याअग्नेः प्रदक्षिणं कारयित्वाकन्यावासः परिधानादिकर्तव्यमितिवदंति। अपरेतु समीक्षणांते प्रदक्षिणकरणं वदंति। अतश्चविकल्पः।।

56. तेजनी तृणपूलिकां।।

57. प्रवृत्य आक्रम्यउल्लंघ्येत्यर्थः। आक्रमणं चतयासहकर्तव्यमिति यज्ञहरिहरौ।।

58. भ्रातुरभावे सकुल्य इति प्रयोगरत्नाकरः। भ्रातृस्थानेपितृव्यस्यभातुलस्यचयः सुतः। मातृष्वसुः सुतस्तद्वत्सुतस्तद्वत्पितृष्वसुरितिबह्वृचकारिकायां।।

58. दृढ़पुरुषः कश्चिद्बलवान्पुरुषइतिहरिहरः। जितेन्द्रियइतिभर्तृयज्ञः। जामातैवदृढ़पुरुषइति रेणुगंगाधरौ। गदाधरमतेपिवर एव।।

60. इमानिशाखान्तरोपदिष्टानिदेवतापदानि। एषां प्रयोगकालेसंप्रदानलक्षणेनप्रयोग-श्चित्तायस्वाहेत्यादित्यादिभवतीतिभर्तृयज्ञः। नेतिकर्कादयः। नचेमानिदेवतापदानिकिं तर्हिमंत्राश्चैते। ते च यथाम्नातएव प्रयोक्तव्या इति।

61. अग्निर्भूतानाद्यष्टादशमंत्रेषुप्रतिमंग्रंयथालिंगवचनंसमावत्त्वित्यादिदेवहूत्या स्वाहेत्यन्तं वाक्यैक- देशमनुवक्तव्यम्।

62. रौद्रीपैत्रीतथामृत्युर्यमाहुत्याकृते तथा। अन्तर्धानं विनायस्तु अल्पायुर्दंपतीभवेदिति-कारिकाकारः।

63. अग्निर्भूतानामित्यादिसुगन्नुपंथामित्यंताद्द्वाविंशतिरभ्यातानाइति कर्क कारिकाकारौ।।

64. एकेआचार्याः संस्रवप्राशनां तेइमामाहुतिमिच्छति। अस्मिन्पक्षेपरमृत्यवितिहोमान्ते पुनरेतस्य संस्रपप्राशनमितिगदाधरः।

65. अत्रकारिकाकारः। तिष्ठंत्यातिष्ठतापत्यागृहीतांजलिनैवसा। अंजलिस्थांस्त्रिधा-सर्वान्प्राङ्मुखीप्रीतमंत्रतः।। प्राजापत्येन तीर्थेन दैवेनेवेतिबह्वृचाइति।।

66. द्रव्यंत्यागे तु वरस्यकर्त्तुत्वं। प्रधान: स्वमीफलयोगादिति कात्यायनोक्ते:।।

67. अथशब्दोत्रस्वस्थानेतिष्ठता कर्त्तव्यमितिद्योतनार्थइतिगदाधर:। अस्या इति चतुर्थी षष्ठ्यर्थे।।

68. कुयार्या दक्षिणं पादं हस्तेन गृहीत्वा अश्मानमुपरिवर: करोतीतिवासुदेव:। धृतकर एव वरोवधूं दक्षिणपादेनकृत्वा आरोहयतीति गंदाधर:।। गत्वोभावुत्तरेणाग्निं तस्या: सव्येतरंकरं। सव्येनादाय हस्तेनवधूपादं तु दक्षिणं।। शिलामारोहयेत्प्रागायतां दक्षिणपाणिनेतिकारिकाकार:।।

69. अत्र कारिकाकार:।। लाजानाज्यं स्रुवं कुंभं ब्रह्माणमृत्विजंगुरुं। एतेषां बाह्यत: कृत्वा शेषाणां तु प्रदक्षिणा। कामस्त्वघोषबाणै: स्वै: प्रहरेदतिदारुणै:। तस्मादग्रेभवेत्कन्यातस्य वाणस्य शान्तये।। कन्यकाग्रेवरं कृत्वा ब्राह्मणोज्ञानदुर्बल:।। विधवाजायतेनारी निषिद्धस्तत्रकारणादिति।।

70. जामातैवदृढश्चैत्तेनैवोत्क्षिप्यस्वपठितमंत्रेणोपवेशयतीतिगदाधर:।।

71. ग्रामशब्देनस्वकुलवृद्धा: स्त्रिय: इति गदाधर:। ग्रामवचनं लोकवचनंमितिभर्तृयज्ञ:।।

72. अग्नइत्यादिषण्णामाहुतीनामुदपात्रेसंस्त्रवप्रक्षेप:। हुत्वाहुत्वैतासामाहुतीनामुदपात्रे स ँ स्त्रवान्समवनीयेति पारस्करोक्ते:। इतरासां तु प्रोक्षणीपात्रेसंस्त्रवप्रक्षेप:।। ततश्चषण्णामाहुतीनामेवात्रसंस्त्रवभक्षणलोप इति।।

73. यदि काश्यपगोत्रीयोवरश्चेत्तदाचार्येणस्वगोत्रपूर्वजांश्चोच्चार्यममपुत्रीत्यूह: कार्य:।।

संस्कार-भास्करः

(संक्षिप्तबीणा-संस्कृतटीका)

संस्कार-भास्करः

(बीणा-टीका)

मङ्गलाचरणम्—

श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः।

त्रैलोक्यं धवलीकृतं स्वप्रभया स्वांगे धृता गोत्रजा,
शूलेनैव विशेषतोदितिसुताद्येनामरारक्षिताः।।
उत्पत्तिस्थितिनाशकादिजगतो यस्येच्छया जायते,
ग्रंथेस्मिन् ग्रहणोद्यमाय गिरिशः सिद्धिं सदा यच्छतु।। 1।।

यो भूच्छौचोपनामाबुधमुकुटमणिर्विश्वनाथः।
प्रसिद्धस्तज्जोगंगाधराख्यः क्षितिसुरमहितः सर्ववेदार्थवेत्ता।
तत्पुत्रः साधुशीलः शतपथनिपुणो याज्ञिकैर्वद्यमानः।।
पुण्यात्मा सर्वकाले जयति ऋषि बुधः शिष्यसंघार्चितांघ्रिः।।

करोति विदुषां प्रीत्यै सर्व संस्कार भास्करं।
सूत्रं हरिहरं कर्क वासुदेवीं समाहितः।। 3।।

आलोक्य सम्यङ्मतिना सरलं सुगमं नवं।।
यस्यावलोकनेनैव स्फुरंति हृदि तत्क्षणात् ।। 4।।

बीणा संस्कृत टीका—संस्काराणां नामानि तेषामहत्त्वञ्च—

संस्काराः—संस्काराणां संख्या विषयेऽत्र विवृतिः क्रियते। अष्टचत्वारिंशत् संस्काराः के ? इति विषये प्राप्यते[1] गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, अन्नप्राशनम्, चौलम्, उपनयनम्,

चत्वारि वेद व्रतानि, स्नानम्, सहधर्मचारिणीसंयोगः, पंचानां यज्ञानामनुष्ठानम्, अष्टकापार्वण, श्राद्धम्, श्रावणी, आग्रहायणी, चैत्री आश्वयुजीति सप्तपाकसंस्थाः,अग्न्याधेयम्, अग्निहोत्रम्, दर्शपूर्णमासौ, चातुर्मास्यानि, आग्रयणेष्टिः, निरुढपशुबन्धः, सौत्रामणी इति सप्त हविर्यज्ञसंस्थाः अग्निष्टोमः अत्यग्निष्टोमः, उक्थ्य, षोडशी, वाजपेय, अतिरात्र, आप्तोर्याम इति सप्त सोमयज्ञसंस्थाः एते चत्वरिंशत्संस्काराः। अष्टौ आत्मगुणाः-दया सर्वभूतेषु, शांतिः, अनसूया, शौचम्, अनायासोमाङ्गल्यम्, अकार्पण्यम्, अस्पृहा इति। यस्य एते चत्वारिंशत्संस्काराः सन्ति परञ्च अष्टौ आत्मगुणाः न सन्ति सः ब्रह्मणः लोकं न गच्छति सायुज्यमपि न प्राप्नोतीत्यर्थः। यस्य जनस्य पार्श्वे एते संस्काराः तथा च अष्टौ आत्मगुणाः सन्ति स ब्रह्मणः लोकं गच्छति सायुज्यमपि प्राप्नोतीत्यर्थः। पार्वणम् स्थालीपाकादि कर्म। श्राद्धं अर्थात् अमावास्यायां यत् क्रियते तत्। श्रावणी तत्र क्रियमाणं श्रवणाकर्म। आग्रहायणी तत्र क्रियमाणं प्रत्यवरोहणम्। चैत्री मध्ये शूलगवादि क्रियते। आश्वयुज्यां आश्वयुजी कर्म क्रियते।

महर्षि अंगिरसेन पंचविंशतिसंस्काराः गादिताः— ते सन्ति गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, बलिः, जातिकर्म, नामकर्म, निष्क्रमणम्, अन्नप्राशनम्, चौलम्, उपनयनम्, चतुर्वेदव्रतम्, स्नानम्, विवाहः, आग्रयणम्, अष्टका, श्रावणी, अमा, आश्वयुजी, मार्गशीर्षे पार्वणम्, उत्सर्गः, उपाकर्म, महायज्ञाः येते संस्काराः ब्राह्मणानां कृते नियतास्सन्ति। ये द्विजातयः पंचविशंतिभिः संस्कारैः संस्कृतास्सन्ति ते श्राद्धादिषु सर्वेषु कर्मषु पवित्राः योग्याश्च भवन्ति। अत्र बलि शब्दस्यार्थः विष्णुबलिरस्ति। तद्व्रतानां चतुष्टयेति चतुर्वेद व्रतानामीत्यर्थः। नियताः इत्युक्ते नित्याः सन्ति।

एतेषां पंचविंशतिसंस्काराणां विषये महर्षि आश्वलायनः चातुर्विध्य-मिति कथ्यते। ते च नैमित्तिक-वार्षिक-मासिक-नित्य भेदेन उक्ताः। नैमित्तिकाः षोडशसंस्काराः सन्ति येषां अवसानं विवाहे भवति। वार्षिका-संस्काराः आग्रहयणाद्याः सप्त एव सन्ति। पार्वणादिकं मासिकं कथ्यते। अशक्तानां कृते पार्वणं वार्षिको भवति। महायज्ञाः नित्यसंस्काराः सन्ति। येतेषां सम्पादनं सन्ध्यावत् अग्निहोत्रादिवत् कर्तव्यमित्यभिप्रायः। येषु संस्कारेषु गर्भाधानाद्युपनयनसंस्कारान्तां सर्वेषां कृते न। तेनैव प्रकारेण

ब्रह्मचर्यसंस्कारात् एव [2]प्रव्रज्यात्यादौ न विरोधं क्रियते। तेषां प्रयोग: ग्रन्थविस्तार भयात् भास्करकारैर्न लिखित:। सहजज्ञानार्थं तानि नामान्येवोल्लिखितानि। इदानीं स्वगृह्योक्त गर्भाधानाद्युद्वाहान्ता षोडश-संस्काराणामाचरणं प्राय: दृश्यन्ते तेऽत्र क्रियन्ते।

अत: ते एव संस्कारा मुख्यतयाऽत्र संगृहीतास्सन्ति। स्मृत्यन्तरेप्येवं प्राप्यते—

गर्भाधानमतश्चपुंसवनकंसीमन्तजाताभिधे ।
नामाख्यं सहनिष्क्रमेण च तथान्नप्राशनं कर्म च।
चूडाख्यं व्रतबंधकेप्यथ चतुर्वेद व्रतानां पुर:।
केशान्त: सविसर्गक: परिणय: स्यात्षोडशीकर्मणाम्।।

एतेषा संस्काराणां विहाय परिशिष्टादि शास्त्रान्तरे कर्णवेधादय: संस्कारा: यथावसरेरत्र परिगृहीतास्सन्ति। तथा चान्ये स्मृतिशिष्टाचारादीनि षष्ठीपूजनादि कर्माणि यथावत्काले अग्रे संगृहीतानि सन्ति। एतेषां सर्वेषां संस्काराणां सम्पादनं द्विजानां कृते समन्त्रका: भवन्ति। ब्रह्मक्षत्रियवैश्या: द्विजा:। [3]निषेकादि श्मशानांता: तेषां मन्त्रत: क्रिया: कर्तव्य: इति। निषेक शब्दस्यार्थ: गर्भाधानं विद्यते। श्मशानं मरणान्ते पितृसंबंधिनीसर्वा: क्रिया: मन्त्रपूर्वकमेव। शूद्रस्य अमंत्रका: क्रिया: क्रियन्ते। संस्कारान् अधिकृत्य यमस्योक्तीत्थं वर्तते-यत्— शूद्रोप्येवंविध: कार्यो विना मन्त्रेण संस्कृत इति अर्थात् द्विजानां यथा संस्काराणां सम्पादनं क्रियन्ते तथैव शूद्राणामपि। परञ्चात्र अमन्त्रका: क्रिया: कर्त्तव्या इत्याशय:। तत्रतस्याध्यनाभावात् अर्थात् अध्ययने अगति कारणात् संस्काणामङ्गभूतं उपनपनादिवेदव्रतादिकै: निवृत्तिरस्ति स्त्रीणामपि जातकर्मादि चूडान्ता: संस्कारा: अमन्त्रका: भवन्ति। विवाह: समन्त्रकं कर्त्तव्यम् विषयेऽस्मिन् याज्ञवल्क्यस्योक्तिरस्ति [4]तूष्णीमेताक्रिया: स्त्रीणां विवाहस्तु समंत्रक इति।

एतेषां संस्काराणां नित्यत्वं विद्यते तथाप्यानुषंगिकं फलं महर्षि याज्ञवल्क्येनाह—

एवमेन: शमं याति अर्थात् बीजगर्भाभ्यां यत्किमपि दोषमुद्भूतं भवति तत्सर्वं शाम्यति। बीजगर्भसमुद्भवदोषं किमस्तीत्येव विषये रजवीर्याभ्यां

संबंधितं गोत्रव्याधिसंक्रान्तिनिमित्तकादि दोषाणां विनाशो भवति। विज्ञानेश्वरानुसारेण तेन गर्भेन पतितानामुत्पतिर्न स्यात्। मनुरप्युक्त्म्–गार्भैर्होमैः जातकर्म चूड़ामौञ्जीनिबन्धनैः द्विजानां बैजिकं गार्भिकं पापानामपमृज्यतेऽ [5]स्वाध्यायेन वृतैः होमैः त्रैविद्येन इज्यया यज्ञै महायज्ञैश्च माध्यमैः ब्राह्मीयं तनुं क्रियते। गार्भ शब्दस्यार्थः गर्भशुद्धये याः क्रियाः क्रियन्ते सा होमग्रहणस्य उपलक्षणमस्ति। एतैः संस्कारैः बैजिकं प्रतिषिद्धमैथुनं संकल्पादिनाञ्च पैतृकं रेतोद्भूतदोषादि पापं तथा च गार्भिक अशुचिमातृगर्भवासजं यद्दोषमुत्पद्यते तत्सर्वमपमृज्यते। स्वाध्यायेन वेदाध्ययनेन व्रतैः मधुमांसवर्जनादिनियमैः होमैः सावित्रचरुहोमादिभिः सायंप्रातर्होमैः च त्रैविद्याख्येन वेदव्रतेन च इज्यया ब्रह्मचर्यावस्थायां देव–ऋषि–पितृ–तर्पणादिना गृहस्थावस्थायां पुत्रोत्पादनेन पंचमहायज्ञादिभिः ज्योतिष्टोमादि यज्ञैः इयं तनुः ब्रह्मप्राप्ति योग्यं क्रियते। कुल्लूकभट्टमतेन कर्मसहकृतब्रह्मज्ञानेन मोक्षस्यावाप्तिर्भवति।

संस्काराणां परिभाषा—

अथ परिभाषा— अधिकारितावच्छेदकमशुचित्वं वर्तते। आपद्य कालेऽपि सदा शुचिर्भूत्वा धर्मकार्यं [6]कुर्यात् इति। प्रयोगपारिजाते भृगूक्ति विद्यते यत् क्वचिदपि अशुचिर्भूत्वा श्रुतिस्मृत्यूदितं कर्म न कुर्यात्। तदभावे अन्येनकारणीयम्। माधवीये बौधायनस्य मतं विद्यते–कथञ्चिदपि शक्त्य–वस्थानुरूपतः नित्यानि कार्याणि न लोपयेत्। नित्यानीति नैमित्तिकप्रारब्ध–काम्योपलक्षणमस्ति। नैमित्तिकस्यापि अकरणे प्रत्यवायो भवति। आरंभनियमोदोष आसमाप्तपर्यन्तं भवति। काम्यकर्मणि प्रतिनिधिर्नास्ति। नित्ये नैमित्तिके न। विषयेऽस्मिन् माधवीये उक्तमस्ति अत्यन्तरोगादीना–माक्रमणे राजचौरादिभये च गुरुअग्निदेवकार्येषु नित्ये कर्मणि हानिश्चेत् दोषभाक् न भवति। अतः नित्यपदेन प्रारब्धकाम्यग्रहणं भवति। अयं औपदेशिकनित्यग्रहणेनैव सिद्धौ अतिदेशिकानित्यग्रहणे मानाभावात्। उपवासोप्यधिकारिविशेषणं— स्नानं, सन्ध्या, तर्पणादि, जपं, होमं देवार्चनं कार्यं उपवासवतां कुर्यात्। सायं सन्ध्याहुतिर्विहाय उपवासवतां करणीयम्।

भैषज्यसेवनादृते जलस्य प्राशनं कृर्तुं शक्यते। कालिकापुराणानुसारेण नित्यक्रियायाः सम्पादनं कृत्वा नौमित्तिकानि काम्यकर्माणि च कुर्यात्। एतावता सर्वत्र कर्मकाण्डीय प्रक्रियारम्भात् पूर्वं नित्यकर्मणः सम्पादनं

कृत्वा आचरेदिति प्राप्यते। स्मृत्यर्थसारानुसारेण इक्षु, जलं, दुग्धं, मूलं, फलं, तांबूलं, औषधंच ग्रहणं कृत्वा स्नानदानादिकाः क्रियाः कर्तुं शक्यन्ते। स्नानविषये हेमाद्रौ विलिख्यते दैवे पित्र्ये च कर्मणि यः स्नातः स एवाधिकारी। जाप्ये दाने च एवमेवविधिर्विद्यते। परञ्च तत्र पवित्राणां इति प्रयुक्तम्। पवित्राणि मन्त्राः इति धिया तत्र मन्त्राणां प्रयोगोऽपि निर्दिष्टमस्ति। निरुक्ते मन्त्रः पवित्रमुच्यतेत्युक्त्वा पवित्रस्यापरनाम मन्त्रोऽप्यस्ति इत्युदितम्। स्नानादि प्रकरणे सर्वत्र वारुणमंत्रप्रयोगो भवितुं शक्नोति। अधिकारनिरूपणे प्रातः सन्ध्योपासनादि कृत्वैव विचार्यते। यतोहि सन्ध्याहीनः जनः सर्वदा अशुचिर्जायते। सर्वकर्मस्वनर्हः भवति। जनोऽयं यत् क्रियते तस्य फलं न प्राप्यते। दानहेमाद्रौ वाराहे चापि प्राप्यते सुस्नातः सम्यगाचान्त सन्ध्यादि नित्यकर्माणि कृत्वा कामक्रोधविहीनो भूत्वा पाखण्डादि रहितं जितेन्द्रियो सत्यवादिश्च सर्वकर्मसु प्रशस्ताः भवन्ति।

कर्माङ्गस्नानादि विषये मार्कण्डेयपुराणे प्राप्यते-दैवं पित्र्यञ्च कर्मणोः शिरस्नानं कुर्वीत। श्मश्रुकर्म प्राङ्मुखोदङ्मुखीभूत्वा सम्पाद्यते। श्मश्रुकर्मणान्ते शिरस्नानस्य विधानमस्ति। अन्यथाशुचित्वञ्जायते। तदापुनर्स्नानस्यापत्तिर्भवति। मंगलकृत्ये स्नानं तिलामलकादिनोद्वर्त्याभ्यङ्गपूर्वकं क्रियते। रुद्रकारिकायां भगवता परशुरामेणोक्तम् स्वगृहमागत्य मङ्गलस्नानमाचरेत्।

मङ्गलस्नानविधानम्— मङ्गलस्नानं कथं भवतीति विषये प्राप्यते सर्वौषधीगंधचूर्णैः युक्तैः कृष्णातिलामलैः। उद्वर्त्यांगानि तैलेन चम्पकादि सुगंधिना। ब्राह्मणैः सह तैलेन मङ्गलस्नानं कुर्वीतेति तात्पर्यः। मङ्गलस्नानं कदा कुर्यादिति विषये निर्णयसिन्धौ कात्यायनस्योक्तिर्यथा— माङ्गल्यं विद्यते स्नानं वृद्धिपूर्वोत्सवेषु च। स्नेहमात्रसमायुक्तं मध्याह्नात्प्राक्तदिष्यत। कर्मणि अहतयोः अधरीयोत्तरीयोः परिधानं कर्तव्यम्। पारस्करगृह्येऽपि प्राप्यते अहतं वासो धौतं वाऽमौत्रेण आच्छादयीत इति। स्मृतिरत्नावल्यां कात्यायनेन अहतं वस्त्रं किंभवतीति विचार्यते ईषद्धौतं, नवं, श्वेतं, सदशं, यन्नधारित, तत्सर्वमहतं भवति। ईषद्धौतमित्यरजकादिनाधौतं भवति परञ्च नागदेवाह्निके व्याख्यातं असकृत् धौतमहतमस्ति। काश्यपेनोक्तं अहतं यन्त्रनिर्मुक्तवासः। स्वायंभुवानुसारेण अहतं वासं तस्मिन्नेव काले नापितु सर्वदा फलदायकं भवति। मांगलिकस्य व्याख्यायां विवाहादि स्वीक्रियते।

अन्यत्र यज्ञादौ ईषद्धौतं क्षौमवस्त्रं स्वीक्रियते।

हेमाद्रौ बृद्धमनुवचनानुसारेण स्वयं धौतेन वस्त्रेण कर्तव्याः क्रियाः। न तु रजकधौतं न उपभुक्तं वस्त्रं गृह्णीयात्। धौतवस्त्रप्रसारणार्थमपि नियमाबद्ध-मस्ति-प्रागग्रमुदगग्रंवा धौतवासः प्रसारयेत्। पश्चिमाग्रं दक्षिणाग्रञ्च प्रसारितं वस्त्रं पुनःप्रक्षालनानन्तरं शुद्धं भवति। महर्षि मार्कण्डेयानुसारेण शयनीये अन्यद्वासःरथ्यासु अन्यत्, देवार्चायामन्यत्, लोकायात्रायामन्यत्, ईश्वरदर्शनार्थमन्यद् वासो भवेत्। धौतवस्त्राभावे वस्त्रान्तरमपि स्वीक्रियते योगियाज्ञवल्क्यानुसारेण धौतवस्त्राणामभावे शाणक्षौमाविकानि च गृह्यते। तत्र शणेन निर्मितमिति (शण + अण्) अर्थात् शणनिर्मितं वस्त्रम्। यथा कपासं, क्षौमं रेशमीवस्त्रम्, आविकानि ऊर्णसूत्राणिवस्त्राणि स्वीक्रियन्ते। तत्र कुतपं योगपट्टं वा धारयेत्। कुतपो नेपालकम्बलेत्युत्वा स्पष्टी क्रियते। उत्तरीयवस्त्राभावे पारस्करगृह्ये प्राप्यते एकं वस्त्रं चेत् पूर्वस्योत्तरवर्गेणाच्छादयेत्। जातूकर्ण्यानुसारेणं वस्त्रोत्तरीयाभावे द्वयंगुलं, त्र्यंगुलं, चतुरगुलं वा सूत्रैः परिमण्डलं कुर्यात्। आपस्तम्बानुसारेणार्द्रवस्त्रपरिधानस्य निषेधो विद्यते— आर्द्रवस्त्रधारण कृत्वा बहिर्जानुहस्तश्च कृत्वा जपहोमपरिग्रहादीन् क्रियन्ते यत् सर्वं तद्राक्षसं भवति। यः जले शुष्कवस्त्रेण स्थले आर्द्रवस्त्रेण जपहोमादिदानञ्च करोति तत्सर्वं कृतं निष्फलं भवति। वर्ज्यवस्त्राण्युक्तानि सन्ति। यथा—[7]न स्यूतं, न दग्धं, न पारक्यं, न मूषकोत्कीर्णं, न जीर्णं वस्त्रधारणं कृत्वा कर्माणि कुर्यात्। काषायवस्त्रेऽपि जप होमादिकं कर्त्तव्यं परञ्च गमनं न कर्तव्यम्। आचारादर्शे प्राप्यते न रक्तं, न उल्वणं, न नीलं वासं, न मलाक्तं वस्त्रं धारयेत्। उल्वणं नामाचलयुक्तं वस्त्रं भवति। जीर्णं नीलं, संधितं, पारक्यं, मैथुनेधृतं, छिन्नाग्रमुपवस्त्रं धारणे निषिद्धमस्ति। अपं च निषेधः सति संभवे विद्यते। अर्थात् यदि संभवमस्ति चेत् त्याज्यः। एवमेवाशयः गौतमेन उक्तम्— सतिसंभवेन जीर्णमलवद्वासाः स्यान्नरक्तमुल्व-णमन्यधृतं वा वासोविभृयादिति।[8] नीलीरक्तवस्त्रपरिधानं सर्वथा निषिद्धमस्ति। प्राप्यते-नीलीरक्तवस्त्रेण स्नानं, दानं, होमः, स्वाध्यायः, पितृततर्पणं वृथा भवति। तद्धारणे प्रायश्चित्तमाह आपस्तम्बः— अहोरात्रपर्यन्तं उपोषितं भूत्वा पञ्चगव्यं प्राशयेत्। आचारचिन्तामणौ प्राप्यते कंवले पट्टवस्त्रे च नीलीवर्णात्मकं न दुष्यति। स्त्रीणां क्रीडार्थ संभोगे शयनीये न दुष्यति। भृगूक्तिरस्ति- स्त्रीधृताशयने नीली ब्राह्मणस्य न दुष्यतीति।

व्याघ्रपादानुसारेणैकवस्त्रधारणं कृत्वा कर्माणि न कुर्यादिति निर्दिष्टमस्ति। प्राप्यते-[9]होमेदेवार्चनाद्यासु क्रियास्वाचमने तथा। नैकवस्त्र: प्रवर्तेत द्विजवाचनिके जप इति। द्विजवाचनिकं स्वस्तिवाचनमस्ति। एकस्य वस्त्रस्य लक्षणं शातातपानुसारेणेत्थमस्ति— सव्यादंशापरिभ्रष्ट अर्थात् वामस्कन्धोपरिवस्त्राभाव:। यत्रैकवस्त्राभाव: स्यात् तत्र देवपित्र्य कर्माणि वर्जितानि सन्ति। त्रिकच्छनिर्णय: त्रिकच्छस्य निर्णय: संग्रहे कथ्यते—वामपृष्ठे तथा नाभौ त्रिकच्छं भवति। त्रिकच्छयुक्तो विप्र: शुचिर्भवति। आदौ कच्छ: ततो नीवी तथा नाभिमध्ये वस्त्रं गृह्णीयात्। नीवीदक्षिणत: स्थापितं भवति। धर्म कार्ये वर्ज्याणि वस्त्राणि कानीति शंकया संग्रहे यथोक्तं तथैवात्र प्राप्यते-यद् वस्त्रं कटिवेष्ट्यमस्ति, पुरीषोयेनकृतमस्ति मूत्रमैथुनकृद्वस्त्रमस्ति वा तत्सर्वं धर्मकार्ये विवर्जयेत्। तत्रासुरीकक्षायानिषेध: प्राप्यते—

[10]स्नाने दाने जपे होमे दैवे पित्र्ये च कर्मणि।
बध्नीयान्नासुरीकक्षां शेष काले यथा रुचि:।।

आसुरीकक्षाया: लक्षणम्—

[11]परिधानाद्बहि: कक्षा निबद्धाचासुरीमता।
धर्मकर्मणिविद्वभिर्वर्जनीया प्रयत्नत इति।।

अत्र: बहि: कक्षा इत्युक्ते बहिर्निर्गता कक्षा। कक्षा नाम पश्चादञ्चलम्। अन्येषामाचार्याणां नये प्रान्तद्वयं कक्षा कथ्यते। सा कक्षा वहिर्निर्गता न भवेत्। उपवीतित्वं बद्धशिखित्वञ्च महत्वम्—

यथा छंदोगपरिशिष्टे कात्यायनस्य मतं विद्यते तथैवात्र लिख्यते—

सदोपवीतिना भाव्यं सदाबद्धशिखेन च।
विशिखोव्युपवीतिश्च यत्करोति न तत्कृम्।।

अत्रोपवीतित्वं सदाबद्धशिखित्वञ्च यज्ञोपवीत निवीत प्राचीनावीतस्यच लक्षणं भारद्वाजेनैवं हेमाद्रौ उच्यते— दक्षिण बाहुमुत्थाय बामस्कन्धे यज्ञोपवीतं प्रवेशयेत्। एतादृशं धारितं यज्ञोपवीतं देवकार्येषु शस्तं भवति। यं यज्ञोपवीतं कंठावलम्बितं भवति तस्य नाम निवीत्युच्यते। बामहस्तमुत्थाय दक्षिण-

स्कन्धे निवेशयेत् चेत् प्राचीनावीत्युच्यते। प्राचीनावीतिपितृकर्मसु स्वीक्रियन्ते। यज्ञोपवीतधारणसंख्या स्मृत्यर्थसारे हरिहरभाष्ये चेत्थं प्रतिपाद्यते—

ब्रह्मचारिण एकं स्यात् स्नातस्यद्वे बहूनि वा।
तृतीयमुत्तरीयार्थे वस्त्राभावे तदिश्यत इति।।

अत्र प्राप्यते यत् तृतीयमुपवीतमुत्तरीयार्थं तुरीयादिवस्त्रार्थञ्च धारयेत्। अत्र बहूनि वा इति काम्यस्य विषयः। तत्र देवलस्य मतमस्ति आयुकामनया बहूनि धार्यते। यज्ञोपवीतविषये विश्वामित्रस्योक्तिरप्युपर्युक्त विद्यते।

शिखाबन्धविचारः— चतुर्विंशतिमते मध्ये शिखाबन्धनं भवेत्। माध्यन्दिनीयान् विप्रान् दक्षिणपार्श्वे शिखां बध्नीयात्। सामवेदिविप्रान् वामपार्वे शिखां बध्नीयात्। अनन्तदेवेनोक्तं सर्वेषां शिरसि यत्र कुत्रचित् केशसत्वे तत्रैव शिखाबन्धनं कुर्यात्। खल्वाटादीनां सर्वथा केशाभावे काठकगृह्ये उक्तम्-प्रमादात् न शिखास्यात्तदा कौशी शिखां ब्रह्मग्रथियुतां दक्षिणकर्णे निदध्यात्।

अथासनविचारः— हेमाद्रौ कौशिकेन प्रतिपादितं यतीनां कृते कुशासनं सदा पवित्रं भवति विशिष्टरूपेण। कुशासनोपवेशने उत्तमं योगं सिद्धयति। विष्णुपुराणानुसारेण कुशासनासीनो भूत्वा यज्ञोपिवीतिना सर्वं प्रकर्तव्यं अन्यथा विफलतामाप्नुते। अत्र कुशोपरिनिवेष्टने इति कुशासनोपादानं कर्मार्हासनोपलक्षणमस्ति। विषयेऽस्मिन् प्राप्यते[12]—

शमीकाश्मर्यशल्लाश्चकदंबो वारणस्तथा।
पंचासनानि शस्तानि श्राद्धेदेवार्चने तथा।।

अत्र काश्मर्यः सालवृक्षः। शल्लः शिंशपावृक्षः। श्राद्धे देवार्चन इति दैव पित्र्य कर्ममात्रोपलक्षणम्। आसीनाष्वनियमे नियममाह[13]—

तिष्ठन्नासीनः प्रह्वो वा नियमो यत्र नेदृशः।
तदासीनेन कर्त्तव्यं न प्रह्वेण न तिष्ठता।।

यस्मिन् कर्मणि आसीनं भूत्वा उत्तिष्ठता वा कर्माणि कुर्वीतेति न ख्यातं तत्रासीनं भूत्वैव कर्माणि कुर्यात्।

प्रौढ़पाद निषेधः—

दानमाचमनं[14] होमं भोजनं देवतार्चनम्।
प्रौढ़पादो न कुर्वीत स्वाध्यायं पितृतर्पणम्।।

प्रौढ़पादं भूत्वा दानं, आचमनं, होमं, भोजनं, देवतार्चनं, स्वाध्यायं पितृतर्पणञ्च न कर्त्तव्यम्। प्रौढपादस्यलक्षणं यथा—

आसनारूढपादस्तु जान्वोर्वाजंघयोस्तथा।
कृतावसक्थिकोयस्तु प्रौढ़पादः सउच्यत।।

अत्र पादोपरि पादबन्धं कृत्वा उपवेशनं निषिद्धमस्ति।

अदिङ् नियमे नियममाह—

[15]यत्र दिङ्नियमो न स्याज्जपहोमादिकर्मसु।
तिस्रस्तत्रदिशः प्रोक्ता ऐंद्रीसौम्याऽपराजिता।।

कं दिक्वन्तं भूत्वा कर्माणि कुर्वीतेति नादेशावसरे तिस्रः दिशाः स्वीक्रियन्ते। ऐन्द्री सौम्या अपराजिता च। ऐन्द्री पूर्वदिशा, सौम्या उत्तरदिशा, अपराजिता ऐशानीदिशा च।

अनुक्तांगे अंगमाह—

[16]यत्रोपदिश्यते कर्मकर्तुरंगं न चोच्यते।
दक्षिणस्तत्रविज्ञेयः कर्मणां पारगः करः।।

यस्मिन् कर्मणि अंगोपदेशाभावो स्यात् तत्र दक्षिणसांगमेव स्वीक्रियन्ते—

इदानीं मन्त्रसहितं पवित्रधारणस्य निरूपणं क्रियते तदुक्तं प्रयोग पारिजाते नामके ग्रन्थे विप्रः मन्त्रोचारणेन सहितेन सर्वेषु कर्मसु पवित्र-धारणं कर्तुं शक्नोति। अमन्त्रकं पवित्रधारणमफलं भवति। अत्रीमहर्षिणानुसारेण [17]उभाभ्यां हस्ताभ्यां दर्भपवित्रकं धारणमावश्यकमस्ति। तत्र विलिखितमस्ति। पवित्रकं ब्रह्मग्रन्थि समन्वितं धारणीयम्। ब्रह्मयज्ञे, जपे च ब्रह्मग्रन्थि-विधानमस्ति। भोजने पवित्रकं वर्तुलं धारणीयमिति प्रोक्तं विद्यते। ब्रह्मग्रन्थियुक्तं पवित्रलक्षणं हेमाद्रौ गारुड़े उक्तमस्ति-वैष्णवं मार्गं संत्यज्य ब्रह्ममार्ग-

विनिःसृतो भवति। सकृत् प्रदक्षिणक्रमेण प्रदक्षिणं कृत्वा पवित्रस्य निर्माणं क्रियते। ब्रह्ममार्ग विषयेऽत्र निर्देशोऽस्ति पवित्री कर्तुः स्वाभिमुखदिशां प्रति प्रवेशो ब्रह्ममार्गः। यदा सः पाशः प्रादक्षिण्येन समग्रवेष्टनं कृत्वा पुरोभागेन प्रवेशं कार्य्यते तदा स एव ब्रह्मग्रन्थि भवति। इदानीं वृत्तग्रंथिमत्पवित्रं कीदृशं भवतीति विषये तत्रैवोक्तं लक्षणं प्रतिपाद्यते अर्धप्रदक्षिणां कृत्वा तस्यां शिखांशं प्रावेशयेत्। वैष्णवेन मार्गेण वृत्तग्रंथि पवित्रकस्य लक्षणमस्ति। वैष्णवोमार्गः पश्चाद्भागः।

यादृशाणां दर्भशिखानां द्विगुणीकृत्य प्रदक्षिणक्रमेणार्धवेष्टनं विधाय पाशः प्रदीयते तथा च पश्चाद्भागेन मार्गेण नीत्वा प्रवेशयेत्तदा वर्तुलोग्रन्थिः भवति। पवित्रके दर्भाणां विषये का संख्या इत्यस्मिन् प्राप्यते चतुर्भिदर्भपिञ्जुलैः[18] ब्राह्मणस्य पवित्रकं भवति। यथाक्रममेकैकं न्यूनवर्णानुसारेण प्रयुज्यते यथा त्रिभिर्दर्भपिञ्जुलैः क्षत्रियस्य पवित्रकं, द्वेदर्भपिञ्जुले वैश्यस्यैकं शूद्रस्य च। द्वितीयपक्षमत्रविद्यते यत् सर्वेषां कृते द्वे पवित्रके धारणीयम्। एतत् संख्यविशिष्टपवित्रलक्षणं विद्यते। तदभावेऽपि द्विदलं कौशं अनन्तगर्भिणं साग्रं प्रादेशमात्रपरिमाणपुरस्सरं सर्वत्र ग्रहणीयम्। इति छान्दोग्य परिशिष्टे कात्यायनस्योक्तिरस्ति। द्विदलं अखण्डैकपत्रात्मकं भवति। पवित्र-धारणस्यस्थानमुक्तमस्ति आचारमीमांसायां रत्नावल्याञ्च। उभयोर्पर्वणोर्मध्ये भागे पवित्रधारणं कुर्यादिति विदुषां विचारः। अनामिकांगुल्याः अग्रिमे पर्वणि पवित्रस्य निसर्गं कुर्यात्। पवित्रमुच्छिष्टं न भवेत्, भुक्तमुच्छिष्टं पवित्रं विवर्जयेदिति। कुशपवित्रस्याभावे हेमाद्रौ विलिख्यते कुशदूर्वामयान्य-न्यानि पवित्राण्यपि प्रयुज्यते। हेम्नः सुवर्णस्य पवित्रनिर्माणं कर्तुं शक्यते। तत्प्रमाणविषये नागदेवमतमस्ति— षोडशमाषोर्ध्वं हेमपवित्रकं कुर्यात्।

षोडशमाषात् स्वल्पतरं न कुर्यात्। हीनकर्मणि उच्छिष्टेन कुशेनापि पवित्रकं निर्मीयते परञ्च स निर्माल्य रूपं भवति। तत्र हेम्नः पवित्रकं न कर्तव्यम्। दर्भकुशकुतपादीनां लक्षणमीत्थमस्ति कौशिकः सप्तपत्रात्मकाः[19] दर्भाः तिलक्षेत्रे समुद्भवाः दर्भाश्च द्विजातीनां कृते देवे पित्र्ये च कर्मणि प्रशस्तकारकाः भवन्ति इति वदन्ति। अप्रसूता कुशाः दर्भाः भवन्ति तथा प्रसूता कुशाः कुशा स्मर्यते। मूलसहिताः कुशाः कुतपाः भवन्ति। यस्याग्रच्छिन्नो भवति तस्य तृणसंज्ञाभिधीयते। दर्भाः यस्या अप्रसूता संज्ञेतिकथिता सा

संजात अप्रसवा, अपुष्पा इति नाम्नाऽपि गृह्यते। दर्भादीनां अयातयामत्वं कथं भवतीतिविषये हेमाद्रौ गृह्यपरिशिष्टे विलिख्यते-दर्भाः, कृष्णाजिनम्, मन्त्राः, ब्राह्मणाः, हविः, अग्नयः अयातयामानि संज्ञकानि सन्ति। ऐतेषां पुनः पुनः नियोज्यानि। यातयामत्वं किमस्तीति विषये अनेक प्रयोगानर्हत्वमस्ति। अयातयामत्वस्य विशेषताऽस्ति एकत्रविनियुक्तस्याप्यनेकक्रियांतरोपयोग-योग्यत्वम्। हविरित्यत्र आज्यं स्वीक्रीयते। कात्यायनेन लिखितं नाज्यादशेषाद्। पुरोडाशौदनादेस्तु शेषमस्ति।

पुरोडाशादीनां पर्युषितं संज्ञाभवतीति कारणात् पुनर्विनियोजनमसंभवमस्ति। कोशादिग्रन्थे आज्य नामकः सुहविरेव प्रयोज्योऽस्ति। दर्भाणां यत्किमपि अयातयामत्वं विद्यते स भाद्रमासे अमावास्यां कुशोत्पाटनीति विख्याता तिथौ गृह्यते। विषयेऽस्मिन् प्राप्यते[20] नभस्य भाद्रपदस्य मासे अमावास्यायां दर्भोच्चाटने तस्मिन् दर्भे अयातयामत्वमागच्छति। एते दर्भाः पुनः पुनः विनियोज्यन्ते।

निर्माल्यसंज्ञकाः कुशाः हेमाद्रौ लघुहारीतस्यमतं विद्यते चितौ ये दर्भाः, पथि मार्गे ये दर्भाः, यज्ञभूमिषु ये दर्भाः, स्तरणे, आसने, पिण्डेषु प्रयुक्ताः ये कुशाः ते परिवर्जनीयाः। तत्र लिखितमस्ति—

पिंडार्थं ये कृता दर्भाः यैः कृतं पितृतर्पणम्।
मूत्रोच्छिष्टं धृताये च तेषां त्यागो विधीयते।।

नीवीमध्येषु ये दर्भाः, ब्रह्मसूत्रे च ये दर्भाः कृताः ते सर्वे पवित्राः भवन्ति। कीदृशमस्ति-यथाकायस्तथाकुशा। गृह्यपरिशिष्टेऽपि-अमेध्ययुक्तादर्भाः त्यागयोग्यं भवन्ति। मार्कण्डेयेन उक्तम्— देवार्चनादि कार्याणि, गुरुणामभिवादनं सम्यगाचम्य क्रियतेति द्विजानां प्रयतनीयम्। अन्तेऽपि आचमनस्य प्रयत्नं करणीयं परञ्च कर्मारम्भे आचमनमवश्यमेव करणीयम्। प्राणायामस्या-धिकारी विषये वृद्धमनु आह-प्राणायामं कृत्वा संयतो भूत्वा सर्वाणि कर्माणि कर्तव्यम्। प्राणायामत्रयं कृत्वा जनः पूतो भवति। तत्प्राणायामः ओंकारपूर्वकं भवति। योगियाज्ञवल्क्यानुसारेण प्राणायामस्य लक्षणं विद्यते यत् व्याहृतिसहितं प्रणवयुक्तं गायत्रीमन्त्रं वारत्रयं यत्र पठ्यते तत्र प्राणायामः। अर्थात् कस्यापि कार्यस्यारम्भादौ प्रणवस्योच्चारणं श्वासनियमनपूर्वकं कर्तव्यम्।

दाल्भ्यपरिशिष्टे लिखितमस्ति— ब्रह्मयज्ञजप-होमो-देव-ऋषि-पितृ-कर्माणि अनोंकृत्यं कृत्वा यदि क्रियते चेत् सर्वसिद्धिकारकं न भवति। शाट्यायन-स्यापिमतमस्ति दानयज्ञतपः स्वाध्यायजपध्यानं संध्योपासनप्राणायामं देवपित्र्यर्च-नेषु मन्त्रोच्चारणे आदौ प्रणवमुच्चारयेदिति। ततो मन्त्रमात्रोच्चारणसन्दर्भे आदौ ओंकारः कर्तव्यः इति सर्वानुक्रमसूत्रभाष्येनिगदितमस्ति। अत्र प्रवर्तयेदितिप्रयोगोऽस्ति तर्हि केचन् विद्वांशः प्रारंभ एव अर्थं प्रकुर्वन्ति। विषयेऽस्मिन् छान्दोग्यपरिशिष्टेकात्यायनस्योक्तिरस्ति-होममन्त्रेषु पृथक् रुपेणोकारं न कुर्यात्। अन्यत्र आचमनादि काले प्रयोक्तव्यम्। इत्यस्मिन् मदनरत्ननामके ग्रन्थे व्यासस्योक्तिः-सर्वदा कर्मारम्भेषु त्रिमात्रः प्रयोक्तव्यम् त्रिमात्रविषये ॐ इति अधिकृत्य आपस्तंबोऽपि एवमेवमाह— ऋष्याद्यज्ञाने दोषमस्ति। दानहेमाद्रौ याज्ञवल्क्यस्य मतं विद्यते—

आर्षछंदश्चदैवत्यंविनियोगस्तथैव च।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः।।

अर्थात्-कस्यापि मन्त्रस्य ऋषि-छंद-देवता-विनियोगादीनां ज्ञानं ब्राह्मणस्य कृते आवश्यकमस्ति। अविदित्वा यः यजनं, अध्ययनं, जपं, होमं तथा तर्पणादि करोति स अल्पफलयुक्तं भवति। **ऋषयादिज्ञाने फलमाह** याज्ञवल्क्यमतानुसारेण— यः पूर्वोक्तप्रकारेण ऋष्यादीन् वेत्ति जानाति तस्याधिकारः रहस्यादिषुकर्मसु भवति। कुत्रापि अपवादः— कृष्णभट्टीये श्राद्धे वैतानिके मखे कर्मणि ऋषिछन्दस्यस्मरणं न कुर्यात्। अन्यत्रेऽपि अग्निहोत्रे, वैश्वदेवे, विवाहादि विधौ होमकाले प्रायशः ऋषिछंददेवता न दृश्यंते। शांतिकादिषु कार्येषु मंत्रपाठक्रियादिषु तथा च होमे ऋषि देवता प्रकर्तव्या। वामनपुराणे— सर्वमंगल मांगल्ये श्रेष्ठं वरदं प्रभुं स्मृत्वा सर्वाणि कर्माणि कारयेत्। नारायणग्रहणमत्र गणेशोमामहेश्वराद्युपलक्षणमस्ति। संकल्पं कृत्वा अधिकारित्वमागच्छति। तदुक्तं मार्कण्डेयपुराणे-स्नानदानव्रतादि कर्मषु संकल्पं विधिवतं कुर्यात्। विषयेऽस्मिन् दक्षस्य मतमस्ति-आदौ प्रातः संध्यां कृत्वा ततो संकल्पस्याचरणं कुर्यात्। अत्र संकल्प इत्यभिप्रायेन अमुक फलार्थं इदं कर्म करिष्ये इति आकारकं मानसं कर्म उच्यते। भटाचार्यैः उक्तम्- संकल्पः कर्म मानसम्। तत्र विशिष्टरूपेण देवलस्योक्ति मासपक्षतिथी च सर्वशः निमित्तानामनुच्चारणं फलभाग् न भवति। संकल्पेन

बिना कर्म सम्पादने दोषोऽस्ति। तिथितत्वे नामके ग्रन्थे तथा च भविष्यपुराणे लिखितमस्ति— संकल्पेन बिना यानि कर्माणि क्रियन्ते तानि अल्पफल-समात्मकं भवन्ति तथा च तस्य धर्मस्यार्धक्षयो भवति। उदकोपस्पर्शनिमित्तानि आह कात्यायनः—रौद्रं, राक्षसं, आसुरं, अभिचारिकं, पितृ, आत्मानञ्च संबद्धं मंत्रमुच्चारयित्वा जलं उपस्पृशेत्। अत्र च शब्दात् तद् दैवत्यं कर्म कृत्वा इति कर्कोपाध्यायमतमस्ति। हेमाद्रौ याज्ञवल्क्यस्य मतमस्ति—रौद्रौ पित्र-असुरान् मन्त्रान् तथा च आभिचारिकान् मन्त्रान् उच्चरित्वा व्याहृत्याऽत्मानं आलभ्य अपोपस्पर्शनं कर्तव्यम्। छन्दोगपरिशिष्टे कात्यायनः पितृमन्त्रानुच्चारणे, आत्मालंभे, पतितेक्षणे, अधोवायु उत्सर्गे, प्रहासे, अनृतभाषणे, मार्जार मूषकस्पर्शे आकृष्टे क्रोधोत्पन्न-काले सर्वेषु निमित्तकर्मसु अपः स्पृशेत् इति। अत्र आत्मालम्भः हृदयोपस्पर्शोऽस्ति। अत्र पितृमंत्रोच्चारणं, आत्मलंभनं अवेक्षणं यज्ञादौ यानि विहितानि तानि एव ग्राह्याणि लौकिकानि न। प्रहास इत्युक्ते महति हासं भवति। मार्जारस्पर्शं स्पष्टमस्ति।

आक्रुष्टे परुषभाषणे, क्रोधेसंभवमानसिको भवेत्तथापि। भर्तृयज्ञादयः वदन्ति आपः स्पर्शने जलस्पर्शमेव विवक्षितं आचमनं न। इति सर्वे कल्पसूत्रस्य भाष्यकाराः व्याख्यां कुर्वन्ति। अपां स्पर्शनं आचमनमस्ति इति हेमाद्रिणा उक्तम्-अत्र सर्वेषु वाक्येषु अपस्पृशेदिति जलस्पर्श एव याज्ञिक सम्प्रदाय विरुद्धोऽस्ति। क्षुतेनिष्ठीवने सुप्ते परिधाने अश्रुपातने। एतेषु पंचषु प्रकरणेषु आचमनं कुर्यात् उतवा दक्षिणं श्रोत्रं स्पृशेत्। कर्मकाले अधमांगस्य स्पर्शनं निषिद्धमस्ति। मदनरत्ने बौधायनमतमस्ति कर्मयुक्तो नरस्यनाभितः अधोभागस्य स्पर्शमशुभमस्ति। कर्मकाले अधमजनानां सन्निधिः निषिद्धोऽस्ति। स्कन्दपुराणे लिखितमस्ति पाखंडिजनानां पतितजनानां नास्तिकजनानां च पार्श्वे पुण्यकर्मणां क्वचिदपि फलं न प्राप्यते।

कर्मकाले निन्द्यशब्दानाह- हेमाद्रौ याज्ञवल्क्यः-पेषणादिकयंत्रेषु शब्दो यावत्कालपर्यन्तं प्रवर्तते, पतितानां, अन्त्यजानां, चाण्डालादीनां यावत् शब्दं भवति तावत्कालपर्यन्तं कर्म न कुर्वीत्। सन्ध्याद्वयकालेऽपि कर्म न कुर्वीत्। **उपांशुलक्षणं प्रतिपाद्यते** आचारप्रदीपे याज्ञवल्क्यः शब्दं बिना जपं भवति अर्थात् जिह्वा चलायमानं भवति एतादृशं जपं विद्वांशः उपांशु वदन्ति। मनसा यं क्रियते तं मानसं भवति। वाक् यम लोपे प्रायश्चित्तं

प्रतिपादयन्ति याज्ञवल्क्यमहोदयाः। यदि वाग्यमलोपो भवति जपे, तर्हि वैष्णवं मन्त्रं व्याहरेद् अथवा विष्णुमव्ययं स्मरेत्।

अक्रियायाः लक्षणं कथ्यते छंदोगपरिशिष्टे कात्यायनेन। अक्रिया त्रिविधात्मिका भवति-अक्रियाः परोक्ता तथा तृतीया यथाक्रियाऽस्ति। परोक्तकर्माश्रयणे दोषं निगदितमस्ति। कात्यायनमतमस्ति— स्वशाखायाः आश्रयं त्यक्त्वा परकीया शाखाया आश्रयं कर्तुं ये इच्छन्ति ते दुर्मेध्ययुक्ताभवंति तेषां चेष्टा ओघयुक्तां स्वीक्रियन्ते। अविरुद्धं परोक्तं कर्माश्रयणमाह यन्नाम्नातं स्वशाखायां परोक्तं या अविरोध्यस्ति। विद्वभिः तदनुष्ठेयमग्निहोत्रादि कर्मवत् इति कुर्यात्। गृह्यपरिशिष्टे लिखितमस्ति— बहु अल्पं स्वगृह्योक्तं यस्य कर्म प्रकीर्तितमस्ति तस्य तावति शास्त्रार्थे कृते सर्व कृतं भवति इति साध ारणाना परा उक्ता।

अयथा कर्मषु गृह्यपरिशिष्टे कात्यायनस्योक्तिरस्ति-मोहादि प्रभावेण प्रभावितो भूत्वा अन्यथा क्रियते चेत् तस्य समापनमप्यन्यथा एव भवति एवं ज्ञानं कर्मसमाप्त्यनन्तरं भवति। तत्र लिखितं विद्यते कर्मसमाप्त्यनन्तरं यद्येवं ज्ञायते मया अयथाकृतं तर्हि पुनरावृतिर्न भविष्यतीति निश्चयो कर्तव्यः। दोषसमनार्थं पुनरविलम्बेनानुष्ठानं कर्तव्यम्। यदि कार्यस्यास्य सम्पादने विलम्बमथवा दुष्करत्वं विद्यते चेत् विष्णुस्मरणं कृत्वा अनावृत्तिकरणीयम्। प्रधानक्रिया करणे प्रधानक्रियायामदि दोषो जायेत चेत् सांगं तत्क्रियते। तदंगस्य अक्रियायां तु नावृतिर्भवति न हि तत्क्रिया भवति। किन्त्वस्यसमाधानार्थं सा कारिकात्रवर्णिताविद्यते अज्ञानाद्वायदिवामोहाद् प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः इति याज्ञवल्क्योक्तं प्रायश्चित्तं विद्यते तदनुष्ठेयम्। इत्थं प्रयोगसमाप्त्यन्तरं अकरणकज्ञानेऽप्येतदेव समाधानम्।

देवानां पूजनविषये के पंचोपचारा इति समाधाने महर्षि जाबालि-मतेन ध्यानमावाहनं निवेदनं नीराजनं प्रणामञ्च ऐते पंचपूजाप्रकाराः। अन्यत्र-गन्धं, पुष्पं, धूपं, दीपं नैवेद्यञ्च पंचोपचाराः। दशोपचाराणां विषये ज्ञानमालायामुक्तम् अर्घ्यं, पाद्यं, स्नानं, वस्त्रनिवेदनं, गंधाद्या नैवेद्यान्ता दशोपचाराः भवन्ति। तत्रैव षोडशोपचाराः ज्ञानमालायां आसनं च स्वागतं, अर्घ्यं, पाद्यं, आचमनीयं, मधुपर्कार्पणं, स्नानं, वसनाभरणानि, गन्धं, पुष्पं

धूपं, दीपं, नैवेद्यम्, मालां, अनुलेपनं, नमस्कारः, विसर्जनम् एते षोडशोपचाराः। नागदेवोऽप्यत्र आवाहनं, आसनं, पाद्यं, अर्घ्यं, आचमनीयकं, स्नानं, वस्त्रं, उपवीतं गन्धं माल्यादीन्, धूपं, दीपं, नैवेद्यं, नमस्कारः प्रदक्षिणा उद्वासनञ्चेति षोडशकं षोडशोपचाराः वदन्ति।

पञ्चगव्यम् स्कान्दे-पञ्चगव्ये इमानि वस्तूनि भवन्ति-गोमूत्रं, गोमयं, क्षीरं, दधि घृतञ्च। यथाक्रमं ज्ञेयम् मधुरत्रयं कात्यायनानुसारेण— आज्यं, क्षीरं, मधुं मधुरत्रयं भवति। मधुपर्कीय द्रव्याणां विषये आपस्तम्बोक्तिः घृतं एकगुणं, तद्विगुणं मधु, दधि समगुणं मधुपर्काख्यं भवति। अर्घद्रब्याणां विषये छान्दोग्यपरिशिष्टे लिख्यते जलं, क्षीरं, कुशाग्राणि, दधि, अक्षतान्, तिलाः, यवाः, सर्षपश्च ऐते अष्टांगर्घ्याः भवन्ति। अमृताह्वयधूपद्रव्याणीमानि-अगरु, चन्दन, मुस्ता, सिह्वकं वृषणं, समंभागं कृत्वा निर्मितं धूपमृताह्वयं धूपं भवति।

आदित्यपुराणे पंचरत्नानीमानि कनकं, सुवर्णं, कुलिशं (हीरकं), नीलं, पद्मरागं (पुखराज) मुक्ता च। ब्रह्माण्डपुराणानुसारेण पञ्चभंगा-ऐते पीप्पलं, उदुम्बरं, प्लक्षं, आम्रंवटञ्च। हेमाद्रौ यक्षकर्दमः— कस्तूरिकायाः भागद्वयं कुंकुमस्य, भागद्वयं चन्दनस्य त्रयोभागाः तथा भागेकं शशिनं भवति। मदनरत्ने सर्वगन्धद्रव्याणीमानि-कुकुम-अगरु-कर्पूर-कस्तूरी-चन्दनं-जातीफलञ्च। छांदोग्यपरिशिष्टे सर्वोषधयस्सन्ति हरिद्राद्वयं, मुरा, शैलेयं, चन्दनं, वचा, चम्पकं मुस्ता च। मात्स्ये सप्तमृदः-गजाश्वरथवल्मीकसंगमह्रद् गोकुलाच्च या। सप्तधान्यानि भविष्ये यव-गोधूमधान्यानि, तिलाः, कङ्गुः, श्यामकाः, चणकाश्च सप्तधान्यानि उदाहृतानि सन्ति।

सप्धातवः सुवर्णं, रजतं, ताम्रं, आरकूटं, लौहं, त्रपु तथा सीसम् एते सप्तधातवः सन्ति। आरकूटं पित्तलम्, त्रपु रांगा इति। पंचरंगाः वर्णनं पंचरात्रे इत्थमस्ति-मण्डलार्थ मण्डलनिर्माणाय पंचवर्णानि रजांसि कुर्यात्। शालितण्डुलचूर्णेन अथवा यवचूर्णेन शुक्लं वर्णं निर्मीतव्यम्। रक्तवर्णं कुसुंभ सिंदूरगैरिकादिभिः निर्मीयते। हरितालेन पनड़ीचूर्णेन च पीतं वर्णं विनिर्मीयते। अमरकोषे रजनीति वैकल्पिकं नाम जतुकायाः। तत्र जनि जतुका रजनी जतुकृच्चक्रवर्तिनीति लिखितमस्ति। वैद्यक शब्दसिन्धुनामके ग्रन्थे लिखितमस्ति मालवदेशस्य प्रसिद्धस्वानामाख्या लताऽस्ति रजनी।

दग्धयवैः कृष्णं वर्णं निर्मीयते एवं च पीतकृष्णविमिश्रितेन नीलं वर्णं विरच्यते।

कलशाः तत्प्रमाणञ्च व्याख्यायते—विष्णुधर्मोत्तरे स्वर्ण-राजत-ताम्र-मृण्मयस्य लक्षणयुक्तं कलशं निर्मीयते। पंचाशांगुलं वैपुल्यं आयतं षोडशांगुलं भवति। मूलाः द्वादशागुलं अष्टांगुलं मुखं भवति। पञ्च च आशाश्च पंचाशा अर्थात् पञ्चाधिकदशमंगुलात्मकं विपुलता भवति। पूर्णपात्रस्य लक्षणं प्रतिपाद्यते पूर्णपात्रं धातुजं मृन्ययं वा प्रतिष्ठितमस्ति। तद्वत् प्रादेशमात्रं दीर्घं चतुरंगुलमुच्चं भवति। श्वेततण्डुलपूर्णेनपात्रेण विहितं क्रियते। यज्ञीयवृक्षाः प्रतिष्ठाहेमाद्रिब्रह्मपुराणे च लिख्यते शमीपलाश न्यग्रोध प्लक्षवैकंकतोद्भवाः। अश्वत्थौदुम्बरौ बिल्वश्चन्दनः सरलस्तथा। शालश्चदेवदारुश्च खादिरचेति याज्ञिकाः।

समिल्लक्षणमाह—

[21]प्रदेशान्नाधिका नोना सशाखा विशाखिका।
न सपर्णा न निर्वीर्या होमेषु तु विजानता।।

नांगुष्ठादधिकाग्राह्या समित्स्थूलतरा क्वचित्।
न वियुक्तत्वचा चैव न सकीटा न पाटिता।।

अत्राङ्गुष्ठादधिकस्थूलतरा समिधा न भवेदिति तात्पर्यः। न त्वचारहिता, न कीटादि युता, न पाटिता, न पर्णयुता, नापुष्टता, न सशाखिका, न प्रादेशाधिका लम्बायमाना हवनीयार्थं समिधा भवेत्। अत्र तर्जन्यङ्गुलप्रसारे यत्परिमाणात्मकं तत्प्रादेशम्। समित्पुष्पकुशादीन् ब्राह्मणः स्वयमाहरेत्। शूद्रानीतं क्रयः क्रीतञ्च प्रयुक्ते अधो गम्यते। ब्रह्मविष्टरलक्षणमाह—

[22]पञ्चाशद्भिर्भवेद्ब्रह्मा तदर्धेनतु विष्टरः।
दक्षिणावर्तकोब्रह्मा वामावर्तस्तु विष्टरः।।

अर्थात् पञ्चाशद्भिर्कुशैः दक्षिणावर्तको ब्रह्मा पञ्चविंशतिभिर्कुशैः वामावर्तको विष्टरः स्वीक्रियते।

सुवर्णरजतताम्रोन्मानमाह[23]—सूर्योदयात् पूर्वं निर्गतानां किरणानां मानं सरेणु भवति। त्रसरेणु अष्टगुणितं भूत्वा लिक्षा, लिक्षा त्रिगुणितो राजसर्षपो भवति। षट्सर्षपः यवं कथ्यते। यवत्रयात्मकं मध्यं स्यात् त्रिमध्यमैकः कृष्णलः, पञ्चकृष्णलैको माषा, षोडश माषात्मको एकं सुवर्णं भवति। चत्वारो सुवर्णस्यैकपलमथवा पञ्चसुवर्णस्याप्यैकं पलं भवति। कृष्णलद्वयस्यैकं रूप्यं, षोडमासात्मकमैकं धरणं, दशधरणस्यैकं शतमानं भवति। पलमैकोऽपि कथ्यते। पूर्वोक्तश्चत्वारः सुवर्णराजतो निष्क इत्यर्थः। कार्षिकः ताम्रिको भवति पणेति संज्ञयावगम्यते। पलस्य चतुर्थांशं कर्षं भवति। कार्षिकः ताम्र संबंधी पणो भवति। कार्षापणसंज्ञश्च स्मृत्यन्तरेऽपि विलिख्यते।

षोडशपणस्यैकोपुराणः चतुष्केण काकण्यैको पणो भवति चतुर्भिर्वराटकैः पंचाहतैः काकिण्येको भवति। देशादिभेदेन पणादिव्यवहारो ज्ञेयः।

धान्यमानम्

[24]पलद्वयं प्रसृतं, द्विगुणं प्रसृतं कुडवसंज्ञं भवति। चतुर्भिः कुडवैः प्रस्थः, चत्वारो प्रस्थः आढकः, आढकैश्चतुर्भिः द्रोणं कथ्यते। द्रोणद्वयं कुंभः, शुर्पोऽपि कथ्यते। खारी द्रोणस्तु षोडशो भवति। द्रोणद्वयस्यैव शूर्प संज्ञा ज्ञायते। पञ्चकृष्णलस्यैको माषो भवति। चतुष्षष्टीभिर्माषैः पलं प्राप्यते। द्वात्रिंशद्भिः पलैः प्रस्थोच्यते यः मागधेषु प्रकीर्तितोभवति। चतुर्भिराढकैः द्रोणं स्यात्।

[25]पलं च कुडवः प्रस्थ आठको द्रोण एव च।
धान्यमानेषुबोद्धव्याक्रमशोमीचतुर्गुणाः।।

षोडशभिर्द्रोणैः खारी, तथा च विंशत्याद्रोणौ कुम्भ उच्यते। दशभिर्कुम्भैः बाहु इति धान्यसंख्या कीर्तिता विद्यते। कुंभोद्रोणद्वयमितिविषये पक्षान्तरेण विंशति द्रोणपरिमितः कुम्भो भवति। पलसहस्रमितः कुम्भ इत्यपि पक्षान्तरं ज्ञेयम्। पलद्वयं प्रसृतमैकपलं मुष्टिर्विद्यते। अष्टमुष्टिसंयुक्तमैको किञ्चित् भवति। अष्टौ किञ्चित् पुष्कलं भवति। चत्वारि पुष्कलानि आढकोच्यते। चतुराठको द्रोणं भवतित्यैकं मानलक्षणं प्रतिपादितम्। एतत्पक्षाणां व्यवस्था शक्तिदेशकालाद्यपेक्षया बोधब्या।

धनिकादिलक्षणम्—

यावद्धनेन सुखपूर्वकं परिवारस्याभरणपोषणञ्च भवति तावद्धनं सुखपूर्वकं प्राप्नुयात् चेत् धनिकः। ऋणं नास्ति यस्य पार्श्वे स मध्यमो भवति। यस्य पार्श्वे पूर्वापरस्य चाधिकं धनं प्राप्यते। अधिकोपार्जनस्यायः स्यात् समहा-धनिको भवति। यः विप्रः सदाचाररतो भवेत् तथाचार्जने पराङ्मुखो भवेत् स दरिद्रः। यत्र अशना भोजनाभावः स्यात्, वासोधान्य विवर्जितो जनः महादरिद्रसंज्ञको भवति। यस्य धनं वर्द्धयित्वा वर्षैकपर्यन्तं ग्राससमं भवेत् तस्य नाम धन्यो भवति। एतादृशं वर्षद्वयात्मकं विद्यते चेत् धन्यतरं कथ्यते। इतोप्याधिकमर्जयेत् चेत् धन्यतममुच्यते। धनेन बिना हि यः वर्षपर्यन्तं ग्राससममन्नमर्जयेत् स धीरो कथ्यते।

धनिकादीनां दक्षिणादाने व्यवस्था—

[26]सहस्रव्याहृतीनां होमे माषमात्रं सुर्वणदक्षिणा भवति। लक्षहोमे शतं यवाः दक्षिणा ज्ञायते। धनिको द्विगुणं दद्यात्रिगुणं तु महाधनी। यवार्धं तु दरिद्रेण दातव्यं कर्म सिद्धये। प्रकारेणानेन महादरिद्रस्य कृते तदर्धस्य विधानमस्ति। एवं रीत्या दक्षिणादीनां व्यवस्था ज्ञेया।

होमद्रव्यमानम्—

कर्षप्रमाणमाज्यं, शुक्तिमात्रं पयः, पञ्चगव्यानि शुक्तिमात्राणि च साधुभिर्विनिर्दिष्टमस्ति। समं मधु, दुग्धं अन्नं च ग्रासमात्रमुदाहृतं विद्यते। दधि प्रसृति मात्रां लाजा मुष्टिसंयुता, सक्तवः पृथुकाश्च तत्प्रमाणानुसारेणैव भवेत्। पलार्धं गुडमानं, शर्कराऽपि तथाविधा, ग्रासार्धमात्रमन्नानामिक्षुः सर्वप्रमाणको भवति। पत्रपुष्पे चैकं स्यात् तथा धूपादिकल्पयेत्। मातुलिंग चतुः खण्डं पनसं दशधाकृतं, अष्टधानारिकेलं च चतुर्धाकदलीफलम्, बिल्वफलं त्रिधात्मकं, खण्डितं कपित्थं द्विधात्मकं, मुष्टिमाना व्रीहयः मुद्गामाषायवाः तथैव स्यात्। तदर्धं तन्दुलाः, मुष्टि सम्मिताः कोद्रवाः, शुक्तिमात्रं लवणमेकविंशतिर्मरीचिकाः, मूलानां खण्डत्रयं, स्वप्रमाणतः फलानां अन्येषां ग्रासमात्रं, पायसं प्रसृति पर्यन्तम्, अक्षतास्तुयवाः प्रोक्ता, तण्डुलाव्रीहयस्तथा गृह्यते। अस्मिन् केषांचित् द्रव्याणामसम्भवे आज्यमुपादेयं भवति भरद्वाजमतेन।

चन्द्रचन्दनकाश्मीरकस्तूरीयक्षकर्दम्।
फलोपसंमितानेतान् गुग्गुलं वदरास्थिवत्।।

द्रव्यसंपृक्तं हवि स्रुवेणदातव्या, ठोससंपृक्तं हविः पाणिना दातका होम मुद्रालक्षणम्।

उक्तद्रव्यालाभे प्रतिनिधिः—

[27]हवनमुद्रा त्रिधा मृगी हंसी सूकरीचेति नाम्ना ज्ञेया। सूकरी करसंकोची, हंसी मुक्तकनिष्ठिका तथा च कनिष्ठातर्जनीहीना तिलाहुतौ मृगीमुद्रा कथ्यते। सर्वत्र शान्तिकर्मणि मृगी हंसी च शुभं भवति। सर्वेष्वभिचारेषु सूकरी प्रकीर्तिता विद्यते। [28]दध्यस्थाने पयः, मध्वस्थाने गुडः, घृतस्थाने पयोदधिवा स्वीक्रियते। सर्वेष्वाजयहोमेषु गव्यमेव घृतं स्वीक्रियते। तदलाभे महिष्या ततो आजं ततो आविकं घृतं गृह्यते। तदलाभे तैलं तदलाभे जार्तिलं तदभावे कौसुंभं तदभावे सार्षपं गृह्यते। यथोक्त[29]वस्त्वसंपत्तौ तदनुकारिगुणयुतं वस्तु गृह्णीयात्। यथा यवानामिव गोधूमा, ब्रीहिणामिव शालयः।

द्रव्यदेवतयोरनादेशे—

[30]आज्यद्रव्यस्यनादेशे मन्त्रस्य देवतायाः प्रजापतिरित्युच्यते। प्राजापत्यो मन्त्रः समस्तव्याहृतयो भवन्तीति मदनः। स्मृत्यन्तरेऽपि प्राप्यते व्याहृति-मंत्रसममन्यो मन्त्रः न। मूलमन्त्रे आदौ [31]प्रणवमुच्चारयेत् अन्ते नमोच्चारयेत् मध्ये देवतायाः स्वकं नाम चतुर्थ्यन्तं विद्ध्यात्। कर्माङ्गस्वस्ति वाचनं नामानि उच्चारयेत्। यथा [32]विवाहस्य देवता अग्निः। तेन विवाहांगभूत-स्वस्तिवाचनांते कर्माङ्गदेवता अग्निः प्रीयतामिति वदेत्। तथैव औपासने अग्निः सूर्यः प्रजापतयः। स्थालीपाके अग्निः। गर्भाधाने ब्रह्मा। पुंसवने प्रजापतिः। सीमंते धाता। व्रततुर्ये-अपापकः। अंते-सुश्रवाः। पुनः उपनयने अग्निः। समावर्तने इन्द्रः। उपाकर्मणि व्रतेषु सविता। वास्तुहोमे वास्तोष्पतिः अन्ते प्रजापतिः। अन्येषु इष्टकर्मसु प्रजापतिः।

कर्म विशेषे अग्नि नामनि

गर्भाधाने अग्नेः मारुतो नाम, पुंसवने-पवमानः, कर्णवेधने शृंगारः, सीमन्ते-मंगलो नाम, जातकर्मणि-प्रबलः, नामकरणे-पार्थिवः-प्राशने-शुचिः,

चौलसंस्कारे सभ्यः, व्रतादेशे-समुद्भवः, गोदाने-सूर्यः, विवाहे योजकः, चतुर्थ्यां-साक्षि अन्ये वन्दन्ती धृतिः, आवसथ्ये भवः, वैश्वदेवे पावकः, गार्हपत्ये-ब्रह्मा, ईश्वरः, दक्षिणोवा, आहवनीये-विष्णुः, अग्निहोत्रेः, त्रयोग्नयः, लक्षहोमे-वह्निः, कोटिहोम-हुताशनः, पूर्णाहुत्यां-मृडोनाम, शान्तिके-वरदः, प्रायश्चित्ते दितिः, पाकयज्ञे साहसः, पौष्टिके बलदः, आभिचारिके-क्रोधः, वृष्ट्यर्थे-शिखि, वनदाहेषु सूचकः, कुक्षौ-जठराग्निः, मृतभक्षणे-क्रव्यादौ, वृषोत्सर्गे नीलोद्वाहे च-रौद्रः, देवानां हव्यवाहनः, पितृणां-कव्यवाहनः, समुद्रे-वाडवो, क्षयः संवर्तकश्च अग्नि नामानि भवन्ति।

आदित्यादिग्रहाणामग्निः—

आदित्यस्याग्निः कपिलः, सोमस्य पिंगलः, भौमस्य धूमकेतु, बुधस्य जठरः, बृहस्पतेः शिखि, शुक्रस्य हाटकः, शनैश्चरस्य महातेजः, राहुकेत्वोः हुताशनेति अग्नि नामानि सन्ति।

अग्निधमनविचारः

[33]नकुर्यादग्निधमनं पाणिशूर्पादिभिः क्वचित्।
मुखेनैव धमेदग्निं यतो वेदा विनिःसृता।।

असमिद्धाग्नौ हवनीय फलम्—

यः[34] प्रज्वलिताग्नौ न जुहोति स आमयावी, मन्दाग्नी दरिद्रश्च भवति।

आहुति काल विचारः—

मन्त्रः[35] ओकारपूतं कृत्वा अन्ते स्वाहा उच्चारयेत्। स्वाहावसाने मन्त्र देवताः ध्यायन् हवनं कुर्यात्।

अनुक्तहवनसंख्यायामाहुतिविचारः—

[36]यत्रानुक्तसंख्या भवेत्तत्र अष्टोत्तरशतं स्मर्यते। अष्टाविंशतिरष्टौ वा यथाशक्तिर्जुहुयात्।

हस्तयोः प्राजापत्यादि तीर्थनिर्णयः—

कनिष्ठा मूले प्रजापतिः, तर्जनीमूले पितृ, अङ्गुष्ठमूले ब्रह्मा, कराग्रे देवतीर्थानि भवन्ति।

देवपितृकर्मकण्डननिर्णयः—

[37]द्रव्याणां कण्डनं, पेषणमुल्लेखनञ्च पितृ कार्ये एक बारं, देवकार्ये त्रिबारं कुर्यात्।

प्रतिमाद्रव्यं तत्प्रमाणञ्च [38]प्रतिमा सौवर्णी, राजती, ताम्री वृक्षजा, मार्तिकी, चित्रजा, पिष्टयुता, लेपोत्था, स्वकीयवित्तानुसारेण माषतः पलपरिमाणपर्यन्तं कर्तव्यम्। अङ्गुष्ठपर्वादारभ्य वितस्त्यावतं लम्बायमानं प्रतिमा स्मृतास्ति।

स्मार्त्तिकर्मसु क्रमनिरूपणम्—

संकल्पः, स्वस्तिवाचनं, विप्रवरणं, भूतनिस्सरणं, पञ्चगव्यैर्भूमिशुद्धिः, मुख्यदेवस्य पूजनम्, अग्निप्रतिष्ठा, सूर्यादिग्रहाणां स्थापनं, देवतान्वाहार्यः, पात्रासादनम्, हवनकृत्यम्, होमौ यथाक्रमं त्यागः इति च पूर्वाङ्गस्य क्रमं विद्यते। पूजनं, स्विष्टाहुतिः, नवाहुतिः, बलिः, पूर्णाहुतिः, पूर्णपात्रविमोकाद्यग्नि अर्चनांते अभिषेकं, मानस्तोके भूतिश्च देवपूजनम्, विसर्जनम् श्रेयोदानं, दक्षिणादिदानं, कर्मेश्वरार्पणम्, क्रमोऽयं च उत्तराङ्गरूपेण प्रायसः स्मार्तकर्मसु दृश्यन्ते।

कर्माङ्गब्राह्मणभोजनसंख्या

[39]गर्भाधाने-दश, विवाहे-शतम्, मेखलादि उपनयने-पञ्चाशत्, आवसथ्ये-त्रयस्त्रिंशत्, श्रौताधाने-शतात्परम्, तत्संस्कारस्य सिद्धये अष्टौ अष्टौ ब्राह्मणाः भोज्या। आग्रयणे प्रायश्चित्ते च कर्मणि पञ्चदशविप्रान् भोजयेत्।

(इति परिभाषा प्रकरणम्)

अथगर्भाधानम्— प्रथमरजोदर्शने त्रयोदशदोषा उक्तास्सन्ति। तेषां दोषानां निरासार्थं शान्तिं कृत्वा गर्भाधानं कुर्यात्। अत्र अग्निचक्रस्य विचारमावश्यकं

परञ्च विशिष्टे कर्मणि वह्निचक्रस्यनावश्यकताऽपि शास्त्रे प्रदर्शिता विद्यते। तद्यथा—

[40]दुर्गाहोमविधौ विवाहसमये सीमन्त पुत्रोत्सवे।
गर्भाधानविधौ च वास्तु समये विष्णोः प्रतिष्ठादिषु।।
मौंजी बन्धनवैश्वदेवकरणे संस्कारनैमित्तिके।
होमोनित्यभवेन्नदोषकथने चक्रं च वह्नेरपी।।

अर्थात् दुर्गाहोमे, विवाहे, सीमन्तसंस्कारे, पुत्रोत्सवे, गर्भाधाने, वास्तुकाले, विष्णुप्रतिष्ठादिविषये, मौञ्जीबन्धने वैश्वदेवकरणे, नैमित्तिकसंस्कारे, नित्यहोमे च अग्निचक्रस्य विचारो न भवति।

गर्भाधानादौरजोदर्शनशांतिः—

[41]निन्द्य-नक्षत्रेषु तिथिवारेषु च पुष्पं दृश्यते चेदशुभं ज्ञायते। निन्द्यस्थानेषु वस्त्रपरिधाने च पुष्पं दृश्यते चेदशुभं भवति। तत्राशुभत्व विनाशार्थं ग्रहयज्ञपुरस्सरं शान्तिं कुर्यात्। शान्तिरियं सुमुहूर्त्ते कर्त्तव्यः। अत्र दंपत्योः मंगलस्नानं कृत्वा पञ्चमे दिवसे तिलतैलेन शुभकल्केन वा उष्णैश्चवारिभिः पंचपल्वसंयुतैः आह्निकविधानं कृत्वा श्रद्धया शुभाचारयुक्तो भूत्वा संकल्पपूर्वकं शान्तिं प्रकुर्यात्। अस्मिन् शान्तिकर्मणि पुण्याहवाचनं वेदज्ञैः ब्राह्मणैः कारयित्वा आभ्युदयिकश्राद्धं आचार्यवरणञ्च कुर्यात्। स्थण्डिलोपरि अग्निं संस्थाप्य ईशानदिशायां वारिप्रपूरितान् चतुष्कुंभान् संस्थापयेत्। पंक्तिरूपेण पञ्चपल्लवादि निवेश्य तण्डुलपूरितं पूर्णपात्रं संस्थापयेत्। पात्रोपरि पृथक्-पृथक् वस्त्रं न्यस्य प्रथमे कुम्भे सूर्यं द्वितीये इन्द्रं तृतीये इन्द्राणीं चतुर्थे भुवनेवरीं च प्रतिमां विन्यसेत्। ततो ग्रहाणां प्रपूजयेत्। ततो सूर्यकलशं संस्पृश्य सूर्यसूक्तं जपेत्। तत्रैकादशनी रुद्रीचापि[42] पठेत्। तदनन्तरं अष्टोत्तरशतमष्टोत्तरं वा सघृतं सशर्करं च पायसेन प्रधानहवनं कुर्यात्। सर्वान् तिलसर्पिषा जुहुयात्।

[43]आकृष्णेनेति सूर्यं, [44]त्रातारमिंद्रेति इन्द्रं [45]आदित्ये रास्नासीति इन्द्राणीं, [46]श्रीश्चतेति भुवनेश्वरीं च यजेत्। ततो यथाविधिः उक्तसंख्याभिः ग्रहहोमं कुर्यात्। ततो एकस्मिन् वंशपात्रे रक्तवस्त्रं प्रसार्य द्रोणसमितं तण्डुलराशिं कृत्वा तस्योपरि सुवर्णस्य कदलीं सूर्यदेवताञ्च वह्नेः उत्तरतो स्थापयेत्। सुवर्णस्य कदली पञ्चपलाढ्यां, पलपरिमाणां, पलार्धेन तदर्धेन तदर्धेन च वा

निर्मीयते, तत्रस्तम्भं पत्राणि च सुष्ठुं भवेत्। श्रोत्रियाय कुटुम्बिने विप्राय वस्त्रादि दक्षिणाञ्च समन्वितालंकृतञ्च कृत्वा दद्यात्। ततो दम्पत्योः अभिषेचनं कुर्यात्। जलेन पञ्चपल्लवैः वारुणान् मन्त्रान् उच्चार्य अभिषेकं कुर्यात्। आपोहिष्ठा त्रिभिर्मन्त्रैः, पञ्चेन्द्रैः, पञ्चवारुणैः, भगप्रणेत, इदमापः, समुद्रा, पुनन्तुमा, आप्याय, पञ्चनद्येति, शिरोमेति चतसृभिः, देवस्यत्वा त्रिभिर्मन्त्रैः पुनः पुनः अभिषिञ्चेत्।

शक्रादिदेवताः सर्वा ब्रह्मविष्णुपरोगमाः। दंपत्योः परिधानार्थं महते वाससी पुरा। कर्मणोन्ते विसृज्य अन्यवस्त्रंधार्येत्। आचार्याय स्वर्णगोभूतिलादि दत्वा ब्राह्मणेभ्ये अन्येभ्यश्च दक्षिणां दद्यात्। रुद्रजापिने अनड्वाहं दद्यात्। शर्कराघृतपायसैः ब्राह्मणान् भोजयेत्। यस्मिन् वस्त्रे रजो दृष्टः तं भयावहं मत्वा त्यजेत् एवं नारदोक्तप्रमाणानुसारेण शान्तिकरणे सकलमनिष्टं विनश्यति।।

(इति रजोदर्शन शान्तिः)

अथ प्रयोगः— तत्रादौ सर्वकर्मसाधारणांगानां गणेशपूजादीनां स्वस्ति-वाचनान्तानां प्रयोगः— शिष्टाचारानुसारेणेत्थं विलिख्यते-वहुदिवससाध्येषु कर्मसु पूर्वे दिवसे अल्पदिवससाध्येषु तस्मिन्नेव दिने नित्यक्रियादि निर्वृत्य पादौ हस्तौ च प्रक्षाल्य द्विराचम्य प्राणानायम्य देशकालौ संकीर्त्य करिष्यमाण अमुककर्मांगतया मंगलस्नानमहं करिष्ये इति संकल्प्य कार्याणि कुर्यात्।

ततो शांतिपाठमन्त्रापठेयुः। ततो यथाग्रन्थं संकल्पं कुर्यात्।

तदनन्तरं कर्मार्थे कर्मपात्रे गंगाद्यावाह्य वरुणं पूजयेत्। ततो कलशाभिमन्त्रणं कुर्यात्। ततः तस्माद् कर्मपात्राद् जलं नीत्वा आत्मानं संप्रोक्ष्य पूजासंभारान्सम्प्रोक्ष्य गणपतिपूजनं कुर्यात्। यथाग्रन्थं गणपति पूजनान्तरं स्वस्ति पुण्याहं वाचयेत्। स्वस्ति पुण्याहवाचनं विवाहे चौले, व्रतबन्धे, यज्ञादौ, दानकर्मणि, गृहारम्भे, धनप्राप्तौ, तीर्थाभिगमने, नवग्रहमखे शान्तौ अद्‌भुतेषु, गृहप्रवेशे, ग्रामस्याभिनिवेशने, गणादीनां संग्रहे, शुभकर्मणि, द्विजैः स्वस्तिपुण्याहं वाचयेत्। ऋद्धिपूर्तौ स्वस्तिं वाचयेदिति स्पष्टं विद्यते।

पुण्याहवाचनानंन्तरं मातृकापूजनं कुर्यात्। मोदादिषड्‌विनायकानामपि प्रपूज्य नान्दीश्राद्धादिकं कुर्यात्। अस्य श्राद्धस्य नाम आभ्युदयिकं श्राद्धमपि

विद्यते। पुत्रजन्मादि आभ्युदयिकावसरे क्रियमाणं श्राद्धं आभ्युदयिकं श्राद्धं कथ्यते। अस्मिन् सर्वं प्रदक्षिणं क्रियते। श्राद्धमिदं सब्येनोपवीतेन क्रियते। आभ्युदयिकश्राद्धस्य कालः पूर्वाह्नः स्वीक्रियते। आभ्युदयिके श्राद्धे सत्यवसु विश्वे देवाः भवन्ति। अत्रास्मिन्नावसरे ब्राह्मणद्वयमावश्यकं विद्यते। हेमाद्रौ प्रत्येकस्य कृते एको ब्राह्मणः भवितुं शक्नोति। तदनन्तरं पिण्डानां लक्षणं बदरीफलमिवप्रतिपाद्यते। वृद्धिश्राद्धे पिण्डदानप्रयोगे संस्कारभास्करे द्विधा व्यवस्था विधेया। यस्यां कुलपरम्परायां वृद्धिश्राद्धाचरणे पिण्डाः दीयन्ते तस्मिन्नेव कुले वृद्धिश्राद्धे पिण्डाः प्रदेयाः। अन्यस्मिन् कुले न। श्राद्धस्यास्य नाम सांकल्पिकमप्युच्यते। हेमाद्रौ षड्त्रिंशन्मते प्राप्यते-तदा वृद्धिषु सर्वासु संकल्पं श्राद्धमाचरेदिति। अनाग्निकानां कृते वृद्धि श्राद्धं सांकल्पिकमेव सम्पादनीयम्। अस्य श्राद्धस्य ख्यातिः सांकल्पिकाभ्युदयिकश्राद्धं विद्यते। सांकल्पिकश्राद्धस्वरूपस्य वर्णने पात्रभोज्यान्नस्य त्यागः भवति। हेमाद्रिमतानु-सारेण पिंडहीनः श्राद्धः संकल्पश्राद्धस्य पर्यायो विद्यते। सांकल्पिके श्राद्धेस्वमंत्रकावाहनार्घाग्नौकरण पिंडदानं विकराक्षय्यस्वधावाचनप्रश्नेत्ये-तत्सप्तकं वर्ज्यम्। एतन्मूलवचनं हेमाद्रौ प्राप्यते। संकल्पवाक्यमपि प्रथमांतं प्रयोज्यते। शुभाय प्रथमांतेन वृद्धौ संकल्पमाचरेदिति प्राप्यते।

वृद्धिश्राद्धकर्तुर्जीवत्पितृकत्वे निर्णयः— पितृवर्गं मातृवर्गं मातामहस्य च वर्गमत्र प्राप्यते-जीवेत्तु यदि वर्गाद्यस्तं वर्गं तु परित्यजेदिति न्यायेन जीवपितृकत्वे मातृमातामहानां पार्वणयुतं नान्दीश्राद्धं कुर्यात्। मातरिजीवत्यां मातामहपर्वमेकमेव। मातामहे जीवति मातृ पार्वणमेकमेव। केवलमातृपार्वणे विश्वेदेवा न कार्या। वर्गात्रयाद्येषु मातृपितृमातामहेषु जीवत्सु नांदीश्राद्ध लोप एव संस्कारेषूचितः।

मातृकापूजनम्—

अविघ्नो मण्डपश्चैव मातृणां पूजनं सकृत्।।
वैश्वदेवं वसोर्धारा नान्दीश्राद्धमतः परम्।

अर्थात् जीवित्पितृक् पुत्रोऽपि नान्दीश्राद्धं कर्तुं शक्नोति। मृत्-मातृमातामहकोपि जीवत्पितृकः स्वसंस्कारे पितुर्मातृपितामहीप्रपितामह्यः प्रयोगः कुर्यात्। पितुः पितृ पितामहप्रपितामहाः एवं पितुर्मातामहप्रमातामहवृद्ध-

प्रमातामहाः सपत्नीका इत्येवमुच्चार्यते। पितरि पितामहे च जीविते सति पितामहस्य मातृ पितामही प्रपितामह्यादियोजितुं शक्यन्ते।

पितुः मात्रादिजीवने तत्पार्वणस्य लोपं कर्तुं शक्यते। यदि आद्यपक्षः अर्थात् पिता जीवति चेत् लोपं भवितुं शक्यते। केचन आचार्याः एच्छिको विकल्पः प्रतिपादयन्ति। एवं प्रकारेण मृतपितृकस्य जीवन्मातृमातामहस्य पार्वणे पितुः नैव नांदीश्राद्धादि सिद्धिर्ज्ञेया। समावर्तन-संस्कारे माणवककृर्तके नांदीश्राद्धप्रकरणे पितुः कुर्यात्। तदभावे ज्येष्ठ भ्राता इति केचित्। तत्रैवमपि प्राप्यते पितापुत्रसमावर्तने स्वपितृभ्यो नांदीश्राद्धं कुर्यात्। यदि पिता जीवत्पितृकश्चेत् सुतसंस्कारे द्वारलोपपक्षोऽपि स्वीकृतः। माणवकस्य पितुरसन्निधाने विदेशवासे सति भ्राता माणवकस्य पितुः मातृ पितामही प्रपितामह्य इत्युच्चार्य श्राद्धं कुर्यात्। मृतपितृक्माणवकस्य समावर्तने पितृव्यः भ्रात्रादिः अस्य माणवकस्य मातपितामहीत्याद्युच्चारयेत्। भ्रात्रादेरभावे स्वयमेव स्वपितृभ्यो दद्यात्। एवं प्रकारेण जीवत्पितृकः पितुरसन्निधाने भात्रादेरभावे च पितुः। पितृभ्यः स्वयमेव नांदीमुखं कुर्यात्। एवं प्रकारेण विवाहेपि द्रष्टव्यम्। मृत पितृकस्य चौलोपनयनादिके संस्कारे पितृव्य मातुलादिकाः अस्य संस्कार्यस्य पितृ पितामह प्रतिपतामहेत्याद्युच्चार्य श्राद्धं कुर्यात्। जीवितः पितुरसन्निधाने मातुलादयः संस्कार्यस्य श्राद्धं न कुर्यात्। आभ्युदयिकश्राद्धानन्तरं देवकोत्थापनपर्यन्तं निषिद्धानि कार्याण्याह महर्षि गर्गमतानुसारेणनान्दीश्राद्धानन्तरं यावन्मातृका विसर्जनं न कुर्यात् तावत्दर्शश्राद्धं क्षयश्राद्धं शीतोदकेनस्नानम् अपसव्यं स्वधाकारं, नित्यश्राद्धं, ब्रह्मयज्ञं, अध्ययनं, नदीसीमातिलंघनं, उपवासव्रतं, श्राद्धभोजनं सपिण्डजनाः न कुर्युः। त्रीपुरुषपर्यन्तं सपिण्ड्यं ज्ञेयम्। कर्मप्रदीपे प्राप्यते आभ्युदयिकश्राद्धानन्तरं यावत् मातृकोत्थापनं कुर्यात् तावत् पुत्रजन्मावसरे द्वितीयं नान्दीश्राद्धं न कर्तव्यम्। राज्ञाभिषेकेऽपि तथैवाभ्युदयिकं श्राद्धं कर्तव्यः। अन्यथा अपमृत्युकरं भवति राज्यारोहणम्। शास्त्रार्थप्रदीपे प्राप्यते—मण्डपोद्वासनात्पूर्वं पुनः नान्दीश्राद्धकरणं अपमृत्युप्रदायकं भवति।

सांकल्पिकनांदीश्राद्धप्रयोगे सत्यवसुसंज्ञकाः विश्वेदेवाः भवन्ति। अन्यत्सर्वं प्रयोगे स्पष्टं विद्यते।

आशीषग्रहणप्रकरणे आदौ यजमानस्योच्चारणं ततो ब्राह्मणानामाशीषः भवेत्। यजमानः—गोत्रं नो वर्धतां, ब्राह्मणाः-वर्धतां वो गोत्रम्। यजमानः-दातारो नोभिवर्धंतां, ब्राह्मणाः- अभिवर्धंतां वो दातारः। यजमानः-वेदाश्चनोभिः वर्धंतां, ब्राह्मणाः-वर्धंतां वो वेदाः। यजमानः-- संततिर्नोभिवर्द्धतां, ब्राह्मणाः-वर्धतां सतंतिः, यजमानः—श्रद्धाचनो मा व्यगमत्, ब्राह्मणाः—मा व्यगमद्वः श्रद्धा। यजमानः—बहुदेयं च नोस्तु, ब्राह्मणाः—अस्तु वो बहुदेयम्। यजमानः-अन्नं च नो बहुभवेत्, ब्राह्मणाः-भवतु वा बह्वन्नं, यजमानः अतिथींश्चलभामहे, ब्राह्मणाः--लभंतावोऽतिथयः, यजमानः—याचिता च नः संतु, ब्राह्मणाः—सन्तु वो अयाचयितारः, यजमानः—एताः आशिषः सत्या संतु, ब्राह्मणाः—संत्वेताः सत्या आशिषः। ततो यथा प्रक्रियाणां सम्पादनं कृत्वा आभ्युदयिकं श्राद्धं प्रपूरयेत्।

अथाचार्यादि ऋत्विग्वरणम्—आचार्यवसिष्ठेनोक्तम्—यजमानः स्नानादिकं कृत्वा जितेन्द्रियो भूत्वा आचार्यादीनां पादप्रक्षालनं कृत्वा अर्घवस्त्रादि भिरर्चयेत्। आत्राचार्यादीन् समर्चयेदिति तात्पर्यं ब्रह्मादिऋत्विजां वरणम्। अर्घ्ये इमानि वस्तूनि भवन्ति—

दधि, दुग्धं, यवाः, दूर्वा, गंधाः, सर्षपः, जलम्, पुष्पाणि एभिः अष्टाभिर्द्रव्यैर्घ्यं दद्यात्। जलम्, क्षीरम्, कुशाग्राणि, दधि, चंदनम्, अक्षताः, दूर्वा, सर्षपः एभिर्द्रव्यैरर्घ्यं कुर्यात्।

अर्घ्यप्रदानेत्थमाचारः दृश्यते—एकस्मिन् मृत्तिकापात्रे दध्याद्यष्टवस्तूनि निक्षिपेत्। अन्यत्र कांस्यपात्रमित्यपि प्राप्यते। परञ्चात्र शरावेति पात्रं निर्दिष्टमस्ति। अस्मिन्नर्घपात्रे फलं पूगीफलं निक्षिप्य अपरेण शरावेण पिधाय रक्सूत्रमावेष्टयेत्। आचार्याः अर्घ्यपात्रस्थाने पुटकादीनामपि प्रयोजयन्ति। सपत्नीको यजमानः प्राङ्मुखोदङ्मुखस्थिताय विप्राय समर्पयेत्। ततो द्यौः शांतिरिति मन्त्रस्य पाठो भवेत्। ततो ब्राह्मणान् प्रार्थयेत्—

प्रार्थनानन्तरं ब्राह्मणानामग्रेऽर्घं स्थापयित्वा उपविशेत्। प्रकरणेऽस्मिन् अर्घोऽर्घोऽर्घः इति त्रिरन्योक्ते सति यजमानः अर्घः प्रतिगृह्यतामिति वदेत्। ततो ब्राह्मणहस्ते तदग्रेवा तदर्घं स्थापयेत्। यदि सर्वे ब्राह्मणाः सहैव वदन्ति तर्हि प्रतिगृह्णीमः इत्युच्चार्यंते। एकैकस्य कृते प्रतिगृह्णामीति उच्यते।

ततो यजमानः आचार्यं प्रार्थयेत्। आचार्यत्वं यथा स्वर्गे इति श्लोकस्य तथा बृहस्पतेऽअतियदर्यो मन्त्रस्योच्चारणपूर्वकं अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः अमुकशर्मा यजमानोऽहं अमुकगोत्रोत्पन्नं अमुक प्रवरान्वितं शुक्ल-यजुर्वेदांतर्गतमाध्यंदिनीयशाखाध्यायिनं अमुक शर्म्माणं ब्राह्मणं अस्मिन् शान्त्याख्ये कर्मणि आचार्यत्वेन त्वामहं वृणे। ततो व्रतोऽस्मीति प्रतिवचनानन्तरं व्रतेन दीक्षा मन्त्रस्य पाठः क्रियते। ततो यजमानः आचार्य एतते पाद्यं पादप्रक्षालनं, एष ते अर्घः, एष ते गंधः एतत्ते पुष्पं समर्पयेत्। प्रकारेणानेन सर्वेषां वरणं क्रियते। यथा चतुर्मुखो इति श्लोकेन ब्रह्मयज्ञानमिति मन्त्रेण ब्रह्मणां वरणं कुर्यात्। ततो सर्वेषां ऋत्विजामपि वरणानन्तरं पूजनं कार्यम्। एवं गणपं सदस्यं चतुरो अष्टौ वा ऋत्विजो वृणुयात्। ततो सूक्तजपकरणार्थे ऋग्वैदिकः याजुर्वैदिकः सामवैदिकाथर्ववैदिकश्च वृणुयात्। अत्र चतुरो अष्टौ वावृणुयादित्यपि विधानं विद्यात्। मूलपाठे एकैकस्य वैदिकस्य पौराणमन्त्रः वेदमन्त्रश्च लिखितं वर्तते। तस्योच्चारणपूर्वकं वृणुयात्। एवं वरणं कृत्वा यदाबध्नन्निति मन्त्रेण आचार्यादीनां ऋत्विजां हस्ते रक्तसूत्रात्मकं कंकणं बंधयेत्। यथाचारः कार्यः। वरणश्राद्धंचापि कुर्यात्। यजमानेन आचार्यादि ऋत्विजां पादपक्षालनं विधाय द्विराचमनं कृत्वा ॐ स्वस्ति न इन्द्रेति दिग्बंधः कुर्यात्। वरणश्राद्धोपहाराः शुचयोभवन्त्वियुक्त्वा जलप्रक्षेपण-पूर्वकं संकल्पं कुर्यात्। संकल्पानन्तरमासनगंधादिभिराचार्यादिऋत्विजामभ्यर्चनं कुर्यात्। आचार्यादिसमस्त ऋत्विग्भ्य इमानि व आसनानि, एतद्वोगंधः, इमानि वः पुष्पाणि, इमानिवस्त्रयुग्मोपवीतकुंडलमुद्रिका केयूरांगदकंठाभरणादीनि यथा दैवतानि तन्निष्क्रयद्रव्यं वाचार्यादि समस्त ऋत्विग्भ्यः दद्यात्।

ततो आचार्यादीन् इदं वो ज्योतीः सुज्योतिरिति उच्चारयेत्। यजमानः निवेदनं करोति अर्चनविधेः परिपूर्णता अस्तु इत्युक्ते अस्त्विति परिपूर्णता इति विप्राः वदन्ति। ततो भोजनसंकल्पः यथा दास्यमानानि तृप्तिपर्याप्तानि सिद्धान्नानि सोपस्कराणि वा आमान्नानि आचार्यादि ऋत्विग्भ्यः स्वाहा संपद्यतां न मम इत्युक्त्वा कुर्यात्। ऋत्विक्वरणादि कर्मणः साङ्गतासिद्धये गां वा तन्निष्क्रयद्रव्यं वा दक्षिणा आचार्यादिभ्यो दद्यात्। परशुरामकारिकायां पदवरणं कुर्यादिति विलिखितमस्ति। पदवरणे दशद्रव्याणि भवन्ति। भाजनं (पात्रम्), भाजनाधारम्, छत्रम्, उपानत्, कमण्डलुम्, आसनम्, वसनं (वस्त्रम्), मुद्रा (अङ्गुलीयकम्), कर्णभूषा (कर्णाभूषणम्), उपवीतकं

(यज्ञोपवीतम्) इमानि दशवस्तूनि पदवरणसिद्धये देयानि। पदाभावे त्रयं देयं पात्रम्, वस्त्रम् अङ्गुलीयकम्, तदभावे तांबूलं दत्वा किञ्चित् प्रकल्पयेत्। प्रकारेणैवं वरणं कृत्वा यस्य विप्रस्य यो भागः स तेन प्रतिगृह्यतामिति वक्तव्यम्। अस्मिन् वरणकर्मणि न्यूनातिरिक्तं तत्सर्वं गणेशाम्बिकयोः प्रसादात् ब्राह्मणवचनाच्च परिपूर्णमस्तु। अस्तु परिपूर्णः इति विप्राः वदन्ति। स्वस्ति न इति मन्त्रेण यजमानस्यातिलककरणं यदाबध्नन्निति दक्षिणहस्ते कंकणबन्धनं तं पत्नीभिरिति मन्त्रेण यजमानपत्न्यश्च वामहस्ते कंकण-बन्धनं कुर्यात्। काण्डात्काण्डादिति दूर्वया यजमानस्य स्वस्य च मार्जनं विधीयताम्। ''दधिक्राब्ण'' इत्यनेन मन्त्रेण अर्घवंदनं तथा 'याः फलिनीरिति मन्त्रेण यजमानाय फलं समर्पयेत्। ततो यजमानेन ब्राह्मणानां प्रार्थना मूलपाठे ब्राह्मणा संतु मे शस्ताः इत्यारभ्य सुप्रसन्नैः प्रकर्तव्यं शान्तिकं विधिपूर्वकमित्युक्त्वा प्रार्थनां कुर्यात्। ततो रक्षोघ्नमंत्रेण पीतसर्षपान् विकिरेत्। ततो पञ्चगव्यकरणम्-गायत्रीमन्त्रेण गोमूत्रं, गंधद्वारा मन्त्रेण गोमयं, आप्यायस्वेति क्षीरं, दधिक्राव्णेति दधि, तेजोसीत्याज्यं देवस्यत्वेति कुशोदकञ्च संगृह्य प्रणवेनयज्ञकाष्ठेनालोड्य आपोहिष्ठेति त्रिभिर्मन्त्रैः कर्मभूमिं यज्ञसंभारांश्च प्रोक्षयेत्। ततः कृतांजलिः स्वस्ति न इति मंत्रं पठेत्। देवा आयान्त्विति भूमौ प्रादेशं कुर्यात्।

ततो होममानानुसारेण चतुरस्रं स्थडिलं च निर्माय तत्र भूमि-कूर्मा-नन्तानां पूजयेत्। वैदिकेन नाममन्त्रेण वा भूमिं संपूज्य कूर्मानन्तौ षोडशोपचारैः संपूज्येत्। तान् कुशानैशान्यां त्यजेत्। तत्र हेतुः-महीतले कृमिकीटपतंगाद्या विचरन्ति। तेषां संरक्षणार्थाय परिसमूहनं क्रियते। त्रयो दर्भाः कनिष्ठांगुष्ठ-मध्यतः ग्रहणं कृत्वा दक्षिणे चोत्तरे त्रिस्त्रिवारं समूहनं कर्तव्यम्। केचन पूर्वस्यामपसारणमित्यपि वदन्ति। द्वितीयः संस्कारः गोमयोदकाभ्यामुपलिप्य। तत्र हेतुः पुरा इन्द्रेण वृत्रोः महासुरः हतः। तेन मेदसेयं पृथिवी व्यापिता अर्थात् अशुद्धा। एतदर्थं शुद्धकरणार्थमुपमलेपनम्। परञ्च यस्मात् गोः गोमयं स्वीक्रियते तस्मात् लक्षणं प्रतिपाद्यते रुग्णा, वृद्धा, प्रसूता, बंध्या, संधिनी, मेध्यभुक्, मृतवत्सा गोः मूत्रं गोमयं पयश्च न स्वीकुर्यात् इति आचारप्रदीपे ग्रन्थे प्रतिपादितम्।

तृतीयः संस्कारः त्रिरुलेखनम्। तत्र रेखा त्रयमुदक्संस्थं प्रागग्रं स्थण्डिलावधि द्वादशांगुलायतावधि वा पर्यन्तं कुर्यात्। अस्थि कंटकानां उद्धरणाय उल्लेखनं कुर्यात्। स्मार्त्तोल्लासे रत्निमात्रं रेखा कर्तव्यम्। ये पिशाचाः अन्तरिक्षनिवासिनः भ्रमन्ति तेषां प्रहरणार्थाय उल्लेखं कर्तव्यम्। अनामिकांगुष्ठेनोद्धृत्य जलेनाभ्युक्ष्य च। उत्तानेन हस्तेन प्रोक्षणं कुर्यात्। प्रोक्षणावोक्षणयोः आपस्तंवेन भेदः प्रतिपादितः-उत्तानेन करेणापि सपवित्रेण वारिणा। विदुषा प्रोक्षणं कार्यं नीचेनावोक्षणं तथा।। प्राजापत्येन तीर्थेनाभ्युक्षणं क्रियते।

अग्निपुराणे प्रतिपादितम्—

पैत्र्यं मूले प्रदेशिन्याः कनिष्ठायाः प्रजापतेः।
ब्राह्मयमङ्गुष्ठमूलस्थं तीर्थं देवं कराग्रतः।।
सव्यपाणितले वह्ने तीर्थ सोमस्य वामतः।
ऋषीणां तु समग्रेषु अंगुलीपर्वसन्धिषु।।

ततो सम्पुटेन पात्रेण अग्निमानीय अग्नेर्दिक्षुतः कुंडं स्थापयेत्। क्रव्यादाग्निं त्यक्त्वा कुंडे अग्निं विनिक्षिपेत्। शरावेण भिन्नपात्रेण कपालेन उल्मुकेन वा अग्नेः प्रणयनं न कार्यं यतोहि व्याधिशोकभयावहं भवतीति कोटिहोमपद्धतौ लिखितं विद्यते। अत्र कपालं खर्परं विद्यते। कुलालचक्रघटितं मृन्मयपात्रमासुरं भवति। हस्तघटितं स्थाल्यादि दैवपैतृकमिति गदाधरभाष्ये प्रतिपाद्यते। एते पञ्चभूसंस्काराः भर्तृयज्ञेन प्रतिपादितम्। यत्रयत्राग्ने स्थापनं तत्रतत्रैतेकर्तव्यताः।

कांस्यादिपात्रेणाग्निमानीय तमग्निं स्थण्डिलस्याग्नेयां निदध्यात्। ॐ हुँ फट् इति मंत्रेण क्रब्यादांशं नैर्ऋत्यां क्षिपेत्। अग्निन्दूतमितिमन्त्रोच्चार्य आत्माभिमुखमग्निं स्थापयेत्। अग्न्यानीते पात्रेसाक्षतोदकं निषिच्य अग्निं प्रतिमुखं कृत्वा ध्यायेत्। ॐ अग्नये नम इति बहिर्गंधपुष्पैः संपूज्य प्रार्थयेत्।

अग्निं प्रज्वलितं वंदे जातवेदं हुताशनं।
हिरण्यवर्णमनलं समृद्धं विश्वतोमुखम्।।

(इत्यग्निस्थापनम्)

ऋतुशांतौ विशेषः अत्रादौ ऋतुशांति प्रकरणे किञ्चिद्विशेषोच्यते। तत्र कलशचतुष्टयं स्थाप्यते। ईशान्यां उदक्संस्थं पंक्तिरूपेण कलशचतुष्टयं स्थाप्यते। कलशस्थापनस्य विधानं पूर्ववदेव विद्यते। यथा ''मही द्यौः'' इति मंत्रेण भूमिस्पर्शनं, ''औषधयः समीति'' यवान् क्षिपेत् इत्यादि मूलोक्तम्। स्थापितेषु कलशेषु स्वर्णमयी इन्द्रइन्द्राणीभुवनेश्वरीकदलीमूर्तीनां घटनादिदोष- परिहारार्थं अग्न्युत्तारणपूर्वकं प्राणप्रतिष्ठां कृत्वा स्थापयेत्। अग्न्युत्तारणे मूर्तीन् घृतेनाभ्यज्य मन्त्रपाठपूर्वकं जलधारां पातयेत्। तत्र मन्त्राः **समुद्रस्यत्वा** इत्यारम्भ **पावकोऽअस्मभ्य शिवो भव** इन्त्यन्तं पठेत्। आं ह्रीं इत्याद्युच्चार्य मूलोक्तविधानानुसारेण मनोजूतिरिति प्रतिष्ठापूर्वकं गंधपुष्पाभ्यां संपूजयेत्। सूर्यं इन्द्रं इन्द्राणीं भुवनेश्वरीञ्चावाहय नमस्कुर्यात्। ततः अग्नेरुत्तरभागे रक्तवस्त्रोपरि वंशस्यपात्रे आढकपरिमितं तण्डुलराशिं कृत्वा कदलीवृक्षं स्थापयेत्। कदल्यै नमः इत्यनेन मन्त्रेण षोडशोपचारैः पूजयेत्। ततो सूक्तजपार्थे वरणिताः विप्राः सूर्यकलशं स्पृष्ट्वा विभ्राडित्यनुवाकं जपेयुः। इन्द्रकलशं स्पृष्ट्वा अप्रतिरथं सूक्तं इन्द्राणी भुवनेश्वरी च कलशं स्पृष्ट्वा श्रीसूक्तं जपेयुः अथवा रुद्रैकादशनी जपेत्।

ग्रहस्थापनम्- आचार्य वसिष्ठेनोक्तम् जन्मभूमि गोत्रं वर्णस्थानं मुखञ्च न ज्ञात्वा ये शांतिं कुर्वन्ति ते वस्तुतः शान्ति न कुर्वन्तुं शक्नुवन्ति। मूलोक्तप्रकारेण ग्रहाणां स्थापनं कुर्यात्। ततो अग्नौ चरुं श्रपयित्वा खेचरान्प्रति होमः कर्त्तव्यः। आघरावाज्यभागौ आज्येनैवाहुतिं दत्वावशिष्टं हवनं कृत्वा पूर्णाहुतिं दद्यात्।

अत्राचार्य वसिष्ठेन नक्षत्रादिमनुष्यान्तानां स्थापनमुक्तम्। परञ्चात्रान्येषु ग्रन्थेष्वदर्शनं विद्यते। एतदेव न विलिख्यते संस्कारभास्करकारैः। तत्रासंख्यातरुद्र स्यस्थापनं कृत्वा संपूज्य कुशकण्डिकां कुर्यात्। ततो श्रेयोदानम्, स्वर्णदानम्, भूमिदानम्, तिलदानादिकञ्चकृत्वा दक्षिणां दत्वा दूर्वापंचपल्लवैः रभिषिंचेयुः। अभिषेके पत्नी वामतो भवेदिति दर्पणकारैः लिखितः।

(इति संस्कारभास्करे सग्रहमखरजोदर्शनशांति प्रयोगः)

अथ प्रथमर्तौकर्तव्यमाह—पतिपुत्रवतीस्त्रिः भवेतेदर्थं अहते आसने तामुपवेश्य हरिद्रापुष्पगंधादीन् दत्वा आशिषो वाचयेयुः। दीपप्रज्वलिते गृहे

वासयेद्। ततो लवणापूपमुद्गादि ताभ्यः दद्यादितिसर्वर्तुसाधारणनियमः। आचार्यवसिष्ठेनोक्तम् रजस्वला स्त्री त्रिरात्रमशुचिर्भवति। सा न पूजयेत्, न स्नायात्, अधः शयीत, दिवसे न स्वपेत्, नाग्निं स्पृशेत्, न दंतं धावयेत्, न मांसमशनीयात्, न गृहन्निरीक्षेत्, नाश्लीलं किञ्चिदाचरेत्। प्रवासम्, गंधमाल्यादिधारणम्, तांबूल-गोरसभक्षणम् पीठाद्यारोहणं च वर्जयेत्। धर्मसिन्धौ प्राप्यते मृण्मये आयसे भूमौ वा भुंजीत्।

आचार्यदक्षेन प्रतिपादितम् सार्तवानारी अंजनाभ्यंजनं स्नानं प्रवासं दंतधावनं गृहाणामीक्षणं न कुर्यात्। ग्रहणाद्यवसरेऽपि आचार्यवसिष्ठेन मज्जनं निषिद्धम्। महर्षिपराशरेणोक्तं नैमित्तिकं स्नानं पात्रांतरे कर्तुं शक्यते। तत्र वस्त्रपीडनं अन्यद्वासञ्चधारणं वर्जितमस्ति। रात्रेः पूर्वांशयोः जननं मरणं रजोदर्शनञ्च भवेत् चेत् पूर्वदिवसात् स्वीक्रियते। अपरे आचार्याः वदन्ति अर्धरात्रिप्राक् मृतौ रजसि सूतके पूर्वदिवसं स्वीक्रियते। अर्धरात्रोर्ध्वपरेऽहनि। लिंगपुराणानुसारेण ऋतुमतीस्त्री स्नानानन्तरं अन्यपुरुषस्पर्शने प्रायश्चित्तं चरेत्। तत्र प्राप्यते भास्करं देवं दृष्ट्वा ब्रह्मकूर्चं पिबेत्। आत्मशुद्ध्ये केवलं पंचगव्यं क्षीरं वा पिबेत्। अथगर्भाधानकालमाह-पारस्करः तामुदुह्य यथर्तु प्रवेशनम्। याज्ञवल्क्येन प्रतिपादितम् ऋतुतः षोडशनिशापर्यन्तं युग्मासु संविशेत्। गर्भाधानकालः रात्रौ प्रदत्तः। दिवसेष्वाधाने क्लीबा, अल्पवीर्या, अल्पायुषांश्च प्रसूयंते। रात्रौ गच्छन् ब्रह्मचार्येव भवति। किंच पर्वषु अष्टमीचतुर्दश्योऽपि न गच्छेत्। मनुना प्रतिपादितम् अमावास्या, अष्टमी, पौर्णमासी, चतुर्दशी पर्वतिथिरुच्यते। हारीतानुसारेण देवे पित्र्ये च कर्मणि पंचमे ऽहनि स्त्री शुद्ध्यति। अत्र समासु पुत्रः विषमासु पुत्रीज्ञेयम्। एकस्यां रात्रौ सकृदेवं कार्यम्। अगमने दोषाः विद्येत। मदनरत्ने व्यासोक्तिः व्याधितोबंधनस्थो वा प्रवासेषु भवन्ति ते ब्रह्महत्या भयात् मुच्यन्ते। आपस्तंबेनोक्तम् शयनादुत्थितानारी शुचिः स्यादशुचिः पुमानिति। वृद्ध-शातातपेनोक्तम् प्रथमऋतोः पूर्व स्त्रीगमनं दोषयुक्तं भवति। आश्वालयनेनोक्तम् रजोदर्शनात्प्राक् पत्नीकरणे अधोपतनं भवति। शुक्रस्य व्यर्थीकरणेन ब्रह्महत्यायाः पापं प्राप्यते। गर्भाधानसंस्कारनिर्णयः- गर्भाधानसीमन्तोन्नयनेप्रतिगर्भ नावर्तेते यतोह्यं स्त्री संस्कारः। किन्तु प्रथमे गर्भे कार्यः। आद्यर्तौ गर्भाधानं मलमासशुक्रास्तादौवपिकार्यम्। उत्सवेषु च सर्वेषु सीमन्ते ऋतुजन्मसु। सुरासुरगुरोश्चैव मौढ्यदोषो न विद्यते।

अथगर्भाधान प्रयोगः— गर्भाधानाख्ये मातृनांदीं प्रपूज्यफलधान्यपूर्णंभूत्वा सूर्यं पश्येत्। ऋतुमती स्त्री नूतनं वस्त्रादिकं परिधाय शुभासने प्राङ्मुखमुप-विशेत्। पतिपुत्रवती कुलवृद्ध सुमंगल स्त्रीभिर्गोधूमैर्नारिकेलफलैपल्लवैश्च प्रक्षेपणं यथा वृद्धाचारं कुर्यात्।

शान्त्यभावे पत्न्यासहोपविश्याच्यम्य प्राणानाम्य संकल्पं कुर्यात्। ततो गणपत्यादि नांदीश्राद्धान्तं कर्माणि कुर्यात्। ब्राह्मणान् सम्भोज्य विप्राशिषं गृह्णीयात्। आदित्यंगर्भम्पयस मन्त्रं पठेत्। मूलपाठे उक्तमन्त्राणां वर्णनमस्ति। तत्रगर्भधारणमौषधमपिवर्णितमस्ति।

अथपुंसवन-संस्कारः-पुंसवनसंस्कारः गर्भसंस्कारो विद्यते। गर्भाध ानात् द्वितीये तृतीये वा मासे गर्भस्पन्दनात् पूर्वं पुंसवनं क्रियते। भर्तृयज्ञेनापि द्वितीये तृतीयेवेति उक्तम्। हेमाद्रौ यमोक्तिः प्रथमे द्वितीये तृतीये वा मासे यदा पुन्नक्षत्रेण चन्द्रमायुक्तः स्यात्तदायं प्रतिगर्भमावर्तनीयम्। आचार्य कर्कस्यमतिरस्ति गर्भसंस्कारएवायम्। अतस्तद्गर्भसंस्काराद्गर्भं गर्भं प्रयुज्यते इति। बह्वृचकारिकायां संस्कारोऽयं स्पंदितेपिकार्यः। कारिकायां प्राप्यते सीमंतात्प्राग्विधातव्यं स्पंदितेपि बृहस्पतिरिति। अस्मिन् कर्मणि गुरुशुक्रास्त-बालवार्द्धक्यमलमासादिष्वपि न दोषो विद्यते। विहितकालालाभे इदमेवकर्तव्यम्। विहित कालालाभे गुरुशुकास्तादौ न कार्यम्। कालातिक्रमणे संजातेऽपि सीमंतदिनेऽपि पुसंवनसंस्कारः कर्तुं शक्यते। जातूकर्ण्येनापीत्थमेव प्रतिपादितम्। यदादिवसे पुन्नामनक्षत्रेण चन्द्रमायुक्तो भवेत्तदा उपवासपूर्वकं अहतेवाससी परिधाय न्यग्रोधावरोहां पिष्ट्वा हिरण्यगर्भोद्भ्यः संभृत इत्येताभ्यां मन्त्राभ्या- मासेचनं कुर्यात्। सेचनं दक्षिणनासिकायां भवेत्। एके आचार्याः वदन्ति कुशकंटकं कुशमूलं सोमांशुं सोमलताखंडं च पिष्टीकृत्य न्यग्रोध ावरोहः प्रक्षिप्य आसेचयेत्। यदि कामयेत् मम पुत्रः वीर्यवान् स्यात्तर्हि सुपर्णोसीति मन्त्रोच्चारणपूर्वकं कर्तव्यम्। स्त्रिय अंके उदकपूर्णकुम्भं निध ाय अनामिकाग्रेण स्पृशन्नभिमत्रंयते।

प्रयोगे उपरोक्तान् सम्भारान् संगृह्य पुंसवनं करिष्ये इति संकल्पं कुर्यात्। संकल्पं कृत्वा गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं वसोर्धारा आयुष्यमंत्रजपं नान्दीश्राद्धं च कृत्वा रात्रौ दक्षिणनासिकायां आसिंचति भर्त्रा। मन्त्राः मूलपाठे उक्तः।

सीमन्तसंस्कारः—पुंसनवत् सीमन्तसंस्कारः करणीयम्। संस्कारोयमपि गर्भसंस्कारः। एतदर्थं प्रतिगर्भं संस्क्रियेत्। देवलाचार्यानुसारेण सीमन्तोन्नयनं स्त्रीसंस्कारकमिस्यते। पारस्कराचार्य मतेऽपि सीमन्तोन्नयनमाद्यगर्भे भवति। हारीतानुसारेण आद्यगर्भे संस्कारे सति सर्वः संस्कृतो भवेदिति। सीमन्तसंस्कारस्यकालः षष्ठेष्टमे वा मासि क्रियते। नवमे मासि वा गर्भविमोचनात् पूर्वं कर्तुं शक्यते। यद्यकृत सीमंताप्रसूयेत् चेत् गृहीत् पुत्रं विधिवतं पुनः संस्कारः क्रियते। अत्र भोजने प्रायश्चित्तमुक्तम्। ब्रह्मोदने, सोमे, सीमंतोन्नयने, जातकर्मणि नवश्राद्धे भुक्त्वा चांद्रायणं चरेद्। कालनिर्णयानुसारेण शुक्ले पक्षे पुनर्वस्वादि पुन्नक्षत्रे चंद्रानुकूले शुभे दिने शुभे लग्ने कार्यः। अत्रापि गुरुशुक्रास्तादि दोषो नास्ति।

प्रयोगः मूलपाठानुसारेण प्राणायामदिकं कृत्वा संकल्पं कुर्यात्। ततो गणेशादि नान्दीश्राद्धान्तकर्माणि कुर्यात्।

ततो मूलपाठानुसारेण कुशकण्डिकां संपाद्य हवनं कुर्यात्।

ततो संस्रवप्राशनादि प्रणीताविमोकान्तं हवनं समाप्य अग्नेः पश्चात् भद्रपीठे गर्भिणीमुपवेश्य युग्मेनसटालुग्रप्सेन औदुम्बरेण त्रिभिश्चदर्भपिञ्जुलैः त्रेण्याशलल्या वीरतरशंकुना पूर्णचात्रेण चेत्येतैः पुंजीकृतैः सीमन्तं मूर्ध्नी विनयति भर्ता। ततो औदुम्बरस्यादि पंचकस्य वेण्यां बंधनं बंधयेत्। मूलपाठे मन्त्रोच्चारणं स्पष्टम्। ततो भर्ता वीणागाथिनौ राजानं संगायेत् इति। 'सोमऽएव'' मन्त्रः पठेत्। असौ स्थाने समीपस्य प्रमुख नद्यः उच्चारयेत्। ततो यथाग्रन्थः प्रयोगः पूरयेत्।

(इति संस्कारभास्करे सीमन्तोन्नयनसंस्कारप्रयोगः)

गर्भिणीधर्माः— अंगारभस्मास्थिकपालचूल्लीशूर्पादिकेषूपरि नारी नोपविशेत्। उलूखलादि हृषदादिके वा यंत्रे तुषाद्ये नोपविशेत्। मार्जनीगोमयपिंड-कादौ मूत्रपुरीषयोः शयनं न कुर्यात्। मुक्तकेशी, विवशा, संध्यावसरे भोजनं शयनञ्च विवर्जितम्। अमंगलवाक्यं न वदेत्, शून्यालयं न गच्छेत्, वृक्षोपरि जले वा न गच्छेत्। गर्भिण्यधिकारे पाद्मे अयस्केरषु मूसलोलूखलादिषू नोपविशेत्। जलं च नावगाहेत् शून्यागारं च विवर्जयेत्। वल्मीकोपरि

नाधितिष्ठेत्, उद्विग्नमना न भवेत्। नखैर्भूमिः नांगारेणनभस्मना लिखेत्। न शयालुः तिष्ठेत् खट्वां छायां विवर्जेत्। गेहे कलहं, गात्रभंग च वर्जयेत्। कदाप्यशुचिर्माभवेत्। उत्तरशिरा अधः शिरा वा न भवेत्। न वस्त्रविहीना नोद्विग्नान चार्द्रचरणा नामंगल्यवदेद्वा न हास्याधिका भवेत्। श्वसुरयोर्नित्यं पूजा मांगल्यतत्परा भवेत्। प्रसन्नवदनातिष्ठेत्। भर्तुः प्रियहिते रता भवेत्। मात्स्ये लिख्यते गर्भिण्याः कृते संध्यायामभोजनम् वृक्षमूले न स्थाव्यं न गंतव्यं भवेत्। सर्वोषधिभिः उष्णवारिणा स्नानमाचरेत्। आभूषणवती वास्तु पूजावती च भवेत्। दानशीला नक्तमाचारयुक्ता भवेत्। कुजाश्वादिशैलहर्म्यादि रोहणम्, व्यायामं, शीघ्रगमनं, शकटारोहणं च त्यजेत्। शोकं रक्तविमोकं साध्वंसं कुक्कुटासनं व्यवसायं दिवास्वापं रात्रौजागरणं त्यजेत्। अतिक्षारमत्या-म्लमतिभोजनमत्युष्णमतिशीतं गुर्वाहारं च त्यजेत्। गर्भिणी नारी विशेषत इतिवृत्ता भवेत्।

प्रकारेणानेन गर्भिण्याः पुत्रः स्थिरायुवृद्धिसंयुतो भवति। अन्यथा गर्भपतनादिकं भवितुं शक्यते। गर्भकृत्यं मार्कण्डेयपुराणानुसारेण विद्यते गर्भस्य रक्षा सदा शौचपूर्वकं कार्यः। प्रशस्तमंत्रालेखनं शुभमाल्यचन्दनादि लेपनं, विशुद्धगृहे वसनं च कुर्यात्। वृक्षं, आर्द्र पयोनिधि तडागं वा नोल्लंघयेत्। संग्रहे प्राप्यते गर्भिणी वांछितं द्रव्यं तस्यै दद्याद्यथोचितम्। तेन चिरायुषं सुतं प्राप्यते अनेन सम्पादनेनान्यथा दोषं भवति। कालविधाननामके ग्रन्थे प्राप्यते क्षौरं, शवानुगमनं, नखकृंतनं, युद्धं, वास्तुकरणं, दूरयानं, उद्वाहं, समुद्रजलस्पर्शोपयोगश्च आयुक्षयकरं विद्यते गर्भिणी पतेः। क्षौरमत्र वपनस्योपलक्षणमस्ति। कर्तनस्यापि अभिप्रायो विद्यते। गर्भिणीपतिः नोन्देत् नाम्भसिस्नायाद् न च श्मश्रवादिकर्तयेत्। स्मृत्यन्तरे वपनस्य निषेधः कर्तनस्य च विधानं प्राप्यते। गर्भिणीपति व्यतिरिक्ते जीवत्पितृकादीनां यत्र वपन-निषेधः प्राप्यते तत्र कर्तनविधानं विद्यते। संग्रहे प्राप्यते दहनं वपनं चौलं, गिरिरोहणं, अवरोहणं गर्भिणीपति वर्जयेत्। स्मृत्यन्तरे प्राप्यते-सिंधुस्नानं वृक्षच्छेदनं वपनं (मुण्डनं) प्रेत (शव) वाहनं विदेशगमनञ्च गर्भिणीपति न कुर्यात्। एतदपवादोऽपि प्राप्यते-निषेधे सत्यपि नैमित्तिकं क्षौरं कुर्यात्। पितुः प्रेतविधानं गर्भिणीपतिराचरेत्। अश्वलायनमतेन ऐते सर्वे नियमाः सप्तमासादूर्ध्वं विचार्यते। गर्भिणीपतिः वपनं मैथुनं, तीर्थ, श्राद्धं च सप्तमासा-

दूर्ध्वं त्यजेत् इत्याश्वलायनस्य मतं विद्यते। श्राद्धं नाम श्राद्धभोजनम्, तीर्थं नाम तीर्थयात्रा।

सूतिकागृहस्थानविचारः— ऐन्द्रदिशायां विक्रमस्थानमाग्नेये पाकशाला भवेत्। पश्चिमे भोजनगृहं तथा च नैर्ऋत्ये सूतिकागृहं भवति। सूतिकागृह-निर्माणप्रकारः पाद्मे प्राप्यते-सुभूमौ वास्तुविद्याविशारदानामनुसारेण प्राक्द्वारोत्तर-द्वारकं वा गृहं सुदृढं निर्मीयते। सूतिकायाः गृहप्रवेशकालानुवर्णने गर्गः रोहिणी, मृगशिरा, अश्विनी, स्वाती, शतभिषा, पुनर्वसु पुष्य, हस्त धनिष्ठा, त्र्युत्तरासु, अनुराधा, चित्रा, रेवती, नक्षत्रेषु सूतिकागारे प्रवेशयेत्। रिक्ता षष्ठी विवर्जितेषु तिथीषु शुभाः केन्द्रे पापाः त्रिषडायगाः भवेयुः। शुभांशे शुभदृष्टौ तु सूतिका प्रवेशनं शुभ भवति। सूतिकागृहप्रवेशविधिः-देवानां ब्राह्मणानां गवां च पूजनं कृत्वा विप्रपुण्याहशब्देनशंखवाद्यरवेण चप्रविशेत्। तत्र हृद्या विश्वसनीयाः बहवः सूतास्त्रियः एरण्डमूलचूर्णेन सघृतेन च प्रविशेत्

सुखप्रसवार्थाय वस्तूनि तत्रस्थापयेत्। प्रसवानन्तरं तत्क्षिपेत्। प्रसव प्रतिबंधे सुखप्रसवोपाये, "प्रमंदिने" ऋचायाः जपं गर्भविमोचने कर्तव्यम्। मनसा सा नारी इन्द्रं ध्यायेत्। शीघ्रप्रसवोपायः धर्मसिन्धौ प्राप्यते— हिमवत्युत्तरेपार्श्वे सुरथानामयक्षिणी। तस्या स्मरण मात्रेण विशल्यागर्भिणीभवेत्। ॐ क्षीं ॐ स्वाहा इति मन्त्रेण दूर्वांकुरेण तिलतैलं शतं सहस्रं वाऽभिमंत्र्य किंचित्पाययेत्। किंचिन्मात्रस्य गर्भलेपः कुर्यात्। सम्यग्लेपे शीघ्रं सुखप्रसवं भवति।

प्रसववेदनाहरोपायः-पारस्करः शूलादिप्रसववेदनान्वितां स्त्रियं भर्ता "एजतु दशमासस्य" मन्त्रस्य पाठपूर्वकं उदकेन प्रसिंचति। मन्त्रः मूलपाठे उक्तः। अभ्युक्षणानन्तरमरावपतनमन्त्रः पठति भर्ता। मन्त्रः मूलपाठे उक्तः।

अथ जातकर्म— पुत्रस्य मुखदर्शनात् पितृऋणाद्विमुच्यते। ज्योतिर्वसिष्ठे पुत्रजातं श्रुत्वा पिता सचैलस्नानमाचरेत्। नद्यां देवखाते वा उत्तराभिमुखो भूत्वा स्नायात्। असन्निधो श्रवणानन्तरं स्नानम्। सन्निधौ मूलाद्यजातं मुखदर्शनानंतरं स्नानम्। भल्लाटवाक्येन मूले जातस्य मुखदर्शननिषेधः। मूलादिजातस्य मुखमदृष्ट्वा एव स्नानं कुर्यात्। मुखावलोकनं जातकर्मादि

शांतिं बिना न कुर्यात्।

संक्रान्तौ विष्ट्यादि प्रसवेप्येवमेव। शांतिमयूख शान्तिविधानादि ग्रन्थे विधिं पश्येत्। एतच्चशान्ति रात्रौ अपि कार्येत्। नैमित्तिकं स्नानं दानं रात्रौ क्रियते। पुत्रजन्मनि, यात्रायां, ग्रहणे दत्तमक्षयं स्यादितिव्यासोक्तिः। रात्रौ नद्यादिगमने अशक्तिश्चेत् तदा सांख्यायनानुसारेण दिवसे जलमाहृत्य स्वर्णयुतं कृत्वा अग्नि सन्निधाने रात्रौ स्नायात्। कालातीते सूतकं भवति एतावता जन्मानन्तरं यथाविधिं जातकर्मादिकं कर्तव्यम्। प्रजापतिनोक्तम्। अशौच-मध्येपि एतत्कार्यम्। मदनपारिजातेऽपि एवमेव। मृताशौचस्य मध्ये पुत्रजन्म भवेत् चेत् अशौचानन्तरं कार्यम्। आचार्य जैमिनिनाप्रोक्तं छिन्ने नाले अशौचं भवति। अच्छिन्ननाभ्यां काले पुत्रजन्मनः श्राद्धं कर्तव्यम्।

स्त्रीशूद्रश्वपचादीनां कृते जातकर्मणि आमश्राद्धस्य विधिर्विद्यते। आमाभावे हेम्ना कार्यः। अग्रे मूलोक्तं स्पष्टमस्ति अतः हिन्दीटीकैव क्रियते।

---

1. गौतम
2. आङ्गिरसस्मृतौ
3. याज्ञवल्क्यस्मृतौ
4. तत्रैव
5. मनुस्मृतौ
6. टोडरानन्दे सप्तर्षिमते
7. महाभारते
8. भविष्यपुराणे
9. विष्णुपुराणे
10. दानहेमाद्रौ
11. याज्ञवल्क्यानुसारेण
12. श्राद्धकारिकायाम्
13. छान्दोग्यपरिशिष्टे (कात्यायनः)
14. दानहेमाद्रौ शाखायनस्यमतम्
15. छान्दोग्यपरिशिष्टे (कात्यायनः)
16. तत्रैव
17. हेमाद्रौ
18. मार्कण्डेयपुराणे

19. हेमाद्रौ
20. हारीतोक्तिः
21. छान्दोग्यपरिशिष्टे
22. स्मार्त्तोल्लासे
23. याज्ञवल्क्यः
24. भविष्यपुराणे
25. विष्णुधर्मोत्तरे
26. तत्रैव
27. वसिष्ठः
28. विष्णुधर्मोत्तरे
29. ब्राह्मे
30. तत्रैव
31. गारुड़े
32. धर्मसिन्धौ
33. कात्यायनस्मृतौ
34. छान्दोग्यपरिशिष्टे कात्यायनः।
35. देवयाज्ञिकः
36. मात्स्ये
37. स्मार्त्तोल्लासे
38. भविष्ये
39. यज्ञपार्श्वे
40. ज्योतिर्निबंधे
41. नारदोक्तिः
42. एकादशनी रुद्री विधानम्—शुक्लयजुर्वेदस्य माध्यान्दिनीया रुद्र्याः प्रथमतः चत्वारोध्यायपर्यन्तं पाठानन्तरं पञ्चमाध्यायस्यैकवारमावृतिं कृत्वा षष्ठसप्तमाध्याययञ्च पठेत्। अष्टमाध्याये इतोपि दशस्थलानि भवन्ति यत्र नमस्ते इत्युक्ते केवलं पञ्चमाध्यायस्य पाठं भवति। सर्वं सभूय एकादशबारं नमस्तेति पञ्चमाध्यायस्य पाठं अन्ते शान्तिपाठं च एकादशनी संज्ञा ज्ञेया।
43. आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्।
44. त्रातारमिन्द्र मवितारमिन्द्र गुं हवे हवे सुहवं गुं शूरमिन्द्रम्। ह्वयामि शक्रं पुरुहूत मिन्द्र गुं स्वस्ति नो मघवाधात्विन्द्रः।
45. आदित्यै रास्नासीन्द्राण्या उष्णीषः पूषासि घर्म्माय दीष्वः।
46. श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुमइषाण सर्वलोकम्मइषाण।

संस्कार-भास्करः

(बीणा हिन्दी टीका)

संस्कार-भास्करः

बीणा हिन्दी टीका—संस्कारों के नाम एवं उनका महत्त्व—

संस्कारों के संख्या के सन्दर्भ में विवरण इस प्रकार है। संस्कारों की संख्या महर्षि गौतम के अनुसार 48 बतलाई गयी है, जो गर्भाधान, पुंसवन, सीमन्तोन्नयन, जातकर्म, नामकरण, अन्नप्राशन, चौल संस्कार, उपनयन संस्कार, चतुर्वेदव्रत, स्नान, सहधर्मचारिणीसंयोग, पञ्चमहायज्ञानुष्ठान, अष्टका, पार्वणश्राद्ध, श्रावणी, आग्रहायणी, चैत्री, आश्वयुजी ये सात यज्ञ संस्था हैं। अग्न्याधेय, अग्निहोत्र, दर्शपूर्णमास, चातुर्मास्य, आग्रयणेष्टि, निरुढ़ पशुबंध, सौत्रामणी ये सात हविर्यज्ञ संस्था हैं। अग्निष्टोम, अत्यग्निष्टोम, उक्थ्य, षोडशी, वाजपेय, अतिरात्र, आप्तोर्याम ये सात सोमयज्ञसंस्था हैं, ये चालिस संस्कारों का वर्णन हुआ। इसमें आठ आत्मगुणों की अनिवार्यता बतलायी गयी हैं जो सभी प्राणियों पर दया करना, शांति, अनसूया, शौच, अनायास, माङ्गल्य, अकार्पण्य अस्पृहा के नामों से जाने जाते हैं। जिसके पास उपरोक्त सभी संस्कार हैं, परन्तु ये आठ आत्मगुण नहीं है वह ब्रह्म लोक की प्राप्ति नही कर सकता अर्थात् सायुज्य की प्राप्ति उसको संभव नहीं है। जिनके पास इन संस्कारों के साथ आठ आत्मगुण भी हैं वे ब्रह्मलोक तथा सायुज्य (मोक्ष) दोनों को प्राप्त करने में सफल हो जाते हैं। पार्वण का अर्थ स्थाली पाक इत्यादि कर्म एवं श्राद्ध से तात्पर्य अमावास्या इत्यादि श्राद्धों से हैं। श्रावणी का अर्थ किया जाने वाला श्रवणाकर्म है। आग्रहायणी का अर्थ क्रियमाण प्रत्यवरोहण, चैत्री अर्थात् शूलगवादि, आश्वयुजी में आश्वयुजी कर्म किया जाता है।

महर्षि अंगिरस के द्वारा पचीस संस्कारों का वर्णन किया गया है, जिन्हें गर्भाधान, पुंसवन, सीमंतोन्नयन, बलि, जातकर्म, नामकर्म, निष्क्रमण, अन्नप्राशन, चौलसंस्कार, उपनयन, चतुर्वेदव्रत, स्नान, विवाह, आग्रयण, अष्टका, श्रावणी, अमा, आश्वयुजी, मार्गशीर्ष में पार्वण, उत्सर्ग, उपाकर्म

एवं महायज्ञ के नाम से जाना जाता है। ये सभी संस्कार ब्राह्मणों के लिए नियत किये गये हैं। जो द्विजातियाँ पचीसों संस्कारों से सुसंस्कृत हैं उन्हें श्राद्धादि सभी कर्मों हेतु पवित्र एवं योग्य माना गया है। इन संस्कारों में बलि शब्द विष्णु बलि के लिए प्रयुक्त है।

इन पचीस संस्कारों को महर्षि आश्वलायन ने चार भागों में विभक्त किया है। वे भाग क्रमशः नैमित्तिक, वार्षिक, मासिक एवं नित्य भेद से जाने जाते हैं। नैमित्तिक के अन्तर्गत षोडश संस्कारों को लिया गया है जिनका समापन विवाह संस्कार में होता है। आग्रयण इत्यादि सात संस्कारों को वार्षिक संस्कार माना गया है। पार्वण इत्यादि को मासिक संस्कार के अन्तर्गत जाना जाता है। असमर्थ जनों के लिए पावर्ण को वार्षिक संस्कार के अन्तर्गत स्थान दिया गया है। महायज्ञ को नित्य संस्कार माना गया है। इनका सम्पादन व्यक्ति को सन्ध्या एवं अग्निहोत्र के समान करना चाहिए। इन संस्कारों में गर्भाधान से लेकर उपनयन संस्कार तक सभी के लिए नियत किये गये हैं। स्नानादि जो लिखे गए हैं वे सभी के लिए नहीं है। इसी प्रकार से ब्रह्मचर्य संस्कार से प्रव्रज्या इत्यादि संस्कार को भी माना जा सकता है। इन सभी का प्रयोग ग्रन्थ विस्तार के भय से नहीं लिखा गया है। सहज ज्ञान के लिए उनके नामों का ही उल्लेख है। अब स्वगृह्योक्त विधि से गर्भाधानादि उद्वाहान्त षोडश संस्कारों का आचरण जो देखा जाता है उसे लिखा जा रहा है।

मुख्यतया उन संस्कारों का इसमें वर्णन किया जा रहा है जिन्हें स्मृत्यन्तर में भी इस प्रकार पाया जाता है—

गर्भाधान, पुंसवन, सीमन्त, जातकर्म, नामकरण, सहनिष्क्रमण, अन्नप्राशन, चूड़ा, व्रतबंध, चतुर्वेद व्रत, केशान्त, सविसर्गक, परिणय, षोडशी इत्यादि श्मशानान्त संस्कार। इन संस्कारों के अलावा परिशिष्टादि शास्त्रान्तरों में वर्णित कर्णवेधादि संस्कारों का यथावसर ग्रहण किया गया है। इन सभी संस्कारों का सम्पादन द्विजाति मात्र के लिए समन्त्रक बतलाया गया है। ब्राह्मण क्षत्रिय वैश्य को द्विजाति कहा गया है। निषेकादि अर्थात् गर्भाधानादि से लेकर श्मशानान्त तक इनकी क्रियायें

